Cela dit, on explique que cette installation comporte dix-huit opérations dont la première est la quête de la terre. Ensuite il est dit comment disposer le pavillon qui servira aux rites préparatoires; il faut y placer huit creusets aux points cardinaux et intermédiaires; ils sont en forme de lotus sauf celui du Nord-Est qui est le creuset principal: destiné à la Déesse, il est en forme de vulve. Au centre de ce dispositif il y a une plate-forme sur laquelle on dispose neuf vases pour les déesses. Dans celui du centre il faut honorer Cāmuṇḍā, dans les autres ce doit être respectivement Kālī à l'Est, Vikarālī au Sud-Est, Bhadrakālī au Sud, Mahādevī au Sud-Ouest, Mahāraudrī à l'Ouest, Mahāśūlī au Nord-Ouest, Manonmanī au Nord et Mahāśakti au Nord-Est. Après cela on explique comment insuffler la vie (dans l'image) après lui avoir donné une âme. On dit qu'il faut imposer les trente-six *kalā*, puis les maîtres des essences, ceux des manifestations et les Six-voies. Après cela il faut rendre un culte selon le mode à cinq cercles qui est décrit. Puis il est question de l'oblation: l'officiant doit faire le rite du feu selon la règle dans le creuset principal, il doit y convoquer la Déesse, puis rendre un culte complet selon le mode des cinq cercles après lui avoir rendu hommage par la méditation; ensuite il faut faire cent fois l'oblation de bûchettes, de beurre clarifié et de riz; les bûchettes convenant à chacun des huit creusets sont respectivement en bois de *palāśa, khadira, vaṭa, bilva*, en *arka* et en bois d'*aśvattha, plakṣa* et *udumbara*. L'oblation de tous les ingrédients doit être faite avec la formule fondamentale de Cāmuṇḍā. On explique ce qu'est cette formule, comme méditer Cāmuṇḍā et ce qu'est la "longue formule" de Cāmuṇḍā (*mālamantra*). A propos de la méditation de Cāmuṇḍā on donne la description suivante pour l'image qui doit être méditée: "Elle a quatre bras, trois yeux et deux jambes. Ses cheveux sont dressés, elle a des crocs et un regard terrible. Sa jambe droite pend et sa jambe gauche est étendue sur le siège. Dans sa main supérieure droite elle tient le *ḍamaru* et dans sa main inférieure le lacet; à gauche ce sont le trident et le crâne. De couleur noire, elle a un grand corps; (un démon) ricanant (est sous sa) jambe gauche;[28] elle a la lèvre pendante et des yeux grands comme des grenades; elle rayonne de colère. Ainsi doit être méditée Cāmuṇḍā dont l'aspect est terrifiant et les parures extraordinaires."

Installation de Mahākālī

C'est lorsque la course du soleil est vers le Nord, un jour faste d'une quinzaine claire que l'on doit procéder à l'installation de Mahākālī. Trois ou cinq jours avant cette installation il faut procéder à la germination des pousses en suivant la règle. Cela dit, on explique comment mettre en place les pierres précieuses, comment

28. Voir ci-dessous p. 138 note 154.

procéder à l'ouverture des yeux; à ce sujet on précise les tâches du sculpteur et de l'officiant. Une fois l'image purifiée avec les cinq terres et le *pañcagavya*, il faut la parer parfaitement puis lui faire faire la circumambulation du village et enfin la conduire à une pièce d'eau pour les rites préparatoires dans l'eau. Là, sur la rive, on dispose une aire sacrificielle où l'on pose la déesse. Au milieu de l'eau il faut construire un très bel abri où l'on étend la statue tête vers l'Est et visage vers le haut; autour on dispose huit vases où on honore les Śakti des Lokapāla; pour ces rites préparatoires la statue doit rester dans l'eau pendant trois nuits ou une nuit ou une veille ou une demi-veille.

Cela est suivi de la description du pavillon pour les autres rites préparatoires: construit devant le temple il est paré de dais, d'étendards (... etc.); carré, il a quatre portes et en son centre se trouve une plate-forme pourvue des caractéristiques prescrites et entourée de huit creusets en forme de vulve. Dans le pavillon, au Nord, il y a une plate-forme avec un trou pour les ablutions.

Une fois le sculpteur congédié, on procède à la décoration intérieure du pavillon: on étend de la bouse, on dispose des guirlandes de perles, des noix de coco, des dais, des guirlandes de *darbha*... etc. Cela fait, a lieu l'oblation au site et, avec le feu qui a été utilisé, la circumambulation du feu, puis, après l'hommage à Vighneśa, la proclamation du caractère faste du jour.

Après ces rites du pavillon il faut disposer sur la plate-forme une aire de riz couverte de jonchées de sésame, de riz blanc, de *darbha*, de fleurs et autres choses; au-dessus on dispose une couche faite de peaux... etc. Alors, ayant retiré l'image de l'eau, on l'introduit dans le pavillon, on la place sur la plate-forme aux ablutions, on la purifie selon la règle, on la vêt de neuf, on lui rend un culte avec parfums et fleurs..., on fixe sur son bras gauche un lien protecteur en prononçant la *gāyatrī* de Kālī et enfin à un moment propice on l'étend sur la couche, la tête vers l'Est et le visage vers le haut.

Cela fait on place à côté de la tête de la Déesse un vase où on impose le *bījamantra* de Kālī après avoir médité son image. Autour il y a huit autres vases parés de cordonnets; on y honore huit Śakti, chacune par son *bījamantra*, puis on honore celles des cinq cercles, chacune avec sa formule. Ensuite il faut installer selon la règle des vases aux portes et leur rendre hommage. On remarquera que dans cet exposé les noms des huit Śakti ne sont pas donnés non plus que les noms de celles des cinq cercles. Ajoutons que des récitations védiques doivent être faites dans le pavillon aux quatre directions.

Dans la description de l'oblation dont il est question ensuite il est dit qu'elle doit être conduite selon la règle depuis le rituel du feu jusqu'à l'oblation plénière. Kālī doit être honorée au milieu du creuset et ses cinq cercles autour d'elle. Les bûchettes sont en bois de *śvetārka*, d'*aśvattha*, de *khadira* et de *vaṭa* pour les creusets des points cardinaux et en bois d'*udumbara*, d'*apāmārga*, de *śamī* et de *palāśa* pour les autres. Les ingrédients pour les oblations sont d'une part les bûchettes, le beurre clarifié, le riz, les fruits, le riz grillé, le sésame, la moutarde

blanche, l'orge, la farine, le miel et les fèves et d'autre part la viande de poulet, de tortue... etc. Pour chacun il y a mille, cent ou cinquante oblations. A la fin de l'oblation des ingrédients il faut toucher la Déesse en prononçant la formule "*gaurī mimāya...*". Il faut rester éveillé pendant la nuit des rites préparatoires et la passer en chants et en danses.

Au matin l'officiant rend un culte en compagnie des gardiens des manifestations. Le sacrifiant lui remet ses honoraires et, en fonction de sa fortune, il honore également les dévots et serviteurs du temple. Ensuite on lève l'image de la couche, on l'installe au-dessus de la plate-forme des ablutions, on prend les vases au milieu de chants et de danses accompagnés du son de toutes sortes d'instruments, on fait la circumambulation du temple, on place les vases devant la Déesse, on retire le *bīja* du vase principal et on l'impose au-dessus des mamelons de la Déesse. Puis l'officiant fait la consécration par l'eau des vases après avoir imposé la vie dans l'image; avec l'eau des vases qui entourent le vase principal il fait ensuite la consécration du piédestal.

Installation de Candraśekhara

Ce chapitre débute par la description de l'image de Candraśekhara: il porte la gazelle et la hachette dans ses mains supérieures et fait les gestes du don et de l'absence de crainte de ses mains inférieures; il est accompagné ou non de sa parèdre. Après la germination des pousses il faut procéder à l'ouverture des yeux décrite brièvement avec l'indication des opérations qui reviennent à l'officiant; elle est suivie par la purification de l'image qui se fait avec un ondoiement de *pañcagavya*.

Ensuite on hisse lentement l'image sur un char, un palanquin ou un brancard; on lui fait faire la circumambulation du village et on l'amène au bord d'un point d'eau, rivière ou bassin. Ayant construit un abri dans l'eau, on le couvre d'une pièce d'étoffe cependant qu'on habille l'image avec des vêtements de *kuśa* et qu'on l'étend au milieu de l'abri, la tête vers l'Est et le visage vers le haut. Ayant murmuré les formules de l'eau, on proclame le caractère faste du jour. L'image restera ainsi dans l'eau pendant une, trois ou cinq nuits; l'en ayant retirée, on l'asperge d'eau de *kuśa* et on lui rend un culte avec les opérations des parfums, des fleurs ainsi que celles de la vêture et de la parure. Puis on la remonte sur le char et on la ramène au temple.

Il faut alors installer devant le temple un pavillon pour les rites préparatoires. Il est carré et pourvu de quatre portes que parent quatre arches; en son centre il y a une plate-forme autour de laquelle sont neuf creusets. Ceux des points cardinaux et intermédiaires sont respectivement carré (Est), en vulve (Sud-Est), semi-circulaire (Sud), triangulaire (Sud-Ouest), circulaire (Ouest), hexagonal (Nord-Ouest), lotiforme (Nord) et octogonal (Nord-Est); enfin le neuvième placé entre le Nord-Est et l'Est est circulaire. Il faut accomplir les rites du pavillon en

l'enduisant de bouse et en l'aspergeant de *pañcagavya*, puis on le pare avec des guirlandes de perles, des dais, des guirlandes de *darbha* et des étendards, des rameaux et des fruits, des vases d'abondance, des pousses, les dix armes et les huit *maṅgala*.

Sur la plate-forme on fait une aire sacrificielle de riz où on dispose les cinq couches (plumes... etc.) puis ayant couvert l'image de tissu de *kuśa*, on l'étend entièrement parée, la tête vers l'Est et le visage vers le haut.

Ensuite on dispose neuf vases parés de cordonnets, tissus... etc. Celui qui est à côté de l'oreille droite de la statue est le vase de la manifestation, c'est-à-dire le vase principal; c'est là qu'on honore la manifestation d'Īśāna, imposée avec sa propre formule. Puis dans les vases qui sont autour on impose, convoque et honore avec leurs formules les manifestations de Tatpuruṣa, Śarva, Aghora, Kapardin, Sadyojāta, Īśvara, Vāmadeva et Śiva.

L'oblation se fait avec treize ingrédients qui sont les mêmes que ceux qui sont prescrits pour Dakṣiṇāmūrti dans le chapitre 10 (ci-dessus); quant aux bûchettes elles sont respectivement en bois de *palāśa*, de *khadira*, d'*aśvattha*, de *śamī*, de *plakṣa*, d'*udumbara*, d'*apāmārga*, de *vaṭa* et de *bilva*. Pour chaque ingrédient il y a vingt-huit oblations; à la fin on fait l'oblation plénière avec la formule de la manifestation.

Ensuite il faut déposer dans le temple à l'endroit qui convient à la statue les neuf pierres précieuses et de l'or. On lève alors l'image de la couche et, en compagnie des gardiens des manifestations, on lui rend un culte avec la formule d'Īśāna et on la met en place. Ensuite on impose (avec l'eau de *kūrca* des vases) les formules des cinq et six membres, on fait la consécration avec l'eau des vases puis on rend un culte en commençant par l'opération des parfums.

Il faut honorer l'officiant principal et ceux des oblations ainsi que les porteurs des manifestations et les serviteurs; ensuite ce sont les dévots śivaïtes et les brahmanes qu'il faut honorer. Enfin a lieu l'oblation d'expiation et l'offrande des prémices pour laquelle on emploie de la mélasse, du beurre clarifié, du caillé avec du riz pur et du riz au *pāyasam*. On nourrit les brahmanes dans la mesure de ses possibilités.

*

* *

On trouvera à la fin de l'ouvrage la bibliographie, l'index des demi-vers du *Rauravottara* et des chapitres donnés en appendice ainsi qu'une table des matières détaillée.

Nous tenons à remercier Śrī Akṣayaśivācārya de Kīḷvelūr, Śrī Svāminātha-śivācārya de Dharmapuram et Śrī Svāmināthaśivācārya de Tiruvāḍudurai qui nous ont prêté des manuscrits pour la préparation de cette édition. Nous remercions également Śrī Rāmānuja Aiyangar, Śrī Sambandhaśivācārya et Śrī

Subrahmaṇya de l'aide qu'ils nous ont apportée tout au long de l'élaboration de cet ouvrage. Nous sommes reconnaissant à la Direction de l'I.F.I. de continuer à encourager nos travaux sur les *āgama* entrepris depuis la fondation de l'Institut. Enfin nous remercions la direction et le personnel de l'Imprimerie de Sri Aurobindo Ashram pour le soin qu'ils ont pris à l'impression de ce livre.

N. R. Bhatt

MANUSCRITS UTILISÉS POUR LA PRÉSENTE ÉDITION

(pour le détail de leur contenu voir à la
fin de l'Introduction sanskrite)

अ Copie de l'I.F.I. (T.27) d'un manuscrit sur ôles appartenant à Akṣaya-śivācārya (Kīḻvelūr).
आ Manuscrit sur papier appartenant à S. Svāmināthaśivācārya (Dharma-puram).
इ Manuscrit sur ôles de l'I.F.I. (RE 40007).
ई Manuscrit sur papier appartenant à K. Svāmināthaśivācārya (Tiruvāḍu-durai) (car. grantha).
उ Manuscrit sur ôles de l'I.F.I. (RE 47875).
ऊ *Idem*. (RE 25193).
ऋ Manuscrit sur papier de l'I.F.I. (T. 146).
ॠ Manuscrit sur ôles de l'I.F.I. (RE 26345).
ऌ Manuscrit sur papier de l'I.F.I. (T.123).
ए Manuscrit sur ôles de l'I.F.I. (RE 48018).
ऐ(१) *Idem*. (RE 25191).
ऐ(२) *Idem*. (RE25193).
ऐ(३) *Idem*. (RE 25202).
ओ *Idem*. (RE 10864).
औ *Idem*. (RE 32434).
क *Idem*. (RE 39691).
ख *Idem*. (RE 43464).
ग Manuscrit sur papier de l'I.F.I. (T.131).
घ *Idem*. (T.525).
ङ Manuscrit sur ôles de l'I.F.I. (RE 30723).
च *Idem*. (RE 32403).
छ Manuscrit sur papier de l'I.F.I. (T. 965).
ज *Idem*. (T. 976).
झ Manuscrit sur ôles de l'I.F.I. (RE 39986).

उपोद्घातः

अष्टाविंशतिशैवशास्त्रजलधौ रत्नानि चोपागमा-
स्तेष्वेकोत्तररत्नवद्विलसति श्रीरौरवस्योत्तरम्।
यत्प्रादाद् रुरवे शिवत्वपरमानन्दाप्तये शंकरो
यस्मादागमरत्नजालमभवत्तं नौमि विश्वेश्वरम् ॥

सिद्धान्तशैवाख्यसमयस्य प्रमाणभूताः कामिकाद्यष्टाविंशतिशैवागमाः, ये 'मूलागमाः' इति व्यवह्रियन्ते। एकैकस्य मूलागमस्य सन्ति केचनानुबन्धरूपा उपागमाः, येषां पट्टिका रौरवागमस्य प्रथमभागे दत्तास्ति। तत्र षोडशतमो मूलागमो रौरवागमः। उपलब्धासु रौरवागममातृकासूपलब्धा रौरवविद्यापादसंग्रहभूतरौरवसूत्रसंग्रहो दशपटलात्मकः, तथा क्रियापादसंबन्धिनः षट्चत्वारिंशत्पटलाश्च भागद्वये इतः पूर्वमेव प्रकाशिताः। सन्त्यन्ये पटलास्तत्रतत्रोदाहृता रौरवागमादुद्धृताः, ये तृतीये भागे प्रकाशयिष्यन्ते।

रौरवोत्तरागमः

रौरवागमस्योपागमत्वेन निर्दिष्टो रौरवोत्तरागमः, यस्य मातृकापञ्चकमुपलब्धमस्माभिः। तथा रौरवोत्तरादुद्धृताः केचन पटला ग्रन्थान्तरेषूपलब्धाः। एतासां मातृकाणां साहाय्येनाधुनायमुपागमः प्रकाश्यते।

रौरवोत्तरस्यास्यागमस्य मूलाधारभूतासु पञ्चस्वपि मातृकासु विंशतिपटला एवोपलभ्यन्ते। प्रथमपटले श्रोता रुरुः प्रासादभेदं मूर्तिभेदं लिङ्गलक्षणभेदं गौरीभेदं देवताप्रतिष्ठाविधिं च श्रोतुमिच्छामीति ईश्वरं प्रार्थयति। वक्ता ईश्वरः प्रासादानां पृथग्भेदं पृथक्पृथग् मूर्तिभेदं लिङ्गलक्षणभेदं विशेषतो गौरीभेदं च वक्ष्यामीति प्रतिजानाति। उपलभ्यमानेषु विंशतिपटलेषु गौरीभेदः, तत्प्रतिष्ठाविधिश्च न दृश्येते। अतः प्रधानमातृकासूपलब्धो भागोऽपूर्ण इति ज्ञायते।

अस्मद्ग्रन्थालये आर्. ई. ३९६९२, आर्. ई. ४३४६४ इत्यङ्किते तालपत्रकोशद्वये "इति रौरवोत्तरे महातन्त्रे रेणुकाप्रतिष्ठाविधिः, रेणुकोत्सवविधिः, रेणुकाप्रायश्चित्तविधिः" इति पटलत्रयं रौरवोत्तरादुद्धृतमुपलभ्यते। तथा आर्. ई. ३२४३४ इत्यङ्किते तालपत्रकोशे "रेणुकाप्रतिष्ठा, रेणुकोत्सवः, प्रायश्चित्तम्, महाकालीप्रतिष्ठा, चामुण्डीप्रतिष्ठा" इति पटलपञ्चकं रौरवागमादुद्धृतमित्युदाहृतम्। अतो रौरवादुद्धृतत्वेन निर्देशेऽप्येते पटला रौरवोत्तरादुद्धृताः स्युः। यद्येवमभ्युपगम्यते तर्ह्येते पटला गौरीभेदे या देवताः, तासां प्रतिष्ठाविधिनिरूपकाः स्युः। एवमेव आर्. ई. ३०७२३ इत्यङ्किते तालपत्रकोशे रौरवादुद्धृतचामुण्डाप्रतिष्ठापटलोऽप्युपलभ्यते। रौरवे इति रौरवोत्तरे इति च मातृकासु ग्रन्थनाम्नो दृश्यमानत्वादेते पटला अनुबन्धे दीयन्ते। "इति रौरवागमोत्तरे चन्द्रशेखरप्रतिष्ठाविधिः" इत्येकः पटलः टि. १४६, टि. ७४२ इत्यङ्कितयोर्मातृकयोर्दृश्यते। मूर्तिभेदे चन्द्रशेखरमूर्तिनाम न लभ्यते। अतः कुतः कुत्रास्य प्रसक्तिरिति न ज्ञायते। अथापि 'रौरवागमोत्तरे' इति शीर्षकदर्शनादयं पटलोऽप्यनुबन्धे दीयते। अत्रत्याः श्लोकाः प्रायेण दक्षिणामूर्तिप्रतिष्ठाविधिपटलस्थश्लोकसदृशा इत्ययं विशेषः।

'रौरवोत्तरे' इत्यधिकृत्य 'आत्मार्थपूजापद्धत्यां (टि० ३७१ पृ० ११३१–३२) तथा सकलागमसंग्रहे (पृ० ७३) च 'स्थूलं शिरः कृशं मूलमुन्नतं तु मुखं भवेत्।' इत्यादिकः श्लोक उदाहृतः,

योऽत्राष्टादशपटले तृतीयः श्लोकः। तथा आत्मार्थपूजापद्धत्यां (टि. ५५. पृ० ६१४) 'विघ्नेशं दक्षिणामूर्तिम्' इत्यादिकः श्लोक उदाहृतः, योऽत्र तुरीयपटले द्वितीयश्लोकोत्तरार्धतृतीयश्लोकः-पूर्वार्धरूपः। तथा शैवागमपरिभाषामञ्जर्याम् अत्रत्याः पञ्चदशपटलस्थतृतीयश्लोकप्रभृत्यष्टम-श्लोकपूर्वार्धपर्यन्ताः श्लोका विना नामनिर्देशं तदीयतुरीयवर्गे ६५उ० —— ७० श्लोकत्वे-नोदाह्रियन्ते।

'पवित्रोत्सवविधिः' इति मुद्रिते ग्रन्थेऽनुबन्धतया सकलागमे विद्यमानाः पवित्रोत्सवसंबन्धिनः श्लोका उद्धृताः सन्ति। तत्र १२३, १२४, १६६, १७२ पृष्ठेषु **'रौरवोत्तरे'** इत्यधिकृत्य ये श्लोका उद्धृताः, ते सर्वे मुद्रिते **रौरवागमे** दृश्यन्ते।

सकलागमे (पृ०१२३) **'रौरवोत्तरे** ——

'ब्रह्मक्षत्रियविट्शूद्राः कृत्वा तु तन्तुकैर्युतम्।'

इदमर्धं **रौरवागमे** क्रियापादे ४५पटलेऽष्टमश्लोकस्योत्तरार्धरूपम्।

सकलागमे (पृ० १२४) "**रौरवोत्तरे** ——

'सद्योजातेन प्रक्षाल्य वलयमस्त्रमन्त्रकम्।
त्रिगुणं त्रिगुणीकृत्य कलं कुर्याद्विधिक्रमम्॥'

अयं श्लोको **रौरवे** क्रियापादे ४५ पटले १२उ०, १३ पूर्वार्धश्लोकरूपः।

सकलागमे (पृ० १६६) **'रौरवोत्तरे** ——

दर्भासनं तु संकल्प्य दक्षिणेन तु मण्डले।
ततोपरि स्थितश्चापि पूर्वे चाभिमुखो गुरुः॥'

अयं श्लोको **रौरवे** क्रियापादे ४५ पटले ७२ तमश्लोकरूपः।

सकलागमे (पृ० १७२) **'रौरवोत्तरे** ——

'स्नानवेदिं च संकल्प्य पश्चात्स्नपनं कल्पयेत्।
तत्तत्स्थानेन पूर्वेण पञ्चगव्यं च कल्पयेत्॥
पञ्चामृतेन कल्पेन पूर्वेण तु सुदेशिकः।'

अत्रत्याः प्रथमद्वितीयतृतीयार्धाः **रौरवे** क्रियापादे ४५ पटले ८६ पूर्वार्धत्वेन ९१-९२ उत्तरार्ध-पूर्वार्धत्वेन च विद्यन्ते। अतो 'रौरवोत्तरे' इति रौरवागमश्लोकाः, तथा 'रौरवे' इति रौरवोत्तरश्लोकाश्च निबन्धेषूदाहृता इति भाति।

रौरवोत्तरागमस्य विषयक्रमनिर्देशविषयेऽस्त्यन्यः कश्चन विमर्शः। **रौरवागमस्य** विद्यापाद-रूपे रौरवसूत्रसंग्रहे तृतीये पटले १७ श्लोके——

'मुद्रासमयतत्त्वार्थमण्डलेज्यापरिग्रहः।
उत्तरेऽभिहितस्तन्त्रे मन्त्राणां चैव संग्रहः॥'

इति **रौरवोत्तरे** समयस्य तत्त्वार्थस्य मुद्राणां मण्डलानाम् इज्याया मन्त्राणां च संग्रहोऽभिहित इति दृश्यते। परमुपलब्धेऽत्र **रौरवोत्तरे** प्रतिष्ठाविधिरेवोपलभ्यते। आरम्भे प्रश्नप्रतिवचनानुसारेण च प्रासादभेद-मूर्तिभेद-लिङ्गलक्षणभेद-गौरीभेद-देवताप्रतिष्ठाविषय एवात्र प्रथमतो निरूप्यन्ते। तत्रान्ते गौरीभेद-तत्प्रतिष्ठाविधिनिरूपको भागो मातृकासु नोपलभ्यते। अतोऽपूर्णोऽयमुपलब्धो भागः। गौरीभेदनिरूपणानन्तरं किं मुद्रासमयतत्त्वार्थमण्डलादीनां निरूपको भागोऽप्यासीद्वा न वेति वक्तुं न शक्यते। 'उत्तरेऽभिहितस्तन्त्रे' इति वचनानुसारेण **रौरवोत्तरे** तादृशो भागोऽवश्यं-भावीति परं वक्तुं शक्यते। अत्राप्यारम्भे 'संक्षेपादुत्तरं तन्त्रं श्रोतुमिच्छाम्यहं प्रभो।' (१.२) इति रुरुणा तादृशोत्तरतन्त्रस्यावतारः प्रार्थ्यते। तत्र प्रथमतः प्रासादभेदादिविषये प्रश्नः, तस्य च विंशतिपटलैः समाधानम्। तत्रापि गौरीभेदतत्प्रतिष्ठाविषयकभागो नोपलभ्यते। तदनन्तरं पुन-

मुद्रासमयतत्त्वार्थादीनां विषये प्रश्नः, तत्समाधानरूपेण तेषां निरूपणादिकं स्यादिति **रौरवोत्तरस्य** समग्रस्येयं विषयसूची। तत्रोपलब्धे भागेऽस्मिन् प्रासादभेद-मूर्तिभेद-लिङ्गलक्षणभेद-देवताप्रतिष्ठा-विधयो निरूपिताः। गौरीभेदेऽन्तर्गतानां ग्रन्थान्तरेषूदाहृतानां रेणुका-चामुण्डा-महाकालीप्रतिष्ठा-दीनामनुबन्धे संग्रहः। चन्द्रशेखरप्रतिष्ठाविधेः कुत्रान्तर्भाव इत्यज्ञातत्वाद् **'रौरवागमोत्तरे'** इति शीर्षकदर्शनाच्चात्रानुबन्धे तस्यापि संग्रह इति संपादितेऽस्मिन्ग्रन्थे विषयव्यवस्थापना।

मुद्रिते **रौरवागमे** यः प्रथमो विद्यापादसंग्रहरूपो रौरवसूत्रसंग्रहाख्यो भागः, तत्र रुरुः प्रवक्ता ऋषयः श्रोतारः। **रौरवागमे** तु ईश्वरः प्रवक्ता रुरुः श्रोता। **रौरवोत्तरागमो**ऽयमपि ईश्वर-रुरुसंवादरूपः। एवं तन्त्रावतारपटलेषु संख्यानाद् वक्तृश्रोतृसंवादाच्च **रौरवोत्तरस्य** रौरवोपागमत्वं सिद्धं भवति। निबन्धेषु **'रौरवोत्तरे'** इत्युदाहृतानां श्लोकानामत्र दर्शनादस्य रौरवोत्तरागमत्वं समर्थितं भवति। इतः पूर्वमस्माभिः **मृगेन्द्रागमः, मतङ्गपारमेश्वरागमः, सार्धत्रिशतिकालोत्तरा-गमः'** इत्युपागमत्रयं सव्याख्यानं प्राकाशि। अधुना **रौरवोत्तरा**ख्योऽयमुपागमः आगमान्तरेभ्यः साजात्यवैजात्यसूचकटिप्पण्या साकं प्रकाश्यते, यस्मादस्य व्याख्यानं किंचिन्नोपलब्धम्।

रौरवोत्तरे दृष्टाः केचनार्धश्लोका आगमान्तरेषु क्वचित्पाठभेदेन दृश्यन्ते। सर्वेष्वप्यागमे-ष्वेतादृशानामर्धानां तौल्यं दरीदृश्यते। केवलानामेतादृशानामर्धानां साजात्यमात्रेणैकत्र स्थित-स्यान्यत्रोद्धाररूपादिविचारविनिमयः कर्तुं न शक्यते। यदा श्लोकानां श्लोकसमूहानां वा तौल्यं दृश्यते, तदा पौर्वापर्यविषयकचर्चाया अवकाशः संभाव्यते।

रौरवोत्तरोद्धृतश्लोकानामागमान्तरश्लोकैः साजात्यसूचिका पट्टिकात्राधो दीयते।

रौरवोत्तरे	५.६ पू०	पूर्वकारणे	१६.४६उ०
,,	६.३ उ०	,,	३.५२पू०
,,	९.६ पू०	सुप्रभेदे, चर्या०	३.१६पू०
		,, क्रिया०	१२. ६पू०
		,, ,,	१५.१५पू०
		,, ,,	३७.३५उ०
		रौरवे, क्रिया०	२७.१२उ०
		कालोत्तरे	१४.१९पू०
		,,	४८. ६उ०
,,	९.६उ०	सुप्रभेदे, क्रिया०	२६.२१उ०
,,	९.१२पू०	रौरवे, क्रिया०	१८.७३पू०
,,	१०.७उ०	सुप्रभेदे, क्रिया०	१५.९३पू०
		सर्वज्ञानोत्तरे, क्रिया०	९. २उ०
		पूर्वकारणे	३१.१२५उ०
		किरणे, क्रिया०	६.१४उ०
,,	११.७उ०	सुप्रभेदे, क्रिया०	१४.३५पू०
		,, ,,	१५.११पू०
		,, ,,	४३.१८पू०
		रौरवे, क्रिया०	२८.२७पू०
,,	१२.१०पू०	सुप्रभेदे, क्रिया०	१२. ५पू०
,,	१४.१८पू०	रौरवे, क्रिया०	३०.४८पू०

रौरवोत्तरे	१६.६१	पूर्वकारणे	२४.२९
		सुप्रभेदे, क्रिया०	२२.१६२उ०
,,	१६.६८पू०	सर्वज्ञानोत्तरे, क्रिया०	२०.५२पू०
		सुप्रभेदे, क्रिया०	३३.८३उ०
,,	१६.७०पू०	वातुलशुद्धाख्ये	१.१०५पू०
		,,	७.४७पू०
		,,	८.८३उ०
		कालोत्तरे	८.४०उ०
,,	१६.७८उ०	,,	२८.३२पू०
,,	१६.८१उ०	रौरवे, क्रिया०	१७.११उ०

अत्र सर्वत्र १६.६१ इत्यङ्कितं श्लोकमेकं विना सर्वत्रार्धश्लोकानामेव साजात्यता दृश्यते।

उपागमाः

तत्र मुद्रिते मृगेन्द्रे, मतङ्गे च मूलागमेष्विव पादचतुष्टयमप्युपलब्धम्। एवं मुद्रिते पौष्करे पारमेश्वरोपागमे तथा सर्वज्ञानोत्तरे च यद्यपि ज्ञानपादमात्रं प्रकाशितम्, अथाप्युदाहृतश्लोकेभ्यस्तत्र पादचतुष्टयमप्यस्तीत्यभ्यूह्यते। सार्धत्रिशतिकालोत्तरे तथान्येषु विविधकालोत्तरागमेषु तादृशविभागो न दृष्टः। इह रौरवोत्तरेऽपि पादचतुष्टयविभागो न दृश्यते। केवलं प्रतिष्ठाभाग एवात्रोपलभ्यते। प्रतिपटलमन्ते 'प्रतिष्ठातन्त्रे' इति विशिष्य निर्देशः सर्वत्र दृश्यते। एवं निश्वासागमस्योपभेदभूतायां निश्वासकारिकायां ज्ञानक्रियापादविषयप्रतिपादकपटला एवोपलभ्यन्ते। पादविभागो न दृश्यते। वातुलशुद्धाख्ये वातुलोपभेदेऽपि पादविभागो नास्ति। ज्ञानपादविषयप्रतिपादका दश पटलाः सन्ति। एवं शर्वोक्तागमस्योपागमद्वये शिवधर्मे, शिवधर्मोत्तरे तथा अंशुमदुपागमे विद्यापुराणतन्त्रेऽपि पादविभागो नास्ति। उपलभ्यमानपटलेषु चर्यापादविषयाः क्रियापादविषयाश्च समुपलभ्यन्ते। देवीकालोत्तरे ज्ञानपादविषयो लभ्यते। चिन्त्यागमोपभेदे सुचिन्त्यापरनामके अचिन्त्यविश्वसादाख्ये पादविभागो नास्ति। उपलभ्यमानेषु पटलेषु क्रियापादविषया एव दृश्यन्ते। एवं 'विद्वेषणसंहिता' 'भीमसंहिता' इत्याख्योपागमद्वये कारणागमोपभेदे क्रियापादविषयकपटला एवोपलभ्यन्ते। 'नारसिंहम्' इत्यभिधीयमाने उपागमे कामिकोपभेदेऽपि क्रियापादविषया एव दृश्यन्ते। 'उत्तरकामिकम्, उत्तरकारणम्' इति मुद्रितग्रन्थद्वयमप्युपागमद्वयं क्रियाभागमेव प्रतिपादयति। एवमंशुमत्काश्यपाख्येऽप्युपागमे क्रियापादोपयोगिविषया एवोपलभ्यन्ते। एवं परिशील्यमाने उपागमविषये इदं वक्तव्यं भवति, यदत्र पादचतुष्टयविभागनियमो नास्ति। मूलागमानामेतेऽनुबन्धरूपाः, ज्ञानविषये क्रियाविषये वा अनुक्तविषयपूरणं संग्रहेणोक्तानां विषयाणां विस्तरेण प्रतिपादनं च कुर्वन्तीति।

पूर्वकामिके प्रथमपटले १०४, १०५ श्लोकयोः

'कर्षणादिप्रतिष्ठान्तं मूलेनैव समाचरेत्।
कृतं चेदुपभेदेन कर्ता भर्ता विनश्यति॥
केवलं यजनं प्रोक्तमुपभेदे विशेषतः।
प्रतिष्ठाद्यं तु मूलैश्चेदष्टाविंशतिभिर्वरम्॥'

इति प्रतिष्ठाकर्म मूलागमानुसारेणैव कर्तव्यमिति, केवलयजनमात्रमुपागमानुसारेण कार्यमिति चोच्यते। एवं चेदुपागमे रौरवोत्तरे प्रतिष्ठाविधिरुपलभ्यते। कुत्र तस्य विनियोगः। कथं च कामिकोक्तलक्षणसमन्वयः। अत्रेदं समाधानं वक्तव्यं भवति। एतौ श्लोकौ केवलमर्थवादरूपौ मूलागमप्राशस्त्यबोधकौ। यत उपागमेष्वपि सर्वे विषयाः समुपलभ्यन्ते। ते च केवलं मूलागमस्यानुबन्धरूपाः। मूलागमे संग्रहेणोक्तं विषयं विस्तरेण वा, अनुक्तानां विषयाणामुद्धाराय वोपागमानां प्रसक्तिरिति।

रौरवोत्तरस्य वैशिष्टचम्

रौरवोत्तरेऽत्र प्रतिष्ठातन्त्रे प्रतिष्ठाविषयकक्रियाकलापनिरूपणेऽस्त्यनुस्यूता काचन विशिष्टा प्रक्रिया, या आगमान्तरेषु दृष्टाभ्यो विजातीया। तथागमान्तरेष्वनुपलब्धाः केचन विषयाश्च सन्ति। तेऽत्र विशिष्य निर्दिश्यन्ते —

(१) प्रथमपटले षण्णवतिप्रासादभेदास्तल्लक्षणं चात्र निरूप्यन्ते। अयमेव विषयः कालोत्तरे, ईशानशिवगुरुदेवपद्धत्यां च प्रकारान्तरेण निरूप्यते। सोऽपि तत्रैव टिप्पण्यामुद्धृत इति तत एवावगन्तव्यः।

(२) षष्ठसप्तमाष्टमपटलेषु विमानस्थितानां मूर्तीनां प्रतिष्ठाविधिर्विमानप्रतिष्ठातः पृथक्तया कथ्यते। तासां मूर्तीनामग्रतोऽर्चनापीठं प्रकल्प्य तस्यापि कुम्भशेषोदकेन संप्रोक्षणं कर्तव्यम्। अभिषिक्तस्यार्चनापीठस्य नित्यपूजा कर्तव्येत्युच्यते। आगमान्तरेभ्योऽयं विशेषोऽत्र दृश्यते।

(३) पञ्चदशपटले चतुष्षष्टिविधलिङ्गभेदा निरूप्यन्ते। येऽन्यत्रैवंविधतया न दृश्यन्ते।

(४) एकोनविंशतिपटले निरूपितो य इष्टलिङ्गप्रतिष्ठाविषयः, तादृशप्रकार आगमान्तरेषु नैवोपलभ्यते।

(५) प्रतिष्ठाविषये दक्षिणामूर्तिप्रतिष्ठायां तथा लिङ्गप्रतिष्ठासु च नवकुण्डकल्पनम्। प्रासादप्रतिष्ठायां प्रतिमण्डपं पञ्चकुण्डकल्पनम्। विघ्नेशविष्णुब्रह्मदुर्गाप्रतिष्ठासु चतुष्कुण्डकल्पनम्। चतुर्मूर्ति-पञ्चमूर्ति-अष्टमूर्तिप्रतिष्ठासु प्रतिमूर्तिकमेककुण्डकल्पनम्। अतः शिवलिङ्गस्य, दक्षिणामूर्तेः, प्रासादस्य च विस्तारेण, अन्येषां संग्रहेण चात्र प्रतिष्ठाक्रिया निरूपितेति भाति।

(६) अत्रागमे प्रतिष्ठाविषयकक्रियाकलापनिरूपणक्रमे काचनानुस्यूता प्रक्रिया सर्वत्र दृश्यते। तथा हि—

'मृण्मयलोहदार्वादिभिर्मूर्तिकरणानन्तरं नयनोन्मीलनं, बिम्बशुद्धिः, जलाधिवासः, मण्डपनिर्माणं, वेदिकाकुण्डादिनिर्माणं, ततः शयनाधिवासः, कुम्भस्थापनं तत्पूजा च, समिदाज्यादिभिः क्लृप्तसंख्याको होमः, मन्त्रन्यासपूर्वकं कुम्भाभिषेकः स्विष्टान्तहोमः' इत्यादिप्रक्रिया सर्वत्र समाना दृश्यते।

तत्र प्रासादप्रतिष्ठा-दक्षिणामूर्तिप्रतिष्ठा-लिङ्गप्रतिष्ठासु समिद्-घृत-चरु-क्षीर-यव-वेणु-प्रियङ्गु-लाज-सर्षप-माष-तिल-मधु-गुला इति त्रयोदशद्रव्याणि समानानि। प्रासादप्रतिष्ठायां परं शतसंख्यया होमः। अन्यत्राष्टाविंशतिसंख्यया होमः।

चतुर्मूर्ति-पञ्चमूर्ति-अष्टमूर्ति-विघ्नेश्वर-विष्णु-ब्रह्म-दुर्गा-द्वारपालप्रतिष्ठाविषये सर्वत्र मधुगुलद्रव्यद्वयं विहायैकादशद्रव्याणि होम्यत्वेन विधीयन्ते। अत्रापि सर्वत्राष्टाविंशतिसंख्यया होमः। सामान्यतः पञ्चाङ्गषडङ्गमन्त्रैरेकादशद्रव्याहुतिर्विधीयत इत्ययमपि विशेषोऽत्रागमे।

एतदागमीयाः केचन विशेषाः

प्रासादभेदविषये मूर्तिभेदविषये प्रतिष्ठाविषये चागमान्तरेषु पृथक् पृथग् यो विशेषः सोऽधुना

विस्तरेण दीयते। रौरवोत्तरे निर्दिष्टानां विषयाणामागमान्तरनिर्दिष्टविषयैः साजात्यवैजात्यं सप्रमाणं यथाशक्ति निर्दिश्यते। यद्यप्येते विषयास्तत्र तत्र मूलेऽधष्टिप्पणीष्वागमान्तरेभ्य उद्धृतैः श्लोकैः सूच्यन्ते, तथापि ग्राहकसौकर्याय विशदतयात्र निर्दिश्यन्ते।

प्रासादभेदाः

अंशुमत्काश्यपे (२४.३१, ३२) अजिते (१२.६६-६८पू०) पूर्वकामिके (४९.१०७, १०८) पूर्वकारणे (७.११६, ११७) दीप्ते (७.१२पू०–१५) मकुटे (२.४९५–४९६) रौरवे क्रियापादे (३९.२३पू०–२४) रौरवोत्तरे (१.७,८) संतानसंहितायां (५.१०, ११पू०) सुप्रभेदे क्रियापादे (३१.३८, ३९) नागरादिविमानानां लक्षणं दृश्यते। तत्र नागरप्रासादलक्षणविषये प्रायेण वैलक्षण्यं नास्ति। प्रासादषड्वर्गेष्वपि चतुरश्रं नागरमिति लक्षणं सर्वत्र समानतया दृश्यते। तत्र विद्यमानो विशेषो यथाक्रमं निरूप्यते। 'होमादिस्तूपिपर्यन्तं नागरं चतुरश्रकम्' इत्यजिते, 'होमादिस्तूपिपर्यन्तं युगाश्रं नागरं भवेत्' इति पूर्वकारणे, 'जन्मादिस्तूपिपर्यन्तं युगाश्रं नागरं भवेत्' इत्यंशुमत्काश्यपे, 'स्तूप्यन्तं चतुरश्रं यन्नागरं तदुदाहृतम्' इति मकुटे, 'सर्वं वै चतुरश्रं यत्प्रासादं नागरं त्विदम्' इति सुप्रभेदे, 'कुड्मलान्तमधिष्ठानाद्वेदाश्रं नागरं भवेत्' इति रौरवे क्रियापादे च नागरप्रासादविषये लक्षणं प्रतिपाद्यते। तथा 'उपानात् स्तूपिपर्यन्तं युगाश्रं नागरं भवेत्' इति पूर्वकामिकदीप्तयोः, 'चतुरश्रमुपानादि स्तूप्यन्तं नागरं स्मृतम्' इति रौरवोत्तरे, 'उपानादिस्तूपिपर्यन्तं चतुरश्रं नागरं भवेत्' इति सन्तानसंहितायां च नागरप्रासादलक्षणं प्रतिपाद्यते। अत्र सर्वेष्वागमेषु नागरप्रासादलक्षणस्य समानत्वम्, रौरवागमे अधिष्ठानात् कुड्मलान्तं चतुरश्रं नागरमिति लक्षणे किंचिद्विशेषः।

'उपानादि स्तूपिकान्तमष्टाश्रं द्राविडं भवेत्' इति रौरवोत्तरे, 'वेदिप्रभृति चाष्टाश्रं विमानं द्राविडाख्यकम्' इति पूर्वकारणे च द्राविडप्रासादलक्षणमुक्तम्। अत्रोभयत्रापि प्रासादषड्वर्गेष्वप्यष्टाश्रं द्राविडमिति लक्षणविषये साजात्यं दृश्यते।

'चतुरश्रायतं चैव अष्टाश्रं वा विशेषतः। प्रासादं द्राविडं विद्यात्' इति दीप्ते, तथा 'चतुरश्रायताष्टाश्रं प्रासादं द्राविडं भवेत्' इति सन्तानसंहितायां च द्राविडप्रासादलक्षणदर्शनाद् दीप्तसंतानसंहितयोः प्रासादषड्वर्गेष्वपि चतुरश्रायतमष्टाश्रं वा द्राविडमिति लक्षणं रौरवोत्तरोक्तद्राविडप्रासादलक्षणात् किंचिद्विभिन्नम्।

'कण्ठात्प्रभृति चाष्टाश्रं द्राविडं परिकीर्तितम्,' इत्यजिते 'कण्ठात्प्रभृति वस्वश्रं द्रामिडं परिकीर्तितम्' इति पूर्वकामिके, 'कण्ठात्प्रभृति वस्वश्रं प्रासादं द्राविडं भवेत्' इति मकुटे, 'ग्रीवमारभ्य चाष्टाश्रं विमानं द्राविडाख्यकम्' इति सुप्रभेदे च द्राविडप्रासादलक्षणदर्शनाद् रौरवोत्तरद्राविडप्रासादलक्षणादेतेषु प्रोक्तं लक्षणं विजातीयम्।

'वस्वश्रं शीर्षकं कण्ठं द्राविडं भवनं भवेत्' इत्यंशुमत्काश्यपे द्राविडप्रासादलक्षणदर्शनात् प्रासादषड्वर्गेषु मध्ये कण्ठशीर्षयोर्भागे वस्वश्रं द्राविडमिति दर्शनादेतल्लक्षणमपि रौरवोत्तरप्रोक्तलक्षणाद्विजातीयम्। रौरवे क्रियापादे नागरादिप्रासादलक्षणकथने द्राविडप्रासादलक्षणं नोपलभ्यते। एवं द्राविडप्रासादलक्षणविषये साजात्यवैजात्यम्।

'स्तूपिकान्तमुपानादि वृत्तं भवति वेसरम्' इति रौरवोत्तरे, 'कुड्मलान्तमुपानादि वृत्तं वेसरमुच्यते' इति रौरवे क्रियापादे च वेसरप्रासादलक्षणं दृश्यते। एवं प्रासादषड्वर्गेषु वृत्तं वेसरमिति रौरवरौरवोत्तरयोर्वेसरप्रासादलक्षणं समानं भवति।

'वृत्तं वृत्तायतं चैव द्वयश्रवृत्तं तथैव च। प्रासादं वेसरं विद्यात्' इति दीप्ते, तथा 'वृत्तं

वृत्तायतं चापि द्व्यश्रवृत्तं तु वेसरम्' इति सन्तानसंहितायां च वेसरप्रासादलक्षणं दृश्यते। अतो दीप्तसंतानसंहिताख्ययोरागमयोर्वृत्तं, वृत्तायतं, द्व्यश्रवृत्तं च वेसरप्रासादलक्षणमित्युक्तं भवति।

'कण्ठात्प्रभृति वृत्तं यद्वेसरं धाम कथ्यते' इत्यजिते, 'कण्ठात्प्रभृति वृत्तं यद्वेसरं परिकीर्तितम्' इति पूर्वकामिके, 'कर्ण (कण्ठ ?) प्रभृति वृत्तं यद्वेसरं परिकल्पयेत्' इति पूर्वकारणे, 'कण्ठात्प्रभृति वृत्तं यद्वेसरं तत्प्रशस्यते' इति मकुटे, 'कण्ठादारभ्य वृत्तं यत्तद्वेसरमिति स्मृतम्' इति सुप्रभेदे च वेसरप्रासादलक्षणदर्शनाद् अजित-पूर्वकामिक-पूर्वकारण-मकुट-सुप्रभेदेषु पञ्चस्वागमेषु कण्ठादारभ्य वृत्तं वेसरप्रासादलक्षणमित्युक्तं भवति। एतल्लक्षणं तथा दीप्तसंतानसंहितयोः प्रतिपादितं च लक्षणं रौरवोत्तरोक्तवेसरप्रासादलक्षणाद्विजातीयम्।

'वृत्तग्रीवशिरोपेतं वेसरं हर्म्यमीरितम्' इत्यंशुमत्काश्यपागमे वेसरप्रासादलक्षणदर्शनात् प्रासादषड्वर्गेषु मध्ये कण्ठशीर्षभागयोर्वृत्तं वेसरमिति वेसरप्रासादलक्षणं प्रतिपाद्यते। एतच्च लक्षणं रौरवोत्तरोक्तवेसरप्रासादलक्षणाद्विजातीयम्। एवं वेसरप्रासादलक्षणविषये साजात्यवैजात्यं ज्ञातव्यम्।

रौरवोत्तरे नागर-द्राविड-वेसराख्यवर्गत्रयं पूर्वप्रदर्शितप्रकारेण सलक्षणं प्रतिपाद्य, विमिश्रकप्रासादविषये वर्गत्रयं सलक्षणं निरूपितम्। तत्रोपानादिचतुरश्रं ग्रीवाद्यष्टाश्रमेकतलमनेकतलं वा नागरद्राविडम्। उपानादिचतुरश्रं ग्रीवादिवृत्तमेकतलमनेकतलं वा नागरवेसरम्। उपानाद्यष्टाश्रं ग्रीवादिवर्तुलमेकतलमनेकतलं वा द्राविडवेसरमिति मिश्रकप्रासादविषये वर्गत्रयलक्षणप्रतिपादनं दृश्यते। एतादृशमिश्रकप्रासादलक्षणमुपलभ्यमानेष्वागमेषु न दृश्यते।

नागरादिवर्गत्रये मिश्रकप्रासादवर्गत्रये च प्रत्येकं षोडशभेदा भवन्ति। ततश्च षण्णवतिप्रासादभेदाः सिध्यन्तीति षण्णवतिप्रासादा रौरवोत्तरे प्रतिपाद्यन्ते। परं के ते षोडशभेदा इत्यत्र विवरणं तेषां नामानि वा नात्र दृश्यन्ते।

कालोत्तरे त्रिपञ्चाशत्तमे पटले द्वात्रिंशन्नागरभेदाः, द्वात्रिंशद्द्राविडभेदाः, द्वात्रिंशद्वेसरभेदा इति नागरादिवर्गत्रयेष्वेव षण्णवतिप्रासादभेदकल्पनं दृश्यते। परं तत्रापि षण्णवतिप्रासादभेदा नैव स्पष्टतया प्रतिपाद्यन्ते। एवं मकुटे द्वितीयपटले, उत्तरकारणे नवतितमे पटले, सूक्ष्मे सप्ताशीतितमे पटले च षण्णवतिप्रासादप्रसङ्गो दृश्यते। सर्वत्रापि नैव स्पष्टतया लक्षणं नामानि वा समग्रतया दृश्यन्ते। एवं प्रथमपटलोक्तविषयाणां साजात्यवैजात्यप्रदर्शनं ज्ञेयम्।

दिङ्मूर्तयः

रौरवोत्तरे द्वितीयपटले दिङ्मूर्तिषु चतुर्मूर्तिभेदविषये विना स्थापनीयभागनिर्देशं नागर-द्राविड-वेसर-नागरवेसराख्यमिश्रक-प्रासादान् प्रकल्प्य, तत्रेन्द्रादिचतुर्मूर्तयः चतुर्दिक्षु स्थापनीया इत्युच्यते। तृतीयपटले नागरे वेसरे वा प्रासादे पूर्वाद्यष्टदिक्षु कुमाराद्यष्टमूर्तयः स्थापनीया इत्युच्यते। चतुर्थपटले नागरादिप्रासादे पादभागे विमानं प्रकल्प्य विघ्नेशादिपञ्चमूर्तयः स्थापनीया इत्युक्तम्। एवं दिङ्मूर्तिस्थापनविषये प्रासादभागेषु विमानादिकल्पनपूर्वकं पृथक्क्रियाकलापपूर्वकं च मूर्तिस्थापनं कर्तव्यमित्युपलभ्यमानेष्वन्येष्वागमेषु नोक्तम्। पूर्वकामिके पञ्चपञ्चाशत्तमे पटले 'गुहासु देवताः स्थाप्याः प्रासादस्य समन्ततः' (५५.७२पू०) इति प्रासादभागे गुहासु दिङ्मूर्तीनां स्थापनं कर्तव्यमित्युच्यते। रौरवोत्तरे द्वितीयपटले दिङ्मूर्तिषु चतुर्मूर्तिविषये प्रासादे पूर्वदिशि इन्द्रं, दक्षिणदिशि दक्षिणामूर्तिं पश्चिमदिशि विष्णुम् उत्तरदिशि ब्रह्ममूर्तिं च स्थापयेदिति कथ्यते। प्रासादषड्वर्गेषु कस्मिन् भागे चतुर्मूर्तिस्थापनं कर्तव्यमिति न निर्दिश्यते। अंशुमदागमे एकोनपञ्चाशत्तमे पटले —

'ग्रीवे चैव चतुर्दिक्षु दिशामूर्ति च विन्यसेत्।
स्कन्दं वै दक्षिणामूर्ति विष्णुं चैव विरिञ्चकम्॥
स्वशक्तिसहितोपेतम्' (४९, ५०पू०)

इत्यत्र स्कन्दादयश्चतस्रो मूर्तयः स्वशक्तिसहिताः पूर्वादिक्रमेण ग्रीवायां स्थापनीया इति प्रोच्यते। रौरवोत्तरे पूर्वदिशि इन्द्रः स्थापनीयत्वेनोक्तः। अंशुमदागमे तत्र स्कन्दः स्थापनीयत्वेनोक्तः। मूर्तयः स्वशक्तिसहिताः स्थापनीया इति तथा मूर्तयश्चतस्रो ग्रीवायां स्थापनीया इत्यंशुमदागमे स्थानं च निर्दिष्टमिति भेदो ज्ञेयः। अत्र विषये अंशुमत्काश्यपे षड्विंशतितमे पटले—

'स्कन्दं वा पूर्वदिग्भागे शक्रो वा हस्तिरोपितः।
दक्षिणे दक्षिणामूर्ति वीरभद्रमथापि वा॥
पश्चिमे नारसिंहं तु सौम्यमूर्तिमथापि वा॥
उत्तरे तु विधातारं धनदं वा द्विजोत्तम।
प्रस्तरोपरि कर्तव्यमेकद्वित्रितले तथा॥' (६३उ० — ६५)

इति चतुर्दिक्षु स्थापनीयानां नामानि निर्दिष्टानि। प्रस्तरोपरि ताश्च मूर्तयः स्थापनीया इति च प्रोक्तम्। पूर्वदिशि स्कन्देन्द्रयोस्तथा दक्षिणदिशि दक्षिणामूर्तिवीरभद्रयोः, पश्चिमदिशि नारसिंहसौम्ययोः, उत्तरदिशि ब्रह्मधनदयोश्च वैकल्पिकेन स्थापनं कर्तव्यमिति प्रदर्शितो भेदोऽवगन्तव्यः। पूर्वकारणे सप्तमे पटले —

'कुमारं पूर्वदिग्भागे दक्षिणामूर्तिकं यमे।
वारुणे तु नृसिंहं वा केशवं वापि कारयेत्॥
ब्रह्माणमुत्तरे देशे कन्धरे तु विशेषतः।' (९२, ९३पू०)

इत्यत्र चतुर्दिक्षु स्थापनीया मूर्तयः, ताश्चांशुमदागमप्रोक्तवद् ग्रीवाभागे स्थापनीया इत्युच्यते। पूर्वदिशि स्कन्द उक्त इति भेदस्तथा पश्चिमे नृसिंहकेशवयोर्वैकल्पिकत्वेन निर्देशरूपो भेदश्चावगन्तव्यः।

दीप्तागमे षष्ठे पटलेऽत्र विषये —

'सेनापतिर्भवेत्पूर्वे दक्षिणामूर्तिर्दक्षिणे।
पश्चिमे नारसिंहं तु उत्तरे च पितामहम्'॥ (६.७९)

इति चतुर्दिक्षु स्थापनीया मूर्तयो निर्दिष्टाः। अत्र पूर्वे पश्चिमे च सेनापतिनारसिंहयोः कथनं रौरवोत्तराद्विजातीयम्।

सन्तानसंहितायां पञ्चमे पटले —

'स्कन्दं तु पूर्वदेशे तु दक्षिणामूर्तिर्दक्षिणे।
पश्चिमे लिङ्गोद्भवं च उत्तरे तु पितामहम्॥'

इति चतुर्दिक्षु स्थापनीया मूर्तयः प्रोक्ताः। अत्र पूर्वदिशि स्कन्दस्तथा पश्चिमदिशि लिङ्गोद्भवश्च स्थापनीय इति कथनं रौरवोत्तराद्विजातीयम्।

सुप्रभेदे क्रियापादे एकत्रिंशत्तमे पटले—

'स्कन्दं कृत्वा तु तत्पूर्वे याम्ये श्रीकण्ठनायकम्॥
शास्त्रार्थानि मुनीनां तु मुक्त्यर्थं प्रोच्चरद्गुरुम्।
पश्चिमे नारसिंहं च सौम्यं वा विन्यसेद्बुधः॥
ब्रह्माणमुत्तरे कृत्वा चतुर्वक्त्रसमायुतम्।' (८९-९१)

इति चतुर्दिक्षु स्थाप्या मूर्तयो निर्दिष्टाः। अत्र पूर्वे स्कन्दं, याम्ये श्रीकण्ठनायकं, पश्चिमे नारसिंहं सौम्यं वा स्थापयेदिति कथनं रौरवोत्तराद्विजातीयम्।

रौरवे क्रियापादे एकोनचत्वारिंशे पटले —

'स्कन्दं हर्म्यमुखे कल्प्य सहजं वा विनायकम्।
दक्षिणामूर्तिनं याम्ये हरिलीलां तु वारुणे।
सौम्यदेशे विधातारं धनदं वा प्रकल्पयेत्॥' (३३,४)

इति दिशामूर्तिषु चतुर्मूर्तयो निरूपिताः। अत्र हर्म्यमुखे स्कन्दं वा विनायकं वा स्थापयेदिति कथनं, पश्चिमदिशि हरिलीलामूर्तिनं स्थापयेदित्युक्तिः, उत्तरदिशि विधातारं धनदं वा स्थापयेदिति विकल्पोक्तिश्च रौरवोत्तरप्रोक्ताद्विजातीयम्। एवं चतुर्मूर्तिविषये साजात्यवैजात्यं प्रदर्शितम्।

दिङ्मूर्तिस्थापने चतुर्मूर्तिविषये रौरवोत्तरस्य आगमान्तरेभ्यः संग्रहेण साजात्यवैजात्यमधः पट्टिकायां निर्दिश्यते।

	पूर्वदिशि	दक्षिणदिशि	पश्चिमदिशि	उत्तरदिशि
रौरवोत्तरे (२ पटले)	इन्द्रः	दक्षिणामूर्तिः	विष्णुः	ब्रह्मा
अंशुमदागमे (४९ पटले)	स्कन्दः	दक्षिणामूर्तिः	विष्णुः	ब्रह्मा
अंशुमत्काश्यपे (२६ पटले)	स्कन्दः अथवा शक्रः	दक्षिणामूर्तिः अथवा वीरभद्रः	नरसिंहः अथवा सौम्यमूर्तिः	ब्रह्मा अथवा धनदः
पूर्वकारणे (७ पटले)	स्कन्दः	दक्षिणामूर्तिः	नरसिंहः अथवा केशवः	ब्रह्मा
दीप्तागमे (६ पटले)	स्कन्दः	दक्षिणामूर्तिः	नरसिंहः	ब्रह्मा
संतानसंहितायाम् (५ पटले)	स्कन्दः	दक्षिणामूर्तिः	लिङ्गोद्भवः	ब्रह्मा
सुप्रभेदागमे (क्रिया०३१पटले)	स्कन्दः	श्रीकण्ठनायकः	नरसिंहः अथवा सौम्यः	ब्रह्मा
रौरवे (क्रिया० ३९पटले)	स्कन्दः अथवा विनायकः	दक्षिणामूर्तिः	हरिलीला	ब्रह्मा अथवा धनदः

अत्रांशुमदागमे स्कन्दादयः स्वशक्तिसहिताः स्थापनीया इति विशेषः। सुप्रभेदे दक्षिणामूर्तिस्थाने

'श्रीकण्ठनायकः मुनीनां शास्त्रार्थं प्रोच्चरद्गुरुः' इत्युक्तत्वाद् दक्षिणामूर्तिरेवाभिप्रेत इति भाति।

रौरवोत्तरे तृतीयपटले प्रासादे दिङ्मूर्तिविषये पूर्वादिचतुर्दिक्षु क्रमेण कुमार-दक्षिणामूर्ति-नारसिंह-ब्रह्ममूर्तयः स्थापनीयास्तथा विदिक्षु काश्यप-अगस्त्य-नारद-वसिष्ठाख्या मुनयः स्थापनीया इत्यष्टमूर्तिभेदः प्रतिपादितः। एतासां मूर्तीनां प्रासादषड्वर्गेषु ग्रीवाभागे स्थापनं कर्तव्यमित्यष्टमूर्तिप्रतिष्ठाविधौ सूच्यते।

एवंरीत्या दिङ्मूर्तिविषयेऽष्टमूर्तिभेदवर्णनमुपलभ्यमानेष्वन्येष्वागमेषु न दृश्यते।

अंशुमत्काश्यपे षड्विंशतितमे पटले—

'तलं प्रति विमानानां दिङ्मूर्तिरथ वक्ष्यते।
स्कन्दं वै पूर्वदिग्भागे दक्षिणामूर्तिं दक्षिणे॥
पश्चिमे विष्णुमूर्तिं वा लिङ्गोद्भवमथापि वा।
धातारमुत्तरे विप्र द्वारस्थानं तु वर्जयेत्॥
मण्टपे दक्षिणे भद्रे स्थापयेत्तु विनायकम्।
पूर्वे च (वा ?) पश्चिमे तस्य नृत्तमूर्तिं प्रकल्पयेत्॥
दुर्गामुत्तरदिग्भागे क्षेत्रपालं तथैव च।
स्थानकं वासनं वाथ दिशामूर्तिं प्रकल्पयेत्॥
एवं धरातलोर्ध्वे तु कर्तव्यं द्विजसत्तम।' (५८उ०–६२)

इत्येतेषु श्लोकेषु दिङ्मूर्तिविषयेऽष्टमूर्तिभेदः प्रकरान्तरेण प्रदर्शितः। अत्र धरातलोर्ध्वेऽथवा अधिष्ठानवर्गे चतुर्दिक्षु स्कन्द-दक्षिणामूर्ति-विष्णु-ब्रह्ममूर्तयः स्थापनीया इत्युच्यते। पश्चिमदिशि विष्णुमूर्तिमथवा लिङ्गोद्भवमूर्तिं स्थापयेदिति विकल्पश्च सूचितः। मण्डपस्य दक्षिणे उत्तरे च विनायक-नृत्तमूर्ती, दुर्गा-क्षेत्रपालौ स्थापनीया इति दृश्यते। अत्र रौरवोत्तरप्रोक्ताः काश्यपादिमहर्षयो नैव दृश्यन्ते। रौरवोत्तरेऽष्टमूर्तयः प्रासादभागे गले स्थाप्या इत्युच्यते। अंशुमत्काश्यपे धरातलोर्ध्वे मूर्तयः स्थापनीया इति निर्दिष्टाः। अत्र रौरवोत्तरप्रोक्ताः स्कन्ददक्षिणामूर्तिब्रह्ममूर्तयः सन्ति। अन्या मूर्तयो विभिन्नाः। एवमत्र वैजात्यं स्पष्टम्।

रौरवोत्तरे चतुर्थपटले दिङ्मूर्तिविषये पञ्चमूर्तिभेदो निगद्यते। तत्र नागरादिविमानेषु पादभागे विमानं प्रकल्प्य तत्र विघ्नेश–दक्षिणामूर्ति-विष्णु-ब्रह्म-दुर्गाख्याः पञ्च मूर्तयः स्थाप्याः। तत्रार्धमण्डपदक्षिणोत्तरभागयोर्विघ्नेशदुर्गयोः स्थानं, तथा प्रासाददक्षिणे दक्षिणामूर्तेः, पश्चिमे विष्णुमूर्तेः, उत्तरे ब्रह्ममूर्तेश्च स्थानं कल्पनीयमित्युच्यते।

पूर्वकामिके पञ्चपञ्चाशत्तमे पटले—

'दक्षिणे दक्षिणामूर्तिं लिङ्गोत्थं तस्य पश्चिमे॥
ब्रह्माणमुत्तरे देशे स्थापयेद्देशिकोत्तमः।
अर्धमण्डपदक्षांशे विघ्नेशं नृत्तरूपिणम्॥
दुर्गां चोत्तरभागे तु रुद्रं वा सार्वदेशिके। (७२-७४)

इत्येतयोः श्लोकयोर्दिङ्मूर्तिविषये पञ्चमूर्तिभेदो विधीयते। पश्चिमदिशि पूर्वकामिके लिङ्गोद्भव उच्यते। रौरवोत्तरे तु तत्र विष्णुमूर्तिरभिधीयते। पूर्वकामिकेऽर्धमण्डपोत्तरभागे दुर्गां वा रुद्रं वा स्थापयेदिति विकल्पोक्तिर्विजातीया भवति।

दीप्तागमे षष्ठे पटले—

'सेनापतिर्भवेत्पूर्वे दक्षिणामूर्तिर्दक्षिणे।
पश्चिमे नारसिंहं तु उत्तरे च पितामहम्॥
तन्मण्डपस्य पार्श्वे तु विघ्नमूर्तिं प्रकल्पयेत्।

सौम्ये कात्यायनीं कुर्यान्महिषस्य शिरः स्थिताम् ।।' (७९–८०)

इत्येतयोः श्लोकयोः षण्मूर्तयोऽभिहिताः। पूर्वे सेनापतिः, पश्चिमे नारसिंहश्च स्थाप्य इति दीप्ते दृश्यते। रौरवोत्तरे तु पूर्वदिशि मूर्तिर्न निर्दिष्टा। पश्चिमे विष्णुरिति सामान्यतो मूर्तिनाम रौरवोत्तरे वर्तते। दीप्ते तु तत्र नारसिंह इति विष्णुमूर्तेर्विशेषोऽभिधीयते। एवं दीप्तरौरवोत्तरयोर्व्यत्यासो ज्ञेयः।

सन्तानसंहितायां पञ्चमे पटले —

'स्कन्दं तु पूर्वदेशे तु दक्षिणामूर्तिं दक्षिणे।
पश्चिमे लिङ्गोद्भवं च उत्तरे तु पितामहम्।
मण्डपस्य तु पार्श्वे तु विघ्नमूर्तिं तु दक्षिणे।
उत्तरे चैव दुर्गां च कुर्यादिकतलस्य तु ।।' (६३,६४)

इत्येतयोः श्लोकयोरत्र विषये दीप्तागमवत् षण्मूर्तयोऽभिधीयन्ते। पूर्वदिशि रौरवोत्तरे मूर्तिर्नोक्ता। पश्चिमे रौरवोत्तरे विष्णुरुक्तः। अत्र संतानसंहितायां पूर्वकामिकवल्लिङ्गोद्भव उच्यत इति व्यत्यासोऽवगन्तव्यः। एवं द्वितीयतृतीयचतुर्थपटलेषु दिङ्मूर्तिविषये प्रोक्तेषु विषयेषु साजात्यवैजात्यमधिगन्तव्यम्।

प्रासादप्रतिष्ठा

रौरवोत्तरे प्रासादप्रतिष्ठाविधौ प्रासादप्रतिष्ठाविषये तथा दिङ्मूर्तिप्रतिष्ठाविषये च प्रत्येकं प्रत्येकं क्रियाकलापनिरूपणं दृश्यते। आगमान्तरेषु दिङ्मूर्तिसहितैका प्रासादप्रतिष्ठाक्रिया निरूप्यते। अत्र पञ्चमपटले प्रासादप्रतिष्ठाविधौ प्रासादस्य पुरतो बाह्ये चतुर्दिक्षु मध्ये च मण्डपाः प्रपा वा कल्पनीया इति पञ्च मण्डपा विधीयन्ते। प्रतिमण्डपं मध्ये वेदिकां सलक्षणां विधाय, तस्या बाह्ये चतुर्दिक्षु क्रमेण चतुरश्रधनुर्वृत्तत्रिकोणाख्यानि चत्वारि कुण्डानि, तथा मध्यमे षडश्रकुण्डं च कल्पनीयमिति पञ्चकुण्डकल्पनप्रकारश्चाभिधीयते।

पूर्वकारणे सप्ततितमे पटलेऽस्मिन्विषये —

'प्रासादस्याग्रभागे तु मण्डपं स्कन्दमण्डपम्।
हर्म्यस्यैवापरे भागे मण्डपं विष्णुमण्डपम् ।।
सौम्येऽब्जमण्डपं प्रोक्तं दक्षिणे त्वीशमण्डपम्'। (१३,१४पू०)

इत्येतत्सार्धश्लोके प्रासादस्य चतुर्दिक्षु पूर्वस्यां दिशि स्कन्दमण्डपम्, तथा पश्चिमदिशि विष्णुमण्डपम्, उत्तरदिशि ब्रह्ममण्डपं, दक्षिणदिशि ईशमण्डपं च कल्पयेदिति चत्वारो मण्डपाः, तेषां नामानि, स्थानानि च निर्दिश्यन्ते।

किं च —

'मण्डपस्य त्रिभागैके मध्यभागे तु वेदिका।
रत्निमात्रसमुत्सेधा दर्पणोदरसंनिभा ।।
कुण्डानि परितः कुर्यान्मानुषे तु पदे क्रमात्।
युगाश्रं योनिचापं च त्र्यश्रं वृत्तमथाब्जकम् ।।
सप्ताश्रं चैव वस्वश्रमिन्द्रादिषु प्रकल्पयेत्।
प्राक्कुण्डईशयोर्मध्ये वृत्तं प्राधानिकं कुरु ।।
हर्म्याग्रे मण्डपं ह्येवं कारयेल्लक्षणैः सह।
अन्येषां मण्डपे ह्येवं कुर्यात्सर्वं युगाश्रकम् ।।

नवाग्न्यायतनं वापि पञ्चाग्न्यायतनं तु वा।
पञ्चाग्न्यायतनं चेत्तु विदिशासु विवर्जयेत्॥' (८-१२)

इत्येतेषु श्लोकेषु प्रासादपूर्वदिशि कल्पिते स्कन्दमण्डपे मध्ये सलक्षणां वेदिकां प्रकल्प्य, तस्या बाह्ये पूर्वाद्यष्टदिक्षु क्रमेण चतुरश्रयोनिधनुस्त्र्यश्रवृत्तपद्मसप्ताश्रवस्वश्राख्यान्यष्ट कुण्डानि, तथेन्द्रेशानदिशोर्मध्ये प्रधानं वृत्तकुण्डं च कुर्यादिति नवकुण्डकल्पनप्रकारोऽभिधीयते। अन्येषु प्रासादपश्चिमोत्तरदक्षिणभागेषु कल्पितेषु विष्णुब्रह्मेशमण्डपेषु नवकुण्डान्यपि चतुरश्राणि कर्तव्यानि। सर्वत्र मण्डपेषु पञ्चकुण्डानि वा कुर्यादिति विकल्पश्च श्रूयते। तत्र यदि पञ्चकुण्डान्येव क्रियन्ते, तदा कोणेष्वाग्नेयादिषूक्तानि कुण्डानि वर्जयेदिति च सूच्यते। एवं च रौरवोत्तरे प्रासादप्रतिष्ठाविधौ पञ्चमण्डपाः, पूर्वकारणे चत्वारो मण्डपाः, रौरवोत्तरे पञ्च कुण्डानि, पूर्वकारणे नवकुण्डान्यथवा पञ्चकुण्डानीति विकल्पश्च श्रूयते। कुण्डानामाकारविषयेऽप्युभयत्र भेदो विद्यते। एवं मण्डपविषये तत्र कुण्डकल्पने च रौरवोत्तरपूर्वकारणयोर्भेदोऽवगन्तव्यः।

पूर्वकामिके एकोनसप्ततितमे पटले —

'प्रासादस्याग्रतः कुर्यान्मण्डपं वेदिकान्वितम्।
नवकुण्डसमायुक्तं पञ्चकुण्डयुतं तु वा॥' (२)

इत्येतच्छ्लोके वेदिकासहित एक एव मण्डपः प्रासादाग्रे कर्तव्य इत्युच्यते। कुण्डविषये पञ्च वा नव वा कर्तव्यानीति विकल्पः श्रूयते। कुण्डानामाकारो नोक्तः।

रौरवोत्तरे मध्यमण्डपवेद्यां नवशक्तिसहितां ईशानमूर्तिं नवकुम्भेषु विन्यस्यावाह्यार्चयेत्। एवं पूर्वमण्डपवेद्यां विद्येश्वराष्टकयुक्तां तत्पुरुषमूर्तिं, तथा दक्षिणमण्डपवेद्यां गणेश्वराष्टकयुक्तामघोरमूर्तिं, पश्चिममण्डपवेद्यां लोकपालाष्टकसमन्वितां सद्योजातमूर्तिम्, उत्तरमण्डपवेद्यां धर्माधर्माद्यष्टकयुक्तां वाममूर्तिं नवसु कुम्भेषु विन्यस्यावाह्यार्चयेदिति कुम्भाधिवासप्रकारो निरूप्यते।

अस्मिन्विषये पूर्वकारणे सप्ततितमे पटले —

'स्कन्दस्य मण्डपे वेद्यां शिवकुम्भं तु मध्यमे।
विन्यस्त्वा तस्य मध्ये तु पञ्चरत्नं विशेषतः॥
ध्यात्वा सदाशिवं तस्मिञ्शिवमन्त्रं तु विन्यसेत्।
वर्धनीं तस्य वामे तु तस्यां हेमं विनिक्षिपेत्॥
ध्यात्वा मनोन्मनीं तस्यां तन्मूलेनैव विन्यसेत्॥
स्कन्दकुम्भं न्यसेद्धीमाञ्शिवकुम्भस्य दक्षिणे।'
'अभितस्तु घटानष्टौ पूर्वाशादिषु विन्यसेत्।
कुमारं षण्मुखं चैव सुब्रह्मण्यं सुराष्ट्रजम्॥
सेनापतिं सुरेशं च कार्तिकेयं गुहं क्रमात्।
पूर्वादिषु घटेष्वेतान्न्यसेत्तद्बीजमन्त्रकैः॥' (२५-२७; ३०, ३१)

इत्येतेषु श्लोकेषु प्रासादपूर्वदिङ्मण्डपे स्कन्दाख्ये वेद्यां मध्ये शिवकुम्भं तद्वामे वर्धनीं च स्थापयित्वा तयोः क्रमेण सदाशिवं, मनोन्मनीं च न्यसेत्। स्कन्दकुम्भं शिवकुम्भस्य दक्षिणभागे स्थापयित्वा, तत्कुम्भमभितः पूर्वाद्यष्टदिक्षु कुम्भानष्टौ स्थापयेत्। तत्र स्कन्दकुम्भे स्कन्दम् अभितोऽष्टकुम्भेषु कुमार-षण्मुख-सुब्रह्मण्य—सुराष्ट्रज-सेनापति-सुरेश-कार्तिकेय-गुहान् विन्यसेदिति पूर्वदिग्वेदिकास्थाप्यानां कुम्भानां तदधिदेवतानां नामानि च निर्दिष्टानि। एवं च पूर्वकारणे पूर्वदिशि शिवकुम्भवर्धन्यौ, तथा स्कन्दकुम्भः, तमभितोऽष्ट कुम्भा भवन्तीति एकादश कुम्भाः सिध्यन्ति। रौरवोत्तरे तु पूर्वमण्डपे विद्येश्वराष्टकसहिततत्पुरुषमूर्तिः नवकुम्भेषु स्थापनीयेत्युच्यते। रौरवोत्तरे नव कुम्भा एवात्र विषये प्रोक्ताः। तत्र न्यस्तव्या मूर्तयोऽपि विजातीयाः।

एवं पूर्वकारणे सप्ततितमे पटले —

'ईशस्य मण्डपे वेद्यां स्थण्डिले परितो न्यसेत्।
प्रधानकुम्भं न्यस्त्वा तु दक्षिणामूर्तिरूपकम्॥
ध्यात्वा महेशबीजं तु विन्यसेद्घटमध्यमे।
परितोऽष्टघटेष्वेतान्भवादीन्पूर्वतो यजेत्॥
भवं शर्वं तथेशानं पशुपतिं रुद्रमेव च।
उग्रं भीमं महादेवं यजेत्पूर्वादितः क्रमात्॥
गन्धादिभिर्यजेद्धीमानीशानेनैव मन्त्रतः।
अभितः कलशानष्टौ शक्रादिषु च विन्यसेत्॥
विद्येशानां स्वबीजैश्च न्यस्त्वा संपूजयेद्धृदा।' (३२उ०-३६)

इत्येतेषु श्लोकेषु प्रासाददक्षिणमण्डपे ईशसंज्ञके स्थापनीयाः कुम्भास्तदधिदेवताश्च प्रोच्यन्ते। तत्र दक्षिणामूर्तिकुम्भं वेद्यां मध्ये स्थापयित्वा तत्र तं यजेत्। तं परितोऽष्टकुम्भान्स्थापयित्वा तत्र भवाद्यष्टमूर्तीर्यजेत्। तत्कुम्भान्परितोऽष्टकुम्भान्स्थापयित्वा तत्राष्टौ विद्येशान्यजेदिति कुम्भाधिवासप्रकारो निरूप्यते। रौरवोत्तरे दक्षिणदिङ्मण्डपवेद्यां गणेश्वराष्टकसहितामघोरमूर्तिं नवकुम्भेषु विन्यस्यार्चयेदित्यच्यते। पूर्वकारणे दक्षिणमण्डपे दक्षिणामूर्तिकुम्भस्तमभितो भवाद्यष्टमूर्तिकुम्भाः, तत्कुम्भान्परितोऽष्टविद्येश्वरकुम्भा इति सप्तदशकुम्भाः सिध्यन्ति। कुम्भाधिदेवताश्च रौरवोत्तरप्रोक्तेभ्यो विजातीयाः। रौरवोत्तरेऽत्र विषये नवैव कुम्भाः प्रोक्ता इति भेदः।

एवं पूर्वकारणे सप्ततितमे पटले —

'विष्णुमण्डपके वेद्यां स्थण्डिलोपरि मध्यमे।
प्रधानकुम्भं विन्यस्त्वा तन्मध्ये विष्णुरूपकम्॥
ध्यात्वा बीजं न्यसित्वा तु गन्धादिभिर्यजेद्धृदा।
अभितस्तु घटानष्टौ शक्रादिषु च विन्यसेत्।
संकर्षणश्च प्रद्युम्नो वासुदेवोऽनिरुद्धकः।
रामश्चैवाच्युतश्चैव नारसिंहश्च वामनः॥
क्रमेणैतानि सर्वाणि अष्टकुम्भेषु विन्यसेत्। (३७-४० पू०)

इत्येतेषु श्लोकेषु प्रासादपश्चिममण्डपवेदिकायां स्थापनीयाः कुम्भास्तदधिदेवताश्चाभिधीयन्ते। तत्र विष्णुमण्डपाख्ये पश्चिममण्डपे वेद्यां मध्ये प्रधानकुम्भं स्थापयित्वा, तत्र विष्णुमर्चयेत्। तत्कुम्भं परितोऽष्टकुम्भान् पूर्वाद्यष्टदिक्षु स्थापयित्वा, तत्र संकर्षण-प्रद्युम्न-वासुदेव-अनिरुद्ध-राम-अच्युत-नारसिंह-वामनानष्ट विन्यस्यावाह्यार्चयेदिति कुम्भाधिवासप्रकारो न्यरूपि। पूर्वकारणे पश्चिमदिग्वेदिकायां नव कुम्भा एव स्थाप्यत्वेन निर्दिष्टाः। रौरवोत्तरेऽपि पश्चिमदिग्वेदिकायां नवैव कुम्भाः स्थापनीया इत्युच्यते। कुम्भसख्याया विषये भेदो नास्ति। अधिदेवताविषये रौरवोत्तरे लोकपालाष्टकसहिता सद्योजातमूर्तिः। पूर्वकारणे संकर्षणाद्यष्टमूर्तिसहिता विष्णुमूर्तिरिति भेदः।

एवं पूर्वकारणे सप्ततितमे पटले —

'ब्रह्ममण्डपके वेद्यां स्थण्डिलोपरि मध्यमे।
प्रधानकुम्भं विन्यस्त्वा तन्मध्ये ब्रह्मरूपकम्॥
ध्यात्वा बीजं न्यसित्वा तु पूजयेत्पुरुषेण तु।
अभितस्तु घटानष्टौ इन्द्रादिषु क्रमान्न्यसेत्॥
त्रयीमयं त्रिमूर्तिं च पद्माक्षं पद्मयोनिकम्।
चतुर्मुखं च धातारं पितामहमजं तथा॥

तत्तन्मन्त्रं क्रमान्न्यस्त्वा ईशानेनैव पूजयेत्।' (४०उ०–४३)

इत्येतेषु श्लोकेषु प्रासादोत्तरमण्डपे ब्रह्ममण्डपाख्ये वेदिकायां स्थापनीयाः कुम्भास्तदधिदेवताश्चोच्यन्ते। वेद्यां मध्ये प्रधानकुम्भं विन्यस्य ब्रह्माणं पूजयेत्। तत्कुम्भं परितोऽष्टकुम्भान् क्रमेण पूर्वाद्यष्टदिक्षु स्थापयित्वा तेषु त्रयीमय-त्रिमूर्ति-पद्माक्ष-पद्मयोनिक-चतुर्मुख-धातृ-पितामह–अजान् विन्यस्यावाह्य यथावदर्चयेदिति कुम्भाधिवासप्रकारः प्रत्यपादि। अत्रापि कुम्भसंख्याविषये भेदाभावेऽपि कुम्भाधिदेवताविषये रौरवोत्तरे धर्माधर्माद्यष्टकसमन्विता वाममूर्तिः, पूर्वकारणे त्रयीमयाद्यष्टकसहितब्रह्ममूर्तिरिति नितरां भेदो वर्तते। पूर्वकारणे पूर्वादिचतुर्षु मण्डपेषु स्थापनीयानां कुम्भानां संख्या षट्चत्वारिंशत्। रौरवोत्तरे पूर्वादिचतुर्षु मण्डपेषु षट्त्रिंशत्कुम्भाः। मध्यमण्डपे नव कुम्भाः स्थापनीया इत्युक्तत्वात् कुम्भसंख्या पञ्चचत्वारिंशद् भवति।

पूर्वकामिके एकोनसप्ततितमे पटले —

'मध्यमे शिवकुम्भं तु वर्धनीसहितं न्यसेत्।
दिङ्मूर्तिसंख्यया कुम्भांस्तद्बहिः परितो न्यसेत्॥ (९)

इत्यस्मिञ्श्लोके मध्यमे वर्धनीसहितः शिवकुम्भः, तद्बहिः परितो दिङ्मूर्तिसंख्यया कुम्भाः स्थापनीया इत्युच्यते। एवं कुम्भाधिवासविषये साजात्यवैजात्यमधिगन्तव्यम्।

होमः

रौरवोत्तरे होमद्रव्यविषये समिद्घृतचरुक्षीरयववेणुप्रियङ्गुलाजसर्षपमाषतिलमधुगुला इति त्रयोदश द्रव्याणि विधीयन्ते।

पूर्वकारणे सप्ततितमे पटले —

'समिदाज्यचरूँल्लाजान्सर्षपं च यवं तिलान्।
आढकं शालिमाषं च निष्पावं च क्रमेण तु॥' (४७ उ०–४८ पू०)

इत्यत्रैकादश द्रव्याणि प्रोक्तानि।

वीरागमेऽष्टषष्टितमे पटले —

'समिदाज्यचरूँल्लाजान्सर्षपांश्च यवांस्तिलान्।
वेणुमाषं च मुद्गं च शिम्बं चैकादशं स्मृतम्॥' (३२ उ०–३३पू०)

इति प्रकारान्तरेणैकादश द्रव्याणि प्रोच्यन्ते।

सन्तानसंहितायां त्रयोविंशतितमे पटले —

'समिदाज्यचरूँल्लाजान्सर्षपांश्च यवांस्तिलान्॥ (२१पू०)

इति सप्त द्रव्याण्यभिधीयन्ते ।

पूर्वकामिके एकोनसप्ततितमे पटले —

'समिदाज्यचरू लाजतिलसस्येन्दुवैणवाः।' (१४उ०)

इति सप्त द्रव्याणि होम्यत्वेन निर्दिश्यन्ते। एवं पञ्चमपटलस्थविषयाणां साजात्यवैजात्यमवगन्तव्यम्।

रौरवोत्तरे षष्ठसप्तमाष्टमपटलेषु प्रासादप्रतिष्ठातः पृथक्कृत्य दिङ्मूर्तिविषये चतुर्मूर्त्यष्टमूर्तिपञ्चमूर्तिभेदानां प्रतिष्ठाविधिरभिधीयते। एवमागमान्तरेषु दिङ्मूर्तीनां प्रथक्प्रतिष्ठाविधिकथनं न दृश्यते। षष्ठसप्तमाष्टमपटलविषया यथावत्पटलार्थसंग्रहे प्रतिपाद्यन्ते। पटलत्रयेऽपि मूर्तीनां कुम्भाम्भःसंप्रोक्षणानन्तरं मूर्तेरग्रे मेखलात्रयसहितं शिलाभिरिष्टकाभिर्वा अर्चनापीठं

प्रकल्प्य, तत्रापि कुम्भशेषोदकैः संप्रोक्षणं कृत्वा, तत्र नित्यपूजा विधेयेत्युच्यते। अयं विषयो विशिष्य गणनीयो भवति। होमविषये पटलत्रयेऽप्येकादश द्रव्याणि होम्यत्वेन निर्दिश्यन्ते।

रौरवोत्तरे प्रासादप्रतिष्ठाविधौ नयनोन्मीलन-जलाधिवास-शयनाधिवास-रत्नन्यासविधयो नैव प्रोक्ताः। एवमेव उत्तरकारणे नवतितमे पटले —

'जलाधिवासनं चैव शयनारोहणं तथा।
रत्नन्यासं विना चैव नयनोन्मीलनं विना॥ (११उ०, १२)
शेषं तु पूर्ववत्कल्प्य'

इत्यत्र जलाधिवासशयनारोहणरत्नन्यासनयनोन्मीलनकर्माणि न कर्तव्यानीत्युच्यते।

पूर्वकामिके एकोनसप्ततितमे पटले —

तदा प्रासाददेहस्थबेराणां दृष्टिमोचनम्।
मध्वाज्यधान्यगोविप्रकन्यानां दर्शनं द्विजाः॥
तत्तद्धृदयमन्त्रेण कृत्वा संप्रोक्ष्य गव्यतः। (४, ५पू०)

इत्यत्र प्रासाददेहस्थमूर्तीनां नयनोन्मीलनं कर्तव्यमित्युच्यते।

पूर्वकारणे सप्ततितमे पटले —

'प्रागुक्तविधिना कुर्यान्मूर्तीनामक्षिमोचनम्।
जलाधिवासनं नोक्तं पुण्याहं वाचयेत्ततः॥' (५उ०, ६पू०)

इत्यत्र मूर्तीनामक्षिमोचनं विधेयम्। जलाधिवासो नेति च स्पष्टमुच्यते। रौरवोत्तरे परं प्रासादप्रतिष्ठातः पृथक्कृत्य षष्ठसप्तमाष्टमपटलेषु दिङ्मूर्तीनां प्रतिष्ठाविधिः प्रतिपाद्यते। तत्रापि नयनोन्मीलनकर्म नोक्तमिति भेदोऽवगन्तव्यः।

रौरवोत्तरे चतुर्थपटले दिङ्मूर्तिविषये प्रासादस्य पादभागेऽर्धमण्डपदक्षिणभित्तौ कल्पिते विमाने विनायकस्थापनं कर्तव्यमित्युक्तम्। नवमपटले विनायकस्य उक्तस्थाने पृथगालयं निर्माय प्रतिष्ठा करणीयेत्युच्यते। एवं च विनायकालयः शिवप्रासादेऽर्धमण्डपदक्षिणे कल्पनीयः। अथवा पृथगालयनिर्माणविषये यानि स्थानान्युक्तानि तेषु वा कल्पनीय इति सिध्यति। आगमान्तरेषु विनायकस्थानं बहुधाभिधीयते।

उत्तरकामिके पञ्चचत्वारिंशत्तमे पटले —

'पुरादावष्टदिक्ष्वन्ते वान्तराले तदालयः।
शिवधाम्न्यष्टदिक्ष्विष्टस्तद्देशो मण्टपादिषु॥
चैत्यवृक्षादिदेशेषु तन्मूले वाखिलालये।
आपणे वाथ रथ्यायां गृहे वा यत्र कुत्रचित्॥' (१, २)

इति विनायकालयस्थानानि बहूनि निर्दिश्यन्ते।

एवं पूर्वकारणे सप्तपञ्चाशत्तमे पटले —

'ग्रामे च नगरे चैव पत्तने खेटकेऽपि च॥
पुरे वा कुब्जके वापि विशेषाद्राजधानिके।
एतेषु कल्पयेद्धीमान्विघ्नेशस्यालयं क्रमात्॥'
'वीथ्यग्रे वीथिमध्ये वा चैत्यवृक्षादिकेषु वा॥' (२उ०—३; ६उ०)

इति विनायकस्यालयस्थानानि प्रोक्तानि।

तथा वीरागमे अष्टपञ्चाशत्तमे पटले—

'ग्रामे वा नगरे वापि पत्तने खेटकेऽपि वा।
प्रासादं कारयेत्तत्र शास्त्रदृष्टेन कर्मणा॥' (४)

इति कारणागमप्रोक्तेषु स्थानेषु कतिचन प्रोच्यन्ते।

अचिन्त्यविश्वसादाख्ये त्रिपञ्चाशत्तमे पटले—

'आरामे चालये वापि पुण्यदेशे मनोरमे।
आत्मार्थं च परार्थं च स्थापनं च विधीयते॥' (६)

इत्यात्मार्थे परार्थे च विघ्नेशस्यालयस्थानं कथ्यते।

एवमजितागमे एकोनपञ्चाशत्तमे पटले—

'तस्य प्रतिष्ठायोग्यं यत्स्थानं देवालयेषु च।
ग्रामादौ पश्चिमे भागे दक्षिणे वा प्रकल्पयेत्॥
लिङ्गस्थापनयोग्यं यत्स्थानं पूर्वमुदाहृतम्।
तत्रापि स्थापनं कुर्यात्' (१५, १६)

इत्यत्र देवालयेषु ग्रामे च पश्चिमे दक्षिणे वा भागे, तथा लिङ्गस्थापनयोग्येषु स्थानेषु च विनायकालयः कल्पनीय इत्युच्यते। एवं विनायकस्य स्थापनयोग्यस्थानमागमेषु बहुधा प्रोच्यते।

रौरवोत्तरे विनायकप्रतिष्ठायां यागार्थं मण्डपं कृत्वा, तन्मध्ये सलक्षणां वेदिकां निर्माय, तस्या बाह्ये चतुर्दिक्षु चतुरश्रधनुर्वृत्तत्रिकोणाख्यानि चत्वारि कुण्डानि कुर्यादित्युच्यते।

अत्र विषये पूर्वकारणे सप्तपञ्चाशत्तमे पटले—

'भवनस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम्।
धर्मरन्ध्राष्टहस्तं वा कलास्तम्भसमन्वितम्॥
मण्डपं तु त्रिधा भज्य मध्यभागे तु वेदिकाम्॥
रत्निमात्रसमुत्सेधां दर्पणोदरसंनिभाम्॥
कुण्डानि कल्पयेत्पश्चान्मानुषे तु पदे हितम्।
नवाग्न्यायतनं वापि पञ्चाग्न्यायतनं तु वा॥
दिशास्वम्बुजकुण्डानि विदिक्ष्वश्वत्थपत्रवत्।
प्राक्कुण्डवेदिकामध्ये वृत्तं प्राधान्यकं कुरु॥
पञ्चाग्न्यायतनं चेत्तु योन्याकाराणि वर्जयेत्।' (३२उ०–३६)

इत्यत्र मण्डपे वेदिकां कृत्वा, तस्या बाह्ये चतुर्दिक्षु पद्मकुण्डानि, कोणेषु योनिकुण्डानि कुर्यात्। प्राक्कुण्डवेदिकयोर्मध्ये वृत्तं प्रधानकुण्डं कल्पयेत्। पञ्चकुण्डपक्षे योनिकुण्डानि वर्जयेदिति नवकुण्डपक्षः पञ्चकुण्डपक्षश्च विकल्पेन प्रोक्तः।

अजितागमे एकोनपञ्चाशत्तमे पटले—

'दक्षिणे चोत्तरे वापि तत्पूर्वं मण्डपं भवेत्।
कुण्डानि परितो दिक्षु विदिक्षु परितः सुधीः॥
चतुरश्रं धनुर्वृत्तं त्रिकोणं च यथाक्रमम्।
विदिक्षु चतुरश्राणि कुण्डानि परिकल्पयेत्॥
शक्रशांकरयोर्मध्ये प्रधानं पद्ममेव हि।
संपत्तौ नवभिर्होमैरलाभे पञ्चभिर्भवेत्॥
स्थापने पञ्चहोमे स्यादैशान्यां तत्प्रधानकम्।' (१७–२०पू०)

इत्यत्र नवकुण्डपक्षः पञ्चकुण्डपक्षश्च विकल्पेन विधीयते। कारणाजितयोर्यद्यपि नवकुण्डानि पञ्चकुण्डानि वा कुर्यादिति पक्षद्वयमभिधीयते। तथापि कुण्डाकारविषये प्रधानकुण्डविषयेऽपि वैजात्यं दृश्यते। रौरवोत्तरे चतुष्कुण्डमेव विहितमिति वैजात्यम्।

अत्र विषये सन्तानसंहितायां सप्तविंशे पटले—

'प्रासादस्यैव पुरतो मण्डपं पञ्चहस्तकम् ।
त्रिहस्तं वाथ देवेशि मण्डपं कारयेत्ततः ॥
ब्रह्मांशे वेदिकां कुर्याद्रत्निमात्रोच्छ्रितां शुभाम् ।
तस्या बाह्ये तु परितः पञ्च कुण्डानि कारयेत् ॥
अथवा एककुण्डं वा ईशान्यामष्टकोणकम् ।' (६–८पू०)

इत्येतेषु श्लोकेषु प्रासादस्य पुरतो मण्डपं कृत्वा तन्मध्ये वेदिकां विधाय, तस्या बाह्ये परितः पञ्च कुण्डानि कुर्यात् । अथवा ऐशान्यामष्टकोणकुण्डमेकं विधेयमिति पञ्चकुण्डपक्ष एककुण्ड-पक्षश्च वर्ण्यते । रौरवोत्तरे तु चतुष्कुण्डमेव विधीयते इति कुण्डविषये वैजात्यम् ।

रौरवोत्तरे कुम्भाधिवासविधौ परिवारकुम्भेष्वष्टसु विघ्नेश्वर-महाकर्ण-गजवक्त्र-महोदर-एकदन्त-महाकाय-विनायक-गणाधिपा इत्यष्टमूर्तीरावाह्याभ्यर्चयेदित्युच्यते ।

अस्मिन्विषये पूर्वकारणे सप्तपञ्चाशत्तमे पटले —

'वरदं पूर्वकुम्भे तु वीरमाग्नेयकुम्भके ।
विघ्नेशं दक्षिणे कुम्भे नैर्ऋत्यां तु गजाननम् ॥
इक्षुप्रियं तु वारुण्यां गजकर्णं तथानिले ।
विनायकं तु सौम्यायां लम्बोष्ठं त्वीशके यजेत् ॥' (६०, ६१)

इति दृश्यते ।

एवं दीप्तागमे चतुःसप्ततितमे पटले —

'वरदं पूर्वदेशे तु वीरमाग्नेयगोचरे ।
विघ्नेशं दक्षिणे चैव नैर्ऋत्यां च गजाननम् ॥
इक्षुप्रियं तु वारुण्यां गजकर्णं तथानिले ।
विनायकं तु सौम्यायां लम्बोष्ठमीशगोचरे ॥' (५२, ५३)

इत्यस्ति ।

पूर्वकारणदीप्तयोरष्टकुम्भाधिपानां नामैकरीत्या दृश्यते । रौरवोत्तरे त्वन्यथा दृश्यत इति वैजात्यं स्पष्टम् ।

अस्मिन्विषये अजितागमे एकोनपञ्चाशत्तमे पटले —

'ततश्च वरदं वीरं विघ्नेशं च गजाननम् ।
भक्ष्यप्रियं गजकर्णं लम्बोष्टं विघ्ननाशकम् ॥
पूर्वादिष्वभितःस्थेषु घटेष्वष्टसु विन्यसेत् ।' (४५उ०, ४६)

इत्यष्टकुम्भाधिपानां नामानि निर्दिश्यन्ते । पूर्वाग्नेयदक्षिणनैर्ऋताधिपानां नामविषये पूर्वकारण-दीप्त-अजितागमेषु साजात्यमस्ति । वारुणाधिपस्य नाम 'इक्षुप्रिय' इति पूर्वकारणदीप्तयोर्दृश्यते । अजिते 'भक्ष्यप्रिय' इति व्यत्यस्तम् । अनिलदिगधिपस्य नाम 'गजकर्ण' इति पूर्वकारणदीप्ताजि-तेषु त्रिष्वपि समानमेव भवति । उत्तरेशदिगधिपयोर्नामविषये पूर्वकारणदीप्तयोः साम्यं दृश्यते । अजिते तु 'लम्बोष्ठविघ्ननाशकौ' इति भेदेन नामद्वयं दृश्यते । रौरवोत्तरे तु सर्वाण्यपि नामानि व्यत्यस्तानि भवन्ति ।

सन्तानसंहितायां सप्तविंशतितमे पटले —

'अभितः कलशानष्टौ विन्यसेत्स्वस्वमूलतः ।
गजाननं गजकर्णं गजहस्तं मदोत्कटम् ॥
लम्बोदरं महोदरं विघ्नेशं गणनायकम् ।' (१२, १३पू०)

इत्येतत्सार्धश्लोके परिवारकुम्भाधिपानां नामानि दृश्यन्ते । एतानि नामानि रौरवोत्तरनिर्दिष्ट-

नामभ्यो भिन्नान्येव। विघ्नेश-गजानन-गजकर्णेति नामत्रयं पूर्वकारणदीप्ताजितेषु यद्यप्यस्ति। तथापि दिगधिपविषये व्यत्यस्तान्येव तानि नामानि भवन्ति।

उत्तरकामिके पञ्चचत्वारिंशत्तमे पटले —

'आमोदश्च प्रमोदश्च सुमुखो दुर्मुखस्तथा।
अविघ्नो विघ्नराजश्च भक्ष्याशी पञ्चहस्तकः॥
एतेऽष्टमूर्तिपाः ख्यातास्त्वन्यथा च निगद्यते।
हस्तिवक्त्रः प्रलम्बोष्ठो विघ्नेशश्च गणाधिपः॥
विनायकैकदन्तौ च भक्ष्यप्रियोऽहिमेखलः।
विघ्नेश्वरनिभा एते विघ्नेशस्याष्टमूर्तयः॥'
'परिवारघटेष्वेवं हस्तिवक्त्रादिकं न्यसेत्।
आमोदप्रमुखान्वापि' (१२उ०–१५पू०; ८२)

इत्येतेषु श्लोकेषु परिवारकुम्भाधिपानां नामानि द्विधा प्रोक्तानि। आमोदादिनामानि पूर्वकारण-दीप्ताजितसंतानसंहितारौरवोत्तरेषु न दृश्यन्ते। हस्तिवक्त्रादिमध्यपठितेषु गणाधिप-विनायकैक-दन्तेति नामत्रयं रौरवोत्तरे दृश्यते। दिगधिपविषये तु वैजात्यमस्ति। एवं विघ्नेशविनाय-केति नामद्वयं पूर्वकारणदीप्तयोर्दृश्यते। विघ्नेशभक्ष्यप्रियेति नामद्वयमजितागमे विद्यते। विघ्नेशेति नाम परं सन्तानसंहितायां दृश्यते।

सुप्रभेदेऽस्मिन्विषये क्रियापादे त्रिचत्वारिंशत्तमे पटले —

'आवृतान्कलशानष्टौ लोकपालादिकान्क्रमात्।' (२४ पू०)

इत्यत्र परिवारघटाधिपा अष्टदिक्पाला इति नितरां वैजात्येन प्रोच्यते। एवं परिवारघटाधिप-विषये साजात्यवैजात्यमधिगन्तव्यम्।

रौरवोत्तरे विघ्नेश्वरप्रतिष्ठायामेकादश द्रव्याणि होम्यत्वेन निर्दिश्यन्ते। अस्मिन्विषये पूर्व-कारणे सप्तपञ्चाशत्पटले —

'समिदाज्यचरूँल्लाजान्सक्तुगौलमपूपकम्।
प्रियङ्गुं कोद्रवं चैव पृथुकं पनसं तथा।' (७४उ०–७५पू०)

इत्यत्र यद्यपि रौरवोत्तरवदेकादश द्रव्याण्येव प्रोक्तानि। तथापि सक्तुगौलापूपककोद्रवपृथुकपन-साख्यानि षड्द्रव्याणि रौरवोत्तरप्रोक्तादन्यान्येव भवन्ति। अन्यानि पञ्च समिदाज्यचरुलाज-प्रियङ्ग्वाख्यानि समानानि दृश्यन्ते।

एवमुत्तरकामिके पञ्चचत्वारिंशत्तमे पटले —

'आवाह्याभ्यर्च्य गन्धाद्यैर्द्रव्यैरेभिश्च तर्पयेत्।
समिद्घृतान्नलाजैश्च तिलापूपगुलैर्यवैः॥' (९२)

इति दृश्यते।

वीरागमेऽष्टपञ्चाशत्तमे पटले —

'समिदाज्यचरूँल्लाजान्सक्तुमाषयवांस्तथा।
कदलीफलसंयुक्तं होमयेद्देशिकोत्तमः॥' (८८ उ०–८९पू०)

इति विद्यते। एवं च उत्तरकामिकवीरागमयोरष्ट द्रव्याणि प्रोक्तानि। उत्तरकामिकोक्तौ गुला-पूपौ विना समिदाज्यचरुलाजतिलयवाख्यानि षड्द्रव्याणि रौरवोत्तरपूर्वकामिकयोः समानानि भवन्ति। क्षीरवेणुप्रियङ्ग्वाख्यानि त्रीण्यधिकानि रौरवोत्तरे। एवं वीरागमप्रोक्ते सक्तुकदली-फले रौरवोत्तरे न दृश्येते।

अजितागमेऽस्मिन्विषये एकोनपञ्चाशत्तमे पटले —

'होमयेयुः क्रमाच्चैव द्रव्याण्येतानि मन्त्रतः।
समिदाज्यचरूँल्लाजान्सक्तुकांश्च यवांस्तिलान्॥' (४९)

इति दृश्यते। अत्र सप्तद्रव्याणि होम्यत्वेन निर्दिष्टानि। रौरवोत्तरे त्वेकादशद्रव्याणीति भेदः। अजितनिर्दिष्टं सक्तु रौरवोत्तरे न दृश्यते।

सन्तानसंहितायां सप्तविंशतितमे पटले —

समिदाज्यचरूँल्लाजान्होमयेत्तु दिचक्षणः।' (१६)

इति चत्वार्येव द्रव्याणि निर्दिश्यन्ते। एवं होमद्रव्यविषये साजात्यवैजात्यमवधेयम्।

दशमपटले दक्षिणामूर्तिप्रतिष्ठायां शिलाभिर्लोहैर्वा प्रतिमां कारयेदित्युच्यते। अस्मिन्विषये सहस्रागमे पञ्चत्रिंशत्तमे पटले —

'पटे वा भित्तिचित्रे वा लोहजे वाश्मजेऽपि वा।' (३पू०)

इत्यत्र प्रतिमां लोहैः शिलाभिर्वा कुर्यात्। अथवा पटे वा भित्तौ वा विलिख्यतामिति विशेष उच्यते।

रौरवोत्तरे दक्षिणामूर्तिप्रतिष्ठायां प्रासादस्याग्रतो मण्डपं विधाय, तत्र सलक्षणां वेदिं कृत्वा, तस्या बाह्ये प्राच्यां चतुरश्रकुण्डम्, आग्नेय्यां योनिकुण्डं, दक्षिणदिशि अर्धचन्द्राकारकुण्डं, नैर्ऋते त्रिकोणकुण्डं, प्रतीच्यां वर्तुलकुण्डं, वायव्यां षडश्रकुण्डम्, उदीच्यां पद्मकुण्डम्, ऐशान्यामष्टकोण-कुण्डम्, ईशानेन्द्रदिशोर्मध्ये प्रधानं वृत्तकुण्डं कारयेदिति नवकुण्डविधिर्दृश्यते।

अस्मिन्विषये पूर्वकारणे षट्सप्ततितमे पटले —

आलयस्याग्रके वापि दक्षिणे वोत्तरेऽपि च।
द्वादशं दशहस्तं वा नवहस्तमथापि वा॥
विकारस्तम्भसंयुक्तं मण्डपं चतुरश्रकम्।
मध्यमे वेदिकां कुर्याद्गुणभागैकभागया॥
रत्निमात्रसमुत्सेधां दर्पणोदरसंनिभाम्।
कुण्डानि कल्पयेद्धीमान्मानुषे तु पदे हि तत्॥
वेदाश्रं शशिखण्डं च भूताश्रं तु गुणाश्रकम्।
महाशासु प्रकल्प्याथ कोणेष्वेव सरोरुहम्॥
शक्रशांकरयोर्मध्ये वृत्तं प्राधानिकं कुरु।' (२४-२८पू०)

इत्येतेषु श्लोकेषु मण्डपस्थानं प्रासादाग्रकेऽथवा प्रासाददक्षिणभागेऽथवोत्तरभागे वा कुर्यादिति विकल्पेन निर्दिश्यते। रौरवोत्तरे तु प्रासादाग्रतो मण्डपं कुर्यादित्युच्यते। एवं वेदिकायां मानुषे पदे नवकुण्डकल्पनप्रकारः कर्तव्यः। तत्र महाशासु क्रमेण वेदाश्र-अर्धचन्द्र-पञ्चाश्र-त्र्यश्रकुण्डानि कुर्यात्। कोणेषु चतुर्ष्वपि पद्मकुण्डं कुर्यादिति पूर्वाद्यष्टदिक्षु कुण्डकल्पनप्रकारः पूर्वकारणे प्रोच्यते। रौरवोत्तरे तु चतुर्दिक्षु क्रमेण वेदाश्रार्धचन्द्रवृत्तपद्मकुण्डानि कल्पनीयानीत्युच्यते। कोणेषु चतुर्षु रौरवोत्तरे क्रमेण योनित्रिकोणषडश्राष्टकोणाख्यानि कुर्यादित्युच्यते। एवं पूर्वाद्यष्ट-दिक्षु कुण्डकल्पनविषये पूर्वकारणरौरवोत्तरयोर्नितरां भेदो वर्तते। पूर्वकारणे इन्द्रेशानदिशो-र्मध्ये वृत्तकुण्डं प्रधानं कुर्यादिति दृश्यते। रौरवोत्तरेऽपि तथैवोक्तमिति तत्र साजात्यं विद्यते। एवं नवकुण्डविधौ पूर्वकारणरौरवोत्तरयोः साजात्यवैजात्यमवगन्तव्यम्।

अस्मिन्विषये दीप्तागमे षट्चत्वारिंशत्तमे पटले —

'प्रासादस्याग्रतः कुर्यान्मण्डपं दशहस्तकम्।
बिम्बाग्रे वाथ कर्तव्यं मण्डपं चेत्सलक्षणम्॥

चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ।
दर्भमालासमायुक्तं वितानैरुपशोभितम् ॥
मण्डपस्य त्रिभागैकं वेदिविस्तारमुच्यते ।
रत्निमात्रसमुत्सेधं दर्पणोदरसंनिभम् ॥
कुण्डानि परितः कुर्याच्चतुर्दिक्षु विशेषतः ।
चतुरश्रं तु पूर्वायां याम्यायामर्धचन्द्रकम् ॥
वृत्तं वै वारुणे भागे पद्मकुण्डं तु चोत्तरे ।
प्राक्कुण्डवेदिकामध्ये वृत्तं प्राधानिकं कुरु ॥' (१०–१४)

इत्येतेषु श्लोकेषु मण्डपस्थानविषये प्रासादाग्रेऽथवा बिम्बाग्रे वेति विकल्पो दृश्यते। तथा पञ्चकुण्डविधिश्च प्रोच्यते। तत्र पूर्वादिचतुर्दिक्षु क्रमेण चतुरश्र-अर्धचन्द्राकार-वृत्त-पद्मकुण्डानि कल्पयेत्। प्राक्कुण्डवेदिकयोर्मध्ये वृत्तकुण्डं प्रधानं कुर्यादिति दृश्यते। रौरवोत्तरे पूर्वकारणे च नवकुण्डपक्षो दीप्ते पञ्चकुण्डपक्ष इति भेदः स्पष्टः। सर्वत्रापि कुण्डाकारविषये भेदो विद्यते। प्रधानकुण्डं परं पूर्वकारणदीप्तरौरवोत्तरेषु त्रिष्वपि वृत्तकुण्डमिति साजात्यम्। उत्तरकामिके एकपञ्चाशत्तमे पटले, तथा पूर्वकारणे षट्सप्ततितमे पटले च मुनिभिः सहितस्य दक्षिणामूर्तेः प्रतिष्ठाविधिरभिधीयते। उभयत्रापि मुनीनामपि नेत्रोन्मीलनजलाधिवासशयनाधिवासकुम्भ-स्थापनकुम्भाभिषेकविधयः प्रतिपाद्यन्ते। तत्र उत्तरकामिके मुनीनां विषये रत्नन्यासविधिः सूच्यते। पूर्वकारणे तु मुनीनां रत्नन्यासो निषिध्यते। पूर्वकारणे पटलान्ते मुनिरहितस्य केव-लस्य दक्षिणामूर्तेरपि प्रतिष्ठाविधिः सूचितः। दीप्तागमे रौरवोत्तरे च केवलदक्षिणामूर्तेः प्रतिष्ठाविधिरुच्यते।

रौरवोत्तरे कुम्भाधिवासविधौ मण्टपे वेद्यां दक्षिणकोणपार्श्वे दक्षिणामूर्तिकुम्भं स्थापयित्वा, तत्रेशानमूर्तिं विन्यस्यावाह्यर्चयेत्। तत्कुम्भं परितोऽष्टकुम्भान्स्थापयित्वा तत्र क्रमेण तत्पुरुष-शर्व-घोर-कपर्दि-सद्य-ईश्वर-वाम-शिवाख्या अष्टौ मूर्तीर्विन्यस्यावाह्याभ्यर्चयेदिति नवकुम्भाधिवास-प्रकारो न्यरूपि।

अस्मिन्विषये उत्तरकामिके एकपञ्चाशत्तमे पटले —

'वर्धनीं विन्यसेद्धीमाञ्शिवकुम्भस्य चोत्तरे।
अभितो वसुकुम्भांस्तु विद्येशाधिष्ठितान्न्यसेत् ॥' (४९)

इत्यस्मिञ्श्लोके शिवकुम्भस्थापनं, तदुत्तरे वर्धनीन्यासः, शिवकुम्भं परितोऽष्टकुम्भस्थापनं तेषु विद्येशाष्टकन्यासश्च प्रोच्यते।

एवं पूर्वकारणे षट्सप्ततितमे पटले —

'बिम्बस्यैव शिरोभागे शिवकुम्भं च वर्धनीम्।
ससूत्रौ जलसंपूर्णौ सापिधानौ सकूर्चकौ ॥
सवस्त्रौ हेमरत्नाढ्यौ विन्यसेत्तु क्रमेण तु।
ध्यात्वा मूर्त्याकृतिं कुम्भे तज्जलं चैव विन्यसेत् ॥
ईशानेन तु संपूज्य पद्ममुद्रां प्रदर्शयेत्।
गौरीबीजं तु वर्धन्यां ध्यात्वा गौरीं न्यसेद्बुधः' ॥
'अभितस्तु घटानष्टौ चन्दनोदकपूरितान्।
सूत्रादिभिः समोपेतानिन्द्राशादिषु विन्यसेत्।
विद्येशानां स्वबीजानि कुम्भमध्ये क्रमान्न्यसेत्' ॥ (४२–४४; ४७उ०, ४८)

इत्येतेषु श्लोकेषु शिवकुम्भवर्धन्योः स्थापनप्रकारः, तत्र मूर्तिन्यासः, अभितोऽष्टकुम्भस्थापनं, तेषु

विद्येशाष्टकन्यासश्चाभिधीयते। एवं च परिवारघटेष्वष्टसु उत्तरकामिकपूर्वकारणयोर्विद्येशाष्टकन्यासः प्रतिपाद्यते। रौरवोत्तरे तत्र तत्पुरुष-शर्व-घोर-कपर्दि-सद्य-ईश्वर-वाम-शिवाख्यानामष्टमूर्तीनां न्यासः प्रतिपाद्यत इति भेदोऽवगन्तव्यः।

एवं दीप्तागमे षट्चत्वारिंशत्तमे पटले —

'शिरःस्थाने न्यसेत्कुम्भं दक्षिणामूर्तिदैवतम्।
अमितः कलशानष्टौ लोकपालाधिदेवतान्॥' (१९)

इत्येतच्छ्लोके मध्ये दक्षिणामूर्तिकुम्भं, बिम्बशिरःस्थाने स्थापयित्वा, तत्कुम्भं परितो लोकपालाधिदैवतान् कुम्भानष्ट स्थापयेदित्युच्यते।

एवं च दीप्तागमे परिवारघटेषु लोकपालाः पूज्यत्वेन निर्दिश्यन्ते। उत्तरकामिके पूर्वकारणे च विद्येशाः पूज्यत्वेन प्रोच्यन्ते। रौरवोत्तरे तत्पुरुषादयोऽष्टौ पूज्या इत्युच्यत इति वैजात्यम्।

रौरवोत्तरे दक्षिणामूर्तिप्रतिष्ठायां पूर्वोक्तत्रयोदश द्रव्याणि होम्यत्वेनाभिधीयन्ते।

अस्मिन्विषये उत्तरकामिके एकपञ्चाशत्तमे पटले —

'समिदाज्यचरूँल्लाजांस्तिलसर्षपवैणवान्।
जुहुयात्तु' (५२)

इत्यस्मिञ्श्लोके रौरवोत्तरे निर्दिष्टेषु त्रयोदशद्रव्येषु मध्ये सप्त द्रव्याण्येव होम्यत्वेन विधीयन्ते।

एवं दीप्तागमे षट्चत्वारिंशत्तमे पटले —

'समिदाज्यचरूँल्लाजांस्तिलसर्षपमाषकान्।
शतमर्धं तदर्धं वा जुहुयात्' (२४उ०, २५पू०)

इत्यत्र रौरवोत्तरोक्तत्रयोदशद्रव्येषु मध्ये सप्त द्रव्याणि होम्यत्वेन निर्दिष्टानि। उत्तरकामिके रौरवोत्तरोक्तानि क्षीरयवप्रियङ्गुमाषमधुगुलाख्यानि षड्द्रव्याणि न सन्ति। दीप्तेऽपि रौरवोत्तरोक्तानि क्षीरयववेणुप्रियङ्गुमधुगुलाख्यानि षड्द्रव्याणि न विद्यन्ते। एवं दशमपटले साजात्यवैजात्यमवगन्तव्यम्।

रौरवोत्तरे एकादशपटले शिवप्रासादे चेत् पश्चिमदिशि पृथगालयं कृत्वा, अथवा उक्तस्थानेषु पृथगालये विष्णुः स्थापनीय इत्युच्यते।

पूर्वकामिके सप्तषष्टितमे पटले — 'वरुणे विष्णुवासः स्यात्' (१५ पू०) इत्यत्र रौरवोत्तरवदेव पश्चिमदिशि स्थाप्य इति निर्दिश्यते।

रौरवे क्रियापादे षट्त्रिंशत्तमे पटले —

'ग्रामादिषु च मध्ये च दिशाष्टास्वन्तरालके।
सागराणां तु पार्श्वे वाप्यरण्ये नदितीरके॥
तटाकतीरोक्तदिशि कर्तव्यं हरिमन्दिरम्।' (१उ०–२)

इत्येतत्सार्धश्लोके ग्राममध्ये दिक्ष्वन्तराले सागरपार्श्वे ,नदीतीरे तटाकतीरेऽरण्ये वा हरिमन्दिरं कल्पयेदिति विष्णोः स्थानं बहुधा विधीयते।

रौरवोत्तरे विष्णोः प्रतिमां शिलादारुलोहैर्वा कुर्यादिति विकल्पेन प्रतिमाकरणद्रव्यमुक्तम्

अस्मिन्विषये वीरागमे —

'शिलालोहमृदा कुर्याच्छास्त्रदृष्टेन कर्मणा।' (टि. १२३ पृ० ३३)

इत्यत्र मृदापि कर्तव्या प्रतिमेति विशेषो दृश्यते। रौरवोत्तरोक्तदारुद्रव्यमत्र न निर्दिष्टम्।

सन्तानसंहितायां त्रयस्त्रिंशत्तमे पटले —

शिलालोहमयं रक्तं मृण्मयं वापि कारयेत्।' (७उ०)

इत्यत्र वीरागमोक्तवन्मृदपि द्रव्यत्वेन प्रोक्ता। अत्रापि रौरवोत्तरोक्तं दारुद्रव्यं न निर्दिश्यते।

अस्मिन्विषये रौरवे क्रियापादे षट्त्रिंशे पटले --

'कृत्वैवं प्रतिमां लोहैर्मृदा वा धातुजैरपि।' (७उ०)

इत्यत्र धातुजद्रव्यं प्रतिमाकरणे विशिष्योच्यते। अत्रापि रौरवोत्तरोक्तं दारुद्रव्यं नोक्तम्।

मतङ्गपारमेश्वरे क्रियापादे चतुर्दशपटले --

'कार्योऽश्वत्थतरोर्विष्णुः' (२३.उ०)

इत्यत्र अश्वत्थतरुणा कार्यो विष्णुरिति दारुविशेषो द्रव्यत्वेनोक्तः। अत्र रौरवोत्तरोक्तशिला-लोहद्रव्यं न निर्दिश्यते। एवं प्रतिमाकरणद्रव्यविषये भेदोऽधिगन्तव्यः।

रौरवोत्तरे प्रासादाग्रे चतुरश्रं मण्टपं प्रकल्प्य, तत्र सलक्षणां वेदिकां निर्माय, तस्या बाह्ये पूर्वादिचतुर्दिक्षु क्रमेण चतुरश्रधनुर्वृत्तत्र्यश्रकुण्डानि कुर्यादिति चतुष्कुण्डकल्पनप्रकारो विधीयते।

अस्मिन्विषये वीरागमे (टि. १२३ पृ० ३५)

'मण्टपं कारयेत्तत्र सप्ताष्टनवहस्तकम्।
मध्यमे वेदिकां कुर्यात्परितः कुण्डमुच्यते॥
दिशासु चतुरश्राणि वृत्तकुण्डं विदिक्षु च।
इन्द्रईशानयोर्मध्ये योन्याकारं भवेत्तथा॥'

इत्यनयोः श्लोकयोः नवकुण्डविधिरुच्यते।

सन्तानसंहितायां त्रयस्त्रिंशे पटले --

'मण्डपं कारयेत्तत्र सप्ताष्टनवहस्तकम्।
मध्यमे वेदिकां कुर्याद्रत्निमात्रसमुच्छ्रिताम्॥
तालमात्रोच्छ्रितां वापि दर्पणोदरवत्कृताम्।
वेदिबाह्ये तु परितो नव कुण्डानि कारयेत्॥
पूर्वे च दक्षिणे चैव पश्चिमे चोत्तरे तथा।
चतुरश्रकुण्डमित्युक्तमीशान्यामष्टकोणकम्॥
आग्नेय्यां निर्ऋतौ चैव वायव्ये तु तथैव च।
वृत्तं कुण्डं प्रतिष्ठाप्य त्रिमेखलसमन्वितम्॥
इन्द्रईशानयोर्मध्ये षडश्रं कुण्डमुच्यते।' (२५उ०-२९)

इत्येतेषु श्लोकेषु नवकुण्डकल्पनप्रकारोऽभिधीयते। वीरे सन्तानसंहितायामुभयत्रापि नवकुण्डान्येव कर्तव्यानीत्युच्यते। कुण्डानामाकारविषये भेदो विद्यते। यद्यपि मण्टपे वेदिकाया बाह्ये पूर्वादि-चतुर्दिक्षु चतुरश्रकुण्डं कर्तव्यमिति वीरसन्तानसंहितयोरुभयत्रापि दृश्यते। तथापि वीरे विदिक्षु वृत्तकुण्डं कल्पयेदित्युच्यते। सन्तानसंहितायां त्वाग्नेये नैर्ऋते वायव्ये च वृत्तकुण्डमैशान्या-मष्टकोणकुण्डं कल्पनीयमिति भेदेनोच्यते। इन्द्रेशानयोर्मध्ये योन्याकारकुण्डं कल्पयेदिति वीरा-गमे प्रोच्यते। सन्तानसंहितायां तत्र षडश्रकुण्डं कल्पनीयमित्युच्यत इति भेदोऽवगन्तव्यः। एवं वीरसन्तानसंहितयोर्नवकुण्डपक्षे साजात्यं वैजात्यं चास्तीति स्पष्टम्। रौरवोत्तरे तु चतुर्दिक्षु चतुरश्रधनुर्वृत्तत्र्यश्राख्यानि चत्वार्येव कुण्डानि कल्पनीयानीत्युच्यत इति वैजात्यं नितरां स्पष्टं भवति।

रौरवोत्तरे कुम्भाधिवासविषये मध्ये, पूर्वे, दक्षिणे, पश्चिमे, उत्तरे च पञ्च कुम्भान् स्था-पयित्वा, तत्र मध्यकुम्भे विष्णुं, पूर्वकुम्भे सहस्रशीर्षपुरुषं, दक्षिणकुम्भे सत्यं, पश्चिमकुम्भे अच्यु-तम्, उत्तरकुम्भे अनिरुद्धं चावाह्य स्वस्वनामभिरर्चयेदिति पञ्चकुम्भस्थापनप्रकारो विधीयते।

अस्मिन्विषये सन्तानसंहितायां त्रयस्त्रिंशे पटले --

'अभितः कलशानष्टौ विन्यसेत्साधिदैवतान्।

विष्णुश्च पूर्वतः स्थाप्यो महाविष्णुर्महानसे ॥
याम्ये चैव सदाविष्णुं निर्ऋतौ नारायणं तथा।
पश्चिमे वासुदेवं तु संकर्षणं तु वायवे ॥
प्रद्युम्नं चोत्तरे न्यस्य ईशान्यामनिरुद्धकम्।
स्वैः स्वैर्मन्त्रैश्च संस्थाप्य पूजयेच्छिवशास्त्रवित् ॥
सकूर्चान्सापिधानांश्च सवस्त्रान्हेमसंयुतान्।
प्रधानकुम्भमीशान्यां विन्यसेद्विष्णुमूलतः।
पार्श्वयोर्वर्धनी न्यस्या श्रीर्भूमिस्तत्र देवता ॥' (३३उ० — ३७)

इत्येतेषु श्लोकेषु परिवारघटेषु पूर्वाद्यष्टदिक्षु स्थापितेषु क्रमेण विष्णु-महाविष्णु-सदाविष्णु-नारायण-वासुदेव-संकर्षण-प्रद्युम्न-अनिरुद्धाख्यानष्ट विन्यस्यावाह्याभ्यर्चयेत्। ऐशान्यां विष्णुबीजेन प्रधानकुम्भं तत्पार्श्वयोर्वर्धन्यौ च स्थापयित्वा तत्र क्रमेण विष्णुश्रीभूमीर्देवतात्वेन विन्यस्यार्चयेदिति वर्धनीद्वयसहितप्रधानकुम्भस्थापनप्रकारो न्यरूपि। एवं चात्र नवकुम्भा वर्धनीद्वयं च स्थापनीया इति सिध्यति। रौरवोत्तरे पञ्चैव कुम्भाः। तत्र विन्यस्यानां देवतानां नामानि च विभिन्नानि।

अस्मिन्विषये वीरागमे (टि० १२३, पृ० ३६)

'अभितः कलशानष्टौ विन्यसेद्विष्णुबीजतः।
सवस्त्रान्सापिधानांश्च सहिरण्यान्सकूर्चकान् ॥
विष्णुं चैव महाविष्णुं सदाविष्णुं तथैव च।
नारायणं वासुदेवं संकर्षणं तथैव च ॥
प्रद्युम्नमनिरुद्धं च पूर्वाशादिषु विन्यसेत्।
स्वस्वनाम्नैव संस्थाप्य गन्धपुष्पादिनार्चयेत् ॥
दद्याद्गुलोदनं चैव ताम्बूलं दापयेत्ततः।'

इत्येतेषु श्लोकेषु परिवारघटानामष्टानां स्थापनविधिरुच्यते। अत्र पूर्वाद्यष्टदिक्षु कुम्भेषु देवतात्वेन न्यसनीयानामष्टानां देवतानां नामानि सन्तानसंहितायामुक्तवदेव दृश्यन्त इति परिवारकुम्भाधिपविषये वीरसन्तानसंहितयोः साजात्यं दृश्यते। वीरागमे प्रधानकुम्भतदीयवर्धनीस्थापनविषयकग्रन्था नोपलभ्यन्ते।

अस्मिन्विषये रौरवे क्रियापादे षट्त्रिंशे पटले —

'रुद्रसंख्यान्नवान्कुम्भान्सूत्रवस्त्राम्बुसंयुतान्।
सकूर्चान्हेमपुष्पाढ्यान्परितोऽष्टौ घटान्न्यसेत् ॥
त्रिषु मध्ये हरिं ध्यायेच्छ्रीभूमी दक्षिणोत्तरे।
वासुदेवं हरिं कृष्णमच्युतं चानिरुद्धकम् ॥
प्रद्युम्नं श्रीधरं देवं धरणीपतिमेव च।
शक्राद्यष्टघटेष्वर्च्य तत्तन्मूलेन पूजयेत् ॥' (२१-२३)

इत्येतेषु श्लोकेष्वेकादशकुम्भस्थापनप्रकारो विधीयते। मध्ये कुम्भत्रयं स्थापयित्वा तेषु मध्यकुम्भे हरिं तस्य दक्षिणोत्तरभागयोः कुम्भद्वये श्रियं भूमिं च विन्यस्य तत्तन्मूलेनार्चयेत्। एवं मध्यकुम्भत्रयं परितः पूर्वाद्यष्टदिशास्वष्टकुम्भान्स्थापयित्वा तेषु क्रमेण वासुदेव-हरि-कृष्ण-अच्युत-अनिरुद्ध-प्रद्युम्न-श्रीधर-धरणीपत्याख्यान्विन्यस्य तत्तन्मूलेनार्चयेदिति परिवाराष्टघटस्थापनप्रकारोऽभिधीयते।

अस्मिन्विषये पूर्वकारणे एकोनशततमे पटले —

'ससूत्रोदककुम्भांस्तु पूर्वाशादिषु विन्यसेत् ।
संकर्षणश्च प्रद्युम्नो वासुदेवोऽनिरुद्धकः ॥
रामश्चैवाच्युतश्चैव नारसिंहोऽथ वामनः ।
क्रमेणैतानि सर्वाणि अष्टकुम्भानि विन्यसेत् ॥
देवस्यैव शिरोभागे प्रधानं कुम्भकं न्यसेत् ।' (१३उ०–१५)

इत्येतेषु श्लोकेषु नवकुम्भस्थापनप्रकारो दृश्यते। एवं च रौरवोत्तरे पञ्चैव कुम्भाः प्रोक्ताः। सन्तानसंहितायां वर्धनीद्वयविशिष्टप्रधानकुम्भस्तथा परिवारघटा अष्टेति नवकुम्भा उच्यन्ते। पूर्वकारणे परिवारकुम्भा अष्ट, तथा प्रधानकुम्भ एक इति नव कुम्भाः प्रोक्ताः। रौरवे क्रियापादे एकादश कुम्भाः प्रोच्यन्ते। वीरागमे परिवारकुम्भा अष्ट विधीयन्ते। अत्र प्रधानकुम्भविषयकग्रन्थो नोपलभ्यते।

पूर्वकारणे 'पाञ्चरात्रप्रकारेण प्रतिष्ठां सम्यगाचरेत् ।' (९९.१६उ०) इत्युच्यते। एवं कुम्भसंख्याविषये साजात्यवैजात्यं प्रदर्शितम्।

रौरवोत्तरे समिद्-घृत-चरु-क्षीर-यव-वेणु-प्रियङ्गु-लाज-सर्षप-माष-तिला इति पूर्वोक्तैकादश द्रव्याणि होतव्यानीत्युच्यते।

अस्मिन्विषये सन्तानसंहितायां त्रयस्त्रिंशे पटले—

'समिदाज्यचरूँल्लाजान्सर्षपांश्च यवांस्तिलान् ।
माषमुद्गकुलुत्थांश्च दश द्रव्यांस्तु कीर्तितान् ॥' (३८उ० ३९)

इत्यस्मिञ्श्लोके दश द्रव्याणि होम्यत्वेन निर्दिश्यन्ते। रौरवोत्तरोक्तानि क्षीरप्रियङ्गुवेण्वाख्यानि त्रीण्यत्र न सन्ति। मुद्गकुलुत्थौ सन्तानसंहितोक्तौ रौरवोत्तरे न दृश्येते।

रौरवे क्रियापादे षट्त्रिंशे पटले—

'समिदाज्यचरूँल्लाजान्दधि दुग्धं प्रियङ्गु च ॥ (२५पू०)

इत्यत्र सप्त द्रव्याण्येवात्र विषये होम्यत्वेन निगद्यन्ते। रौरवोत्तरोक्तानि तिलयववेणुसर्षपमाषाख्यानि पञ्च द्रव्याण्यत्र न दृश्यन्ते।

एवमत्र विषये वीरागमे (टि. १२३.३६ पृष्ठे)

'समिदाज्यचरूँल्लाजान्मन्त्रैर्हुत्वा तु देशिकः ।'

इत्यत्र चत्वार्येव द्रव्याणि होम्यत्वेन निर्दिष्टानि। रौरवोत्तरोक्तानि क्षीरयववेणुप्रियङ्गुसर्षपमाषतिलाख्यानि सप्त द्रव्याण्यत्र न सन्ति। एवमेकादशपटलविषये साजात्यवैजात्यमधिगन्तव्यम्।

रौरवोत्तरे द्वादशपटले प्रासादस्योत्तरदिशि पृथगालयं कृत्वा, तत्र ब्रह्मा स्थापनीय इत्युच्यते।

विमलागमे त्रिंशत्तमे पटले—

'प्रासादस्योत्तरे भागे स्थापयेन्मन्त्रवित्तमः ।' (६उ०)

इत्यत्र रौरवोत्तरोक्तवदेव प्रासादोत्तरभागे ब्रह्मणः स्थानमुच्यते।

पूर्वकारणे षष्टितमे पटले 'ब्रह्माणं वारुणे देशे' (६०.१०पू०) इत्यत्र ब्रह्मा पश्चिमदिशि स्थाप्य इत्युच्यते।

रौरवोत्तरे शिलाभिर्लोहैर्वा ब्रह्मणः प्रतिमां कुर्यादित्युच्यते।

मतङ्गपारमेश्वरे क्रियापादे चतुर्दशे पटले—

'चतुर्वक्त्रः पितामहः ।
शुद्धहेममयः कार्यो बृहत्काष्ठोऽथवा तरुः ॥
कार्यः श्रीपर्णिसंज्ञस्तु' (२८,२९पू०)

इत्यत्र ब्रह्मप्रतिमाकरणे हेम श्रीपर्णिसंज्ञकतरुश्च द्रव्यत्वेन परिगण्यते। रौरवोत्तरे शिलापि द्रव्यत्वेनोक्ता। दारुद्रव्यं नोक्तमिति भेदोऽधिगन्तव्यः।

रौरवोत्तरे प्रासादस्याग्रतश्चतुरश्रमण्डपं कृत्वा तन्मध्ये सलक्षणां वेदिकां विधाय, तस्या बाह्ये चतुर्दिक्षु पूर्वादिक्रमेण चतुरश्रधनुर्वृत्तत्रिकोणाख्यानि चत्वारि कुण्डानि कुर्यादिति चतुष्कुण्डविधिरुच्यते।

एवमेव पूर्वकारणे षष्टितमे पटले —

'परिवारालयाग्रे तु मण्टपं लक्षणान्वितम्।
नवहस्तमष्टहस्तं वा सप्तहस्तमथापि वा॥
षोडशस्तम्भसंयुक्तं द्वादशस्तम्भमेव वा।
कृत्वा मण्टपमध्ये तु त्रिभागैकेन वेदिका॥
कलाङ्गुलसमायामा दर्पणोदरसंनिभा।
परितश्चाग्निकुण्डानि महाशासु प्रकल्पयेत्॥
चतुरश्रं धनुर्वृत्तं कोणं पूर्वादितः क्रमात्।'
'एकाग्निं वाथ कुर्वीत प्रासादस्याग्रके बुधः' (८४उ०–८७; ८९पू०)

इत्येतेषु श्लोकेषु रौरवोत्तरोक्तवच्चतुष्कुण्डपक्षः, विकल्पेनैककुण्डपक्षश्चाभिधीयते।

विमलागमे त्रिंशत्तमे पटले —

'प्रासादस्योत्तरे भागे मण्टपं चतुरश्रकम्।'
'तन्मध्ये वेदिकां कुर्यादुपवेदिसमन्विताम्।
प्रधानं वृत्तकुण्डं तु चतुरश्रं तु पूर्वके॥
त्रिकोणं यमदिग्भागे पश्चिमे पद्ममेव च।
उत्तरे योनिकुण्डं तु कारयेत्क्रमशः सुधीः॥' (१०उ०; १३, १४)

इत्येतेषु श्लोकेषु पञ्चकुण्डपक्षो विधीयते।

अजितागमे सप्तचत्वारिंशे पटले —

'मण्टपे पूर्ववत्क्लृप्ते पूर्वादिचतसृष्वपि।
दिक्षु कुण्डानि कुर्वीत चतुरश्रार्धचन्द्रके॥
वृत्तं त्रिकोणकं चैव पद्ममीशानगोचरे।' (१उ०–२)

इत्येतत्सार्धश्लोके पञ्चकुण्डपक्षोऽभिधीयते। यद्यपि विमलागमाजितागमयोः पञ्चकुण्डपक्षोऽभिहितः। तथापि विमलागमे पूर्वादिचतुर्दिक्षु क्रमेण चतुरश्रत्रिकोणपद्मयोनिकुण्डानि कल्पनीयानीत्युच्यते। अजितागमे तु पूर्वादिचतुर्दिक्षु चतुरश्रार्धचन्द्रवृत्तत्रिकोणाख्यानि कुण्डानि कुर्यादित्युच्यते। प्रधानकुण्डं विमलागमे वृत्तं भवति। अजितागमे तु पद्ममिति भेदः। रौरवोत्तरे तु चतुष्कुण्डपक्ष इति कुण्डविषये साजात्यवैजात्यमधिगन्तव्यम्।

रौरवोत्तरे कुम्भाधिवासविषये मध्यादीशानपर्यन्तं नवकुम्भान् स्थापयेत्। तत्र मध्यकुम्भे ब्रह्माणं, पूर्वकुम्भे पितामहम्, दक्षिणकुम्भे विधातारं, पश्चिमकुम्भे प्रजापतिम्, उत्तरकुम्भे अजम्, आग्नेयकुम्भे विधिं नैर्ऋतकुम्भे स्रष्टारं, वायव्यकुम्भे पद्मोद्भवम्, ईशानदिक्कुम्भे वक्तारं चावाह्य स्वस्वनामभिरर्चयेदिति नवकुम्भस्थापनप्रकारो निरूप्यते।

अस्मिन्विषये विमलागमे त्रिंशत्तमे पटले —

'प्रतिमायाः शिरोभागे ब्रह्मकुम्भं प्रकल्पयेत्।
त्रिसृभिः शक्तिभिर्युक्तां कारयेद्वर्धनीं ततः॥
ततो दिव्यऋषीन्सप्त सप्तकुम्भेषु पूजयेत्।
दिक्पालानष्टकुम्भेषु पूजयेत्क्रमशस्तथा॥' (१८उ०–२०पू०)

इत्यनयोः श्लोकयोः शक्तित्रययुक्तवर्धनीसहितं ब्रह्मकुम्भं प्रतिमायाः शिरोदेशे स्थापयेत्।

ततः सप्तऋषिकुम्भान्सप्त स्थापयेत्। ततो दिक्पालकुम्भानष्ट च स्थापयेत्। तत्तत्कुम्भेषु तत्तदधिपतीन्पूजयेदिति सप्तदशकुम्भस्थापनं विधीयते। रौरवोत्तरे तु नवानामेव कुम्भानां स्थापनं प्रोक्तमिति भेदः।

अस्मिन्विषये अजितागमे सप्तचत्वारिंशे पटले —

'ब्रह्मकुम्भं तदा तत्र द्रोणपूरं मनोरमम्।'
'आवेष्टचाहतवस्त्राभ्यां स्थापयेद्वेदिमध्यमे।
परितश्च ततः कुम्भांस्तादृशानपि विन्यसेत्॥'
'लोकपालान्यथास्थानं तत्तन्मन्त्रैः समर्चयेत्।' (१६पू०; १७उ०–१८पू०; २१उ०)

इत्यत्र वेदिमध्ये ब्रह्मकुम्भस्थापनं, तथा तत्कुम्भं परितो दिक्पालाष्टककुम्भस्थापनं च कर्तव्यमित्युच्यते। एवमजितागमेऽपि रौरवोत्तरोक्तवन्नवकुम्भस्थापनं यद्यपि सिध्यति। तथापि प्रधानकुम्भे ब्रह्मा, परितोऽष्टकुम्भेषु दिक्पाला अष्टौ च पूज्या इत्यजिते प्रोच्यते। रौरवोत्तरे तु परितोऽष्टकुम्भेषु पितामहादयोऽष्टौ पूजनीयत्वेनोच्यन्त इति भेदः स्पष्टः।

अस्मिन्विषये पूर्वकारणे षष्टितमे पटले —

'बिम्बस्य तु शिरोदेशे स्थापयेद्वचोमकुम्भकम्'। (१०३पू०)

इति परिवारत्वेन परिगणितस्य ब्रह्मणः प्रतिष्ठाविषये कुम्भस्यैकस्यैव स्थापनं निगद्यते। एवं विमलागमे ब्रह्मप्रतिष्ठाविधौ सप्तदश कुम्भास्तथाजितरौरवोत्तरयोर्नवकुम्भाः, पूर्वकारणे त्वेक एव कुम्भश्च स्थापनीयत्वेन निगद्यन्त इति कुम्भस्थापनविषये साजात्यवैजात्यमधिगन्तव्यम्।

रौरवोत्तरे ब्रह्मप्रतिष्ठायां पूर्वोक्तैकादशद्रव्याणि होतव्यानीत्युच्यते।

अस्मिन्विषये विमलागमे त्रिंशत्तमे पटले —

'अथाचार्यः प्रसन्नात्मा होमकर्म समारभेत्।
पलाशैर्ब्रह्मपुष्पैश्च बिल्वैरश्वत्थपुष्पकैः॥
दूर्वाभिश्च हुनेन्मन्त्री ब्रह्मजज्ञानमन्त्रतः।
पायसेन तिलैर्मुद्गैर्लाजैश्च सर्षपैः क्रमात्॥' (टि०१२३, पृ० २६)

इत्येतयोः श्लोकयोः पलाश-ब्रह्मपुष्प-बिल्व-अश्वत्थपुष्प-दूर्वा-पायस-तिल-मुद्ग-लाज-सर्षपैर्दशद्रव्यैर्होमयेदित्युच्यते। रौरवोत्तरे तु एकादश द्रव्याणि होम्यानीत्युच्यते। विमलागमप्रोक्तेषु दशसु द्रव्येषु मध्ये तिललाजसर्षपा रौरवोत्तरेऽपि निर्दिश्यन्ते। रौरवोत्तरप्रोक्तं माषद्रव्यं विमलागमे न दृश्यते। रौरवोत्तरे सामान्येन प्रोक्ते समिच्चर्वाख्ये द्वे द्रव्ये विमलागमे पलाशपायसे इति विशेषत्वेनाभिधीयेते। ब्रह्मपुष्प-बिल्व-अश्वत्थपुष्प-दूर्वा-मुद्गाख्यानि पञ्चद्रव्याणि रौरवोत्तरोक्तेभ्यो भिन्नानि भवन्ति।

अस्मिन्विषये अजितागमे सप्तचत्वारिंशत्तमे पटले —

'समिदाज्यचरूंश्चापि तिलवेणुयवानपि।
माषं च क्रमतो मन्त्रैरङ्गैर्मूलादिभिर्बुधः।' (२४)

इत्यस्मिन्श्लोके सप्त द्रव्याणि होम्यत्वेनाभिधीयन्ते। अत्र रौरवोत्तरप्रोक्तानि क्षीरप्रियङ्गुलाजसर्षपाख्यानि चत्वारि द्रव्याणि न सन्ति।

अमिन्विषये पूर्वकारणे षष्टितमे पटले —

'समिदाज्यचरूँल्लाजान्सर्षपं च क्रमेण तु।
सद्यादिब्रह्ममन्त्रैश्च जुहुयुर्वै क्रमेण तु॥' (११४उ०,११५पू०)

इत्यत्र समिदादीनि पञ्च द्रव्याणि होम्यत्वेनोच्यन्ते। अत्र रौरवोत्तरोक्तानि क्षीरयववेणुप्रियङ्गुमाषतिलाख्यानि षड्द्रव्याणि न दृश्यन्ते। एवं द्वादशपटलोक्तविषयेषु साजात्यवैजात्यमधिगन्तव्यम्।

रौरवोत्तरे त्रयोदशपटले दुर्गाप्रतिष्ठाविधौ प्रतिमां शिलाभिर्लोहैर्वा कुर्यादित्युच्यते।

पूर्वकारणेऽष्टनवतितमे पटले --

'शैलजं लोहजं वापि बेरं कुर्याद्विचक्षणः'। (३पू०)

इत्यत्रापि प्रतिमाकरणद्रव्यं रौरवोत्तरोक्तवदेव दृश्यते।

रौरवोत्तरे प्रासादेऽर्धमण्डपोत्तरभागे पृथगालयं प्रकल्प्य तत्र दुर्गां स्थापयेदित्युच्यते।

पूर्वकारणे षष्टितमे पटले -- 'याम्ये कात्यायनी प्रोक्ता' (९ उ०) इत्यत्र दक्षिणदिशि दुर्गा-स्थापनीयेति भण्यते।

सुप्रभेदे क्रियापादे एकोनचत्वारिंशे पटले -- 'दुर्गां चैवोत्तरे कुर्यात्' (२८उ०) इत्यत्र दुर्गा-मुत्तरदिशि स्थापयेदित्युच्यते। रौरवोत्तरेऽर्धमण्टपोत्तरदेशे दुर्गा स्थापनीयेत्युक्तेति भेदोऽवगन्तव्यः।

अस्मिन्विषये अजितागमे त्रिपञ्चाशे पटले --

'लिङ्गस्थापनयोग्येषु स्थानेष्वपि शिवालये।
ग्रामादावपि चोक्तेषु स्थानेष्वस्याः प्रकल्पयेत्॥
प्रासादं हि ततः पूर्वद्वारं भुक्तिप्रदं नृणाम्।
मुक्तिदं पश्चिमद्वारं पूर्वद्वारं जयावहम्॥' (१६उ०-१८पू०)

इत्येतयोः श्लोकयोर्दुर्गालयो लिङ्गस्थापनयोग्यस्थानेषु, तथा शिवालये ग्रामादौ चोक्तस्थानेषु च कल्पनीय इत्युच्यते। किं च दुर्गालयविषये पूर्वद्वारपश्चिमद्वारप्रासादकल्पने फलविशेषश्च भण्यते।

रौरवोत्तरे प्रासादस्याग्रतश्चतुरश्रं मण्डपं विधाय, तत्र सलक्षणां वेदिकां निर्माय, तस्या बाह्ये चतुर्दिक्षु क्रमेण चतुरश्रधनुर्वृत्तत्रिकोणाख्यानि चत्वारि कुण्डानि कुर्यादिति चतुष्कुण्डकल्पनप्रकारो विधीयते।

अस्मिन्विषये स्वायम्भुवागमे द्विपञ्चाशे पटले --

'चतुर्दिशि।
चतुरश्रं धनुर्वृत्तं त्रिकोणं च यथाक्रमम्॥
मेखलात्रयसंयुक्तमेकैकं चतुरङ्गुलम्।
अनुक्रमेण कर्तव्यं निम्नोन्नतविवर्जितम्॥
ऐशान्यामपमीकुण्डे [मप्यब्जकुण्डे] देव्यग्निं कल्पयेद्यथा।
अथवा चतुरश्रं तु कर्तव्यम्' (१८उ०-२१पू०)

इत्येतेषु श्लोकेषु पञ्चकुण्डपक्षो विधीयते। अत्र चतुर्दिक्षु कल्पनीयत्वेन विहितेषु कुण्डेषु विषये रौरवोत्तरवचनेन सह सादृश्यमस्ति। परं तु देवीकुण्डमैशान्यां पद्मरूपेण विधेयमथवा चतुरश्र-रूपेणेति कथनं रौरवोत्तरे न विद्यते।

एवमस्मिन्विषये अजितागमे त्रिपञ्चाशे पटले --

'तदग्रे मण्टपं कुर्यात्पूर्ववत्पार्श्वयोस्तथा।
तत्र वेद्यास्तु परितः कुण्डानि परिकल्पयेत्॥
आशासु चतुरश्राणि विदिक्षु चतसृष्वपि।
योन्याकाराणि कुण्डानि पद्मं च त्वीशशक्रयोः॥
मध्यस्थाने ततस्तस्य' (१८उ०-२०)

इत्येतेषु श्लोकेषु वेद्यास्तु परितश्चतुर्दिक्षु चतुरश्रकुण्डानि, विदिक्षु योनिकुण्डानि, तथेशानेन्द्र-दिशोर्मध्ये पद्मकुण्डं प्रधानं च कुर्यादिति नवकुण्डपक्षः प्रतिपाद्यते।

एवं पूर्वकारणे अष्टनवतितमे पटले --

'कुण्डानि कारयेत्तत्र दिशासु विदिशासु च।

प्राक्कुण्डवेदिकामध्ये प्रधानं तत्र कल्पयेत् ॥' (१९उ०–२०पू०)

इत्यस्मिञ्श्लोके विना कुण्डाकारं नवकुण्डपक्षोऽभिधीयते। रौरवोत्तरे तु चतुष्कुण्डपक्ष एव भण्यते।

एवमेव सन्तानसंहितायां त्रिंशे पटले —

'प्रासादस्यैव पुरतो मण्टपं कारयेत्ततः।
तस्य मध्ये [तु] वेदी स्याद्बाह्ये कुण्डानि कारयेत्।
नव वा पञ्चकुण्डं वा कारयेल्लक्षणान्वितम् ॥' (७–८पू०)

इत्येतत्सार्धश्लोके विना कुण्डाकारं नवकुण्डपक्षः पञ्चकुण्डपक्षश्च कथ्यते। एवं च स्वायंभुवे पञ्चकुण्डपक्षः, अजितपूर्वकारणयोर्नवकुण्डपक्षः, सन्तानसंहितायां नवकुण्ड-पञ्चकुण्डपक्षौ रौरवोत्तरे चतुष्कुण्डपक्षश्च प्रतिपाद्यन्त इति व्यत्यासोऽवगन्तव्यः।

रौरवोत्तरे कुम्भाधिवासविषये प्रतिमायाः सव्यभागे प्रधानकुम्भं, तं परितोऽष्ट परिवारकुम्भांश्च स्थापयित्वा, तेषु मध्यकुम्भे प्रधाने दुर्गां, पूर्वकुम्भे कात्यायनीं, दक्षिणकुम्भे कुमारीं, पश्चिमकुम्भे विन्ध्यवासिनीम्, उत्तरकुम्भे अम्बिकाम्, आग्नेयकुम्भे भगवतीं, नैर्ऋतकुम्भे भवानीं, वायव्यकुम्भे कीर्तिम्, ऐशानकुम्भे मोहिनीं च विन्यस्य स्वैः स्वैर्नामादिभिरर्चयेदिति कुम्भस्थापनप्रकारोऽभिधीयते।

अस्मिन्विषये पूर्वकारणे अष्टनवतितमे पटले —

'देव्याश्च दक्षिणे पार्श्वे प्रधानं च घटं न्यसेत्।
दुर्गां कात्यायनीं चैव विजया चापराजिता ॥
देवी वेगवती चैव गायत्री शर्वरी तथा।
गान्धार्युक्तक्रमेणैव मध्यमाद्दिशि विन्यसेत् ॥' (२८उ०-३०पू०)

इत्येतयोः श्लोकयोर्नवकुम्भस्थापनविधिरुच्यते। अत्र दुर्गाकात्यायन्यौ वर्जयित्वा अन्याः सप्त कुम्भाधिदेवता रौरवोत्तरोक्ताभ्यो विभिन्नाः।

अत्र सन्तानसंहितायां त्रिंशे पटले —

'वर्धन्यष्ट समादाय पूर्वादीशान्तकं न्यसेत्।
वामादिशक्तयोऽष्टौ तु मनोन्मनीमीशदेशतः ॥' (१३)

इत्यत्र वर्धन्यष्टकं पूर्वाद्यष्टदिक्षु स्थापयित्वा तत्र वामाद्यष्टशक्तयो विन्यस्याः। ईशान्यां मनोन्मनी विन्यस्येति कुम्भाधिदेवताः प्रकारान्तरेण विधीयन्ते ।

सुप्रभेदागमे क्रियापादे षट्चत्वारिंशे पटले —

'कुम्भं मन्त्रैश्च विन्यस्य ध्यात्वा तद्रूपमात्मनि।
आवृतान्कलशान्स्थाप्य लोकपालांश्च विन्यसेत् ॥' (६उ०–७पू०)

इत्यत्र परिवारघटेषु दिक्पालान्विन्यसेदित्युच्यते। इत्थं कुम्भाधिपविषये साजात्यवैजात्यमवगन्तव्यम्। रौरवोत्तरे दुर्गाप्रतिष्ठायां होमविषये पूर्वोक्तैकादश द्रव्याणि होम्यत्वेनोच्यन्ते।

अस्मिन्विषये पूर्वकारणेऽष्टनवतितमे पटले —

'समिदाज्यचरूँल्लाजान्मुद्गमाषतिलांस्तथा'। (३१उ०)

इत्यत्र सप्तद्रव्याणि निर्दिष्टानि। रौरवोत्तरे त्वेकादशद्रव्याणीति भेदः। पूर्वकारणोक्तं मुद्गद्रव्यं रौरवोत्तरे न दृश्यते।

अत्र सुप्रभेदागमे क्रियापादे षट्चत्वारिंशे पटले —

'आज्यं चरुं तथा लाजानौदुम्बरसमित्तथा।' (८उ०)

इत्यत्र चत्वार्येव द्रव्याणि विधीयन्ते। एतानि चत्वार्यपि रौरवोत्तरेऽपि सन्ति। रौरवोत्तरे

समिदिति सामान्येन निर्दिष्टं द्रव्यं सुप्रभेदे औदुम्बरसमिदिति विशेषद्रव्यतया निर्दिश्यते।

सन्तानसंहितायां त्रिंशे पटले –

'समिदाज्यचरूँल्लाजान्सर्षपं च हुनेद्बुधः। (४पू०)

इति समिदादिपञ्चद्रव्यं होम्यत्वेन निर्दिश्यते। एवमेवाजितागमेऽपि (५३.३६उ०) दृश्यते। एतानि पञ्चद्रव्याणि रौरवोत्तरेऽपि विद्यन्ते। एवं होमद्रव्यविषये साजात्यवैजात्यमवधेयम्। इत्थं त्रयोदशपटलस्थविषयाणां साजात्यवैजात्यं प्रतिपादितम्।

रौरवोत्तरे शिवप्रासादे द्वारपालप्रतिष्ठायां 'पूर्वद्वारपालौ महानन्दिमहाकालौ, दक्षिणद्वारपालौ अनन्तपशुपती, पश्चिमद्वारपालौ महाचण्डमहामुण्डौ, उत्तरद्वारपालौ पिङ्गलविजयौ' इति चतुर्दिक्षु द्वारपालानां नामानि निर्दिश्यन्ते। प्रतिद्वारं नाम्ना निर्दिष्टौ तत्तद्द्वारे सव्यवामभागयोः क्रमेण स्थापनीयाविति चोक्तम्।

एवं दीप्त-योगज-रौरव-वीर-सुप्रभेदेषु पञ्चस्वपि द्वारपालविषये नामस्थाननिरूपणं दृश्यते। तथाहि —

दीप्ते सप्तषष्टितमे पटले —

'पूर्वद्वाराधिपौ ज्ञेयौ नन्दिकालावुभौ तथा।
दण्डी मुण्डी महावीर्यौ दक्षिणद्वारपालकौ॥
भृङ्गी च विजयश्चैव पश्चिमद्वारपालकौ।
अनन्तः पशुपतिश्चैव उत्तरद्वारपालकौ॥' (१उ०–३पू०)

योगजागमे षष्ठे पटले —

'पूर्वद्वारे स्थितौ यत्र नन्दिकालौ महात्मनः।
अनन्तः पशुपतिश्चैव दक्षिणद्वारपालकौ॥'
'पश्चिमद्वारपालौ च दण्डी मुण्डी तथैव च।'
'विजयश्चैव भृङ्गीश उत्तरद्वारपालकः'। (२४६उ०, २४७पू०, २४८उ०, २५०पू०)

रौरवे क्रियापादे द्वात्रिंशे पटले —

'नन्दिकालौ तु पूर्वे तु दक्षिणेऽदक्षिणे स्थितौ।
दण्डिमुण्डी अवाच्यां तु विजयो भृङ्गिरेव च।
वारुणे रक्षकावेतौ गोपत्यनन्तकाविमौ।
उत्तरद्वाररक्षार्थं दक्षिणेऽदक्षिणे न्यसेत्॥' (६उ०–८पू०)

वीरागमे एकचत्वारिंशत्तमे पटले —

'पूर्वदिग्द्वारपालौ तु नन्दी कालस्तथैव च।'
'दक्षिणद्वारपालौ तु दण्डी मुण्डी तथैव च।'
'पश्चिमद्वारपालौ तु भृङ्गिणं विजयं तथा।'
'उत्तरद्वारपालौ तु अनन्तं पशुपतिं तथा।' (२४पू०, २५पू०, २६पू०, २७पू०)

सुप्रभेदागमे क्रियापादे एकोनचत्वारिंशे पटले —

'कुङ्कुमाभो महाकालः परशुश्चायुधस्तथा।
अनन्तेशः पशुपतिर्दक्षिणे द्वारपालकौ॥'
'पश्चिमद्वारपालौ च दण्डिमुण्डीशसंज्ञकौ।'
'विजयश्चैव भृङ्गीशश्चोत्तरद्वारपालकौ॥' (१३उ०, १४पू०, १५उ०,१७पू०) इति।

एष्वागमेषु द्वारपालानां वर्णास्तदीयानामायुधविशेषास्तथान्यानि लक्षणानि च कथ्यन्ते। रौरवोत्तरे तु वर्णादयो नाभिधीयन्ते। द्वारपालानां वर्णादिविषये साजात्यवैजात्यविमर्शो रौरवे

क्रियापादोपोद्घाते द्वात्रिंशपटलार्थसंग्रहे प्रदर्शित इति तत एवावगन्तव्यः। अत्र तु नामस्थानविषये रौरवोत्तरीयो विशेषः परं प्रतिपाद्यते।

रौरवोत्तरे पूर्वद्वारपालौ 'महानन्दिमहाकालौ' इति कथ्येते। दीप्तयोगजवीररौरवेषु 'नन्दिकालौ' इति निर्दिष्टौ। सुप्रभेदे परं 'महाकालः' इति पूर्वद्वारे वामभागे स्थापनीयस्य द्वारपालस्य नाम रौरवोत्तरोक्तवन्निर्दिष्टम्। सुप्रभेदे पूर्वद्वारे सव्यभागे स्थापनीयस्य द्वारपालस्य स्थाननामलक्षणादिप्रतिपादकग्रन्थो लुप्तः।

रौरवोत्तरे दक्षिणद्वारपालकौ 'अनन्तः पशुपतिः' इति क्रमेण निर्दिष्टौ। एवमेव योगजसुप्रभेदयोरप्यस्ति नामनिर्देशः। दीप्तरौरववीरेषु परं 'दण्डी मुण्डी' इति नामनिर्देशक्रमो भेदेन दृश्यते।

पश्चिमद्वारपालविषये रौरवोत्तरे परं 'महाचण्डमहामुण्डौ' इति नामनिर्देशक्रमोऽस्ति। अत्र विषयेऽन्येष्वागमेषु वैजात्यं नितरां दृश्यते। तथा हि — अस्मिन्विषये दीप्ते 'भृङ्गी विजयः' इति, वीरे 'भृङ्गिणः विजयः' इति, रौरवे 'विजयो भृङ्गिः' इति च द्वारपालनामनिर्देशक्रमो विद्यते। योगजसुप्रभेदयोः 'दण्डी मुण्डी' इति नामनिर्देशो दृश्यत इति वैजात्यम्।

उत्तरद्वारपालविषये रौरवोत्तरे 'पिङ्गलः विजयः' इति नामनिर्देशक्रमो विद्यते। दीप्ते, वीरे च 'अनन्तः पशुपतिः' इति, योगजसुप्रभेदयोः 'विजयः भृङ्गीशः' इति च नामनिर्देशक्रमो दृश्यते। रौरवे 'गोपतिः अनन्तः' इति नामनिर्देशक्रमो विद्यते। एवं चतुर्दिक्षु द्वारपालविषये साजात्यवैजात्यं प्रादर्शि।

रौरवोत्तरे द्वारपालानां नामस्थाननिरूपणादनन्तरं 'शिल्पिकर्मसमाप्तौ तु जले चैवाधिवासयेत्।' इति प्रतिमाकरणानन्तरं प्रतिमाया जलाधिवासक्रिया विधेयत्वेन सूच्यते। वस्तुतोऽत्र नेत्रोन्मीलनकर्म वक्तव्यम्। उत्तरकारणे, दीप्ते, रौरवे च नेत्रोन्मीलनकर्मप्रस्तावो विद्यते। अपि चास्मिन् पटले सर्वमपि क्रियाजातं संग्रहेणैव कथ्यते। शयनाधिवासप्रतिपादनानन्तरं कुम्भाधिवासाय कुम्भस्थापनप्रकारो न निरूप्यते। कुम्भेषु कुम्भाधिपार्चनं, तथा होमश्च पूर्ववत्कर्तव्याविति सूच्यते। प्रतिमास्थापनप्रकारोऽपि नितरां संग्रहेण प्रतिपाद्यते। कुम्भाभिषेकप्रकारो नैव स्पष्टतया प्रत्यपादि। पटलान्ते च 'प्रतिष्ठातन्त्रविधिवच्छेषकर्म समाचरेत्' इत्युच्यते।

रौरवोत्तरेऽधिवासार्थं मण्डपकल्पनविषये द्वारस्य पुरतो मण्टपं प्रकल्प्य मण्डपे सव्यवामभागयोरुभयोरपि वेदिकां निर्माय, उभयोरपि वेदिकयोः पुरतो वृत्तकुण्डमेकं कल्पनीयमित्येकस्मिन्द्वारे मण्डपकल्पनप्रकारमभिधाय, अन्येष्वपि द्वारेषु एवमेव कर्तव्यमिति सूच्यत इति भाति। एवं शयनाधिवासविषयेऽपि द्वे प्रतिमे जलादुद्धृत्य ते प्रतिमे सव्यवामभागस्थयोरुभयोर्वेदिकयोः क्रमेण प्राक्शीर्षमूर्ध्ववक्त्रं च शाययेदित्युक्त्वा, अन्येष्वपि द्वारेषु द्वारपालप्रतिमानां शयनाधिवासप्रकार एवमेव कर्तव्य इति सूच्यत इति भाति। एवंरीत्या मण्डपकल्पनप्रकारः, शयनाधिवासप्रकारश्चोपलभ्यमानेष्वन्येष्वागमेषु न दृश्यते। कुम्भाधिवासविषये कति कुम्भाः स्थापनीया इति च नोक्तम्। द्वारपालप्रतिष्ठाविधिरुपलभ्यमानागमेषु सर्वत्रापि संपूर्णतया न दृश्यते। दीप्तागमे तथोत्तरकारणे च दशकुम्भप्रस्तावो द्वारपालप्रतिष्ठाविधौ दृश्यते। स च नैव स्पष्टतया विद्यते।

रौरवे क्रियापादे द्वात्रिंशे पटले नेत्रोन्मीलनानन्तरं पञ्चगव्याभिषेचनेन बिम्बशुद्धिं कृत्वा, प्रतिमाया अग्रतो वेदिकां विधाय, वेदिकाग्रे वृत्तकुण्डमेकं प्रकल्पयेत्। ततो वेद्यां शालिभिः स्थण्डिलं निर्माय, तत्र दर्भैः पुष्पैश्च परिस्तीर्य गन्धाम्बुपूरितं सूत्रवस्त्राद्यलंकृतं कुम्भमेकं स्थापयित्वा, तत्र प्रतिमारूपं ध्यायेत्। गन्धपुष्पादिभिः पूजयेदिति वेदिकाग्रे कुण्डकल्पनप्रकारः, कुम्भाधिवासप्रकारश्च संक्षेपेण वर्ण्यते। शयनाधिवासविषयो रौरवे न दृश्यते। ततो होमविधिः प्रतिपाद्यते। ततो वेद्याः कुम्भमादाय, बिम्बाग्रे निधाय, तदद्भिः प्रतिमायामभिषेचन-

प्रकारो वर्ण्यते। अन्ते च एवं दौवारिकाष्टानां स्थापनं कार्यमित्युच्यते। एवं च रौरवे एकस्य द्वारपालस्य प्रतिष्ठाविधिमुक्त्वा, तथैवान्येषामपि द्वारपालानां प्रतिष्ठा कर्तव्येत्युच्यते। रौरवोत्तरे त्वेकद्वारविषये द्वारपालद्वयस्य स्थापनमभिधाय तद्वद्द्वारान्तरेऽपि द्वारपालस्थापनं करणीयमिति सूच्यते। एवं द्वारपालप्रतिष्ठाविधौ साजात्यवैजात्यमधिगन्तव्यम्।

रौरवोत्तरे पञ्चदशे पटले 'सर्वतोभद्रं, वर्धमानं, शैवाधिक्यं, त्रैराशिकम्' इति लिङ्गविषये चत्वारो वर्गाः सन्ति। अत्र सर्वतोभद्रलिङ्गे ब्रह्मविष्णुरुद्रभागाः सममानाः, वर्धमाने ब्रह्मभागाद्विष्णुभागस्य विष्णुभागाद्रुद्रभागस्य आधिक्यम्, शिवाधिक्ये ब्रह्मविष्णुभागौ समानौ रुद्रभागस्य परमाधिक्यम्, त्रैराशिके यद्यपि औन्नत्ये भागत्रयमानं समानमथापि ब्रह्मादिभागानामुत्तरोत्तरनाहस्याधिक्यमिति विशेषः। एतेषां वर्गाणां प्रत्येकं चतुर्विधत्वेन षोडशभेदा भवन्ति। तेषां षोडशभेदानामपि प्रत्येकं चतुर्विधभेदा वर्तन्ते। तथा च चतुष्षष्टिविधा लिङ्गभेदाः सिद्धा इति चतुष्षष्टिविधलिङ्गभेदसाधनप्रकारोऽभिधीयते। सर्वतोभद्रादीनां तदुपभेदानां च स्वरूपलक्षणानि नैव प्रतिपाद्यन्ते। चतुष्षष्टिविधलिङ्गभेदा आगमान्तरेषु न दृश्यन्ते। मकुटागमे मुद्रितपुस्तके (४६) पृष्ठे षण्णवतिलिङ्गभेदनाम्नां प्रस्तावो वर्तते। तत्र नामानि न समग्रतया प्रतिपादितानि।

अंशुमत्काश्यपे एकपञ्चाशत्तमे पटले —

'समलिङ्गं वर्धमानं शैवाधिक्यं च स्वस्तिकम्।
सर्वतोभद्रलिङ्गं च सार्वदेशिकमेव च॥
धारालिङ्गं मुखलिङ्गं लिङ्गमष्टविधं भवेत्।' (१०७उ०—१०८)

इत्यत्राष्टविधानि लिङ्गानि परिगणितानि।

एवं पूर्वकारणे नवमपटले, दीप्ते त्रयोदशपटले च समखण्ड-वर्धमान-शैवाधिक्य-त्रिराशिकाख्यानि चतुर्विधलिङ्गानि परिगण्यन्ते। तद्यथा —

'समखण्डं वर्धमानं शैवाधिक्यं त्रिराशिकम्।
लिङ्गं चतुर्विधं प्रोक्तम्' (पूर्वकारणे ९.११७);
'समखण्डं वर्धमानं शैवाधिक्यं त्रिराशिकम्'। (दीप्ते १३.७१पू०) इति।

सुप्रभेदे क्रियापादे त्रयस्त्रिंशे पटले समखण्ड-वर्धमान-शिवाधिकाख्यानि त्रिविधानि लिङ्गानि परिगण्यन्ते। यथा —

'समं वै वर्धमानं च शिवाधिकमतः परम्।' (८३पू०) इति।

अजितागमे चतुर्थपटले ३३-३८ श्लोकेषु, तथा रौरवे क्रियापादेऽष्टाविंशतितमे पटले ७उ०—१३पू० श्लोकेषु च समखण्ड-वर्धमान-शिवाधिक-स्वस्तिकाख्यानि चत्वारि लिङ्गानि सलक्षणं प्रतिपादितानि। पूर्वकामिके द्विषष्टितमे पटले २३उ०—३५ श्लोकेषु आढ्य-अनाढ्य-सुरेड्य-समखण्ड-वर्धमान-शैवाधिक्य-त्रैराशिक-स्वस्तिकाख्यानि लिङ्गान्यष्टौ सलक्षणं प्रतिपाद्यन्ते।

पूर्वकामिके द्विषष्टितमे पटले, रौरवोत्तरे वर्गद्वयत्वेन निर्दिश्यमानयोर्वर्धमानशिवाधिकलिङ्गयोश्चतुर्धा भेदा उपवर्णिताः। यथा —

'चतुष्पञ्चषडंशं तु पञ्चषट्सप्तभागिकम्।
षट्सप्ताष्टांशकं सप्तभागाष्टनवभागिकम्॥
वर्धमानमिदं प्रोक्तं विप्रादीनामनुक्रमात्।
सप्तसप्ताष्टभागं तु पञ्चपञ्चषडंशकम्॥
वेदवेदशरांशं तु गुणानलयुगांशकम्।
एवं शिवाधिकं प्रोक्तं द्विजातीनामनुक्रमात्॥ (३०-३२) इति।

पूर्वकारणे नवमपटले शिवाधिकलिङ्गविषये परं चतुर्धा भेदा उपवर्णिताः। यथा —

'सप्तसप्ताष्टभागं तु पञ्चपञ्चषडङ्गकम्।
वेदवेदशरांशं तु गुणानलयुगांशकम्॥' (११९उ०-१२०पू०) इति।

एतच्छिवाधिकविषयकभेदलक्षणं पूर्वाकामिकोक्तवदेव दृश्यते।

अंशुमत्काश्यपे एकपञ्चाशत्तमे पटलेऽपि वर्धमानशिवाधिकलिङ्गयोर्विषये भेदचतुष्टयवर्णनं दृश्यते। यथा —

'भानुद्व्यंशे तदायामे सप्तांशं चतुरश्रकम्।
अष्टांशेनाष्टकोणं तु नवांशं वृत्तमुच्यते॥
षट्सप्तवसुभागं वा पञ्चषट्सप्त एव वा।
चतुष्पञ्चषडंशं वा वर्धमानं चतुर्विधम्॥'
'लिङ्गायामे दशांशे तु गुणांशं चतुरश्रकम्।
वस्वश्रं चैव तत्तुल्यं युगांशं स्याच्छिवांशकम्॥
शिवाधिकमिति ख्यातमथवान्यप्रकारतः।
वेदवेदशरं वापि पञ्चपञ्चषडंशकम्॥
षट्षट्सप्तांशकैर्वापि शैवाधिक्यं चतुर्विधम्।'

(१२४, १२५; १२६-१२८पू०) इति।

शिवाधिकभेदलक्षणे पूर्वकामिके 'सप्तसप्ताष्टभागम्' इति यदुक्तं लक्षणं, तल्लक्षणे अंशुमत्काश्यपे 'षट्षट्सप्तांशकैर्वापि' इति प्रकारान्तरेण लक्षणमुदितम्। अन्यत्सर्वं पूर्वकामिकांशुमत्काश्यपयोस्तुल्यमेव दृश्यते।

एवं रौरवोत्तरे विना लक्षणं चतुर्भेदवत्त्वेन प्रतिपादितयोर्वर्धमानशिवाधिकलिङ्गयोर्विषये पूर्वकामिकपूर्वकारणांशुमत्काश्यपागमेषु सलक्षणं चतुर्भेदाः प्रतिपादिता इति प्रदर्शितम्। सर्वतोभद्रत्रैराशिक लिङ्गद्वयविषयेऽन्येष्वागमेषु भेदप्रतिपादनं न दृश्यते।

रौरवोत्तरेऽत्र पटले धारालिङ्गं, मुखलिङ्गं च नाम्ना निर्दिष्टम्। परं मुखलिङ्गलक्षणं मुखलिङ्गप्रतिष्ठाख्यसप्तदशपटले दीयते। पूर्वकारणे (९.१२५-१२७; १३५-१४०) धारालिङ्गमुखलिङ्गयोर्लक्षणं कथ्यते। एवं पूर्वकामिके (६२.३६-५१) तथा सुप्रभेदे क्रियापादे (३३.९१-९४) च धारालिङ्गमुखलिङ्गयोर्विषये लक्षणादिकं प्रतिपादितम्। अजिते (४. ४८-५२), तथा किरणे चर्यापादे (२१.४५-४९) च धारालिङ्गविषये लक्षणादिकमुपपाद्यते। किरणे चर्यापादे (२३.२-११) मुखलिङ्गं सलक्षणोपभेदमभिधीयते। रौरवोत्तरे सर्वतोभद्र-वर्धमान-शैवाधिक्य-त्रैराशिकाख्यानां चतुर्वर्गाणां, धारालिङ्गमुखलिङ्गयोश्च महालिङ्गमिति व्यपदेशोऽस्तीति भण्यते। अयं विषयोऽन्यत्रागमेषु न दृश्यते। एवं पञ्चदशपटले साजात्यवैजात्यमवगन्तव्यम्।

रौरवोत्तरे शैललिङ्गप्रतिष्ठाविधौ शैललिङ्गं नागरादिविमानेषु, माटाख्ये विमाने, मण्टपे, कूटे च स्थापयेदित्युच्यते। प्रथमतलस्योपरि षड्वर्गसहितं विमानं माटाभिधानं विमानमिति द्राविडभाषायां व्यवह्रियते। माटाभिधाने विमाने स्थापयेदित्युक्तिरुपलभ्यमानेष्वन्येष्वागमेषु न दृश्यते।

रौरवोत्तरेऽत्र शैललिङ्गप्रतिष्ठायां यः क्रियाकलापः स एव मुखलिङ्गादिप्रतिष्ठाविधौ दक्षिणामूर्तिप्रतिष्ठाविधौ च समानतया दृश्यते इत्ययं विशेषोऽत्रागमे।

रौरवोत्तरे शैललिङ्गप्रतिष्ठाविषये प्रासादस्याग्रतो हस्तद्वादशविस्तारमथवा दशहस्तं, षट्त्रिंशत्स्तम्भैरथवा षोडशस्तम्भैर्युक्तं मण्डपं विधाय, तत्र मध्ये सलक्षणां वेदिकां निर्माय, वेदिकाया

बाह्ये नवकुण्डानि कारयेदिति नवकुण्डपक्षोऽभिधीयते। तत्र पूर्वाद्यष्टदिक्षु क्रमेण चतुरश्र-योनि-धनुस्त्रिकोण-वृत्त-षडश्र-पद्माष्टकोणाख्यानि कल्पयेत्। इन्द्रेशानदिशोर्मध्ये वृत्तकुण्डं प्रधानं कुर्यादिति नवकुण्डकल्पनप्रकारश्चाभिहितः। एवमेव पूर्वं दक्षिणामूर्तिप्रतिष्ठायामपि नवकुण्ड-कल्पनरीतिरुक्ता। मुखलिङ्ग-बाणलिङ्ग-इष्टलिङ्ग-रत्नलिङ्गप्रतिष्ठासु चतसृष्वपि मण्डपे कुण्डक-ल्पनमेवमेव करणीयमिति तत्र तत्र सूच्यते।

अस्मिन्विषये पूर्वकारणे एकोनषष्टितमे पटले —

'कन्यसत्रयलिङ्गानां मण्टपं कन्यसं भवेत्।
मध्यमत्रयलिङ्गानां मण्टपं मध्यमं भवेत्॥
उत्तमत्रयलिङ्गानां मण्टपं चोत्तमं भवेत्।
कूटं वापि प्रपां वापि मण्टपं समलंकृतम्॥
वेदिकायास्तु परितः कुण्डानि च प्रकल्पयेत्।
कुण्डकुट्टिमयोर्मध्ये चान्तरं तु द्विहस्तकम्॥
द्वात्रिंशत्कुण्डकान्यत्र कुर्यादुत्तममण्डपे।
चतुर्विंशतिकुण्डानि कुर्यान्मध्यममण्डपे॥
कारयेन्नव कुण्डानि कन्यसे मण्डपे क्रमात्।
तुर्याश्राश्वत्थपत्राभे चापं गुणाश्रवर्तुले॥
भूताश्राब्जाष्टकाश्राणि कुण्डानीन्द्रादिषु क्रमात्।
वृत्तं प्रधानकं मध्ये इन्द्रकुण्डेशकुण्डयोः॥' (२६-३१)

इत्येतेषु श्लोकेषु उत्तममध्यमकन्यसत्रयलिङ्गानुरोधेनोत्तममध्यमाधमाख्यानि मण्डपानि निर्माय, तत्र मध्ये वेदिकां कृत्वा, तस्या बाह्ये उत्तममण्डपे द्वात्रिंशत्कुण्डानि, मध्यममण्डपे चतुर्विंशतिकुण्डानि, कन्यसमण्डपे नव कुण्डानि च कुर्यादित्युच्यते। अत्र प्रधानकुण्डं विना द्वात्रिंशच्चतुर्विंशतिरिति कुण्डपरिगणनं कृतमिति भाति। अन्ते नवकुण्डकल्पनरीतिश्च प्रदर्शिता। रौरवोत्तरे नवकुण्ड-कल्पनप्रकारे वायुदिशि षडश्रकुण्डं कल्पनीयमित्युक्तम्। पूर्वकारणे तत्र पञ्चाश्रकुण्डमुक्तम्। रौरवोत्तरे ऐशानकुण्डमष्टकोणमित्युच्यते। पूर्वकारणे तु तत्राष्टाश्रकुण्डं कल्पनीयमिति कथ्यते

अस्मिन्विषये दीप्तागमे विंशे पटले —

'यागार्थं मण्टपं कुर्यात्प्रासादस्याग्रतोऽन्तिके।
सूत्रेण संमितं कृत्वा भूमिशल्यं विवर्जयेत्॥
द्वात्रिंशद्धस्तविस्तारं मण्डपं चोत्तमं स्मृतम्।'
'हस्तैर्द्वादशभिर्युक्तं मण्डपं चाधमं भवेत्।
अधमत्रयलिङ्गस्य मण्डपं चाधमं भवेत्॥
मण्डपस्य त्रिभागैका मध्यमे वेदिका भवेत्।'
'चतुरश्रं धनुर्वृत्तं पद्मं पूर्वादिदिक्षु च॥
योनित्रिकोणपञ्चाश्रमष्टाश्रं स्याद्विदिक्षु वै।
उत्तमत्रयलिङ्गस्य द्वात्रिंशत्कुण्डमाचरेत्॥
मध्यमत्रयलिङ्गस्य चतुर्विंशत्कुण्डमुच्यते।
अधमत्रयलिङ्गस्य कुण्डान्यष्टौ प्रकल्पयेत्॥
इन्द्रईशानयोर्मध्ये कुण्डं प्राधानिकं कुरु।'

(३३, ३४पू०; ३५उ०, ३६; ३९उ०–४२पू०)

इत्येतेषु श्लोकेषु मण्डपविषये उत्तमाधमयोर्लक्षणम्, अधमत्रयलिङ्गस्याधममण्डपमित्युक्तिः, मण्डप-

मध्ये वेदिकानिर्माणप्रकारश्चाभिधीयन्ते। तत्रोत्तमत्रयलिङ्गविषये द्वात्रिंशत्कुण्डानि मध्यमत्रय-लिङ्गविषये चतुर्विंशतिकुण्डानि, अधमत्रयलिङ्गविषये कुण्डाष्टकं च कुर्यादित्युच्यते। तत उत्तममध्यमाधमत्रयलिङ्गविषयेषु त्रिष्वपि शक्रशांकरयोर्मध्ये प्रधानत्वेन कुण्डमेकं च कल्पनीय-मित्युच्यते। अतः सर्वत्र प्रधानकुण्डं विना कुण्डसंख्याकथनमिति सिध्यति। पूर्वाद्यष्टदिक्षु कुण्डकल्पनरीतिरुच्यते।

अस्मिन्विषये पूर्वकामिके चतुष्षष्टितमे पटले ––

'योग्या हस्तमिता वेदी लिङ्गे स्यात्कन्यसत्रये।
द्वादशस्तम्भसंयुक्ता स्याल्लिङ्गे मध्यमत्रये॥
गात्रैर्विंशतिभिर्युक्ता वेदी स्यादुत्तमत्रये।
तत्तद्भक्तिप्रमाणेन बाह्यपङ्क्तीः प्रकल्पयेत्॥
एवं पङ्क्तियुता चाद्ये ततः कुण्डाष्टकं भवेत्।
द्विभक्तिर्मध्यमे ज्ञेया चतुर्विंशतिकुण्डके॥
त्रिभक्तिसंयुताप्यष्टचत्वारिंशच्च कुण्डकम्।
ज्येष्ठलिङ्गत्रयं वा स्याद् द्वात्रिंशत्कुण्डसंयुतम्॥'
'सर्वत्र नवकुण्डं वा लिङ्गे कन्यसकन्यसे।
पंञ्चकुण्डमथैकं वा चललिङ्गेऽपि कथ्यते॥
वेदिभगशशाङ्कार्धत्र्यश्रवृत्तानि पञ्चसु।
षडश्राब्जाष्टकोणानि दिक्ष्वन्यासु निवेशयेत्॥
वृत्तं प्रधानमेवं स्याच्चतुरश्रं तु वा भवेत्।' (११–१४; १६-१८पू०)

इत्येतेषु श्लोकेषु कन्यसत्रयमध्यमत्रयोत्तमत्रयलिङ्गविषये वेदीकल्पनप्रकारः, तत्र बाह्ये तत्तल्लिङ्गा-नुरोधेन कुण्डकल्पनरीतिश्च वर्ण्यते। तत्र कन्यसत्रयलिङ्गविषये कुण्डाष्टकम्, मध्यमत्रयलिङ्ग-विषये चतुर्विंशतिकुण्डानि, तथोत्तमत्रयलिङ्गविषयेऽष्टचत्वारिंशत्कुण्डानि च कल्पनीयानीत्युच्यते। उत्तमत्रयलिङ्गविषये द्वात्रिंशत्कुण्डानि वा कुर्यादिति पक्षान्तरं चाभिधीयते। अत्रापि प्रधानकुण्डं विना सर्वत्र कुण्डपरिगणनमिति भाति। सर्वत्र नवकुण्डं वा कल्पयेदिति च पक्षान्तरमत्र प्रोक्तम्। कन्यसाधमलिङ्गविषये चललिङ्गविषये च पञ्चकुण्डमथवैककुण्डं प्रकुर्यादित्युक्तम्। अन्ते च नवकुण्डकल्पनरीतिर्वर्ण्यते। पूर्वकारणदीप्तागमयोरुत्तमत्रयलिङ्गविषये द्वात्रिंशत्कुण्डकल्पनमेवोक्तम्। पूर्वकामिके तु तत्र अष्टचत्वारिंशत्कुण्डकल्पनमथवा द्वात्रिंशत्कुण्डकल्पनमिति विकल्पोक्तिर्दृश्यते। सर्वत्र नवकुण्डं वा कुर्यादिति पक्षान्तरं च पूर्वकामिकेऽभिधीयते। एवं पूर्वकारणदीप्तागमापेक्षया पूर्वकामिके दृश्यमानो भेदोऽवगन्तव्यः। रौरवोत्तरे तु शैललिङ्गमुखलिङ्गबाणलिङ्गेष्टलिङ्गरत्न-लिङ्गप्रतिष्ठाविधिषु पञ्चस्वपि नवकुण्डकल्पनमेव प्रोक्तमिति वैजात्यं साजात्यं चाधिगन्तव्यम्।

अजितागमेऽष्टादशपटले ३४–४३ श्लोकेषु लिङ्गप्रतिष्ठाविषये कुण्डवेदिकासहितमण्डप-विधिः प्रतिपाद्यते। तत्र ––

'वेदाश्रयोनिखण्डेन्दुत्र्यश्रवृत्तषडश्रकैः।
पद्मवस्वश्रसंयुक्तैरष्टदिक्ष्वष्टकुण्डकैः॥
शक्रशांकरयोर्मध्ये वृत्तेन च समन्वितम्।
वेदाश्रकुण्डैः परितश्चतुर्विंशैः समन्वितम्॥' (३६उ०-३८पू०)

इत्यनयोः श्लोकयोरुत्तमत्रयलिङ्गविषये कुण्डकल्पनविधिरुच्यते। अत्र च नवकुण्डानां परित-श्चतुर्विंशतिचतुरश्रकुण्डानि कल्पनीयानीत्युच्यते। अतोऽत्र उत्तमत्रयलिङ्गविषये त्रयस्त्रिंश-त्कुण्डानि प्रोक्तानीति सिध्यति। अत्र प्रधानकुण्डगणनं विना द्वात्रिंशत्कुण्डानि पूर्वकारणदीप्ता-

गमयोरुक्तानीति भेदो ज्ञेयः। पूर्वकामिके त्वत्र अष्टचत्वारिंशत्कुण्डान्यथवा द्वात्रिंशत्कुण्डानीति पक्षद्वयमस्तीति व्यत्यासो ज्ञेयः।

अजितागमे मध्यमत्रयलिङ्गविषये —

'तस्यास्तु परितः कुण्डमष्टदिक्षु च पूर्ववत्।
विदिक्ष्वष्ट च कुण्डानि वृत्तानि परिकल्पयेत्॥' (४०उ०, ४१पू०)

इत्यस्मिन्श्लोके 'वेद्याः परितः पूर्ववद्दिक्षु कुण्डाष्टकं प्रकल्प्य, पुनर्विदिक्षु वृत्तानि कुण्डानि कारयेत्' इत्युक्तत्वान्मध्यमत्रयलिङ्गविषये षोडशकुण्डान्यजितागमे विहितानीति सिध्यति। अत्र प्रधानकुण्डगणनं विना कुण्डसंख्या प्रोक्तेति भाति। पूर्वकारणे, दीप्ते, पूर्वकामिके च मध्यमत्रयलिङ्गविषये चतुर्विंशतिकुण्डानि प्रोक्तानि। अजिते तु षोडशकुण्डानि प्रोच्यन्त इति भेदो ज्ञेयः।

एवमजितागमेऽधमत्रयलिङ्गविषये —

'मध्ये वेदिकया युक्तमुत्सेधेन द्वितालता।
कुण्डैरावृतया चैव नवभिः पूर्ववासितैः॥' (४२उ०, ४३पू०)

इत्यत्र 'नवकुण्डैरावृतया वेद्या युक्तम्' इत्युक्तत्वादधमत्रयलिङ्गविषये नवकुण्डान्येव कल्पनीयानीति सिध्यति। एवं च पूर्वकारणेऽजिते च प्रधानकुण्डगणनेन सहाधमत्रयलिङ्गविषये नवकुण्डानि कर्तव्यानीत्युक्तम्। प्रधानकुण्डगणनं विना दीप्तपूर्वकामिकयोरष्टकुण्डानि कल्पनीयानीत्यभिहितम्। रौरवोत्तरे तु लिङ्गविषये उत्तमत्रयादिभेदं विना नवकुण्डपक्ष एवाभिहित इति वैजात्यं भवति।

चिन्त्यागमे विंशे पटले लिङ्गप्रतिष्ठाविषयेऽधिवासार्थं मण्डपविधिः १४उ०–२२ श्लोकेषु प्रतिपाद्यते। अत्र उत्तमत्रयलिङ्गादिभेदेन मण्डपे कुण्डविषये च भेदप्रतिपादनं न दृश्यते। कुण्डविषये नवकुण्डपक्षः पञ्चकुण्डैककुण्डपक्षौ च प्रतिपादिताः। यथा —

'कुण्डानि परितः कुर्यादिन्द्राद्यष्टदिशासु च।
श्रुत्यश्रं योनिचन्द्रार्धं त्र्यश्रं वृत्तं षडश्रकम्॥
पद्ममष्टाश्रकुण्डानि लक्षणोक्तं तु कारयेत्।
शक्रेशानकयोर्मध्ये वृत्तकुण्डं प्रधानकम्॥
पञ्चाग्नौ चतुरश्राणि दिशासु श्रेष्ठं वृत्तकम्।
एकाग्नौ चैव कुण्डं च पूर्वे वा चतुरश्रकम्॥' (२०–२२) इति।

अत्र नवकुण्डकल्पनविषये रौरवोत्तरे ऐशानकुण्डमष्टकोणमित्युक्तम्। चिन्त्ये तु अष्टाश्रकुण्डमभिहितम्। अन्यत्सर्वं समानं भवति। रौरवोत्तरे पञ्चकुण्डैककुण्डपक्षौ नैव प्रोक्ताविति भेदोऽवगन्तव्यः।

एवं सुप्रभेदे क्रियापादे षट्त्रिंशे पटले २२उ०–३० श्लोकेषु लिङ्गप्रतिष्ठाविषयेऽधिवासार्थं मण्डपविधिरभिधीयते। अत्रापि उत्तमत्रयलिङ्गादिभेदेन मण्डपे कुण्डविषये च विशेषप्रतिपादनं न दृश्यते। अत्र नवकुण्डपक्षोऽभिहितः। विस्तारे नवकुण्डपक्षः, संक्षेपे पञ्चकुण्डपक्ष इत्यच्यते। यथा —

'तस्याश्च परितः कृत्वा कुण्डानि च विधानतः।
पूर्वे तु चतुरश्रं तु याम्ये चैवार्धचन्द्रवत्॥
पश्चिमे वृत्तकुण्डं तु उत्तरे पद्ममेव च।
योन्याकारं तथाग्नेय्यां त्रिकोणं चैव नैर्ऋते॥
षट्कोणं वायुदिग्भागे ऐशान्यामष्टकोणकम्।

ऐशानइन्द्रयोर्मध्ये वृत्तकुण्डं तु कारयेत् ॥

विस्तारे नवहोमः स्यात्संक्षेपे पञ्चहोमकम् ।' इति (२७-३०पू०)

अत्र नवकुण्डकल्पनप्रकारे रौरवोत्तरे वायव्यां षडश्रकुण्डमुक्तम्। सुप्रभेदे तु तत्र षट्कोण-कुण्डमुक्तम्। अन्यत्सर्वं समानं भवति। रौरवोत्तरे पञ्चकुण्डपक्षो नैवाभिहित इति वैजात्य-मधिगन्तव्यम्।

रौरवे क्रियापादेऽष्टाविंशे पटले लिङ्गप्रतिष्ठायामधिवासार्थमण्डपविधिः २७–३३ श्लोकेषु प्रतिपाद्यते। अत्रापि उत्तमत्रयलिङ्गादिभेदेन मण्टपे कुण्डविषये च विशेषप्रतिपादनं न दृश्यते। अत्र पञ्चकुण्डपक्ष एव प्रोच्यते। यथा —

'तुर्याश्रिकुण्डं प्राच्यां तु दक्षिणे त्वर्धचन्द्रकम्।

वारुणे वृत्तकुण्डं तु सौम्ये चैव त्रिकोणकम् ॥

पद्मकुण्डमथैशान्यां सर्वं वेदाश्रमेव वा।' (३०उ०, ३१) इति।

रौरवोत्तरे नवकुण्डपक्षः प्रतिपादितः, रौरवे पञ्चकुण्डपक्ष उक्त इति वैजात्यं स्पष्टम्। पूर्व-कारणे, दीप्ते, पूर्वकामिके, अजिते च उत्तमत्रयादिलिङ्गानुरोधेन मण्डपकल्पने विशेषः, कुण्डकल्पने च संख्याविशेषकथनं च दृश्यते। चिन्त्ये रौरवे सुप्रभेदे चैतादृशविशेषो नाभिधीयते। रौरवो-त्तरे लिङ्गप्रतिष्ठाविधिषु सर्वत्रैकरूपेण नवकुण्डपक्ष एवाभिहित इति साजात्यवैजात्यमवगन्तव्यम्।

रौरवोत्तरे शैललिङ्गप्रतिष्ठाविषये कुम्भाधिवासे लिङ्गस्य दक्षिणभागे शिवकुम्भं, वामभागे वर्धनीं च स्थापयित्वा, तयोः परितः पूर्वाद्यष्टदिक्षु चाष्टौ कुम्भान्स्थापयेदिति नवकुम्भस्थापन-प्रकारोऽभिधीयते। ततो लिङ्गदक्षिणभागस्थे शिवकुम्भे ईशानमूर्तिं, वर्धन्यामुमां, पूर्वकुम्भे तत्पुरुषमूर्तिं, दक्षिणकुम्भेऽघोरमूर्तिं, पश्चिमकुम्भे सद्योजातमूर्तिम् उत्तरकुम्भे वामदेवमूर्तिम्, आग्नेय-कुम्भे हृदयमूर्तिं, नैर्ऋतकुम्भे शिरोमूर्तिं, वायव्यकुम्भे शिखामूर्तिम्, ऐशानकुम्भे कवचमूर्तिं, लिङ्गे नेत्रमूर्तिं, पीठेऽस्त्रमूर्तिं चावाह्य तत्तन्मन्त्रैरर्चयेदिति कुम्भाधिपविषये पञ्चब्रह्मणां हृदयाद्यङ्गानां च न्यासप्रकारो विधीयते। एवमेव मुखलिङ्गबाणलिङ्गेष्टलिङ्गरत्नलिङ्गप्रतिष्ठाविधिष्वपि कुम्भस्थापनं, कुम्भाधिपविषये मूर्तिन्यासं च कुर्यादिति तत्र तत्र सूच्यते। कुम्भाधिवासविषये दृश्यमानोऽयं प्रकारो नान्यत्रोपलभ्यमानेष्वागमेषु वर्तते। एतादृशं रौरवोत्तरस्यागमान्तरवैजात्यं विशिष्यावगन्तव्यम्।

अत्र विषये दीप्तागमे विंशे पटले —

'शिरः प्रदेशे लिङ्गस्य शिवकुम्भं च विन्यसेत्।'

'ध्यात्वा सदाशिवं रूपं पञ्चमूर्तिभिरन्वितम्।'

'आवाहनादिकं सर्वं पूर्वोक्तविधिना कुरु।'

'वर्धनीं विन्यसेद्वामे द्रोणतोयप्रपूरिताम्।'

'ध्यात्वा गणाम्बिकां देवीं पीनोन्नतपयोधराम्।'

'अभितः कलशानष्टौ द्रोणार्धोदकपूरितान्।'

'अनन्तादिशिखण्डचन्तानष्टविद्येश्वरान्न्यसेत् ॥'

'तत्तन्मन्त्रं समुच्चार्य पूजयित्वा यथाविधि।'

(१४१उ०, १४८उ०; १५२पू०, १५३पू०, १५५पू०, १५७उ०,१६१पू०, १६३उ०)

इत्येतेषु श्लोकेषु शिवकुम्भे सदाशिवं, वर्धन्यां गणाम्बिकाम्, अभितोऽष्टकुम्भेषु विद्येश्वरानष्टौ च विन्यस्य तत्तन्मन्त्रैः पूजयेदित्युच्यते।

विषयेऽस्मिन् पूर्वकारणे एकोनषष्टितमे पटले —

'शिवकुम्भस्य मध्ये तु शिवमन्त्रं तु विन्यसेत्।
ध्यात्वा सादाशिवं रूपं पूर्वोक्तविधिना सह।'
'तस्यैव वामभागे तु वर्धनीं चैव विन्यसेत्।'
'निक्षिप्य मध्यमं कूर्चं मनोन्मन्यास्तु मन्त्रकम्।
वर्धनीमध्यमे न्यस्त्वा ध्यात्वा तद्रूपकं यजेत्॥'
'अभितस्तु घटानष्टौ स्थापयेदष्टदिक्षु च।
इन्द्रादीशानपर्यन्तमष्टविद्येश्वरान्न्यसेत्॥'
'तत्तद्बीजानि न्यस्त्वा तु ध्यात्वा पूर्वोक्तवत्सुधीः।
गन्धादिभिर्यजेत्पश्चान्नैवेद्यान्तं क्रमाद्धृदा॥'
(११२, ११७उ०, ११८उ०, ११९पू०, १२०उ०, १२१पू, १२३)

इत्येतेषु श्लोकेषु शिवकुम्भे सदाशिवं, वर्धन्यां मनोन्मनीं तयोरभितोऽष्टसु कुम्भेषु विद्येश्वरानष्टौ च विन्यस्य तत्तन्मन्त्रैः पूजयेदित्युच्यते। दीप्ते वर्धन्यां गणाम्बिका पूज्यत्वेन विहिता। पूर्वकारणे तु तत्र मनोन्मनी पूज्येत्युच्यते। दीप्तपूर्वकारणयोरयमेव भेदो वर्तते।

अस्मिन्विषये पूर्वकामिके चतुष्षष्टितमे पटले—

'वेद्यूर्ध्वे परितः कुम्भान्न्यसेद्विद्येश्वरात्मकान्।
निद्राकुम्भं शिरोदेशे वर्धनीमुत्तरे न्यसेत्॥ (१११उ; ११२पू०)

इत्यत्र लिङ्गशिरोदेशे निद्राकुम्भं, तदुत्तरे वर्धनीं परितोऽष्टविद्येश्वरकुम्भांश्च स्थापयेदिति कुम्भस्थापनप्रकारः प्रोच्यते।

तथा अजितेऽष्टादशपटले—

'शिवे सदाशिवं तत्र यजेत्कुम्भे मनोन्मनीम्।
तत्कुम्भे चापि संपूज्य विद्येशान्दिक्षु पूजयेत्॥ (१४६उ०, १४७पू०)

इत्यत्र कुम्भाधिपार्चनं कथ्यते। पूर्वकारणाजितयोरत्र साजात्यं विद्यते। एवमेव रौरवे क्रियापादेऽष्टाविंशे पटले ४२–५७ श्लोकेषु कुम्भाधिपार्चनमुच्यते। एवं च पूर्वकारणेऽजिते रौरवे च प्रकृतविषये साजात्यमस्ति।

सुप्रभेदे क्रियापादे षट्त्रिंशे पटले—

'बाललिङ्गगतं देवं कुम्भे विन्यस्य बुद्धिमान्।
तस्य पीठगतां देवीं वर्धन्यां तु समावहेत्॥
विद्येश्वराधिपानष्टौ वस्त्रहेमास्त्रसंयुतान्।
कूर्चाक्षतवितानास्यान्फलपल्लवशोभितान्॥
शिवकुम्भस्य परितः संस्थाप्य कलशान्बुधः।
विद्येश्वरान्परीवारान्द्वारपालादिदेवताः॥
तत्तत्कुम्भे समाहूय तत्तन्मन्त्रेण मन्त्रवित्।' (६६उ०–६९)

इत्येतेषु श्लोकेषु कुम्भस्थापनं कुम्भाधिपार्चनं च विधीयते। शिवकुम्भवर्धन्योः, तथा विद्येशकुम्भानां परिवारद्वारपादिदेवताकुम्भानां च स्थापनं कथ्यते। परिवारद्वारपालादिदेवताकुम्भस्थापनविषयोऽन्यत्र न दृश्यते। एवं कुम्भाधिवासविषये साजात्यवैजात्यं प्रदर्शितम्।

रौरवोत्तरे समिद्–घृत-चरु-क्षीर-यव-वेणु-प्रियङ्गु-लाज-सर्षप-माष-तिल-मधु-गुला इति त्रयोदश द्रव्याणि होतव्यानीत्युच्यते।

अत्र विषये पूर्वकारणे एकोनषष्टितमे पटले पञ्चदशद्रव्याणि कथ्यन्ते—

'समिदाज्यचरूँल्लाजान्माषमुद्गयवांस्तिलान्।

शालिगोधूमनीवारान्सक्तून्सिद्धार्थकं दधि ॥
क्षीरं क्रमेण विधिवज्जुहुयुर्वै पृथक् पृथक्'। इति। (१४१उ०, १४२)

अत्र पूर्वकारणोदितद्रव्येषु मुद्गशालिगोधूमनीवारसक्तुदधीनि षड्द्रव्याणि रौरवोत्तरे न निर्दिश्यन्ते। रौरवोत्तरोक्तानि वेणुप्रियङ्गुमधुगुलाख्यानि चत्वारि द्रव्याणि पूर्वकारणे न सन्तीति साजात्यवैजात्यं ज्ञेयम्।

अजितागमेऽष्टादशपटले —

'समिदाज्यचरूँल्लाजान्सर्षपांश्च यवांस्तिलान्।
मुद्गमाषकुलुत्थांश्च वेणुनीवारकानपि॥
एतानि होमद्रव्याणि' (१५३, १५४पू०)

इत्यत्र द्वादश द्रव्याणि कथ्यन्ते। अत्र रौरवोत्तरोक्तेषु द्रव्येषु क्षीरप्रियङ्गुमधुगुलाख्यानि चत्वारि द्रव्याणि न निर्दिष्टानि। अजितोक्तानि मुद्गकुलुत्थनीवाराख्यानि त्रीणि रौरवोत्तरे न सन्तीति साजात्यवैजात्यं ज्ञेयम्।

अस्मिन्विषये दीप्ते, चिन्त्ये, रौरवे चैकादशैव द्रव्याण्युच्यन्ते। यथा —

'समिदाज्यचरुलाजाः सक्तुसिद्धार्थमाषकाः।
यवनीवारश्रीपत्रतिलास्त्वेकादशा इमे॥ (दीप्ते २०.१६९) इति।;
'समिदाज्यचरूँल्लाजांस्तिलसिद्धार्थकान्यवान्।
माषं मुद्गं च शालिं च सक्तुमेकादश क्रमात्॥'
(चिन्त्ये २०.१२७उ०; १२८पू०) इति।;
'समिदाज्यचरूँल्लाजान्सक्तुमाषतिलानपि।
सिद्धार्थं गुलमुद्गं च कदलीफलमेव च॥' (रौरवे क्रियापादे २८.५९) इति।

दीप्तागमोक्तानि सक्तुनीवारश्रीपत्राख्यानि त्रीणि द्रव्याणि रौरवोत्तरे न दृश्यन्ते। रौरवोत्तरोक्तानि क्षीरवेणुप्रियङ्गुमधुगुलाख्यानि पञ्च द्रव्याणि दीप्तागमे न सन्ति। चिन्त्यागमोक्तानि मुद्गशालिसक्त्वाख्यानि त्रीणि रौरवोत्तरे न सन्ति। रौरवोत्तरोक्तानि क्षीरवेणुप्रियङ्गुमधुगुलाख्यानि पञ्च द्रव्याणि चिन्त्यागमे न दृश्यन्ते। एवं रौरवागमोक्तानि सक्तुमुद्गकदलीफलाख्यानि त्रीणि द्रव्याणि रौरवोत्तरे न दृश्यन्ते। रौरवोत्तरोक्तानि क्षीरयववेणुप्रियङ्गुमध्वाख्यानि पञ्च द्रव्याणि रौरवे न विद्यन्त इति साजात्यवैजात्यमधिगन्तव्यम्। एवं षोडशपटलस्थविषयाणां साजात्यवैजात्यं प्रदर्शितम्।

रौरवोत्तरे सप्तदशपटले मुखलिङ्गप्रतिष्ठायां मुखलिङ्गलक्षणविषये पञ्चशिरोभिः पञ्चमुखैश्च युक्तं पञ्चदशनेत्रसमन्वितं जटामकुटसंयुक्तं पञ्चमुखलिङ्गं कुर्यात्। तत्र पूर्वे तत्पुरुषवक्त्रं, दक्षिणेऽघोरवक्त्रं, पश्चिमे सद्योजातवक्त्रम्, उत्तरे वामदेववक्त्रं, मध्यमे ईशानवक्त्रं च कल्पयेदिति मुखकल्पनविधिश्च प्रतिपाद्यते। एवं पञ्चमुखलिङ्गलक्षणमभिधाय त्रिमुखमेकमुखं वापि कुर्यादिति त्रिमुखैकमुखलिङ्गयोरपि सूचनं कृतम्। एवं च रौरवोत्तरे मुखलिङ्गविषये पञ्चमुख-त्रिमुख-एकमुखलिङ्गानि त्रीणि परिगण्यन्ते। पञ्चदशपटले पञ्चमश्लोके 'चतुर्मूर्धादिलिङ्गकम्' इति चतुर्मुखलिङ्गस्य सूचना यद्यपि कृता। तादृशलिङ्गं पुनरत्र न परिगणितम्।

अत्र विषये पूर्वकारणे नवमपटले — 'शराननं चतुर्वक्त्रं त्रिवक्त्रं चैकवक्त्रकम्' (९. १३६ उ०) इत्यत्र पञ्चमुख-चतुर्मुख-त्रिमुख-एकमुखानि लिङ्गानि चत्वारि मुखलिङ्गविषये परिगण्यन्ते।

पूर्वकामिके, किरणे, दीप्ते च चतुर्मुखत्रिमुखैकमुखानि लिङ्गानि त्रीणि प्रतिपाद्यन्ते। तद्यथा—

'चतुर्मुखं तत् त्रिमुखमेकवक्त्रयुतं भवेत्।' (पूर्वकामिके ६२.४० पू०) इति।;
'एकवक्त्रं त्रिवक्त्रं वा प्रासादे चैकवक्त्रके।

स्थाप्यं चतुर्मुखं लिङ्गम्' (किरणे चर्यापादे २३.१०उ०, ११पू०) इति ।;

'चतुरास्यं त्रिरास्यं वा प्रासादे स्थाप्य लिङ्गवत् ।
एकवक्त्रमतिशुक्लं स्थापयेच्चलवद्बुधः ।' (दीप्ते ४८.११) इति ।

अंशुमत्काश्यपे मुद्रिते एकोनपञ्चाशत्पटले—

'चतुर्वक्त्रैकवक्त्रं वा चतुर्बाहु द्विबाहु वा ।' (१४७ उ०)

इत्यत्र चतुर्मुखमेकमुखमिति द्वे मुखलिङ्गे उच्येते ।

रौरवोत्तरे मण्डपे कुण्डकल्पनविषये चतुरश्रादिवृत्तान्तानि नवकुण्डानि शैललिङ्गप्रतिष्ठोक्तवत् कर्तव्यानीत्युक्तम् । अत्र विषये दीप्तागमेऽपि —

'चतुरश्राणि कुण्डानि दिक्षु कुर्याद्यथाक्रमम् ।
आग्नेयादीशकोणान्तं वृत्तकुण्डानि कारयेत् ॥
ईशानशक्रयोर्मध्ये वृत्तं प्राधानिकं कुरु ।' (४८.२५ उ०, २६)

इत्यत्र नवकुण्डकल्पनप्रकारो वर्ण्यते । रौरवोत्तरे नवकुण्डकल्पने दिक्षु पूर्वादिक्रमेण चतुरश्रधनुर्वृत्तपद्मकुण्डानि, विदिक्षु आग्नेयादिक्रमेण अर्धचन्द्रत्रिकोणषडश्राष्टकोणख्यानि कुण्डानि कुर्यादित्युक्तम् । दीप्ते तु दिक्षु सर्वत्र चतुरश्रकुण्डानि, कोणेषु च सर्वत्र वृत्तकुण्डानि कुर्यादित्युच्यते । अत्र वैजात्यं स्पष्टं भवति । प्रधानकुण्डविषये तूभयत्रापि वृत्तकुण्डमुक्तमिति साजात्यं वर्तते ।

कुम्भाधिवासविषये दीप्तागमे —

'शिवकुम्भं वर्धनीं च तत्तदीशे तु विन्यसेत् ।
पूर्वोक्तशिवमन्त्रं तु शिवकुम्भे तु विन्यसेत् ॥
वर्धन्यां वर्धनीबीजं तद्रूपं तु विभावयेत् ।
अभितोऽष्टघटान्यस्त्वा शिवतोयेन पूरयेत् ॥
सवस्त्रान्सपिधानांश्च लोकपालाधिदैवतान् ।
बीजानि लोकपालानां तत्तत्कुम्भेषु विन्यसेत् ॥
पूजयित्वा यथान्यायं नैवेद्यान्तं विशेषतः ।' (४८.३०उ०–३३)

इत्येतेषु श्लोकेषु शिवकुम्भवर्धन्योः स्थापनं, तत्र तत्तन्मन्त्रन्यासः, अभितोऽष्टकुम्भस्थापनं, तत्र दिक्पालाष्टकपूजनं च विधीयन्ते । रौरवोत्तरे तु पूर्वादीशानान्तमष्टकुम्भस्थापनं, मध्यमे शिवकुम्भवर्धन्योः स्थापनं च कर्तव्यम् । शैललिङ्गप्रतिष्ठाविध्युक्तप्रकारेण नवकुम्भेषु लिङ्गे पीठे च ईशानाद्यस्त्रपर्यन्तमूर्तिन्यासं तदीयमर्चनं च कुर्यादित्युच्यते । ईशानाद्यस्त्रपर्यन्तो मूर्तिन्यासप्रकारः शैललिङ्गप्रतिष्ठाविधौ सम्यक् प्रदर्शितः । एवं कुम्भाधिवासविषये दीप्तागमरौरवोत्तरागमयोर्वैजात्यमस्तीति स्पष्टम् ।

रौरवोत्तरे होमविषये त्रयोदश द्रव्याणि कथ्यन्ते । दीप्तागमे तत्र —

'समिदाज्यचरुक्षीरं लाजं चापि तथा मधु ।
अपूपं फलसिद्धार्थं तिलं वै जुहुयात्क्रमात् ॥' (४८.३४उ०, ३५पू०)

इत्यस्मिञ्श्लोके दशद्रव्याणि विधीयन्ते । दीप्तागमोदितमपूपफले रौरवोत्तरे न दृश्येते । रौरवोत्तरोक्तानि यववेणुप्रियङ्गुमाषगुलाख्यानि पञ्च द्रव्याणि दीप्तागमे न विद्यन्त इति होमद्रव्यविषये साजात्यवैजात्यम् । एवं सप्तदशपटले साजात्यं वैजात्यं च प्रादर्शि ।

रौरवोत्तरेऽष्टादशपटले बाणलिङ्गविषये यावन्मानमुपलभ्यते लिङ्गं तावन्मानमेव ग्राह्यम् । स्वमानमेव तन्मानमित्युच्यते । अत्र विषये उत्तरकामिके षट्त्रिंशे पटले —

'माषमात्रादिहस्तान्तं तेषां मानमुदाहृतम् ।
पादाङ्गुलविवृद्ध्या तु गृह्णीयाद्वा यथेच्छया ॥

विस्तारनाहमानं तु बाणलिङ्गस्य नेष्यते।' (५, ६पू०)

इत्येतत्सार्धश्लोके बाणलिङ्गविषये औन्नत्यविषये पादाङ्गुलवृद्धया माषमात्रादिहस्तान्तं मानमुक्त्वा, यथेच्छया मानगणनं विनापि ग्राह्यमिति पक्षान्तरमप्युच्यते। बाणलिङ्गविषये विस्तारविषये नाहविषये च मानं नास्तीति निषेधः कृतः।

अधिवासार्थं मण्डपकल्पनविषये रौरवोत्तरे शैललिङ्गप्रतिष्ठाविध्युक्तप्रकारेण मण्डपं तत्र नवकुण्डानि च कर्तव्यानीत्युच्यते। अत्र विषये उत्तरकामिके —

'नवपञ्चैककुण्डकम्।
कुर्याल्लिङ्गाधिवासार्थं वेदिकासहितं यथा॥
वेदिकारहितं चैतद्गृहादौ स्थण्डिलं मतम्।' (३६.२२उ०–२३)

इत्यत्र परार्थपूजाविषये आलये लिङ्गप्रतिष्ठाविषयेऽधिवासार्थं मण्डपं वेदिसहितं कुर्यात्। गृहादौ आत्मार्थपूजाविधौ लिङ्गप्रतिष्ठायां वेदिकारहितः स्थण्डिलमात्रयुक्तो मण्डपः कर्तव्य इति विशेषः प्रोच्यते। कुण्डकल्पनविषये विकल्पेन नव कुण्डानि पञ्चकुण्डानि वा कर्तव्यानि। एकं कुण्डं वा कर्तव्यमिति पक्षत्रयमुच्यते। रौरवोत्तरे तु बाणलिङ्गप्रतिष्ठायां नवकुण्डपक्ष एव प्रोक्तः।

एवं कुम्भाधिवासे उत्तरकामिके —

'शिवकुम्भं च वर्धनीम्।
विद्येशकुम्भसंयुक्तं ससूत्रं सापिधानकम्॥
सहिरण्यं सवस्त्रं च गन्धोदपरिपूरितम्।
संस्थाप्य संयजेत् सर्वान्' (३६.२६उ०–२८पू०)

इत्यत्र शिवकुम्भवर्धन्योस्तथा परितोऽष्टविद्येशकुम्भानां च स्थापनं, तत्र कुम्भाधिपानामर्चनं च करणीयमित्युच्यते। रौरवोत्तरे तु शैललिङ्गप्रतिष्ठाविध्युक्तप्रकारेण शिवकुम्भवर्धन्योः स्थापनं, पूर्वादीशानपर्यन्तमष्टकुम्भस्थापनं च विधेयम्। तत्र नवकुम्भेषु लिङ्गे पीठे च ईशानाद्यस्त्र-पर्यन्तमूर्तिन्यासमर्चनं च शैललिङ्गप्रतिष्ठायामुक्तवत्कुर्यादिति सूच्यते। एवं कुम्भाधिवास-विषये वैजात्यमवगन्तव्यम्।

रौरवोत्तरे होमद्रव्यविषये त्रयोदश द्रव्याणि होतव्यानीत्युच्यते।

अस्मिन्विषये उत्तरकामिके षट्त्रिंशे पटले —

'समिदाज्यान्नलाजैश्च तिलेन च समन्वितम्।
जुहुयान्मूलमन्त्रेण शतमष्टोत्तरं यथा॥' (२९)

इत्यत्र पञ्चद्रव्याणि होतव्यानीत्युच्यते। एतानि पञ्च द्रव्याण्यपि रौरवोत्तरे दृश्यन्ते। परं तु रौरवोत्तरोक्तानि क्षीरयववेणुप्रियङ्गुसर्षपमाषमधुगुलाख्यानि द्रव्याण्यष्ट पूर्वकामिके न विद्यन्त इति वैजात्यं स्पष्टम्।

रौरवोत्तरे रत्नन्यासविषये प्रासादे लिङ्गस्थापनयोग्ये स्थानेऽथवा पीठमध्ये बिलीकृते नव-रत्नानि स्थापयेदित्युच्यते। अत्र उत्तरकामिके षट्त्रिंशे पटले —

'रत्नन्यासं ततः कुर्यान्नवपञ्चैकरत्नकम्।
पिण्डिकावटमध्ये तु हेमं वाथ विनिक्षिपेत्॥' (२०उ०, २१पू०)

इत्यत्र पिण्डीकावटमध्ये रत्नन्यासः कर्तव्य इत्येक एव पक्षः कथ्यते। रौरवोत्तरे तु पीठावटे-ऽथवा स्थापनयोग्यस्थान इति पक्षद्वयमभिधीयते। नवरत्नानि स्थापयेदिति रौरवोत्तरे नवरत्नन्यास एव प्रोक्तः। उत्तरकामिके नवरत्नानि पञ्चरत्नानि रत्नमेकं वा स्थापयेत्। रत्नाभावे हेम वा स्थाप्यतामिति पक्षचतुष्टयमभिहितम्। एवं बाणलिङ्गप्रतिष्ठाविधौ साजात्यवैजात्यं प्रादर्शि।

रौरवोत्तरे एकोनविंशे पटले पर्वते वा वने वा नदीजले वोपलभ्यमानं स्वाभिमतं लिङ्गं

प्रगृह्य प्रतिष्ठां कुर्यादित्युक्त्वा, एतल्लिङ्गविषये परं पृथक्तया प्रतिष्ठाविधानं संग्रहेणाभिधीयते। एवंरीत्या पर्वतादिषूपलभ्यमानलिङ्गविषये परं पृथक्प्रतिष्ठाविधिकथनमन्यागमेषूपलभ्यमानेषु नैव दृश्यत इत्यागमान्तरेभ्योऽत्र विशेषः ।

रौरवोत्तरे विंशे पटले रत्नलिङ्गविषये माणिक्य-मुक्ता-वैडूर्य-इन्द्रनील-प्रवाल-स्फटिक-पद्मराग-पुष्पराग-वज्र-मरकत-अयस्कान्त-सूर्यकान्त-इन्दुकान्ताख्यानि त्रयोदश द्रव्याणि कथ्यन्ते।

दीप्तागमे एकसप्ततिपटले —

माणिक्यं पद्मरागं च तथा मरकतं भवेत्।
स्फटिकं च तथा प्रोक्तं पुष्परागं तथैव च।
प्रवालं चैव वज्राख्यं वैडूर्यमिन्द्रनीलकम्॥ (३ उ०, ४)

इत्यत्र नवरत्नानि निर्दिष्टानि।

अजितेऽपि चतुर्थपटलेऽस्मिन्विषये किंचिद्भेदेन नवरत्नान्येवाभिहितानि यथा —

'माणिक्यमुक्ते त्वथ वज्रनीलौ वैडूर्यसंज्ञं हरिताश्मना च।
पुष्यादिरागस्फटिकप्रवाला नवैव रत्नानि भवन्त्यमूनि॥ (१३) इति।

सुप्रभेदे क्रियापादे त्रयस्त्रिंशे पटले सप्त रत्नानि प्रोक्तानि। यथा —

'मौक्तिकं च प्रवालं च वैडूर्यं स्फटिकं तथा।
पुष्यं मरकतं नीलं रत्नजं संप्रकीर्तितम्॥ (३६) इति।

पूर्वकारणे, दीप्ते, अजिते च रत्नलिङ्गविषये फलं च विशिष्य कथ्यते। तद्यथा —

'मरकतं पुष्टिदं ज्ञेयं पद्मरागं धनार्थकम्।
आयुष्यवृद्धि वैडूर्यं स्फटिकं पुत्रवर्धनम्॥
स्तम्भनं पुष्यरागं स्याद् दृष्टवश्यं प्रवालकम्।
आकर्षणं स्याद् वज्राख्यं माणिक्कं सर्वसिद्धिदम्॥
इन्द्रनीलं तु मोक्षार्थं रत्नजानां फलं भवेत्।'
(पूर्वकारणे ९.१७८-१८०पू०) इति।;

माणिक्यं जयदं ज्ञेयं पद्मरागं धनावहम्।
पुष्टिं मरकतं कुर्यात्स्फटिकं पुत्रवृद्धिदम्॥
स्तम्भनं पुष्यरागं च राजवश्यं प्रवालकम्।
आकर्षणं तु वज्राख्यं वैडूर्यं चायुर्वर्धनम्॥
इन्द्रनीलं महासिद्धि रत्नजानां फलं भवेत्। (दीप्ते ७१.५–७पू०) इति।,

'माणिक्यं श्रीप्रदं प्रोक्तं यशसे नीलमुच्यते।
हरितं फलदं प्रोक्तं दोषमुक्त्यै च मौक्तिकम्॥
प्रवालं वशदं विद्याद् वज्रं राज्यप्रदं भवेत्।
वैडूर्यं वैरिनाशार्थं सौभाग्ये पुष्यरागकम्॥
सर्वकामप्रदं प्रोक्तं स्फटिकं तु जनार्दन।'। (अजिते ४.५३–५५पू०) इति।

एवं च दीप्त-सुप्रभेद-पूर्वकारणाजितागमेषु नवरत्नलिङ्गानि निर्दिष्टानि। रौरवोत्तरे नवरत्नलिङ्गानि मौक्तिक-अयस्कान्त-सूर्यकान्त-चन्द्रकान्ताख्यानि चत्वारि, आहत्य त्रयोदश रत्नलिङ्गानि निर्दिश्यन्ते।

अजिते चतुर्थपटले रत्नलिङ्गपीठविषये स्वयोन्यन्ययोनिकयोरुत्तमादिभेदः प्रतिपाद्यते। यथा —

'उत्तमं स्वस्वयोनि स्यान्मध्यमं स्वर्णयोनिकम्।
अधमं रौप्ययोनि स्यात्तदभावे तु ताम्रजम्॥
तस्याप्यभावे शैलं स्याद्रत्नलिङ्गस्य पीठकम्। (५५उ०, ५६) इति।

रौरवोत्तरेऽधिवासार्थं मण्डपं विधाय, तन्मध्ये सलक्षणां वेदिकां निर्माय, तस्या बाह्ये परितः शैललिङ्गप्रतिष्ठाविध्युक्तप्रकारेण नवकुण्डानि कारयेदित्युच्यते।

अस्मिन्विषये पूर्वकारणे द्विषष्टितमे पटले—

'युगाश्रं मण्टपं कुर्यात् षोडशस्तम्भसंयुतम्।
गुणपङ्क्तिसमायुक्तमुच्छ्रयं पङ्क्तिमानकम्॥
तन्मध्ये वेदिकां कुर्यात्तत्त्रिभागैकभागतः।
नवाग्न्यायतनं वापि पञ्चाग्न्यायतनं तु वा॥
कुण्डं वा स्थण्डिलं वापि अग्नेरायतनं कुरु।
मानुषे तु पदे कुर्यात् कुण्डानि लक्षणैः सह॥
दिशासु चतुरश्राणि पद्मानि विदिशासु च।
ईशानशक्रयोर्मध्ये वृत्तं प्राधान्यकं कुरु॥
नवाग्निक्रममेवं तु पद्मकुण्डानि वर्जयेत्।
ईशाने वृत्तकुण्डं तु पञ्चहोमक्रमान्वितम्॥
प्राग्देशे वृत्तकुण्डं तु एकहोमे प्रजापते।" (६उ०-११)

इत्येतेषु श्लोकेषु मण्डपविधिस्तत्र वेदीकल्पनं, वेद्या बाह्ये नवकुण्डकल्पनप्रकारः, पञ्चकुण्डैककुण्डयोः कल्पनप्रकारश्च वर्ण्येते। एवं चात्र नवकुण्डपक्षः, पञ्चकुण्डपक्षः, एककुण्डपक्ष इति पक्षत्रयं विधीयते। रौरवोत्तरे तु नवकुण्डपक्ष एक एवोक्त इति वैजात्यम्। नवकुण्डकल्पनप्रकारे पूर्वकारणे पूर्वादिचतुर्दिक्षु चतुरश्रकुण्डानि, विदिक्षु पद्मकुण्डानीत्युच्यते। रौरवोत्तरे पूर्वादिचतुर्दिक्षु क्रमेण चतुरश्रधनुर्वृत्तपद्मकुण्डानि, विदिक्षु योनित्रिकोणषडश्राष्टकोणाख्यानि कुण्डानि कुर्यादित्युच्यते। प्रधानकुण्डविषये तूभयत्रापि वृत्तकुण्डमेवोक्तमिति भेदो नास्ति। एवं च पूर्वाद्यष्टदिक्षु कुण्डाकारविषये पूर्वकारणे रौरवोत्तरे च नितरां व्यत्यासो वर्तते।

अस्मिन्विषये भीमसंहितायाम्—

'मण्टपं कारयेत्ततः।
सप्तषड्भूतहस्तं वा समं वै चतुरश्रकम्॥
षोडशस्तम्भसंयुक्तं पङ्क्तित्रयसमायुतम्।
मध्यभागे तु वेदिः स्यात्तस्योच्चं द्वादशाङ्गुलम्॥
कुण्डं वा स्थण्डिलं वापि नवपञ्चैकमेव च।
दिशास्वम्बुजकुण्डानि वृत्तानि विदिशासु च॥
पुरन्दरेशयोर्मध्ये वृत्तं कुर्यात्प्रधानकम्।
पञ्चाग्न्यायतनं चेत्तु वृत्तकुण्डानि वर्जयेत्॥
प्रधानं शांकरे देशे कल्पयेत्कल्पवित्तमः।
पूर्वे वा पश्चिमे वाथ दक्षिणे चोत्तरेऽथवा॥
कारयेद्वृत्तकुण्डं तु पूर्वोक्तविधिना बुधः।' (टि० ७७६, पृ० २९४, २९५)

इत्यत्रापि पूर्वकारणोक्तवद् मण्टपकल्पनं वेदीविधानं, तथा तत्र कुण्डकल्पनप्रकारश्चाभिधीयते। पूर्वकारणवत् कुण्डविषये नव, पञ्च, एकमिति पक्षत्रयमुच्यते। नवकुण्डकल्पनप्रकारे परं व्यत्यासो वर्तते। पूर्वादिचतुर्दिक्षु चतुरश्रकुण्डानीति पूर्वकारणे दृश्यते। भीमसंहितायां तत्र पद्मकुण्डानीति प्रोच्यते। रौरवोत्तरे तु चतुरश्रधनुर्वृत्तपद्मकुण्डानीति कथ्यते। एवं विदिक्षु पूर्वकारणे पद्मकुण्डानि कर्तव्यानीत्युच्यते। भीमसंहितायां तत्र वृत्तकुण्डानि कल्पनीयानीत्युच्यते। रौरवोत्तरे तु कोणेष्वाग्नेयादिषु क्रमेण योनित्रिकोणषडश्राष्टकोणाख्यानि कुण्डानि विधेयानीत्यु-

च्यते। प्रधानकुण्डविषये पूर्वकारणे भीमसंहितायां रौरवोत्तरे च इन्द्रेशानदिशोर्मध्ये वृत्तकुण्डं कल्पनीयमिति प्रोक्तम्। एवं च पूर्वाद्यष्टदिक्षु कुण्डाकारविषये पूर्वकारणे, भीमसंहितायां रौरवोत्तरे च नितरां वैजात्यं विद्यते। एवं नवकुण्डकल्पनविषये साजात्यं वैजात्यं च निरूपितम्। अत्र कुण्डकल्पनवषये दीप्तागमे पञ्चकुण्डपक्षः, एककुण्डपक्षश्च प्रतिपाद्यते। यथा —

'परितः कल्पयेत्कुण्डं चतुर्दिक्ष्वीशदेशतः।
प्राग्देशे कल्पयेत्कुण्डमेकहोमे विशेषतः॥
चतुरश्रं धनुर्वृत्तं त्रिकोणं पद्ममेव च।' (७१.१९७०, २०)

इत्येतत्सार्धश्लोके चतुर्दिक्षु क्रमेण चतुरश्रधनुर्वृत्तत्रिकोणाख्यानि कुण्डानि कृत्वा, ईशानदिशि पद्मकुण्डं कुर्यादिति पञ्चकुण्डपक्षः प्रतिपाद्यते। तथा पूर्वदिश्येककुण्डकल्पनेन एककुण्डपक्षो निर्वर्तनीय इति चोच्यते। रौरवोत्तरे तु नवकुण्डपक्षएव प्रोक्तः।

रत्नलिङ्गप्रतिष्ठाविषये कुण्डकल्पनकथने पूर्वकारणे, भीमसंहितायां च दीप्तागमवत्पञ्चकुण्डपक्ष एककुण्डपक्षश्च प्रतिपाद्येते। तत्रापि परस्परं व्यत्यासो वर्तते। तत्र पूर्वकारणे चतुर्दिक्षु चतुरश्राणि कुण्डानि कृत्वा, ईशानदिशि वृत्तकुण्डं कल्पयेदिति पञ्चकुण्डपक्षः प्रत्यपादि। भीमसंहितायां चतुर्दिक्षु पद्मकुण्डानि कृत्वा, ईशानदिशि वृत्तकुण्डं कुर्यादिति पञ्चकुण्डपक्षोऽभिहितः। दीप्तागमे तु चतुर्दिक्षु क्रमेण चतुरश्रधनुर्वृत्तत्रिकोणाख्यानि चत्वारि कुण्डानि कृत्वा, ईशानदिशि पद्मकुण्डं कुर्यादिति पञ्चकुण्डपक्षः कथ्यते। एवं पूर्वकारणे एककुण्डपक्षे पूर्वदिशि वृत्तकुण्डं कुर्यादित्युच्यते। तत्र विषये भीमसंहितायां पूर्वे वा पश्चिमे वा दक्षिणे वा उत्तरे वा वृत्तं कुण्डं कल्पनीयमित्युच्यते। दीप्तागमे पूर्वस्यां दिशि कुण्डं कल्पनीयमिति सामान्येनोच्यते। तत्र व्याख्यानतो निर्णयः कर्तव्य इति भाति। एवं पञ्चकुण्डपक्षे तथैककुण्डपक्षे च व्यत्यासः प्रादर्शि।

कुम्भाधिवासविषये रौरवोत्तरे नवकुम्भस्थापनं, तथा नवकुम्भेषु लिङ्गे पीठे च शैललिङ्गप्रतिष्ठोक्तप्रकारेण ईशानाद्यस्त्रपर्यन्तमूर्तिन्यासो मूर्तीनामर्चनं च कार्यमित्युच्यते।

अस्मिन्विषये पूर्वकारणे द्विषष्टितमे पटले —

'शिरःप्रदेशे लिङ्गस्य शिवकुम्भं च वर्धनीम्।
रत्नादि शिवकुम्भे तु वर्धन्यां हैमकं क्षिपेत्॥
सदाशिवं यजेत्कुम्भे शिवमन्त्रेण देशिकः।
मनोन्मनीं तु वर्धन्यां तन्मन्त्रेणैव विन्यसेत्॥
अभितोऽष्टघटान्न्यस्त्वा हैमेन टङ्कशूलधृक्।
विद्येशानां स्वमन्त्रेण पूजयेत्तु क्रमेण तु॥
गन्धपुष्पादिभिः पूज्य नैवेद्यं दापयेत्पृथक्।' (३३–३६पू०)

इत्येतेषु श्लोकेषु शिवकुम्भस्थापनं तत्र सदाशिवयजनं, तथा वर्धनीस्थापनं तत्र मनोन्मन्या यजनं, तयोरभितोऽष्टकुम्भस्थापनं तत्राष्टविद्येशानां यजनं च कुर्यादित्युच्यते। एवमेव भीमसंहितायामपि शिवकुम्भवर्धन्योः स्थापनं, तयोरभितोऽष्टविद्येशकुम्भस्थापनं तेषामर्चनं च कुर्यादित्युच्यते। दीप्तागमे चैकसप्ततितमे पटलेऽप्येवमेव दृश्यते। तद्यथा —

'लिङ्गस्यैव शिरोभागे शिवकुम्भं तु विन्यसेत्।
तस्यैवोत्तरदिग्भागे वर्धनीं स्थापयेत्ततः॥
अभितोऽष्टौ घटान्न्यस्य पूर्वादिषु प्रदक्षिणम्।
(भीमसंहितायां टि० ७७६. पृ० २९६)इति।;
'ईशान्यां स्थापयेन्मन्त्री शिवकुम्भं च वर्धनीम्।
अभितः कलशानष्टौ ससूत्रान्सापिधानकान्॥

सवस्त्रान्वारिसंपूर्णान्सकूर्चान्सहिरण्यकान् ।
विद्येश्वरसमायुक्तान्पल्लवैरुपशोभितान् ॥
स्थापयित्वा यथान्यायं पूजयेत्स्वस्वनामभिः ।' (दीप्ते ७१.२७उ०–२९) इति।

एवं कुम्भाधिवासविषये पूर्वकारणे, भीमसंहितायां, दीप्ते च मध्ये वर्धनीसहितशिवकुम्भस्थापनं तत्परितोऽष्टविद्येश्वरकुम्भस्थापनमिति नवकुम्भस्थापनम्, रौरवोत्तरे तु ईशानादिकवचपर्यन्तमूर्तिभिर्नवकुम्भस्थापनमिति साजात्यं वैजात्यं च प्रदर्शितम् ।

होमविषये रौरवोत्तरे त्रयोदशद्रव्याण्यभिहितानि ।

अस्मिन्विषये दीप्तागमे एकसप्ततितमे पटले —

'समिदाज्यचरूँल्लाजान्सर्षपांश्च यवांस्तिलान् ।
होमयेद्विधिना धीमान्द्रव्याणि च विशेषतः ॥' (३३उ०, ३४पू०)

इत्यत्र सप्त द्रव्याणि होतव्यानीत्युच्यते। एतानि सप्त द्रव्याणि रौरवोत्तरागमेऽपि दृश्यन्ते। परं तु रौरवोत्तरोक्तानि क्षीरवेणुप्रियङ्गुमाषमधुगुलाख्यानि षड् द्रव्याणि दीप्तागमे न दृश्यन्त इति वैजात्यं ज्ञेयम् । एवं विंशपटलप्रोक्तविषयेषु साजात्यवैजात्यमवगन्तव्यम् ।

पटलार्थसंग्रहः

अत्र **प्रथमपटलो**पक्रमे रुरुर्भगवन्तमीश्वरं प्रति 'पुरा भवता मह्यं (रौरवाख्यं) महातन्त्रं विस्तरेण प्रोक्तम् । अधुना संक्षेपेणोत्तरं तन्त्रं श्रोतुमिच्छामि' इति प्रार्थयति । 'प्रार्थनानुसारेणोत्तरतन्त्रं वक्ष्यते' इतीश्वरेण प्रतिज्ञायते। ततो रुरुः 'प्रासादभेदः, तत्र स्थापनीयानां दिङ्मूर्तीनां भेदः, लिङ्गलक्षणभेदः गौरीभेदः, एतदीयदेवताप्रतिष्ठाविधिश्च कथम्' इति वक्तव्यविषयान्पृच्छति। 'प्रासादभेदं दिङ्मूर्तिभेदं लिङ्गलक्षणभेदं गौरीभेदं, तथा विशेषत एतेषां प्रतिष्ठाविधिं च वक्ष्यामि' इति भगवता समाधिः क्रियते। 'गौरीभेदं विशेषतः प्रवक्ष्यामि' इति च प्रतिज्ञायां प्रोक्तम् । तत्प्रतिपादकग्रन्थो मातृकासूपलब्धासु नोपलभ्यते। प्रथमे पटले षण्णवतिप्रासादभेदः संक्षेपेण प्रतिपाद्यते। तत्र प्रथमं 'उपानात् प्रभृति स्तूप्यन्तं चतुरश्रं नागरं, एवमुपानादारभ्य स्तूप्यन्तमष्टाश्रं द्राविडं, उपानात्प्रभृति स्तूप्यन्तं वृत्तं वेसरम्' इति नागरद्राविडवेसराख्यानां त्रयाणां प्रासादभेदानां लक्षणं प्रतिपाद्यते। 'उपानादिचतुरश्रं ग्रीवाद्यष्टाश्रमेकतलमनेकतलं वा नागरद्राविडम्, उपानादिचतुरश्रं ग्रीवादिवृत्तमेकतलमनेकतलं वा नागरवेसरम्, उपानाद्यष्टाश्रं ग्रीवादिवर्तुलमेकतलमनेकतलं वा द्राविडवेसरम्' इति त्रिविधमिश्रकप्रासादभेदानां लक्षणमुच्यते। नागरद्राविडवेसराख्यं भेदत्रयं, तथा नागरद्राविड-नागरवेसर-द्राविडवेसराख्यमिश्रकप्रासादभेदत्रयं च संमिल्य भेदषट्कं, प्रत्येकं षोडशभेदकं भवति। एवं च षण्णवतिप्रासादभेदाः सिद्धा इति संक्षेपेण प्रासादभेदो न्यरूपि। भेदषट्कस्य प्रत्येकं षोडशभेदत्वं कथं सिध्यतीति स्पष्टं न प्रतिपाद्यते। एवं **प्रथमपटलार्थसंग्रहः** ।

द्वितीये पटले दिङ्मूर्तिविषये चतुर्मूर्तिभेदो निरूप्यते। नागरादिप्रासादेषु पूर्वस्यां दिशि दक्षिणदिशि, पश्चिमदिशि उत्तरदिशि च क्रमेण इन्द्रदक्षिणामूर्तिविष्णुब्रह्ममूर्तयः स्थापनीया इति चतुर्मूर्तिभेदः प्रादर्शि। एवं **द्वितीयपटलार्थसंग्रहः**।

तृतीये पटले दिङ्मूर्तिविषयेऽष्टमूर्तिभेद उपपाद्यते। विमाने पूर्वाद्यष्टदिक्षु द्राविडं वेसरं वा प्रासादं निर्माय, तत्र क्रमेण पूर्वादिचतुर्दिक्षु कुमारदक्षिणामूर्तिनारसिंहब्रह्ममूर्तय इति चतस्रो देवताः, विदिक्षु क्रमेण काश्यपागस्त्यनारदवसिष्ठा इति मुनयश्चत्वारश्च दिङ्मूर्तित्वेन स्थाप्या इत्यष्टमूर्तिभेदो न्यरूपि। अत्र प्रासादषड्वर्गेषु कस्मिन्वर्गेऽष्टमूर्तयः स्थाप्या इत्यस्मिन्पटले यद्यपि न प्रतिपादितम् । तथापि सप्तमे पटलेऽष्टमूर्तिप्रतिष्ठाविधौ 'प्रासादस्य गले मूर्तीः कुशैर्वस्त्रैश्च

वेष्टयेत्' (९.३०) इति वचनेन ग्रीवावर्गेऽष्टमूर्तीनां स्थापनं कर्तव्यमिति सूच्यते। एवं **तृतीयपटलार्थसंग्रहः।**

चतुर्थे पटले दिङ्मूर्तिविषये पञ्चमूर्तिभेदः प्रोच्यते। नागरादिविमानानां पादभागे सुधया शिलाभिर्दारुणा वा प्रतिमा निर्माय विघ्नेशदक्षिणामूर्तिविष्णुब्रह्मदुर्गामूर्तयः स्थापनीयाः। तत्रार्धमण्डपदक्षिणोत्तरभागयोर्विघ्नेशदुर्गयोः स्थानं कल्पनीयम्। तथा दक्षिणदिशि दक्षिणामूर्तेः, पश्चिमदिशि विष्णोः, उत्तरदिशि ब्रह्मणश्च स्थानं कल्प्यमिति पञ्चमूर्तिभेदो विधीयते। अत्र प्रासादे षड्वर्गेषु मध्ये पादभागे मूर्तिकल्पनं कर्तव्यमिति स्पष्टमभिहितम्। प्रतिमाकरणद्रव्यमपि प्रतिपादितम्। एवं **तुरीयपटलार्थसंग्रहः।**

पञ्चमे पटले प्रासादप्रतिष्ठाविधिरुच्यते। अत्र नूतनप्रासादनिर्माणे, पुनः प्रासादस्योत्थापनविषये च प्रतिष्ठाविधौ कर्तव्यः क्रियाकलापोऽभिधीयते। तत्र प्रथममधिवासार्थं विधेयो मण्डपविधिर्वर्ण्यते। अत्र मण्डपः प्रपा वा विधीयतामिति विकल्पो दृश्यते। मण्डपश्च प्रासादस्य पुरतः बाह्ये चतुर्दिक्षु मध्यमे च कर्तव्य इति पञ्चमण्डपविधानं सूच्यते। मण्डपमध्ये वेदिका करणीया। वेदिकां परितश्चतुर्दिक्षु मध्यमे पुरतश्च क्रमेण चतुरश्रधनुर्वृत्तत्रिकोणषडश्रकाणि पञ्चकुण्डानि कल्पनीयानि। एवं प्रतिमण्डपं वेदिकाकुण्डकल्पनप्रकारो न्यरूपि। मण्डपेषु द्वारतोरणाष्टमङ्गलदर्भमालापुष्पमालादिभिरलंकारो विधेय इति मण्डपविधिः प्रादर्शि।

ततो वेदिकोपरि शालिभिः स्थण्डिलं प्रकल्प्य, तत्र प्रतिष्ठादिवसात्पूर्वदिनरात्रौ कुम्भाधिवासः कर्तव्य इत्युक्त्वा, कुम्भस्थापनप्रकारस्तत्र मूर्तिन्यासप्रकारश्चाभिधीयते। मध्यमण्डपवेदिकायां नवकुम्भान्स्थापयित्वा, तेषु नवशक्तिसहितमीशानमूर्तिमावाह्य विन्यसेत्। एवं पूर्वदिङ्मण्डपवेद्यां कुम्भनवकं स्थापयित्वा तत्राष्टविद्येश्वरसहितं तत्पुरुषमूर्तिं, दक्षिणदिङ्मण्डपवेद्यां नव कुम्भान्निवेश्य तत्राष्टगणेश्वरसहितमघोरमूर्तिं, पश्चिमदिङ्मण्डपवेदिकायां कुम्भनवकं निवेश्य तत्राष्टलोकपालसहितं सद्योजातमूर्तिं, सौम्यदिङ्मण्डपवेदिकायां नवकुम्भान्स्थापयित्वा तत्र धर्माधर्माद्यष्टसंयुतं वामदेवमूर्तिं चावाह्य विन्यसेत्। ततः कुम्भार्चनं, कुशैर्वस्त्रैश्च प्रासादवेष्टनं च कर्तव्यमिति कुम्भाधिवासप्रकारो निरूपितः।

ततो होमविधिः प्रतिपाद्यते। तत्र प्रथमं समिद्घृतचरुक्षीरयववेणुप्रियङ्गुलाजसर्षपमाषतिलमधुगुला इति होम्यानि त्रयोदश द्रव्याणि समन्त्रकं विधीयन्ते। पञ्चकुण्डानुसारेण पलाशबिल्वाश्वत्थन्यग्रोधोदुम्बरवृक्षसंभवाः पञ्च समिधो होम्यत्वेन प्रतिपाद्यन्ते। अत्र लाजसर्षपमाषतिलमधूनां पञ्चानां द्रव्याणां मन्त्रप्रतिपादकग्रन्थ उपलब्धासु मातृकासु लुप्तः। ईशानमन्त्रेण समिधं, तत्पुरुषमन्त्रेण घृतम्, अघोरमन्त्रेण चरुं, वाममन्त्रेण क्षीरं, सद्योजातमन्त्रेण यवं, कवचमन्त्रेण वैणवम्, अस्त्रमन्त्रेण प्रियङ्गुं, नेत्रमन्त्रेण गुलं च होमयेदिति त्रयोदशद्रव्येषु मध्येऽष्टानां द्रव्याणां मन्त्रा उपलभ्यन्ते। त्रयोदशद्रव्याणामाहुतीः प्रत्येकं शतसंख्याकाः कृत्वा पुनराज्याहुतीरष्टाविंशतिसंख्याकाः कुर्यात्। प्रासादमन्त्रमुच्चार्य पूर्णाहुतिः कर्तव्येति होमविधिः प्रादर्शि।

ततः कुम्भाम्भःप्रोक्षणविधिः प्रोच्यते। तत्र शुभतिथ्यादियुक्ते दिने प्रातः सुमुहूर्ते कुम्भाम्भःप्रोक्षणाय मण्डपवेदिकातः कुम्भानुद्धृत्य तेषां प्रासादप्रदेशे न्यासप्रकारो वर्ण्यते। तत्र नवशक्त्यावृतेशानमूर्तिकुम्भानां मध्यादीशानपर्यन्तं प्रासादाभ्यन्तरे न्यासो विधेयः। एवं विद्येश्वरावृततत्पुरुषमूर्तिकुम्भानां प्रासादशिखरे, गणेशावृताघोरमूर्तिकुम्भानां ग्रीवायां, लोकपालावृतसद्योजातमूर्तिकुम्भानां प्रस्तरे, धर्मधर्माद्यावृतवामदेवमूर्तिकुम्भानां पादभागे च न्यासः कर्तव्य इत्युक्तम्। ततः प्रासादमन्त्रोच्चारणेन प्रासादस्य कुम्भाम्भःप्रोक्षणं, गन्धपुष्पाद्यैः पूजनं, स्विष्टान्तो होमश्च कर्तव्याः। तत आचार्यपूजा, ब्राह्मणभोजनं च करणीयमिति प्रासादप्रतिष्ठाविधौ क्रियाकलापः प्रत्यपादि। एवं **पञ्चमपटलार्थसंग्रहः।**

षष्ठे पटले प्रासादे दिङ्मूर्तिविषये पूर्वादिचतुर्दिक्षु स्थापनीयत्वेन प्रोक्तानामिन्द्रदक्षिणामूर्तिविष्णुब्रह्माख्यानां चतुर्मूर्तीनां प्रतिष्ठाविधिः प्रतिपाद्यते। तत्र प्रथमं प्रासादस्य चतुर्दिक्षु मूर्तेरभिमुखं चतुरश्रमण्डपश्चतुर्द्वारसमन्वितः कर्तव्य इति मण्डपचतुष्टयकल्पनं सूच्यते। तेषु चतुर्षु मण्डपेषु मध्ये वेदिकां कृत्वा तद्बाह्यतो मूर्तेरग्रे क्रमेण पूर्वादिचतुर्दिक्षु पूर्ववेदिकायाः पूर्वे दक्षिणस्या दक्षिणे पश्चिमायाः पश्चिमे उत्तराया उत्तरे चतुरश्रधनुर्वृत्तत्रिकोणाख्यानि कुण्डानि विधेयानि। ध्वजतोरणादिमण्डपालंकारश्च कर्तव्य इति मण्डपविधिः प्रादर्शि।

ततः प्रतिष्ठादिवसात्पूर्वदिनरात्रौ कर्तव्यः कुम्भाधिवासप्रकारस्तत्र मूर्तिन्यासविधिश्च प्रोच्यते। तत्र मण्डपेषु मूर्तेरग्रे प्रकल्पितेषु वेदिकोपरि शालिभिः स्थण्डिलं प्रकल्प्य, तत्र चतसृणां मूर्तीनां प्रत्येकमेककुम्भस्थापनं पूर्वादिदिक्षु कर्तव्यम्। प्राग्भवे कुम्भे इन्द्रमूर्तिं, दक्षिणे कुम्भे दक्षिणामूर्तिं, पश्चिमे कुम्भे विष्णुमूर्तिं, सौम्ये कुम्भे ब्रह्ममूर्तिं चावाह्य विन्यसेत्। स्वस्वनामादिपञ्चाङ्गषडङ्गैरर्चयेत्। कुशैर्वस्त्रैश्च प्रतिमां वेष्टयेदिति कुम्भाधिवासस्तत्र मूर्तिन्यासविधिश्च न्यरूपि।

ततो होमविधिः प्रतिपाद्यते। तत्र प्रथमं चतुष्कुण्डानुसारेण खदिरबिल्वाश्वत्थपलाशवृक्षसंभूताश्चतुर्विधाः समिधोऽभिधीयन्ते। ततः समिद्घृतचरुक्षीरयववेणुप्रियङ्गुलाजसर्षपमाषतिला इत्येकादशद्रव्याणि मूर्तीनां पञ्चाङ्गषडङ्गैर्होतव्यानि। द्रव्याणां प्रत्येकमष्टाविंशतिसंख्याका आहुतयो होतव्याः। ततो द्रव्यशेषसमायुक्तं पूर्णाहुतिः कर्तव्येति होमविधानं प्रत्यपादि।

ततः शुभतिथ्यादियुक्ते दिने प्रातः सुमुहूर्ते प्रतिमासु कुम्भस्थमूर्तिन्यासपुरःसरं कुम्भाम्भःप्रोक्षणविधिर्गन्धपुष्पाद्यर्चनप्रकारश्चाभिधीयते।

ततो मूर्तेरग्रे शिलाभिरिष्टकाभिर्वा मेखलात्रयसंयुतमर्चनापीठं प्रकल्प्य, तत्रापि कुम्भाम्भःप्रोक्षणं गन्धपुष्पाद्यैरर्चनं च विधेयम्। स्विष्टान्तो होमः कर्तव्यः। अनन्तरमाचार्यपूजा विधेया। अर्चनापीठे नित्यपूजा च कर्तव्येति चतुर्मूर्तिप्रतिष्ठाविधौ क्रियाकलापो न्यरूपि। एवं **षष्ठपटलार्थसंग्रहः।**

सप्तमे पटले प्रासादे दिङ्मूर्तिविषये पूर्वाद्यष्टदिक्षु स्थापनीयत्वेन प्रोक्तानां स्कन्दकाश्यपदक्षिणामूर्त्यगस्त्यनारसिंहनारदब्रह्मवसिष्ठाख्यानामष्टानां मूर्तीनां प्रतिष्ठाविधिरभिधीयते। तत्र प्रथममधिवासार्थं प्रासादस्य पूर्वाद्यष्टदिक्षु सवेदिकं मण्डपाष्टकं प्रकल्प्य, तत्र तत्तद्वेदिकाबाह्ये क्रमेण पूर्वाद्यष्टदिग्भागे पूर्वायाः पूर्वे इत्यादिक्रमेण चतुरश्राश्वत्थपत्राकारार्धचन्द्राकारत्रिकोणवृत्तषडश्रपद्माष्टकोणाख्यान्यष्टकुण्डानि कल्पनीयानि। द्वारतोरणदर्भमालाभिर्मण्डपालंकारो विधेय इति वेदिकाकुण्डसहिताष्टमण्डपविधिरभिधीयते।

ततः प्रतिष्ठादिवसात्पूर्वदिनरात्रौ कर्तव्योऽधिवासविधिर्निरूप्यते। तत्र प्रथमं प्रासादस्य पूर्वाद्यष्टदिक्षु ग्रीवाभागे प्रकल्पितानां पूर्वोक्तस्कन्दाद्यष्टमूर्तीनां कुशैर्वस्त्रैश्च वेष्टनं कर्तव्यम्। ततो मूर्त्यग्रे प्रकल्पितेषु मण्डपेषु वेदिकायां शालिभिः स्थण्डिलं प्रकल्प्य, तत्र सूत्रवस्त्ररत्नकूर्चादियुक्तान्सोदकान्कुम्भानष्टाधिवासयेत्। पूर्वदिग्वेदिकाकुम्भे स्कन्दं, वह्निदिग्वेदिकाकुम्भे काश्यपं, दक्षिणदिग्वेदिकाकुम्भे दक्षिणामूर्तिं, निर्ऋतिदिग्वेदिकाकुम्भेऽगस्त्यं, वरुणदिग्वेदिकाकुम्भे नारसिंहं, वायुदिग्वेदिकाकुम्भे नारदं, सौम्यदिग्वेदिकाकुम्भे ब्रह्माणम्, ईशानदिग्वेदिकाकुम्भे वसिष्ठं चावाह्य तत्तन्मूर्तिमन्त्रेण गन्धपुष्पाद्यैरर्चयेत्। कोणेषु वृषभाणुभिर्वृषभान्पूज्य वृषकुम्भानधिवासयेदिति कुम्भाधिवासप्रकारो न्यरूपि।

ततो होमविधिरुच्यते। तत्र प्रथममष्टकुण्डानुसारेण शमीन्यग्रोधबिल्वप्लक्षाश्वत्थोदुम्बरपलाशखदिरवृक्षसंभवा अष्टविधाः समिधो विधीयन्ते। ततः समिद्घृतचरुक्षीरयववेणुप्रियङ्गुलाजसर्षपमाषतिला इत्येकादश द्रव्याणि मूर्तीनां पञ्चाङ्गषडङ्गमन्त्रैर्होतव्यानि। द्रव्याणां प्रत्येकमष्टाविंशतिसंख्याका आहुतयो होतव्याः। मूर्तिमन्त्रेण पूर्णाहुतिः कर्तव्येति होमविधानं प्रत्यपादि।

ततो मन्त्रन्यासपुरःसरं प्रतिमासु कुम्भाम्भःप्रोक्षणविधिर्निरूप्यते। ततस्तन्मूर्त्यग्रे शिलाभिरिष्टकाभिर्वा मेखलात्रयसहितमर्चनापीठं प्रकल्प्य, तत्रापि कुम्भशेषोदकेन प्रोक्षणं, गन्धपुष्पाद्यर्चनं, स्विष्टान्तो होमश्च निर्वर्तनीयाः। तत आचार्यहोतॄणां पूजा, भक्तपरिचारकाणां पूजा च कर्तव्या। विभवानुसारेण ब्राह्मणभोजनं च विधेयमित्यष्टमूर्तिप्रतिष्ठाविधौ क्रियाकलापः प्रादर्शि।

अर्चनापीठे नित्यपूजा विधेयेति पूर्वं षष्ठे पटले चतुर्मूर्तिप्रतिष्ठाविधौ, तथाष्टमपटले पञ्चमूर्तिप्रतिष्ठाविधौ च दर्शनादत्रापि 'अर्चनापीठे नित्यपूजा कर्तव्या' इत्येतद्ग्रन्थो भवितव्य इति भाति। परं तूपलब्धासु मातृकासु प्रोक्तग्रन्थो नोपलभ्यते। अत्र पटलेऽधिवासप्रस्तावे कोणेषु वृषभकुम्भस्थापनस्य विहितत्वात् स्कन्दाद्यष्टमूर्तिभिः सह वृषभा अपि स्थापनीया इति सूच्यते। एवं **सप्तमपटलार्थसंग्रहः**।

अष्टमे पटले दिङ्मूर्तिविषये तुरीयपटले स्थापनीयत्वेन प्रोक्तानां विघ्नेश्वरदक्षिणामूर्तिविष्णुब्रह्मदुर्गाख्यानां पञ्चानां मूर्तीनां प्रतिष्ठाविधिरभिधीयते। तत्र प्रथममधिवासार्थं मूर्तीनामग्रे चतुरश्रो मण्डपो विधेय इति मण्डपपञ्चकविधिः सूच्यते। मण्डपमध्ये वेदिका कर्तव्या। वेदिकाबाह्यतो मूर्तेरग्रे कुण्डं कल्पनीयम्। तत्र पञ्चमूर्त्यनुसारेण चतुरश्रधनुर्वृत्तत्रिकोणषडश्रकाख्यानि पञ्च कुण्डानि कर्तव्यानि। मण्डपेषु ध्वजतोरणाष्टमङ्गलदर्भमालादिभिरलंकारो रचनीय इति मण्डपविधिरभिहितः।

ततः प्रतिष्ठादिवसात्पूर्वदिनरात्रौ कर्तव्योऽधिवासविधिर्वर्ण्यते। वेदिकोपरि शालिभिः स्थण्डिलं प्रकल्प्य, तत्र प्रतिमूर्तिकं सूत्रवस्त्रादिसंयुतमेकं कुम्भं तत्तत्स्थाने स्थापयित्वा तत्र तत्तन्मूर्तिनामादिभिरर्चनाकरणप्रकारो निरूप्यते। तत्रार्धमण्डपदक्षिणवेदिकोपरि स्थापिते कुम्भे विघ्नेश्वरं, प्रासाददक्षिणदिग्वेदिकोपरि स्थापिते कुम्भे दक्षिणामूर्तिं, प्रासादपश्चिमदिग्वेदिकोपरि स्थापिते कुम्भे विष्णुमूर्तिं, प्रासादसौम्यदिग्वेदिकोपरि स्थापिते कुम्भे ब्रह्ममूर्तिम्, अर्धमण्डपोत्तरवेदिकोपरि स्थापिते कुम्भे दुर्गां चावाह्य तत्तन्मूर्तिनामादिभिर्गन्धपुष्पाद्यैरर्चयेत्। कुशैर्वस्त्रैश्च प्रतिमानां वेष्टनं कर्तव्यमित्यधिवासविधिप्रकारो वर्णितः।

ततो होमविधिः प्रतिपाद्यते। तत्र प्रथमं पञ्चकुण्डानुसारेण खदिरबिल्वाश्वत्थपलाशप्लक्षवृक्षसंभूताः पञ्चविधसमिधो निरूपिताः। समिद्घृतचरुक्षीरयववेणुप्रियङ्गुलाजसर्षपमाषतिला इत्येकादश द्रव्याणि मूर्तीनां पञ्चाङ्गषडङ्गमन्त्रैर्होम्यानि। प्रतिद्रव्यमष्टाविंशतिसंख्याका आहुतयो होतव्याः। मूर्तिमन्त्रमुच्चार्य पूर्णाहुतिर्विधेयेति होमविधिः प्रादर्शि।

ततः प्रभाते सुमुहूर्ते प्रतिमासु कुम्भाम्भःप्रोक्षणविधिः प्रतिपाद्यते। तत्र मन्त्रन्यासप्रकारो निरूप्यते। ततो मूर्तीनामग्रतः शिलाभिरिष्टकाभिर्वा मेखलात्रययुतमर्चनापीठं प्रकल्प्य, तत्रापि कुम्भशेषोदकेन प्रोक्षणं, गन्धपुष्पाद्यैरर्चनं, स्विष्टान्तो होमश्च निर्वर्तनीयाः। तत आचार्यहोतृपूजा परिचारकपूजा च निर्वर्तनीया। यथाविभवं ब्राह्मणभोजनं च विधेयम्। अर्चनापीठे नित्यपूजा कर्तव्येति पञ्चमूर्तिप्रतिष्ठाविधौ क्रियाकलापः प्रत्यपादि। एवम् **अष्टमपटलार्थसंग्रहः**।

नवमपटलात्प्रभृति त्रयोदशपटलान्तं पूर्वं चतुर्थपटले दिङ्मूर्तिविषये नागरादिविमानेषु पादभागे स्थापनीयत्वेन निर्दिष्टानां विघ्नेशदक्षिणामूर्तिविष्णुब्रह्मदुर्गाख्यानां पञ्चमूर्तीनां प्रोक्तस्थाने पृथगालयं प्रकल्प्य तत्र प्रतिष्ठापनप्रकारो विधीयते। तत्र प्रथमं विघ्नेशप्रतिष्ठाविधि**र्नवमे पटले**ऽभिधीयते।

विघ्नेशस्यार्धमण्डपदक्षिणभागेऽथवोक्तस्थाने प्रासादं कल्पयेदिति प्रतिष्ठायोग्यस्थानं निर्दिष्टम्। शिलया लोहेन दारुणा वा प्रतिमां कारयेदिति प्रतिमाकरणद्रव्यमभिहितम्। शिल्पिकर्मसमाप्तौ मन्त्रपुरःसरं विधेयः प्रतिमाशुद्धिप्रकारो निरूप्यते।

प्रतिमाकरणद्रव्यनिरूपणानन्तरं समनन्तरपटलेषु चतुर्ष्वपि नयनोन्मीलनविधेर्दर्शनादत्रापि स

विषयो भवितव्य इति भाति तद्विषयप्रतिपादकग्रन्थोऽत्र लुप्त इति वक्तव्यं भवति।

ततः प्रतिमाया जलाधिवासविधिः संक्षेपेण निरूप्यते। तत्र महत्यां प्रतिमायां तथा मृण्मयप्रतिमायां चित्रे च जलाधिवासो दर्पणस्य कर्तव्य इत्युच्यते।

ततोऽधिवासार्थमण्डपकल्पनप्रकारो निरूप्यते। प्रासादस्याग्रतश्चतुरश्रो मण्डपः कल्पनीयः। तत्र मध्ये वेदिका कल्पनीया। वेदिकायाश्चतुर्दिक्षु क्रमेण चतुरश्रधनुर्वृत्तत्रिकोणाख्यानि चत्वारि कुण्डानि कर्तव्यानि। दर्भमालादिभिर्मण्डपालंकारो विधेय इति वेदिकाकुण्डसहितमण्डपनिर्माणविधिः प्रादर्शि।

ततो वेदिकोपरि शालिभिः स्थण्डिलं निर्माय तत्राण्डजैर्मुण्डजैर्वापि शयनं प्रकल्प्य, जलात् प्रतिमामुद्धृत्य, मण्डपं प्रवेश्य, नववस्त्रैराच्छाद्य, गन्धाद्यैरर्चयित्वा तां पीठिकया सह शयने प्राक्शीर्षामूर्ध्ववक्त्रां चाधिवासयेदिति प्रतिमायाः शयनाधिवासविधिः प्रोच्यते।

ततो वेदिकायां सूत्रवस्त्ररत्नाद्यैरलंकृतानष्ट कुम्भान्पूर्वादीशान्तदिक्षु स्थापयित्वा, क्रमेण तेषु कुम्भेषु विघ्नेश्वर-महाकर्ण-गजवक्त्र-महोदर-एकदन्त-महाकाय-विनायक-गणाधिपा इत्यष्टौ मूर्तीरावाह्य स्वैः स्वैर्मन्त्रैर्गन्धपुष्पाद्यैरर्चयेदिति कुम्भाधिवासप्रकारोऽभिधीयते। अत्रागमान्तरेषु च प्रधानकुम्भस्य परितोऽष्टकुम्भानां न्यासस्योक्तत्वादत्रापि प्रधानकुम्भस्थापनविषयकग्रन्थो भवितव्य इति भाति। स ग्रन्थो मातृकासु लुप्त इति वक्तव्यं भवति।

ततो होमविधिः प्रतिपाद्यते। तत्र चतुष्कुण्डानुसारेण पलाशोदुम्बराश्वत्थप्लक्षवृक्षसंभूताश्चतुर्विधाः समिधो निरूपिताः। समिद्घृतचरुक्षीरयववेणुप्रियङ्गुलाजसर्षपमाषतिला इत्येकादश द्रव्याणि मूर्तिनामादिपञ्चाङ्गषडङ्गैर्मन्त्रैर्होमयेदिति समन्त्रकं होमद्रव्याणि निर्दिष्टानि। प्रसङ्गादत्र मूर्धवदनहृद्गुह्यपादाख्याः पञ्चाङ्गमन्त्रा इति पञ्चब्रह्ममन्त्रा एव पञ्चाङ्गमन्त्रत्वेनोच्यन्त इति विवरणं क्रियते। एवं हृदयशिरःशिखाकवचनेत्रास्त्रमन्त्रा एव षडङ्गमन्त्रा इति च विव्रियते। द्रव्याणां प्रत्येकमष्टाविंशतिसंख्याका आहुतयो होतव्याः। द्रव्यशेषसमायुक्तं पूर्णाहुतिः कर्तव्येति होमविधानं निरूप्यते।

ततः प्रभाते सुमुहूर्ते शयनाद्बिम्बमुत्थाप्य प्रासादं संप्रवेश्य, गर्भगृहे रत्नन्यासपुरःसरं पीठिकया सह बिम्बस्थापनप्रकारस्तत्र विधेयोऽष्टबन्धनप्रकारश्च प्रतिपाद्यते। तत्र गणगायत्रीमन्त्रमुच्चार्य पीठिकया सह प्रतिमां स्थापयेदिति मन्त्रनिर्देशः क्रियते। एवं प्रतिमास्थापनविधिः संक्षेपेण प्रोक्तः।

ततो वेदिकास्थकुम्भान्प्रासादं संप्रवेश्य मन्त्रन्यासपुरःसरं प्रतिमायां कुम्भतोयाभिषेकविधिः, वस्त्रमाल्यानुलेपनं कृत्वा गन्धपुष्पाद्यैः प्रतिमाया अर्चनाप्रकारश्च निरूप्यते। तत्र विघ्नेशस्य गुलान्नं पायसं वा विशिष्य निवेदनीयमित्युच्यते। ततः स्विष्टान्तो होमः कर्तव्य इत्युक्तम्। आचार्यपूजा तथा होतृपूजा परिचारकादिपूजा च कर्तव्या। यथाविभवं ब्राह्मणभोजनं च विधेयमिति विघ्नेशप्रतिष्ठाविधौ क्रियाकलापः प्रादर्शि। एवं **नवमपटलार्थसंग्रहः**।

दशमे पटले दक्षिणामूर्तिप्रतिष्ठाविधिः प्रतिपाद्यते। दक्षिणामूर्तेः प्रासादद्वारदक्षिणभागे उक्तस्थाने वान्यत्र स्थापनायालयः कर्तव्य इति प्रतिष्ठायोग्यस्थानं निरूप्यते। शिलाभिर्लोहैर्वा प्रतिमां कारयेदिति प्रतिमाकरणद्रव्यं निर्दिश्यते।

ततः प्रासादस्य पुरतः सवेदिकां प्रपां कृत्वा तत्र प्रतिमाया नेत्रोन्मीलनं कर्तव्यमित्युक्त्वा तदनन्तरं समन्त्रकं विधेयं कर्म च सम्यक् प्रतिपाद्यते। नेत्रोन्मीलनानन्तरं कर्तव्यः प्रतिमाशुद्धिप्रकारश्च प्रदर्शितः।

ततो रथे शिबिकायां वा प्रतिमामारोप्य ग्रामं नगरं वा प्रदक्षिणं कारयित्वा, नद्यां तटाके वा प्रतिमाया जलाधिवासः कारयितव्य इति निर्दिश्य जलाधिवासप्रकारो यथावत्प्रतिपाद्यते।

जलाधिवासानन्तरं जलाद्बिम्बमुद्धृत्य कुशोदकैः संप्रोक्ष्य, वस्त्राभरणैरलंकृत्य, गन्धपुष्पाद्यैरर्चयित्वा, रथमारोप्य प्रासादं संप्रवेशयेदिति जलतीरात्प्रतिमायाः प्रासादानयनप्रकारोऽभिधीयते।

ततः प्रतिमायाः शयनाधिवासाय तथा कुम्भाधिवासाय च मण्डपनिर्माणविधिः प्रतिपाद्यते। प्रासादस्याग्रतश्चतुरश्रमण्डपश्चतुर्द्वारयुक्तश्चतुस्तोरणभूषितश्च कल्पनीयः। तस्य मध्ये वेदिका कर्तव्या। तस्या बाह्ये पूर्वाद्यष्टदिक्षु क्रमेण चतुरश्रयोन्यर्धचन्द्राकारत्रिकोणवर्तुलषडश्रपद्माष्टकोणाख्यान्यष्टकुण्डानि विधेयानि। ईशानेन्द्रदिशोर्मध्ये वृत्तकुण्डं च कल्पयेदिति नवकुण्डानां निर्माणप्रकारो वर्णितः। मुक्तादामवितानैर्ध्वजैः फलपल्लवैः पूर्णकुम्भदशायुधाष्टमङ्गलैर्दर्भमालादिभिश्च मण्डपालंकारः कर्तव्य इति वेदिकाकुण्डसहितमण्डपनिर्माणविधिः प्रादर्शि।

ततो वेदिकोपरि शालिभिः स्थण्डिलं प्रकल्प्य, तत्राण्डजाद्यैः शयनं निर्माय, कुशैर्वस्त्रैश्च संवेष्टितां समलंकृतां प्रतिमां तत्र शयने प्राक्शीर्षामूर्ध्ववक्त्रां चाधिवासयेत्। एवं प्रतिमायाः शयनाधिवासप्रकारः संक्षेपेण प्रतिपादितः।

ततो वेदिकोपरि दक्षिणदिक्कोणपार्श्वे मूर्तिकुम्भं, तस्य परितोऽष्टकुम्भांश्च स्थापयित्वा, नवसु कुम्भेषु मूर्तिकुम्भादारभ्य क्रमेण ईशानमूर्ति-पुरुष-शर्व-घोर-कपर्दि-सद्य-ईश्वर-वाम-शिवानावाह्य, स्वस्वमन्त्रं समुच्चार्य गन्धाद्यैरर्चयेदिति कुम्भाधिवासप्रकारो न्यरूपि।

ततो होमविधिरुच्यते। तत्र प्रथमं नवकुण्डानुसारेण पलाशखदिरप्लक्षशम्यश्वत्थोदुम्बरापामार्गवटबिल्वसंभूता नवविधसमिधो निरूप्यन्ते। समिद्घृतचरुक्षीरयववेणुप्रियङ्गुलाजसर्षपमाषतिलमधुगुला इति त्रयोदशद्रव्याणि समन्त्रकं होम्यत्वेन विधीयन्ते। प्रतिद्रव्यमष्टाविंशत्याहुतयो विधेयाः। स्वमूर्तिमन्त्रमुच्चार्य पूर्णाहुतिः कर्तव्येति होमविधानं प्रत्यपादि।

ततः प्रासादे स्थापनस्थाने रत्नन्यासपुरःसरं प्रतिमामीशानमन्त्रेण मूर्तिपैः सह स्थापयेदिति प्रतिमास्थापनप्रकारोऽतीव संक्षेपेण प्रतिपाद्यते। एवं मन्त्रन्यासपुरःसरं प्रतिमायां कुम्भतोयाभिषेको गन्धपुष्पाद्यैरर्चनं च संग्रहेणाभिधीयते। अर्चनविषये दक्षिणामूर्तेर्गुलान्नं पायसं च गुलाज्यादिभिः सह विशिष्य निवेदनीयमित्युच्यते। ततः स्विष्टान्तो होमः कर्तव्यः। तत आचार्यहोतृपूजा तथा मूर्तिधारकपरिचारकपूजा शिवभक्तपूजा च विधेया। यथाविभवं ब्राह्मणभोजनं च कर्तव्यमित्युच्यते। एवं दक्षिणामूर्तिप्रतिष्ठाविधौ क्रियाकलापः प्रादर्शि। एवं **दशमपटलार्थसंग्रहः**।

एकादशे पटले विष्णुप्रतिष्ठा प्रतिपाद्यते। तत्र प्रथमं विष्णोः प्रासादस्य पश्चिमदिशि अन्यत्रोक्तस्थाने वा आलयं कारयेदिति प्रतिष्ठायोग्यस्थानं निर्दिश्यते। शिलया लोहेन दारुणा वा प्रतिमां कुर्यादिति प्रतिमाकरणद्रव्य निरूप्यते।

ततः प्रतिमाया नयनोन्मीलनकरणार्थं प्रासादस्य पुरतः सवेदिकां प्रपां कारयित्वा वेदिकोपरि प्रतिमां पूर्वाभिमुखमास्थाप्य, तत्र कर्तव्यं नयनोन्मीलनाख्यं कर्म च निरूप्यते।

ततः प्रतिमाशुद्धिर्जलाधिवासो जलतीरात् प्रतिमायाः प्रासादानयनप्रकारश्च संक्षेपेण प्रोच्यते। ततः प्रतिमायाः शयनाधिवासाय कुम्भाधिवासाय च मण्डपनिर्माणविधिरुच्यते। तत्र प्रासादस्याग्रे चतुरश्रमण्डपश्चतुर्द्वारयुक्तश्चतुस्तोरणभूषितश्च कल्पनीयः। मण्डपमध्ये वेदिका कर्तव्या। तस्या बाह्ये पूर्वादिचतुर्दिक्षु क्रमेण चतुरश्रधनुर्वृत्तत्रिकोणाख्यानि चत्वारि कुण्डानि प्रकल्प्य, मुक्तादामवितानैः फलपल्लवध्वजैः पूर्णकुम्भदर्भमालादिभिर्मण्डपालंकारो विधेय इति वेदिकाकुण्डसहितमण्डपनिर्माणविधिः प्रतिपादितः।

वेदिकोपरि शालिभिः स्थण्डिलं प्रकल्प्य, कम्बलैर्वस्त्रैश्च शयनं निर्माय, तत्र प्रतिमां प्राक्शिरस्कामूर्ध्ववक्त्रां च शाययेदिति प्रतिमायाः शयनाधिवासप्रकारः संग्रहेण प्रत्यपादि। तत्र मण्डपे पूर्वादिचतुर्दिक्षु मध्ये च पञ्चकुम्भान् स्थापयित्वा, मध्यकुम्भे विष्णुमूर्तिं पूर्वकुम्भे सहस्रशीर्ष-

पुरुषं, दक्षिणकुम्भे सत्यमूर्तिं, पश्चिमकुम्भेऽच्युतम्, उत्तरकुम्भेऽनिरुद्धं चावाह्य स्वस्वनामभिर्गन्ध-पुष्पाद्यैरर्चयेदिति कुम्भाधिवासप्रकारो न्यरूपि।

ततो होमविधिरभिधीयते। तत्र चतुष्कुण्डानुसारेण शमीपलाशाश्वत्थखदिरवृक्षसंभूताश्चतुर्विधसमिधोऽभिधीयन्ते। समिद्घृतचरुक्षीरयववेणुप्रियङ्गुलाजसर्षपमाषतिला इत्येकादश द्रव्याणि मूर्तिनामादिपञ्चाङ्गैः षडङ्गैश्च होतव्यानीति समन्त्रकं द्रव्याणि प्रतिपाद्यन्ते। ततः प्रसङ्गान्नवमपटल इवात्रापि मन्त्रविषये पञ्चाङ्गषडङ्गविवरणं क्रियते। प्रतिद्रव्यमष्टाविंशतिसंख्याका आहुतयो होतव्याः। विष्णोर्नुकमिति मन्त्रेण पूर्णाहुतिः कर्तव्येति होमविधानं न्यरूपि।

ततः प्रासादे स्थापनयोग्ये स्थाने पञ्चरत्नानि सुवर्णं च न्यसेदिति रत्नन्यासविधिः सूचितः।

ततः शुभतिथ्यादियुक्ते दिने प्रभाते सुलग्ने प्रतिमां शयनादुद्धृत्य, प्रासादं संप्रवेश्य, स्थापनयोग्ये स्थाने मूर्तिपैः सह इदं विष्णुरिति मन्त्रेण स्थापयेदिति प्रतिमास्थापनप्रकारोऽभिधीयते। ततो मन्त्रन्यासपुरःसरं प्रतिमायां कुम्भतोयाभिषेको गन्धपुष्पाद्यैरर्चनं च कर्तव्य इति प्रोच्यते। तत्रार्चनविषये विष्णवे घृतयुक्तं हविर्विशिष्य निवेदनीयमिति भण्यते। तत आचार्यहोतृपूजा, तथा मूर्तिधारकपरिचारकपूजा च कर्तव्या। यथासंभवं ब्राह्मणभोजनं च विधेयमिति विष्णुप्रतिष्ठाविधौ क्रियाकलापः प्रादर्शि। **एवमेकादशपटलार्थसंग्रहः।**

द्वादशे पटले ब्रह्मणः प्रतिष्ठाविधिरुच्यते। तत्र प्रथमं ब्रह्मणः प्रासादस्योत्तरदिश्यालयं कल्पयेदिति तथान्यत्रोक्तस्थाने वा कल्पयेदिति च प्रतिष्ठायोग्यस्थानं निर्दिश्यते। शिलया लोहैर्वा प्रतिमां कारयेदिति प्रतिमाकरणद्रव्यमभिधीयते।

ततः प्रतिमाया नयनोन्मीलनकर्मनिर्वर्तनाय प्रासादस्याग्रतः सवेदिकां प्रपां कुर्यात्। दर्भमालाभिः पटैश्च प्रपां परिवेष्टयेत्। वेदिकोपरि शालिभिः स्थण्डिलं प्रकल्प्य, तत्र प्रतिमां संप्रवेश्य, पूर्वाभिमुखमास्थाप्य नयनोन्मीलनविषये समन्त्रकमनुष्ठेयं कर्म यथावत्प्रतिपाद्यते। एवं नयनोन्मीलनविधिरुच्यते।

ततो जलाधिवासस्तथा जलाधिवासानन्तरं प्रतिमायाः प्रासादानयनप्रकारश्च सूच्यते।

ततः शयनाधिवासाय कुम्भाधिवासाय च विधेयो मण्डपविधिः प्रतिपाद्यते। तत्र प्रासादस्याग्रतश्चतुर्द्वारसमन्वितश्चतुस्तोरणभूषितश्चतुरश्रमण्डपः कल्पनीयः। मण्डपे षोडशस्तम्भा द्वादश स्तम्भा वा भवेयुः। मण्डपमध्ये वेदिका कल्पनीया। वेदिकाया बाह्ये चतर्दिक्षु क्रमेण चतुरश्रधनुर्वृत्तत्रिकोणाख्यानि चत्वारि कुण्डानि करणीयानि। ध्वजवितानफलपल्लवैर्दर्भमालादिभिश्च मण्डपालंकारो विधेय इति वेदिकाकुण्डसहितमण्डपविधानं प्रतिपाद्यते।

ततो वेदिकोपरि शालिभिः स्थण्डिलं प्रकल्प्य तत्र कुशवस्त्रपरिस्तरणेन शयनं संसाध्य, शयने कुशवस्त्रवेष्टितां प्रतिमां प्राक्शिरस्कामूर्ध्ववक्त्रां च शाययित्वा गन्धपुष्पाद्यैरर्चयेदिति शयनाधिवासविधिर्निरूप्यते।

ततः सूत्रवस्त्ररत्नादियुक्तान्सुलक्षणान् नवसंख्याकान्कुम्भान् मध्यादीशानदिक्पर्यन्तं स्थापयित्वा, तत्र मध्यकुम्भे ब्रह्माणं, पूर्वकुम्भे पितामहं, दक्षिणकुम्भे विधातारं, पश्चिमकुम्भे प्रजापतिम्, उत्तरकुम्भे अजम्, आग्नेय्यां विधिं, नैर्ऋतकुम्भे स्रष्टारं, वायव्यकुम्भे पद्मोद्भवम्, ईशानकुम्भे वक्तारं चावाह्य स्वस्वनामादिभिरर्चयेदिति कुम्भाधिवासविधिः प्रतिपाद्यते।

ततो होमविधिरभिधीयते। तत्र प्रथमं चतुष्कुण्डानुसारेण पलाशखदिराश्वत्थशमीवृक्षसंभूताश्चतुर्विधाः समिधोऽभिधीयन्ते। समिद्घृतचरुक्षीरयववेणुप्रियङ्गुलाजसर्षपमाषतिला इत्येकादश द्रव्याणि समन्त्रकं होम्यत्वेन प्रोच्यन्ते। प्रतिद्रव्यमष्टाविंशतिसंख्याका आहुतयः कर्तव्याः। ब्रह्मजज्ञानमन्त्रेण पूर्णाहुतिः करणीयेति होमविधानं न्यरूपि।

ततः शयनाद्बिम्बमुद्धृत्य, गन्धपुष्पाद्यैरर्चयित्वा, प्रासादं संप्रवेश्य, स्थापनयोग्यस्थाने पञ्च-

रत्नानां सुवर्णस्य च न्यासं कृत्वा, तत्र प्रतिमां ब्रह्मजज्ञानमन्त्रेण मूर्तिपैः सह स्थापयेदिति रत्नन्यासपुरःसरं प्रतिमास्थापनप्रकारो निरूप्यते।

ततो मन्त्रन्यासपुरःसरं कुम्भतोयाभिषेकप्रकारो गन्धपुष्पाद्यैरर्चनप्रकारश्चातीव संक्षेपेण प्रत्यपादि। तत्र स्विष्टान्तो होमो विधेयः। नैवेद्यविषये विशिष्य व्यञ्जनाद्यैर्गुलैश्च संयुतं पायसं निवेदनीयमिति चोच्यते। तत आचार्यहोतृपूजा तथा मूर्तिधारकपरिचारकपूजा च कर्तव्या। यथाविभवं ब्राह्मणभोजनं च विधेयमिति ब्रह्मप्रतिष्ठाविधौ क्रियाकलापः प्रादर्शि। एवं **द्वादशपटलार्थसंग्रहः**।

त्रयोदशे पटले दुर्गाप्रतिष्ठाविधिः कथ्यते। तत्र प्रथमं प्रासादार्धमण्डपोत्तरभागे अथवान्यत्रोक्तस्थानेषु दुर्गाया आलयं प्रकल्पयेदिति प्रतिष्ठायोग्यस्थानं, तथा शिलाभिर्लोहैर्वा प्रतिमां कारयेदिति प्रतिमाकरणद्रव्यं च निर्दिश्यते।

ततः प्रासादस्याग्रतः प्रतिमाया नयनोन्मीलनकर्मनिर्वर्तनाय सवेदिकं चतुरश्रमण्डपं प्रकल्प्य, वेदिकोपरि शालिभिः स्थण्डिलं निर्माय, तत्र प्रतिमां पूर्वाभिमुखमास्थाप्य, वस्त्रदर्भैः परिवेष्टच, नयनोन्मीलनविषये शिल्पिना विधेयं कर्म, तथाचार्येण समन्त्रकमनुष्ठेयं कर्म च यथावत्प्रोच्यते। एवं नयनोन्मीलनविधिर्न्यरूपि।

ततः प्रतिमामुद्धृत्य सलिलाशयं संप्रवेश्य तत्र जलमध्ये प्रपां कृत्वा तत्र प्रतिमामेकत्रिपञ्चरात्रमधिवासयेदिति संक्षेपेण जलाधिवासविधानं प्रदर्शितम्।

ततोऽधिवासाय मण्डपनिर्माणविधिः प्रतिपाद्यते। प्रासादस्याग्रतश्चतुरश्रमण्डपश्चतुर्द्वारसमन्वितश्चतुस्तोरणभूषितश्च कर्तव्यः। मण्डपमध्ये वेदिका कल्पनीया। तस्या बाह्ये चतुर्दिक्षु क्रमेण चतुरश्रधनुर्वृत्तत्रिकोणाख्यानि चत्वारि कुण्डानि कर्तव्यानि। मुक्तादामवितानैर्ध्वजैः फलपल्लवैरङ्कुरैः पूर्णकुम्भैर्दर्भमालादिभिर्मण्डपालंकारः कर्तव्य इति वेदिकाकुण्डसहितमण्डपनिर्माणविधिर्निरूपितः।

ततो वेदिकोपरि शालिभिः स्थण्डिलं प्रकल्प्य, तत्राण्डजाद्यैः क्रमेण शयनं निर्माय, जलात्प्रतिमामुद्धृत्य, मण्डपं संप्रवेश्य, कुशैर्वस्त्रैश्च परिवेष्टच, गन्धपुष्पाद्यैरभ्यर्च्य, प्राक्शिरस्कामूर्ध्ववक्त्रां च शयने शाययेदिति शयनाधिवासविधिर्निरूप्यते।

ततः प्रतिमायाः सव्यभागे प्रधानकुम्भं तं परितोऽष्टकुम्भांश्च संस्थाप्य, मध्यकुम्भे प्रधाने दुर्गां, पूर्वकुम्भे कात्यायनीं, दक्षिणकुम्भे कुमारीं, पश्चिमकुम्भे विन्ध्यवासिनीम्, उत्तरकुम्भे अम्बिकाम् आग्नेयकुम्भे भगवतीं, नैर्ऋतकुम्भे भवानीं, वायव्यकुम्भे कीर्तिम्, ईशानकुम्भे मोहिनीं च न्यस्यावाह्य स्वैः स्वैर्नामादिमन्त्रैरर्चयेदिति कुम्भाधिवासः प्रतिपादितः।

ततो होमविधिरभिधीयते। तत्र प्रथमं चतुष्कुण्डानुसारेण पलाशखदिराश्वत्थशमीवृक्षसंभूताश्चतुर्विधाः समिधः प्रतिपाद्यन्ते। समिद्घृतचरुक्षीरयववेणुप्रियङ्गुलाजसर्षपमाषतिला इत्येकादश द्रव्याणि स्वपञ्चाङ्गषडङ्गमन्त्रैर्होतव्यानि। प्रतिद्रव्यमष्टाविंशतिसंख्याका आहुतयो विधेयाः। जातवेदसमन्त्रेण पूर्णाहुतिः कर्तव्येति होमविधिर्न्यरूपि।

ततः प्रासादे स्थापनयोग्यस्थाने पञ्चरत्नानि हेम च विन्यसेदिति रत्नन्यासविधिः सूच्यते।

ततः शुभतिथ्यादियुक्ते प्रातः सुमुहूर्ते शयनाद् बिम्बमुद्धृत्य, पूर्वाभिमुखमास्थाप्य, गन्धपुष्पाद्यैरभ्यर्च्य, प्रासादं संप्रवेश्य स्थापनार्हे स्थाने जातवेदसमन्त्रेण मूर्तिपैः सह स्थापयेदिति प्रतिमास्थापनप्रकारो विधीयते।

ततो मन्त्रन्यासपुरःसरं प्रतिमायाः कुम्भतोयाभिषेकप्रकारो गन्धपुष्पाद्यैरर्चनप्रकारश्च प्रतिपाद्यते। तत्रार्चनविषये दुर्गायाः पायसं व्यञ्जनैः सह गुलान्नं च विशिष्य निवेदनीयमित्युच्यते। ततः स्विष्टान्तो होमः कर्तव्यः। तत आचार्यहोतृपूजा तथा मूर्तिधारकपूजा च विधेया। यथासंभवं ब्राह्मणभोजनं नवकन्याभोजनं च कर्तव्यमिति दुर्गाप्रतिष्ठाविधौ क्रियाकलापो विधीयते। एवं **त्रयोदशपटलार्थसंग्रहः**।

चतुर्दशे पटले द्वारपालप्रतिष्ठाविधिरुच्यते। तत्र प्रथमं पूर्वद्वारस्य सव्यवामभागयोर्महानन्दि-महाकालौ, दक्षिणद्वारस्य सव्यवामभागयोरनन्तपशुपती, पश्चिमद्वारस्य सव्यवामभागयोर्महाचण्ड-महामुण्डौ, उत्तरद्वारस्य सव्यवामभागयोः पिङ्गलविजयौ च कल्पयेदिति चतुर्द्वारेषु द्वारपालानां नामानि तेषां स्थापनयोग्यानि स्थानानि च निर्दिश्यन्ते।

शिल्पिकर्मसमाप्तौ जले चैवाधिवासयेदिति प्रतिमाकरणानन्तरं जलाधिवासः कर्तव्य इति सूच्यते। अत्र नेत्रोन्मीलनकर्मणः प्रस्तावो न दृश्यते।

ततोऽधिवासाय मण्डपविधिः प्रतिपाद्यते। तत्र प्रासादस्य पुरतश्चतुर्षु द्वारेषु पार्श्वद्वये वेदिका-सहितो मण्डपः कल्पनीयः। वेदिकयोरग्रे वृत्तकुण्डं कल्पनीयम्। एवं वेदिकाद्वयवृत्तकुण्डद्वय-सहितमण्डपकल्पनप्रकारोऽभिधीयते। मुक्तादामवितानैः फलपल्लवैश्च मण्डपालंकारः कर्तव्य इत्युच्यते। प्रतिद्वारं मण्डपे वेदिकाद्वये शालिभिः स्थण्डिलं प्रकल्प्य, तत्र जलादानीतां प्रतिमां मण्डपं संप्रवेश्य प्राक्शिरस्कामूर्ध्ववक्त्रां शाययेदिति शयनाधिवासप्रकारोऽतीव संक्षेपेण न्यरूपि।

मण्डपे कुम्भाधिवासप्रस्तावोऽत्र न दृश्यते। यजनं होमं च पूर्ववत्कुर्यादिति सूच्यते। ततः प्रतिमास्थापनयोग्ये स्थाने पञ्चरत्नानि पूर्ववत्स्थापयित्वा स्वस्वनामादिमन्त्रैः प्रतिमां स्थापये-दिति रत्नन्यासपुरःसरं प्रतिमास्थापनप्रकारोऽतीव संक्षेपेण प्रतिपादितः। शेषकर्म प्रतिष्ठातन्त्र-विधिवत्कुर्यादित्युच्यते। आचार्यपूजा कर्तव्येत्युक्तम्। एवं द्वारपालप्रतिष्ठाविधौ क्रियाकलापोऽतीव संक्षेपेण प्रत्यपादि। एवं **चतुर्दशपटलार्थसंग्रहः**।

पञ्चदशे पटले लिङ्गभेदो निरूप्यते। तत्रादौ लिङ्गविषये सर्वतोभद्रं, वर्धमानं, शिवाधिकं, त्रैराशिकमिति वर्गचतुष्टयं नाममात्रेणाभिधाय, प्रतिवर्गं चत्वारो भेदाः सन्ति। तेषां चतुर्णां भेदानामपि प्रत्येकं भेदचतुष्टयमस्ति। एवं चतुःषष्टिविधलिङ्गभेदाः सिध्यन्तीति सूच्यते। नैव स्पष्टतया चतुःषष्टिविधलिङ्गभेदप्रतिपादनं दृश्यते। एवं सहस्रधारालिङ्गमुखलिङ्गयोर्नाममात्रेण निर्देशोऽस्ति। लक्षणादिकं न निर्दिश्यते। सर्वतोभद्रादिलिङ्गचतुर्वर्गस्य, सहस्रधारालिङ्गस्य, मुखलिङ्गस्य च महालिङ्गमिति व्यपदेशोऽस्ति।

नागरे विमाने सर्वतोभद्रं, द्राविडे विमाने वर्धमानं, वेसरे विमाने शिवाधिकं, मिश्रके विमाने त्रैराशिकं च स्थापयेदिति सर्वतोभद्रादिलिङ्गचतुर्वर्गस्य स्थापनयोग्यं विमानं निरूप्यते। ततो मिश्र-कविमाने सहस्रधारालिङ्गं स्थापनीयमित्युच्यते। मुखलिङ्गविषये स्थापनयोग्यविमानं न निर्दिश्यते।

आदौ लिङ्गं प्रासादो वा क्रियतामिति विकल्पो दृश्यते। आदौ लिङ्गकल्पने तन्मानवशात् प्रासादः कल्पनीयः। आदौ प्रासादकरणे तन्मानवशाल्लिङ्गं कर्तव्यमिच्युते। प्रासादवशाल्लिङ्ग-कल्पने गर्भमानं, द्वारमानं, हस्तमानमिति मानत्रयं, लिङ्गवशात्प्रासादकरणे लिङ्गद्विगुणं, लिङ्ग-त्रिगुणं, लिङ्गचतुर्गुणमिति मानत्रयं, तथा हस्तैर्वितस्तिभिर्मात्रैश्च मानोन्मानं त्रिधेति प्रासादलिङ्ग-योर्विषये नवधा मानं प्रतिपाद्यते।

लिङ्गविषये उत्तमं, मध्यमम्, अधमम्, अधमाधममिति चत्वारो भेदाः, एतेषां चतुर्णां भेदानां प्रत्येकं चतुर्धा भेदाः, पुनस्तेषां भेदानामपि प्रत्येकं चत्वारो भेदा इति प्रकारान्तरेण चतुष्षष्टि-विधभेदप्रकारोऽभिधीयते। एवं मानविषयेऽपि चतुष्षष्टिविधा भवन्तीति सूच्यते। एवं **पञ्चदश-पटलार्थसंग्रहः**।

षोडशे पटले शैललिङ्गप्रतिष्ठाविधिः कथ्यते। तत्रादौ नागरादिविमाने माटकूटयोः, मण्डपे च शैललिङ्गस्थापनविधिर्वक्ष्यत इति प्रतिज्ञा। ततः प्रासादवशाल्लिङ्गकल्पने, लिङ्गानुरोधेन पीठिकाकल्पने च मानं प्रतिपाद्यते। ततो लिङ्गे शिल्पिना निर्वर्तनीयः सूत्रवर्तनप्रकारोऽभि-धीयते। प्रतिलिङ्गकरणं बाललिङ्गकरणं च सूच्यते। अत्र लिङ्गस्थापनकर्मण्यादौ मध्येऽव-वसाने च प्रतिलिङ्गमुपयुज्य कर्मान्ते तद्विसर्जयेदित्युक्तम्। शिल्पिकर्मणोऽन्ते लिङ्गं पञ्चगव्ये

निक्षिपेदित्युच्यते। ततो लिङ्गे लक्षणोद्धारविधानार्थं प्रासादस्य पुरतश्चतुरश्रं मण्डपं प्रकल्प्य, तन्मध्ये वेदिं कृत्वा, तत्र शालिभिः स्थण्डिलं प्रकल्प्य, पञ्चगव्ये निक्षिप्तं लिङ्गमुद्धृत्य, जलैः प्रक्षाल्य, वेदिकामध्यमानीय स्थण्डिले स्थापयेदित्युक्त्वा, लक्षणोद्धारविषये समन्त्रकमाचार्येण निर्वर्तनीयं कर्माभिधीयते।

ततो जलतीरे प्रपां कृत्वा तत्र मध्ये वेदिकां निर्माय, तत्र स्थण्डिले नवकलशस्थापनपूर्वकं पीठिकया सह लिङ्गस्य जलाधिवासप्रकारो निरूप्यते।

ततः शयनाधिवासाय कुम्भाधिवासाय च कल्पनीयो मण्डपविधिः प्रतिपाद्यते। तत्र प्रासादस्य पुरतो द्वादशहस्तविस्तारयुक्तमथवा दशहस्तविस्तारयुक्तं, षट्त्रिंशत्स्तम्भैरथवा षोडशस्तम्भैः समन्वितं, चतुर्द्वारचतुस्तोरणभूषितं चतुरश्रमण्डपं निर्माय, तन्मध्ये वेदिकां प्रकल्प्य, तस्या बाह्ये पूर्वाद्यष्टदिक्षु क्रमेण चतुरश्र-योनि-धनुराकृति-त्रिकोण-वृत्त-षडश्र-पद्म-अष्टकोणाख्यान्यष्टकुण्डानि, ईशानेन्द्रदिशोर्मध्ये वृत्तकुण्डं चेति नवकुण्डानि कल्पयेदिति वेदिकाकुण्डसहितमण्डपविधिः प्रादर्शि। मण्डपे मुक्तादामध्वजैश्छत्रैः फलपल्लवैर्दर्भमालाभिः पूर्णकुम्भैरष्टमङ्गलाद्यैरलंकारः कर्तव्य इत्युक्तम्।

मण्डपे वेदिकोपरि शालिभिस्तण्डुलैस्तिलैश्च स्थण्डिलं प्रकल्प्य, दर्भैश्च भूषयित्वा, तदुपरि अण्डजैर्मुण्डजै रोमजैश्चर्मजैर्दिव्यजैश्च पञ्चभिः शयनं प्रसाध्य, जलाल्लिङ्गमुद्धृत्य, रथमारोप्य, मण्डपं संप्रवेश्य, शयने प्राक्शिरस्कमधःसूत्रं शाययेत्। लिङ्गस्य पश्चिमे पार्श्वे पीठं चाधिवासयेदिति शयनाधिवासः प्रतिपादितः।

लिङ्गस्य दक्षिणपार्श्वे शिवकुम्भं, वामपार्श्वे वर्धनीं, पूर्वादीशानपर्यन्तमष्टकुम्भांश्च सूत्रवस्त्ररत्नादियुक्तान् स्थापयित्वा, लिङ्गदक्षिणकुम्भे ईशमूर्तिं, वामपार्श्वस्थायां वर्धन्यामुमां, पूर्वदिक्कुम्भे तत्पुरुषमूर्तिं, दक्षिणदिक्कुम्भेऽघोरमूर्तिं, पश्चिमदिक्कुम्भे सद्योजातमूर्तिम्, उत्तरदिक्कुम्भे वाममूर्तिं, तथाग्नेयकुम्भे हृदयमूर्तिं, नैर्ऋतकुम्भे शिरोमूर्तिं, वायव्यकुम्भे शिखामूर्तिम्, ईशानकुम्भे कवचमूर्तिं, लिङ्गे नेत्रमूर्तिं, पीठेऽस्त्रमूर्तिं च विन्यस्यावाह्य तत्तन्मन्त्रैर्गन्धपुष्पाद्यैरर्चयेदिति कुम्भाधिवासस्तत्रार्चनप्रकारश्चाभिहितः।

ततः प्राच्यामृग्वेदं, दक्षिणायां यजुर्वेदं, प्रतीच्यां सामवेदम्, उदीच्यामथर्वणवेदं, तथाग्नेय्यां पञ्चाङ्गमन्त्रान्, नैर्ऋत्यां षडङ्गमन्त्रान्, वायव्यामघोरास्त्रमन्त्रम् ईशानदिशि पाशुपतास्त्रमन्त्रं चाधीयीरन्निति प्रागाद्यध्ययनप्रकारो न्यरूपि। ततो होमविधिः प्रतिपाद्यते। तत्र प्रथमं नवकुण्डानुसारेण पलाशखदिरप्लक्षशम्यश्वत्थोदुम्बरापामार्गवटबिल्ववृक्षसमुद्भूता नवविधाः समिधोऽभिधीयन्ते। समिद्घृतचरुक्षीरयववेणुप्रियङ्गुलाजसर्षपमाषतिलमधुगुला इति त्रयोदश द्रव्याणि समन्त्रकं होम्यत्वेन निर्दिश्यन्ते। प्रतिद्रव्यमष्टाविंशतिसख्याका आहुतयो होतव्या इत्युक्तम्। द्रव्यशेषसमायुक्तं व्योमव्यापिमन्त्रमुच्चार्य पूर्णाहुतिः कर्तव्या। एवं होमविधिः प्रादर्शि।

ततः प्रासादे लिङ्गस्थापनयोग्ये स्थाने पादशिलां निक्षिप्य तत्र नवरत्नानि, पञ्चलोहान्, सुवर्णनिर्मितान्यष्टमङ्गलवस्तूनि दर्पणादीनि, सुवर्णमयानृषभकूर्ममत्स्यांश्च विन्यसेदिति रत्नादिन्यासविधिः प्रोच्यते। अत्र रत्नालाभे सुवर्णं निक्षिप्यतामिति सूच्यते।

ततः शयनाल्लिङ्गमुद्धृत्य तत् प्रासादे स्थापनयोग्यस्थानं मूर्तिपैः सह संप्रवेशयेदित्युक्तम्। तत आचार्यपूजा प्रोक्ता। तत्र नवधा दक्षिणा प्रतिपादिता। एवं होतृमूर्तिधारकपरिचारकपूजाप्रकारश्चाभिधीयते।

ततः सुनक्षत्रयुक्ते दिने सुमुहूर्ते मन्त्रन्यासपुरःसरं लिङ्गस्थापनप्रकारः पीठबन्धप्रकारोऽष्टबन्धनप्रकारश्च वर्ण्यते। ततः कुम्भाभिषेकप्रकारः संक्षेपेण प्रत्यपादि। ततः स्विष्टान्तो होमो विधेयः। गन्धादिभिरभ्यर्च्य पायसान्नं, गुलान्नं, महाहविश्च प्रदद्यात्। यथाविभवं सहस्रं तदर्धं

तदर्धार्धं वा ब्राह्मणान्भोजयेदिति शैललिङ्गप्रतिष्ठाविधौ क्रियाकलापो न्यरूपि। एवं **षोडशपटलार्थ-संग्रहः।**

सप्तदशे पटले मुखलिङ्गप्रतिष्ठाविधिः कथ्यते। तत्र प्रथमं मुखलिङ्गलक्षणं प्रतिपाद्यते। पूर्वे तत्पुरुषमुखं, दक्षिणेऽघोरमुखं, पश्चिमे सद्योजातमुखम्, उत्तरे वामदेवमुखं, मध्ये ईशानमुखं च कल्पयेदिति पञ्चमुखकल्पनप्रकारोऽभिधीयते। त्रिमुखमेकमुखं वा लिङ्गं कुर्यादिति त्रिमुखैक-मुखलिङ्गद्वयं सूचितम्।

ततो नेत्रोन्मीलनकर्मनिर्वर्तनाय प्रासादस्य पुरतश्चतुर्द्वारयुक्तं दर्भमालादिभिरलंकृतं चतुरश्रं मण्डपं प्रकल्प्य, तन्मध्ये वेदिकां कृत्वा, तत्र शालिभिः स्थण्डिलं निर्माय, तत्र लिङ्गं संप्रवेश्य, स्थापयित्वा, नववस्त्रैः संवेष्टय, नेत्रमन्त्रं समुच्चार्य, मण्डलत्रययुक्तानि पञ्चदशनयनानि हेम-सूच्या विलिखेत्। मधुसर्पिर्भ्यां नेत्रपञ्चदशसु तर्पयेत्। कपिलां कृष्णां वा गां सवत्सां तन्मन्त्र-मुच्चार्य दर्शयेदिति नेत्रोन्मीलनकर्म निगद्यते। ततो वस्त्रगन्धादिभिः समन्वितान्नव कलशानभितः स्थापयित्वा, तान्नवशक्तिभिः संपूज्य, लिङ्गं तत्कलशोदकैः स्नापयेदिति नेत्रोन्मीलनानन्तरं विधेयः शुद्धिप्रकार उच्यते।

ततो लिङ्गं रथमारोप्य सलिलाशयं संप्रवेश्य, जलतीरे प्रपां सवेदिकां विधाय, तत्र स्थण्डिले नवकुम्भस्थापनपूर्वकं कर्तव्यो जलाधिवासविधिः प्रतिपादितः।

ततोऽधिवासाय मण्डपनिर्माणविधिरभिधीयते। प्रासादस्याग्रतश्चतुरश्रश्चतुस्तोरणभूषितश्चतुर्द्वार-युतो मण्डपो विधेयः। तन्मध्ये वेदिकां निर्माय, तस्या बाह्ये शैललिङ्गप्रतिष्ठाविधौ प्रोक्तवन्नवकुण्डानि कर्तव्यानीति सूचितम्। एवं वेदिकाकुण्डसहितमण्डपविधिः प्रदर्शितः।

ततो वेदिकामध्ये शालिभिः स्थण्डिलं विधाय, तत्र पूर्वपटलोक्तवत्क्रमेणाण्डजाद्यैः पञ्चशयनं कल्पयित्वा, जलाल्लिङ्गं मण्डपं संप्रवेश्य, शयने प्राक्शीर्षं लिङ्गं शाययेदिति शयनाधिवासः संक्षे-पतः प्रोक्तः।

ततो मण्डपे पूर्वदिक्प्रभृतीशानदिक्पर्यन्तमष्टकुम्भान्, मध्ये शिवकुम्भं शिरोभागे दक्षिणभागे स्थापयेदित्युक्त्वा, ईशानाद्यस्त्रपर्यन्तमन्त्रमूर्तीः स्वमन्त्रैरावाह्य, स्थापयित्वा, गन्धाद्यैरर्चयेदिति निगद्यते। अनेन वचनेन कुम्भेषु मूर्तिन्यासादिकं कर्म शैललिङ्गप्रतिष्ठाविध्युक्तवत्कर्तव्यमिति सूचितम्। एवं कुम्भाधिवासप्रकारः प्रत्यपादि।

ततो होमविधिरभिधीयते। तत्र समिद्घृतचरुक्षीरयववेणुप्रियङ्गुलाजसर्षपमाषतिलमधुगुला इति त्रयोदशद्रव्याणि होम्यत्वेन निर्दिश्यन्ते। समिदाज्ये स्वस्वमूर्तिमन्त्रैर्जुहुयात्। चर्वाद्येका-दशद्रव्याणि पञ्चाङ्गषडङ्गमन्त्रैर्जुहुयादिति होमविषये मन्त्राश्च प्रतिपादिताः। प्रतिद्रव्यमष्टा-विंशतिसंख्याका आहुतयो होतव्याः। हृन्मन्त्रेण पूर्णाहुतिः कर्तव्येति होमविधिरभिहितः।

ततः प्रासादे स्थापनयोग्यस्थाने नवरत्नानि विन्यसेत्। ततः शयनाल्लिङ्गमुद्धृत्य, प्रासादं संप्रवेश्य मूर्तिभिः सहेशमन्त्रेण लिङ्गं स्थापयेत्। ततः पीठबन्धमष्टबन्धनं च विधाय, पूर्ववत् कुम्भाभिषेकं कुर्यात्। गन्धाद्यैरर्चयेत्। पायसान्नं विशिष्य निवेदयेत्। आचार्यहोतृपूजा तथा परिचारकपूजा च विधेया। यथासंभवं ब्राह्मणभोजनं च कर्तव्यमिति मुखलिङ्गप्रतिष्ठाविधौ क्रियाकलापः प्रादर्शि। एवं **सप्तदशपटलार्थसंग्रहः।**

अष्टादशे पटले बाणलिङ्गप्रतिष्ठाविधिर्निगद्यते। तत्रादौ बाणलिङ्गलक्षणमभिधीयते। बाण-लिङ्गविषये मानं नास्ति। यावन्मानं लिङ्गमुपलभ्यते, तावन्मानं ग्राह्यम्। स्वमानमेव तन्मानं भवेत्। विप्रादिजातिक्रमेण श्वेतरक्तपीतकृष्णवर्णानि बाणलिङ्गानि भवेयुः। शिरोभागे स्थौल्यं मूलभागे कार्श्यं मुखभागे चौन्नत्यं बाणलिङ्गे भवितव्यमित्युच्यते। अत्र लक्षणोद्धारकर्म नोक्तम्। जलाधिवासः कर्तव्यत्वेन सूच्यते। ततोऽधिवासाय मण्डपविधिः कथ्यते। तत्र

प्रासादस्याग्रतश्चतुरश्रो मण्डपः कर्तव्यः। तन्मध्ये वेदिका कल्पनीया। वेदिकाया बाह्ये शैललिङ्गप्रतिष्ठाविध्युक्तवन्नवकुण्डानि कल्पयेदिति मण्डपे नवकुण्डकल्पनप्रकारः सूच्यते।

वेदिकोपरि शालिभिः स्थण्डिलं प्रकल्प्य तत्राण्डजाद्यैः क्रमेण पञ्चशयनं विधाय, जलाल्लिङ्गमुद्धृत्य, प्रासादं संप्रवेश्योदकेन प्रक्षाल्य, नववस्त्रेण संवेष्टच, मण्डपे शयने शाययेदिति शयनाधिवासप्रकारः संक्षेपेण प्रतिपादितः।

लिङ्गस्य दक्षिणे पार्श्वे मूर्तिकुम्भं विन्यसेत्। पूर्वादीशानपर्यन्तमष्टकुम्भान् स्थापयेत्। तत्र मूर्तिन्यासार्चनादिकं शैललिङ्गप्रतिष्ठाविध्युक्तप्रकारेण कर्तव्यमिति सूच्यते। एवं कुम्भाधिवासप्रकारः प्रत्यपादि।

ततो होमविधिः कथ्यते। तत्र समिद्घृतचरुक्षीरयववेणुप्रियङ्गुलाजसर्षपमाषतिलमधुगुला इति त्रयोदश द्रव्याणि होम्यत्वेन निर्दिष्टानि। तत्र समिधस्त्र्यम्बकमन्त्रेण घृतमीशानमन्त्रेणान्यान्येकादशद्रव्याणि पञ्चाङ्गषडङ्गमन्त्रैश्च जुहुयादिति मन्त्राश्च प्रोक्ताः। प्रतिद्रव्यमष्टाविंशतिसंख्याका आहुतयो होतव्याः। ततः पूर्णाहुतिमाचरेत्। एवं होमविधिरभिहितः।

ततः प्रासादे स्थापनयोग्यस्थाने नवरत्नानि विन्यसेत्। अथवा पीठमध्ये बिलं कृत्वा रत्नानि विन्यसेदिति रत्नन्यासविधिः सूच्यते। तत ईशमन्त्रेण मूर्तिभिः सह शयनाल्लिङ्गमुद्धृत्य लिङ्गं प्रासादं संप्रवेश्य स्थापनयोग्यस्थाने स्थापयेत्। मूर्तिन्यासाष्टबन्धनादिकं कुर्यात्। कुम्भाभिषेकश्च कर्तव्यः। स्विष्टान्तो होमो विधेयः। यथाशास्त्रमुपचाराः सर्वेऽपि कर्तव्याः। विशिष्य पायसान्नं हविश्च निवेदयेत्। आचार्यहोतृपूजा तथा परिचारकपूजा च विधेया। यथासंभवं ब्राह्मणभोजनं च विधेयम्। एवं बाणलिङ्गप्रतिष्ठाविधौ क्रियाकलापः सर्वोऽपि संक्षेपेण न्यरूपि। एवम् **अष्टादशपटलार्थसंग्रहः**।

एकोनविंशे पटले इष्टलिङ्गप्रतिष्ठाविधिरभिधीयते। तत्र प्रथममिष्टलिङ्गस्य लक्षणं तदीयप्रतिष्ठाविधिं च संक्षेपेण वक्ष्यामीति प्रतिज्ञा। ततः पर्वते वा, वने वा, नद्यां वा, एतदन्यत्र जले वोपलभ्यमानं स्वाभिमतं लिङ्गं गृह्णीयात्। तच्च जलेऽधिवासयेदितीष्टलिङ्गलक्षणं, तस्य जलाधिवासकर्म कर्तव्यमिति च सूच्यते। अत्रापि लक्षणोद्धारकर्म कर्तव्यत्वेन न विधीयते।

ततोऽधिवासाय प्रासादस्याग्रतो वान्यत्र वा मण्डपं विधाय, तत्र वेदिकां प्रकल्प्य, तस्या बाह्ये शैललिङ्गप्रतिष्ठाविध्युक्तप्रकारेण नवकुण्डकल्पनं विधेयमिति सूच्यते। मण्डपे वेदिकायां शालिभिः स्थण्डिलं प्रकल्प्य, तत्राण्डजाद्यैः क्रमेण शैललिङ्गप्रतिष्ठाविध्युक्तप्रकारेण सर्वालंकारसंयुक्तं पञ्चशयनं विधाय, जलाल्लिङ्गं समुद्धृत्य, जलतीरे स्थापितकुम्भोदकैः प्रक्षाल्य, वस्त्रेण संवेष्टच, मण्डपं संप्रवेश्य, शयने शाययित्वा, कुशवस्त्रैः समाच्छाद्य गन्धादिभिरर्चयेदिति शयनाधिवासप्रकारो न्यरूपि।

ततः शैललिङ्गप्रतिष्ठाविधिप्रोक्तप्रकारेण नवकुम्भस्थापनं, तेषु मूर्तिन्यासार्चनादिकं कर्म विधेयमिति कुम्भाधिवासप्रकारः संक्षेपतः प्रत्यपादि।

ततः समिद्घृतचरुक्षीरयववेणुप्रियङ्गुलाजसर्षपमाषतिलमधुगुला इति त्रयोदशद्रव्याणि होम्यत्वेन विधीयन्ते। तत्र स्वस्वमूर्तिमन्त्रैः समिदाहुतिः, आवो राजेति मन्त्रेणाज्याहुतिश्च विधेया। तदन्यानि चर्वादीन्येकादशद्रव्याणि पञ्चाङ्गषडङ्गमन्त्रैर्होतव्यानीति मन्त्राः प्रतिपादिताः। प्रतिद्रव्यमष्टाविंशतिसंख्याका आहुतयो होतव्या इति होमविधिः संक्षेपेण प्रत्यपादि।

शयनाल्लिङ्गमुद्धृत्य मूर्तिभिः सह स्थापनयोग्यस्थाने स्थापयित्वाष्टबन्धनकुम्भाभिषेकादिकं कर्म निर्वर्तनीयमिति लिङ्गस्थापनकुम्भाभिषेकादिकर्मातीव संक्षेपेण प्रोच्यते। ततः पायसान्नं गुलान्नं च विशिष्य निवेदयेत्। आचार्यहोतृपूजा तथा परिचारकपूजा च विधेया। यथाविभवं ब्राह्मणभोजनं कर्तव्यमिति क्रियाकलापः सर्वोऽपीष्टलिङ्गप्रतिष्ठाविधौ संक्षेपेण प्रादर्शि। एवम् **एकोनविंशपटलार्थसंग्रहः**।

विंशे पटले रत्नलिङ्गप्रतिष्ठाविधिरभिधीयते। तत्र प्रथमं रत्नलिङ्गप्रतिष्ठाविधिः संक्षेपतः कथ्यत इति प्रतिज्ञा। नवरत्नानि तथा सूर्यकान्ताद्यश्मनश्च गृहीत्वा लिङ्गवत्कर्तव्यानि। तेषां लिङ्गानां पीठं स्वयोनिकमन्ययोनिकं वा कुर्यात्। तच्च पीठं लिङ्गनाहद्विगुणं भवितव्यम्। पीठं चतुरश्रं वृत्तं वा भवेत्। अन्ययोनिकं पीठं यदि क्रियते, तदाष्टबन्धनविधानेन लिङ्गपीठ-संयोजनं कर्तव्यम्। तत्र च यदि सुवर्णादिलोहैरन्ययोनिकं पीठं क्रियते, तदा लोहैस्तैलैश्च लिङ्ग-पीठसंयोजनं विधेयम्। लिङ्गपीठसंयोजनं च सुदृढं करणीयमिति च सूच्यते। ततः पञ्चगव्या-भिषेचनेन लिङ्गशुद्धिं विधाय तल्लिङ्गमेकरात्रं त्रिरात्रं वा जले चाधिवासयेदिति जलाधिवास-प्रकारो न्यरूपि।

ततोऽधिवासाय प्रासादस्याग्रतश्चतुर्द्वारसमन्वितश्चतुस्तोरणभूषितं चतुरश्रं मण्डपं विधाय, तन्मध्ये वेदिकां कृत्वा, वेदिकां परितो नवकुण्डानि कल्पयेदिति शैललिङ्गप्रतिष्ठाविध्युक्तप्रकारेण नवकुण्ड-कल्पनं कर्तव्यमिति सूचितम्।

वेदिकोपरि शालिभिः स्थण्डिलं प्रकल्प्य, तत्राण्डजाद्यैः क्रमेण शैललिङ्गप्रतिष्ठाविध्युक्तप्रकारेण पञ्चशयनं निर्माय, मुक्तादामवितानैः फलपल्लवैर्दर्भमालादिभिश्च मण्डपालंकारं कृत्वा, जला-ल्लिङ्गं समुद्धृत्य, मण्डपं संप्रवेश्य, पुनर्जलैः प्रक्षाल्य, नववस्त्रेण संवेष्टय, शयने प्राक्शिर ऊर्ध्व-वक्त्रं च शाययेदिति शयनाधिवासप्रकारो न्यरूपि।

ततो मण्डपे वेदिकायां मध्यादीशानपर्यन्तं नवकुम्भान् स्थापयित्वा, तत्रेशानादिनवमूर्तीः समा-वाह्य, गन्धादिभिरर्चयेदिति शैललिङ्गप्रतिष्ठाविध्युक्तप्रकारेण कुम्भाधिवासप्रकारो निर्वर्तनीय इति सूच्यते।

ततः समिद्घृतचरुक्षीरयववेणुप्रियङ्गुलाजसर्षपमाषतिलमधुगुला इति त्रयोदश द्रव्याणि होम्य-त्वेन विधीयन्ते। स्वैः स्वैर्मूर्तिमन्त्रैः समिदाहुतिः, आवो राजेति मन्त्रेणाज्याहुतिश्च विधेया। चर्वाद्येकादशद्रव्याणि पञ्चाङ्गषडङ्गमन्त्रैर्होतव्यानि। प्रतिद्रव्यमष्टाविंशतिसंख्याका आहुतयो होतव्याः। हृन्मन्त्रेण पूर्णाहुतिः कर्तव्या। एवं होमविधिः प्रत्यपादि।

ततः शयनाल्लिङ्गमुद्धृत्य गन्धादिभिः समभ्यर्च्य, प्रासादं संप्रवेश्य स्थापयेत्। ततो मूर्तिन्यासं कृत्वा कुम्भाभिषेको विधेयः। ततो गन्धादिभिरभ्यर्चयेत्। स्विष्टान्तो होमो विधेयः। आचार्यहोतृपूजा तथा परिचारकपूजा च निर्वर्तनीया। पायसान्नं हविश्च विशिष्य निवेदयेत्। यथाविभवं ब्राह्मणभोजनं कर्तव्यम्। एवं रत्नलिङ्गप्रतिष्ठाविधौ क्रियाकलापो न्यरूपि। एवं **विंशपटलार्थसंग्रहः**।

अनुबन्धः

'रेणुकाप्रतिष्ठाविधिपटलः, रेणुकोत्सवविधिपटलः, रेणुकोत्सवप्रायश्चित्तविधिपटलः' इत्येतत्पटलत्रयं 'इति रौरवोत्तरे' इति निर्दिश्य अस्मद्ग्रन्थालयस्थे आर्. ई. ३२४३४, ३९६९२, ४३४६४ इत्यङ्किततालपत्रात्मककोशत्रये, तथा टि० १३१, टि० ५२५ इत्यङ्कितपत्रात्मककोशद्वये चोपलभ्यते। तथा रेणुकाप्रतिष्ठाविधिपटलमात्रं रौरवोत्तरादुद्धृतं टि० ९७६ इत्यङ्कितपत्रात्मककोशेऽप्युपलभ्यते। अयमेव रेणुकाप्रतिष्ठाविधिपटलो रौरवागमादुद्धृत इति टि. ९९१ इत्यङ्किते पत्रात्मककोशे, तथा 'इति कारणे प्रतिष्ठातन्त्रे रेणुकाविधिपटलः' इति टि० ९६५ इत्यङ्किते पत्रात्मककोशे चोपलभ्यते। एवमाहत्य बहुषु कोशेषु 'इति रौरवोत्तरे' इति निर्देशस्य दर्शनात्पटलत्रयमिदं रौरवोत्तरागमस्यानुबन्धे दीयते।

अयमत्र विशेषः। यद्यपि बहुशो 'रौरवोत्तरे प्रतिष्ठातन्त्रे' इति निर्देशोऽस्ति। अथापि रौरवोत्तरे प्रतिष्ठाविधौ या विशिष्टानुस्यूता प्रक्रिया होमविधौ या द्रव्यपरिगणना, आहुतिसंख्या, मूर्तिमन्त्रपञ्चाङ्गषडङ्गादिमन्त्रप्रयोगः, तादृशी प्रक्रियात्र न दृश्यते। क्वचिन्मातृकासु 'रेणुकास्थापनं वक्ष्ये शृणुष्व कमलासन' इति कमलासनस्य ब्रह्मणः संबोधनस्य दर्शनादिदम् ईश्वरब्रह्मसंवादरूपं, नेश्वररुरुसंवादरूपम्। टि० ९६५ कोशे 'कारणे प्रतिष्ठातन्त्रे' इति दर्शनाद्, अस्य चेश्वरब्रह्मसंवादरूपत्वादिदं कारणागमसंबन्धि स्यात्। परं मुद्रिते पूर्वकारणे उत्तरकारणे वा नैते पटला उपलभ्यन्ते।

गौरीभेदप्रतिपादकाः पटला रौरवोत्तरागमस्य मुद्रणायोपयुक्तासु पञ्चस्वपि प्रधानमातृकासु नोपलब्धाः। रौरवोत्तरे इति निर्दिश्य इमे पटला देवीभेदप्रतिपादका उपलब्धास्ते गौरीभेदविभागेऽन्तर्भूताः स्युरित्येतावन्मात्रपर्यालोचनयानुबन्धे पटला एते दीयन्ते।

एवमेव आर्. ई. ३०७२३, ३२४०३, ३२४३४, ३९६९२ इत्यङ्कितेषु तालपत्रात्मककोशेषु 'चामुण्डाप्रतिष्ठा' 'महाकालीप्रतिष्ठा' इति पटलद्वयं 'रौरवे' इति निर्दिश्योदाहृतम्। रौरवोत्तरादुद्धृतेन रेणुकाप्रतिष्ठादिपटलत्रयेण सहानुस्यूतमेव पटलद्वयस्यास्य आर्. ई. ३२४३४ इत्यङ्किते तालपत्रात्मककोशे दर्शनात् रौरवे इति रौरवोत्तरे निर्दिष्टानां तथा रौरवोत्तरे इति रौरवे निर्दिष्टानामप्युदाहरणं निबन्धेषु दर्शनाच्चेदं पटलद्वयं गौरीभेदेऽन्तर्गतं स्यादित्यत्रानुबन्धे दत्तम्।

तथैव 'रौरवागमोत्तरे' इति विशिष्य निर्दिश्य टि० १४६, टि ७४२ इत्यङ्किते पत्रात्मककोशद्वये 'चन्द्रशेखरप्रतिष्ठाविधिः' इत्याख्यः पटल उपलभ्यते। चन्द्रशेखरप्रतिष्ठाविषयो रौरवोत्तरे प्रतिज्ञायां न दृष्टः। अथापि रौरवोत्तरादुदाहृत इति कृत्वायमप्यनुबन्धे दीयते। अत्र पटले क्रियाप्रक्रिया दक्षिणामूर्तिप्रतिष्ठापटलवदेव वर्तत इत्ययं विशेषः।

रेणुकाप्रतिष्ठापटलार्थसंग्रहः

रेणुकास्थापनं योग्यमासेष्वागमोक्तविधानेन कर्तव्यमिति कालो विधीयते। मृत्संग्रहणम्, अङ्कुरार्पणं वास्तुशान्तिं च कुर्यादिति सूच्यते। रत्नन्यासविधिप्रतिपादनं तथा नयनोन्मीलनविधिवर्णनं च प्रतिपाद्येते। जलाधिवासविधौ दारुजलोहजबेराणां ग्रामप्रदक्षिणं विधेयम्। सुधाचित्रादिबेरविषये प्रासाद एव स्फटिकेऽथवा दर्पणे वा जलाधिवासः कर्तव्य इति सूच्यते। अधिवासार्थमण्डपकल्पनं, शयनाधिवासो होमविधिश्च प्रदर्शिताः। सुमुहूर्ते स्थिरलग्ने जीवन्यासादिकरणपुरःसरं कुम्भाभिषेकविधिः प्रतिपाद्यते। रेणुकायाः स्वरूपध्याने सा रक्तवर्णा त्रिणयना करण्डमकुटवती सर्वालंकारभूषिता द्वादशहस्तेषु वामसव्येषु शङ्खचक्रौ खेटकखड्गौ कपालशूलौ

पाशडमरू धनुर्बाणौ वरदाभयौ इति द्वादशायुधधारिणी, जया विजया योगिनी मोहिनी मलिनी मालिनी भोगिनी भोगवती इत्याख्याष्टद्वारशक्तिपरिवारिता, तथा तीव्रशक्तिः तीव्ररूपिणी खड्गिनी निम्बवासिनी निम्बरूपिणी मायी महामायी अजकुक्कुटभक्षिणी इत्यष्टशक्तिपरिवारितेति वर्ण्यते। एतादृशीं कुम्भेषु पूजयेदित्युच्यते। भूतराजाय बलिप्रदानप्रकारो वर्ण्यते। तत्राजकुक्कुटानां बलिं दद्यादित्युच्यते। आचार्यपूजां, दीनान्धकृपणादीनां भूरिदानं चावश्यं कुर्यादिति रेणुकाप्रतिष्ठायां क्रियाकलापः प्रादर्शि।

रेणुकोत्सवपटलार्थसंग्रहः

रेणुकोत्सवविधानेन रोगशान्तिर्ग्रामवृद्धिः, राज्ञो विजयाभिवृद्धिश्च भूयादिति फलानि प्रतिपादितानि। उत्सवश्च सर्वमासेषु कर्तव्य इति कालो निर्दिश्यते। रेणुकोत्सवे वारोत्सवपक्षोत्सवमासोत्सवा इति त्रैविध्यमस्तीति वर्णितम्। उत्सवारम्भदिनात्पूर्वरात्रेऽङ्कुरार्पणं कृत्वा देवाताह्वानादिकर्म कर्तव्यमिति सूच्यते। ततो ध्वजपटं सलक्षणं संपाद्य विधेयो ध्वजारोहणविधिप्रकारो वर्ण्यते। यागशालायां विधेयो यागविधिः, नवदिनेषु विधेयो यानक्रमश्च सम्यक् प्रतिपाद्येते। चूर्णोत्सवविधिः, तीर्थविधिश्च विहितौ। ध्वजावरोहणविधिस्तदनन्तरं कर्तव्यो भूतराजबलिविधिश्च प्रतिपाद्येते। भक्तपूजां दीनान्धकृपणादीनां भूरिदानं चावश्यं कुर्यादिति रेणुकोत्सवविधौ क्रियाकलापः प्रादर्शि।

रेणुकोत्सवप्रायश्चित्तपटलार्थसंग्रहः

रेणुकोत्सवप्रायश्चित्तविधौ रेणुकोत्सवे अङ्कुरार्पणहीने, दीपयन्त्रविहीने, मल्लयन्त्रहीने, नृत्तयन्त्रहीने, नागपीठहीने, गजवाहनहीने च लोके जायमानानामनिष्टानां सूचनपुरःसरं तन्निवृत्त्यर्थं विधेयः प्रायश्चित्तप्रकारो विधीयते। एवं रथहीने, रथाङ्गहीने, डोलायन्त्रादीनां च हीने संभाव्यमानानामनिष्टानां सूचनं, तत्परिहाराय प्रायश्चित्तविधानं च दृश्यते। होमद्रव्यहीने, बलिहीने, नैवेद्यहीने, मन्त्रहीने च जायमानानामनिष्टानां प्रदर्शनं तत्परिहाराय प्रायश्चित्तविधिप्रतिपादनं च विद्यते। प्रायश्चित्तस्य संपूर्णतया करणे संपूर्णफलावाप्तिः स्यादित्युच्यते। एवं रेणुकोत्सवसंबन्धिनां कर्मणां विषये प्रायश्चित्तविधिः प्रादर्शि।

चामुण्डाप्रतिष्ठापटलार्थसंग्रहः

ग्रामे पट्टणे पर्वताग्रे वने वा भूतप्रेतपिशाचगन्धर्वोरगराक्षसेभ्यो मृगेभ्यश्च भयनाशार्थं, ज्वरमहास्फोटापस्मारादिरोगनिवृत्त्यर्थं राज्ये शुभाभिवृद्ध्यर्थं च ग्रामादिषु विशेषतश्चामुण्डा स्थापनीयेति चामुण्डास्थापनफलं निरूप्यते। उत्तरायणे शुभे काले शुक्लपक्षे सुलग्ने चामुण्डास्थापनं कर्तव्यमिति प्रतिष्ठाकालो निर्दिश्यते। मृत्संग्रहणपूर्वकमष्टादशप्रतिष्ठाक्रियाविधिराचरणीय इति सूच्यते। ततोऽधिवासार्थमण्डपकल्पनप्रकारो वर्ण्यते। तत्र पूर्वाद्युत्तरान्तासु सप्तसु दिक्षु पद्मकुण्डानि कुर्यात्। ईशानदिशि देवीकुण्डं प्रधानं योन्याकारं कल्पयेदित्युच्यते। वेदिकोपरि नव वर्धन्यः स्थापनीयाः। तत्र मध्यवर्धन्यां चामुण्डादेवी पूजनीया। परितोऽष्टसु वर्धनीषु पूर्वादीशानान्तं क्रमेण काली विकराली भद्रकाली महादेवी महारौद्री महाशूला मनोन्मनी महाशक्तिरित्यष्टौ पूजनीया इत्युच्यते। जीवन्यासपूर्वकं प्राणप्रतिष्ठा विधेयेति सूच्यते। षड्विंशतिकलान्यासप्रकारो वर्ण्यते। ततस्तत्त्वतत्त्वेश्वरीन्यासो मूर्तिमूर्तीश्वरीन्यासः षडध्वन्यासश्च

कर्तव्या इति सूच्यते। ततः पञ्चावरणमार्गेण पूजा यथाविधि कर्तव्येत्युक्त्वा तत्प्रकारः प्रतिपाद्यते। ततो होमविधिः प्रतिपाद्यते। तत्र आचार्यः प्रधानकुण्डेऽग्न्याधानादिकं कर्म सर्वमग्निकार्योक्तमार्गेण कृत्वा तन्मध्ये शक्तिमावाह्य ध्यानपूजापुरःसरं पञ्चावरणमार्गेण शक्तिं साङ्गं प्रपूज्य समिदाज्यचरूणां प्रत्येकं शताहुतीः कुर्यादित्युच्यते। पलाश-खदिर-वटार्क-बिल्ववृक्षसमुद्भवाः समिधस्तथा अश्वत्थ-प्लक्ष-उदुम्बरवृक्षसमुद्भूताः समिधोऽष्टकुण्डानुसारेण प्रोच्यन्ते। होमद्रव्याणि सर्वाणि मूलमन्त्रेण होमयेदित्युक्तम्। ततश्चामुण्डामूलमन्त्रः, चामुण्डाध्यानं, मालामन्त्रश्च प्रतिपादिताः। एतावानेव चामुण्डाप्रतिष्ठाविधौ क्रियाकलापो न्यरूपि। चामुण्डाध्यानवर्णने

'चतुर्बाहुं त्रिणेत्रां च द्विपादेन समन्विताम्।
ऊर्ध्वकेशीं सुदंष्ट्रां च रौद्रदृष्टिसमन्विताम्॥
लम्बितं दक्षिणं पादं वामपादं तु शायिनम्।
दक्षहस्ते तु संयुक्तां डमरुं पाशमेव च॥
वामहस्तान्तरं चैव शूलं चैव कपालकम्।
नीलवर्णां महारूपां वामपादाट्टहासिनीम्॥
लम्बोष्ठीं मातुलुङ्गाक्षीं महाकोपसमन्विताम्।
उग्ररूपां महावेषां चामुण्डाध्यानमाचरेत्।
एवं ध्यात्वा महादेवीं पूजयेत्तु विशेषतः॥'

इति श्लोका दृश्यन्ते।

महाकालीप्रतिष्ठापटलार्थसंग्रहः

उत्तरायणे शुक्लपक्षे शुभवारादिभिर्युक्ते दिने महाकालीप्रतिष्ठा कर्तव्येति प्रतिष्ठाकालोऽभिधीयते। प्रतिष्ठादिवसात्पूर्वं त्र्यहे पञ्चाहे वाङ्कुरार्पणं विधिवत्कर्तव्यमित्युच्यते। ततो रत्नन्यासविधिः सूच्यते। तदनन्तरं प्रतिमाया नयनोन्मीलनकर्म वर्ण्यते। तत्र शिल्पिनाचार्येण च कर्तव्यं विधानं सम्यक् प्रतिपाद्यते। ततः पञ्चमृत्पञ्चगव्यैर्बेरशुद्धिं कृत्वा प्रतिमां सर्वालंकारशोभितां ग्रामप्रदक्षिणपूर्वकं जलाधिवासाय जलाशयं प्रवेशयेत्। जलतीरे स्थण्डिलं निर्माय तत्र देवीं न्यसेत्। जलमध्येऽतिसुन्दरां प्रपां कृत्वा तत्र प्रतिमां प्राक्शिरस्कामूर्ध्ववक्त्रां च शाययेत्। तामभितोऽष्टकुम्भान् स्थापयित्वा तत्र लोकपालशक्तीः प्रपूजयेत्। त्रिरात्रमेकरात्रं यामं यामार्धं वा जले प्रतिमामधिवासयेदिति जलाधिवासविधिरुच्यते। ततोऽधिवासार्थं मण्डपकल्पनप्रकारः प्रतिपाद्यते। तत्र प्रासादस्याग्रतो वितानध्वजाद्यलंकृतं चतुर्द्वारयुक्तं चतुरश्रं मण्डपं कृत्वा, तन्मध्ये वेदिकां सलक्षणां विधाय, तस्या बाह्ये दिक्षु विदिक्षु च योन्याकाराणि कुण्डानि कुर्यादित्यष्टकुण्डकल्पनं प्रतिपाद्यते। मण्डपस्योत्तरपार्श्वे स्नानश्वभ्रं कुर्यादिति मण्डपविधानं प्रत्यपादि। ततो शिल्पिविसर्जनं, मण्डपे गोमयालेपनं मुक्तादामनालिकेरफलाद्यैस्तथा वितानदर्भमालाद्यैश्चालंकरणं कर्तव्यमित्युच्यते। वास्तुहोमविधानं, तदग्निना पर्यग्निकरणं च विधेयमित्युच्यते। विघ्नेशपूजनं कृत्वा पुण्याहवाचनं करणीयमिति मण्डपसंस्कारा विधीयन्ते।

ततो वेदिकोपरि शालिभिः स्थण्डिलं कृत्वा तिलतण्डुलदर्भपुष्पादिभिः परिस्तीर्य चर्मजाद्यैः शयनं निर्माय, तत्र जलादुद्धृत्य प्रतिमां मण्डपं संप्रवेश्य, स्नानश्वभ्रोपरि विन्यस्य, यथाविधि बिम्बशुद्धिं कृत्वा नवाम्बरेण प्रतिमामाच्छाद्य, गन्धपुष्पादिभिः संपूज्य, कालीगायत्रीमन्त्रेण कौतुकं वामहस्ते बद्ध्वा सुमुहूर्ते कालीं प्राक्शिरस्कामूर्ध्ववक्त्रां शयने शाययेदिति शयनाधिवासविधिः प्रदर्शितः।

ततो देव्याः शिरःप्रदेशे वर्धनीं विन्यस्य तत्र कालीरूपं ध्यात्वा तद्बीजमन्त्रं वर्धन्यां न्यसेत्। परितोऽष्टौ वर्धन्यः सूत्रादिभिः समन्विताः स्थाप्याः। तास्वष्टशक्तीः स्वस्वबीजमन्त्रयुक्ताः संपूजयेत्। पञ्चावरणशक्तीनां स्वस्वमन्त्रैर्विशेषतः पूजा विधेया। द्वारकुम्भांश्च विधिवत्स्थापयित्वा पूजयेदित्युक्तम्। एवं कुम्भाधिवासप्रकारो निरूपितः। अत्राष्टशक्तीनां नामानि, तथा पञ्चावरणशक्तीनां नामानि च चामुण्डाप्रतिष्ठाविधौ निर्दिश्यन्ते। एवं द्वारकुम्भपूजनमपि सूचितम्। दिशास्वध्ययनं कुर्यादित्युक्तम्।

ततो होमविधिः प्रतिपाद्यते। अत्राग्निकार्यादिपूर्णान्तमग्निकार्योक्तवत् समाचरेदित्युक्तम्। कुण्डमध्ये पञ्चावरणमार्गेण कालीं पूजयेदित्युच्यते। पूर्वादिचतुर्दिक्षु श्वेतार्क-अश्वत्थ-खदिर-वटवृक्षसमुद्भूताः समिधो होतव्याः। औदुम्बर–अपामार्ग–शमी-पलाशसमिधः विदिक्षु होम्या इति समिधो निरूपिताः। समिदाज्यचरुफललाजतिलसर्षपयवपिष्टमधुमाषाः, कुक्कुटकूर्मादिमांसानि च होमद्रव्यत्वेन निर्दिश्यन्ते। प्रतिद्रव्यं सहस्रं शतमर्धं वा जुहुयादित्युच्यते। द्रव्यहोमान्ते 'गौरीमिमाय' इति मन्त्रतो देवीं स्पृशेदिति होमविधिः प्रदर्शितः। गेयनृत्तैः सह रात्रौ जागरणं कुर्यादित्यधिवासविधिर्वर्णितः।

प्रभाते मूर्तिपैः सहाचार्यः पूजयेदित्युच्यते। यजमानेनाचार्यदक्षिणा देया। भक्तानां परिवाराणां च वित्तानुसारं पूजा यजमानेन विधेयेति सूचितम्।

ततः शयनात्प्रतिमामुद्धृत्य, स्नानवेद्युपरि विन्यस्य, सर्वातोद्यसमायुक्तं नृत्तगेयैः सह कुम्भानुद्धृत्य, हर्म्यप्रदक्षिणं कृत्वा, देव्या अग्रे कुम्भान्स्थापयित्वा, कुम्भाद्बीजं समादाय देव्याश्चूचुकस्योपरि न्यसेत्। जीवन्यासादिकं विधाय, देशिकः कुम्भाभिषेकं कुर्यात्। परितःस्थिताष्टवर्धनीजलैः पीठे पूर्वादितोऽभिषेकं कुर्यादिति कुम्भाभिषेकप्रकारो न्यरूपि। एवं महाकालीप्रतिष्ठाविधौ क्रियाकलापः प्रादर्शि।

चन्द्रशेखरप्रतिष्ठापटलार्थसंग्रहः

चन्द्रशेखरप्रतिष्ठाविधौ प्रारम्भे चन्द्रशेखरमूर्तिलक्षणं वर्ण्यते। मृगटङ्कधरं वरदाभयपाणिनं देवं शक्तियुक्तं वियुक्तं वा चन्द्रशेखरं कारयेदिति प्रतिमालक्षणमुच्यते। अङ्कुरार्पणपूर्वं नयनोन्मीलनं कुर्यादित्युक्त्वा नयनोन्मीलनविषये देशिकेन विधेयं कर्म प्रतिपाद्यते। एवं चात्र नयनोन्मीलनकर्म संग्रहेण प्रत्यपादि। ततः पञ्चगव्याभिषेकेन बिम्बशुद्धिप्रकारः प्रतिपाद्यते।

ततो रथे वा शिबिकायां रङ्गे वा प्रतिमामारोप्य शनैः ग्रामप्रदक्षिणं कृत्वा जलाशयं संप्रवेशयेत्। जलाशयो नदी वा तडागो वा भवेदिति सूचितः। जलाशये प्रपां विधाय, तां पटेनावेष्ट्य, कुशैर्वस्त्रैश्च प्रतिमां परिवेष्ट्य, प्रपामध्ये प्राक्शिरस्कामूर्ध्ववक्त्रां शाययेत्। अब्लिङ्गानि जपित्वा पुण्याहं वाचयेत्। एकरात्रं त्रिरात्रं पञ्चरात्रं वा जले प्रतिमामधिवासयेदिति जलाधिवासविधिः प्रादर्शि। ततो जलात्प्रतिमामुद्धृत्य कुशाम्भसाभिषिच्य, गन्धपुष्पाद्यैर्वस्त्रैराभरणैश्चाभ्यर्च्य, रथमारोप्य प्रासादं संप्रवेशयेदिति प्रतिमायाः प्रासादानयनविधिरुक्तः।

ततोऽधिवासार्थं मण्डपविधिः प्रतिपाद्यते। तत्र प्रासादस्याग्रतश्चतुरश्रकं चतुर्द्वारचतुस्तोरणभूषितं मण्डपं प्रकल्प्य, तन्मध्ये सलक्षणां वेदिकां निर्माय, तस्या बाह्ये प्राच्यां चतुरश्रकुण्डम्, आग्नेय्यां योनिकुण्डं, दक्षिणेऽर्धचन्द्राकारकुण्डं, नैर्ऋते त्रिकोणकुण्डं, प्रतीच्यां वृत्तकुण्डं, वायव्ये षडश्रकुण्डम्, उदीच्यां पद्मकुण्डमीशानदिशि अष्टकोणकुण्डं च कल्पयेत्। इन्द्रेशानदिशोर्मध्ये वृत्तकुण्डं च कुर्यादिति नवकुण्डकल्पनप्रकारो विहितः। गोमयालेपनं ततः पञ्चगव्यप्रोक्षणं च कुर्यादिति मण्डपसंस्कारविधिरुच्यते। मुक्तादामवितानैर्दर्भमालाभिर्ध्वजैः फलपल्लवैः पूर्णकुम्भैरङ्कु-

रैर्दशायुधाष्टमङ्गलैश्च मण्डपमलंकुर्यादिति मण्डपालंकारप्रकारोऽभिहितः।

ततो वेदिकोपरि शालिभिः स्थण्डिलं प्रकल्प्य तत्राण्डजाद्यैः शयनं निर्माय, कुशैर्वस्त्रैश्च समाच्छाद्य समलंकृतां प्रतिमां प्राक्शिरस्कामूर्ध्ववक्त्रां शयने शाययेदिति शयनाधिवासविधिः प्रादर्शि। ततः सूत्रवस्त्ररत्नाद्यलंकृतान् कुम्भान्नव स्थापयित्वा, तत्र दक्षिणे कोणपार्श्वे स्थापिते मूर्तिकुम्भे प्रधानकुम्भे ईशानमूर्ति विन्यस्य स्वमन्त्रेणाभ्यर्चयेत्। मूर्तिकुम्भं परितः स्थापितेष्वष्टसु कुम्भेषु क्रमेण तत्पुरुष-शर्व-अघोर-कपर्दि-सद्योजात-ईश्वर-वामदेव-शिवाख्या मूर्तीर्विन्यस्यावाह्य स्वस्वमन्त्रैरर्चयेदिति कुम्भाधिवासविधिरभिहितः।

ततो होमविधिर्वर्ण्यते। तत्र समिद्घृतचरुक्षीरयववेणुप्रियङ्गुलाजसर्षपमाषतिलमधुगुला इति त्रयोदशद्रव्याणि होतव्यानीत्युच्यते। पलाशखदिराश्वत्थशमीप्लक्षोदुम्बरापामार्गवटबिल्ववृक्षसंभूताः नवविधाः समिधो नवकुण्डानुसारेणाभिधीयन्ते। प्रतिद्रव्यमष्टाविंशत्याहुतयो होम्या इत्युच्यते। स्वमूर्तिमन्त्रमुच्चार्य पूर्णाहुतिः कर्तव्येत्युच्यते। एवं होमविधिः प्रत्यपादि। ततः प्रासादे प्रतिमास्थापनयोग्ये स्थाने नवरत्नानि सुवर्णं च विन्यस्य, तत्र शयनात्प्रतिमामुद्धृत्य, स्थापनीयस्थानं संप्रवेश्य, ईशानमन्त्रेण मूर्तिपैः सहाचार्यः प्रतिमां स्थापयेदिति प्रतिमास्थापनविधिरुक्तः। प्रतिमायां कुम्भकूर्चोदकेन पञ्चाङ्गषडङ्गमन्त्रविन्यासपूर्वकं कुम्भतोयाभिषेको विधेयः। गन्धाद्यैः क्रमेणार्चयेदिति कुम्भाभिषेकप्रकारोऽभिहितः। आचार्यहोतृमूर्तिधारकपरिचारकपूजा कर्तव्या। तथा शिवभक्तद्विजानपि पूजयेत्। ततः प्रायश्चित्तहोमं विधाय, विशेषतो गुलाज्यदधिभिः सह शुद्धान्नं पायसान्नं च निवेदयेत्। यथाविभवविस्तरं ब्राह्मणभोजनं कर्तव्यमिति चन्द्रशेखरप्रतिष्ठाविधौ क्रियाकलापो न्यरूपि।

एवमनुबन्धे रेणुकाप्रतिष्ठादिपटलषट्कानन्तरं मूलश्लोकानामर्धानुक्रमणिका, अनुबन्धस्थश्लोकानामर्धानुक्रमणिका, उपयुक्तग्रन्थसूची विस्तृता विषयानुक्रमणिका च दीयन्ते। उपोद्घातान्ते एतद्ग्रन्थसंपादनायोपयुक्तमातृकासूची सङ्केतसूची च दीयेते। संस्कृतोपोद्घातात्पूर्वं तदीयफ्रांसीयभाषानुवादः, तदन्ते आङ्गलभाषायां संग्रहश्च दीयेते॥

कृतज्ञतानिवेदनम्

एतत्पुस्तकसंपादनकार्ये प्रतिकृतिदानेनोपकृतवद्भ्यः कीवलूर शिवश्री अक्षयशिवाचार्यवर्येभ्यः धर्मपुरम् शिवश्री स्वामिनाथशिवाचार्यवर्येभ्यः तिरवाडुदुरै शिवश्री स्वामिनाथशिवाचार्यवर्येभ्यः पुस्तकसंपादनकार्ये सर्वात्मना सर्वास्ववस्थासूपकृतवतां ब्रह्मश्री रामानुजय्यंगार्-शिवश्री संबन्धशिवाचार्यब्रह्मश्री सुब्रह्मण्यशास्त्रिणां, उपोद्घातस्य फ्रांसीयभाषान्तरकरणेनोपकृतवतां श्रीमतां ब्रूनो दजान्स्महाशयानाम्, अस्मदालये आरम्भात्प्रभृति प्रचलतो विशेषतोऽप्रकाशितानामागमानां विमर्शरीत्या प्रकाशनस्य विषयेऽद्यापि सादरं प्रोत्साहं दत्त्वा मार्गदर्शिनामस्मदध्यक्षमहाशयानां, तथा नातिचिरेण ग्रन्थं सुष्ठु मुद्रितवताम् श्रीअरविन्दमुद्रणालयाधिकारिणां च हार्दिकीं कृतज्ञतां निवेदयामः॥

पार्वतीजानिकृपया परया सुपरिष्कृतः।
विंशतिपटलैर्युक्तो रौरवोत्तरसंज्ञकः॥
उपागमेषु प्रवरः परमेशप्रियावहः।
प्रकाशितोऽयमधुना विदुषां परितुष्टये॥

एतद्ग्रन्थसंपादनोपयुक्तमातृकासूची

अ. अस्मद्ग्रन्थालये विद्यमाना पत्रात्मकहस्तलिखितमातृका। अङ्कः टि. २७। इयं मातृका कीवलूर् शिवश्री अक्षयशिवाचार्यगृहे विद्यमानायास्तालपत्रमातृकायाः प्रतिकृतिः। अस्यां मातृकायां १-२० पटला विद्यन्ते।

आ. इयं मातृका धर्मपुरम् शिवश्री एस्. स्वामिनाथशिवाचार्यस्य गृहे विद्यमाना। पत्रात्मिका। अस्यां मातृकायां १-२० पटला विद्यन्ते।

इ. अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्. इ. ४०००७। अस्यां मातृकायां १-२० पटला विद्यन्ते।

ई. इयं मातृका तिरुवाड्डुदुरै शिवश्री क. स्वामिनाथशिवाचार्यस्य गृहे विद्यमाना। पत्रात्मिका। अस्यां मातृकायां १–२० पटला विद्यन्ते।

उ. अस्मद्ग्रन्थालये विद्यमाना पत्रात्मकहस्तलिखितमातृका। अङ्कः आर्. इ. ४७८७५। अस्यां मातृकायां १-२० पटला विद्यन्ते।

ऊ. अस्मद्ग्रन्थालये विद्यमाना तालपत्रात्मिका मातृका। अङ्कः आर्. इ. २५१९३। अस्यां मातृकायां ६, ७ पटलौ विद्येते।

ऋ. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि. १४६। अस्यां मातृकायां १३, १४ पटलौ विद्येते। अनुबन्धस्थचन्द्रशेखरप्रतिष्ठा च विद्यते।

ॠ. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि. ७४२। अस्यां मातृकायां 'ऋ' मातृकावदेव पटला दृश्यन्ते।

ऌ. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि. १२३। अस्यां मातृकायां चतुर्दशः पटलः केवलं विद्यते।

ए. अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्. इ. ४८०१८। अस्यां मातृ-मातृकायां ९-११ पटला विद्यन्ते।

ऐ.१ अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्. इ. २५१९१। अस्यां मातृकायां मुखलिङ्गस्थापनपटलस्थाः केचन श्लोका उपलभ्यन्ते।

ऐ.२ अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्. इ. २५१९३। अस्यां मातृकायां मुखलिङ्गस्थापनपटलस्थाः केचन श्लोका उपलभ्यन्ते।

ऐ.३ अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्. इ. २५२०२। अस्यां मातृकायां मुखलिङ्गस्थापनपटलस्थाः केचन श्लोका उपलभ्यन्ते।

ओ. अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्-इ. १०८६४। अस्यां मातृकायां विंशतितमः पटलः केवलं विद्यते।

औ. अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर् इ. ३२४३४। अस्यां मातृकायाम् अनुबन्धस्था रेणुकाप्रतिष्ठा-उत्सव-प्रायश्चित्तविधिपटला दृश्यन्ते। तथा चामुण्डास्थापन-महाकालीप्रतिष्ठापटलौ च दृश्येते।

क. अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्. इ. ३९६९२। (टि. ९६८) अस्यां मातृकायां 'औ' मातृकायां निर्दिष्टाः पटला दृश्यन्ते।

ख. अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्. इ. ४३४६४। अस्यां मातृकायामनुबन्धस्था रेणुकाप्रतिष्ठा-उत्सव-प्रायश्चित्तविधिपटला विद्यन्ते।

ग. अस्मद्ग्रन्थालये विद्यमाना पत्रात्मकहस्तलिखितमातृका। अङ्कः टि. १३१। इयं मातृका मद्रपुरी श्री स्वामिनाथशिवाचार्यस्य गृहे विद्यमानाया मातृकायाः प्रतिकृतिः। अस्यां मातृकायां 'ख' मातृकावदेव पटला दृश्यन्ते।

घ. अस्मद्ग्रन्थालये विद्यमाना पत्रात्मकहस्तलिखितमातृका। अङ्कः टि. ५२५ अस्यां मातृकायां 'ख' मातृकावत्पटला विद्यन्ते।

ङ. अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्. इ. ३०७२३। अस्यां मातृकायामनुबन्धे विद्यमानश्चामुण्डास्थापनपटलो दृश्यते।

च. अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्. इ. ३२४०३। अस्यां मातृकायामनुबन्धे विद्यमानश्चामुण्डास्थापनपटलो विद्यते।

छ. अस्मद्ग्रन्थालये विद्यमाना पत्रात्मकहस्तलिखितमातृका। अङ्कः टि. ९६५। अस्यां मातृकायामनुबन्धे विद्यमानो रेणुकाप्रतिष्ठापटलो दृश्यते।

ज. अस्मद्ग्रन्थालये विद्यमाना पत्रात्मकहस्तलिखितमातृका। अङ्कः टि. ९७६। अस्यां मातृकायामनुबन्धे विद्यमानो रेणुकाप्रतिष्ठापटलो दृश्यते।

झ. अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्. इ. ३९९८६; टि. ९९१। अस्यां मातृकायामनुबन्धे विद्यमानो रेणुकाप्रतिष्ठापटलो दृश्यते।

संकेतसूची

उ० —	उत्तरार्धम्
क्रिया० —	क्रियापादः
चर्या० —	चर्यापादः
तै० आरण्यकम् —	तैत्तिरीयारण्यकम्
तै० ब्रा० —	तैत्तिरीयब्राह्मणम्
तै० संहिता —	तैत्तिरीयसंहिता
पू० —	पूर्वार्धम्

INTRODUCTION

(*English Summary*)

Rauravottarāgama is one of the six *upāgama*-s related to the main āgama *Raurava*, the sixteenth in the list of the twenty-eight main *Śaivāgama*-s. We have already published two volumes of the *Rauravāgama* in the I.F.I. series (n°18-I and 18-II), containing ten chapters from the *vidyāpāda* (called in the colophons: *Raurava-sūtrasaṅgraha*) and forty-six chapters from the *kriyāpāda*. Few more chapters which have been quoted in different digests have been collected and will be published in a third volume.

Our edition of the *Rauravottarāgama* is based on five main manuscripts. The text thus available seems however to be incomplete, because at the beginning of the *Rauravottara* the Sage Ruru asks Śiva to teach him about different kinds of temples, divine images, Liṅga and forms of Gaurī; the different forms of Gaurī and their installation are not dealt with in the twenty chapters available in those five manuscripts.

Some chapters dealing with Reṇukāpratiṣṭhā, Reṇukotsava, Reṇukotsava-prāyaścitta, Cāmuṇḍāpratiṣṭhā and Kālīpratiṣṭhā are found quoted in some manuscripts as from *Rauravottara* and in some others as from *Rauravāgama*; quotations in digests where ascribed to *Rauravottara* are often found in *Rauravāgama* and vice-versa. Such being the case and as Reṇukā, Cāmuṇḍā and Kālī could be counted as different forms of Gaurī, these chapters dealing with them most probably could be a part of the *Rauravottara*; thus they are given here in an appendix. One more chapter, Candraśekharapratiṣṭhāvidhi, has been found in a manuscript as belonging to the "*Rauravāgamottara*"; though as per contents listed in the first chapter of the *Rauravottara*, Candraśekharapratiṣṭhā is not indicated, still as it is quoted from "*Rauravāgamottara*" and also as the method of ritual confirms with the similar rituals found in Dakṣiṇāmūrtipratiṣṭhāvidhi in the *Rauravottara*, we have included it in the appendix.

In the *vidyāpāda* of the *Rauravāgama*, the śloka 17 of the chapter 3 states that explanation of *mudrā*-s (symbols), *samaya*-s (conducts), *tattvārtha* (meaning of *tattva*-s), *maṇḍala*-s (diagrams), *ijyā* (daily worship) and *mantra*-s are told in the "*uttara tantra*", namely the *Rauravottara*. None of these topics are found in the available manuscripts of the *Rauravottara* and we have to conclude that on this point also the manuscripts are incomplete.

Some *upāgama*-s are available with four *pāda*-s: for example, *Mṛgendra, Mataṅga*...etc. For others like the *Pauṣkara* and the *Sarvajñānottara*, though only their *jñānapāda* is available in full, we have to presume from quotations found in digests that they also were made up of four *pāda*-s. On the other hand, it is obvious that *upāgama*-s such as *Sārdhatriśatikālottara* and other *kālottarāgama*-s do not have such a division; one can see also that the *Vātulaśuddhākhya*, an *upāgama* of

Vātulāgama contains ten paṭala-s which deal with matter pertaining only to *jñānapāda*; in several other *upāgama*-s, the fourfold division is not found: for example the *Niśvāsakārikā*, the *Śivadharma*, the *Aṃśumatkāśyapa*...etc. One has to conclude that the traditional division in four *pāda*-s is not a necessary feature of the *upāgama*-s which are just supplements to the four-fold main *āgama*-s.

Some special features of the *Rauravottara*

– In paṭala-s 6, 7 and 8, the consecration ceremonies for the images placed on the facades of the temple (*diṅmūrti*) have been prescribed separately from the ceremonies for the consecration of the temple itself. In other texts there is only one group of ceremonies for the temple and for the images. In front of each of those images it is prescribed here to establish a small altar with three *mekhala*-s and to make the consecration of it; afterwards the daily ritual must be performed on these altars.

– In paṭala 15 sixty-four kinds of Liṅga-s are mentioned; such division is not found in other texts, no more than the one of ninety-six temples mentioned in the first chapter.

– Regarding installation ceremonies, the ritual are described in detail for the temple, for Dakṣiṇāmūrti and for the Liṅga-s; for the other images they are cursorily described.

– Regarding the installation of the temple, five pavilions, each with nine firepits (*kuṇḍa*), are prescribed; for Dakṣiṇāmūrti and for the Liṅga-s, it is only one pavilion with nine *kuṇḍa*-s; for the images to be installed in separate temples such as Gaṇeśa, Viṣṇu, Brahmā and Durgā, four *kuṇḍa*-s are prescribed. Lastly, regarding installation ceremonies for the four, eight or five *diṅmūrti*-s, one *kuṇḍa* is prescribed for each deity.

– The general pattern of the installation ceremonies described in the *Rauravottara* is quite uniform and its main stages are as follows: after having prepared the image (with stone, metal or wood), there are in succession the ceremonies of opening of the eyes (*nayanonmīlana*), purification of the image (*bimbaśuddhi*), immersion in water (*jalādhivāsa*), construction of the pavilion for consecration (*maṇḍapanirmāṇa*), construction of an altar (*vedikā*) in the centre of the pavilion and of firepits (*kuṇḍa*) around the altar, placing the image on a specially prepared bed (*śayanādhivāsa*), installation of water pots (*kumbhasthāpana*) and their worship, fire ritual with firesticks (*samidh*), ghee (*ājya*), cooked rice (*caru*)...etc., final oblation, taking the water pots near the image, transferring the invoked god to the image, spinkling or pouring of the water from the pots on the image (*kumbhābhiśeka*), completion of fire ritual (*sviṣṭāntahoma*), honouring the priests (*ācāryapūjā*) and feeding of brahmins (*brāhmanabhojana*); all these ceremonies are the same in all the case.

– For the installation of the temple and that of Dakṣiṇāmūrti and of the Liṅga-s

thirteen materials are prescribed: *samidh* (firesticks), *ghṛta* (ghee), *caru* (cooked rice), *kṣīra* (milk), *yava* (barley), *veṇu* (bamboo rice), *priyaṅgu* (panic seeds), *lāja* (parched rice), *sarṣapa* (mustard), *māṣa* (black-gram), *tila* (sesame), *madhu* (honey) and *gula* (jaggery). For the temple installation there are one hundred oblations of each material, and in other cases twenty-eight. In the installation of other deities, eleven materials only are prescribed, honey and jaggery being left out; the number of oblations is twenty-eight.

Contents of paṭala-s

Paṭala 1. Divisions of the temples.

The main varieties of the temples nāgara, vesara and drāviḍa, and again the mixed varieties such as nāgara-drāviḍa, nāgara-vesara and drāviḍa-vesara are explained. It is told that each such variety has sixteen divisions; the total is thus ninety-six; however neither explanation nor the names of them are given.

Paṭala 2. Temples with four *diṅmūrti*-s

The images to be installed on the four facades of the temple are Indra (East), Dakṣiṇāmūrti (South), Viṣṇu (West) and Brahmā (North).

Paṭala 3. Temples with eight *diṅmūrti*-s

The images are to be installed in the four main directions and in the four sub-directions. In the main directions they are from East onwards Kumāra, Dakṣiṇāmūrti, Narasiṃha and Brahmā, and in the sub-directions starting from South-East, the Sages Kaśyapa, Agastya, Nārada and Vasiṣṭha. They are to be installed at the level of the attic (*kaṇṭha*) of the temple.

Paṭala 4. Temples with five *diṅmūrti*-s

The images are to be installed on the level of the pillars on the temple itself and on the *ardhamaṇḍapa*. In the South and North of the *ardhamaṇḍapa* are Gaṇeśa and Durgā and, on the temple itself, Dakṣiṇāmūrti (South), Viṣṇu (West) and Brahmā (North).

Paṭala 5. Ceremonies for installation of the temple.

The ceremonies are the same either for a newly built temple or for a temple which has been renovated.

First the rules for the construction of the pavilion for preparatory ceremonies are given and it is stated that either pavilions or sheds (*prapā*) could be constructed. There must be five pavilions: one "inside", that is to say in front of the temple, and four others "outside", that is to say in the four directions. There should be an altar in the centre of each pavilion and five pits (*kuṇḍa*) for fire ritual

around it: one in front and other four in the main directions. The first of them is square (*caturaśra*) and the rest are bow-like (*dhanur*), round (*vṛtta*), triangle (*trikoṇa*) and hexagon (*ṣaḍáśra*). The pavilion is to be decorated with four doors, arches, eight auspicious things (*aṣṭamaṅgala*), garlands made of *darbha* grass and also of flowers.

Then nine water pots are to be placed on each altar and respective deities are to be invoked in those pots and are to be duly worshipped. Afterwards the fire ritual is to be conducted in each of the firepits. Thirteen materials are prescribed as offerings and five kinds of fire-sticks (*samidh*) for the five firepits. One hundred times each of the materials are to be offered and twenty-eight times the ghee is to be poured. The final oblation is to be done with recitation of the *prāsādamantra*.

On the auspicious day fixed for the consecration ceremony, the pots on the altars are to be taken to the temple. The first nine from the altar in front are to be taken inside the temple. The pots from the eastern altar are to be taken to the top (*śikhara*) of the temple, the pots from the southern altar to its attic (*kaṇṭha*), the pots from the western altar to the entablature (*prastara*) and the pots from the northern altar to the level of the pillars (*pādabhāga*). Then the water from the pots is to be sprinkled inside and all around the temple, the deities are to be worshipped and a concluding fire ritual is to be performed. Honour to the priests and feeding of brahmins are to follow.

Paṭala 6. Installation of the four *dinmūrti*-s

A pavilion is to be constructed in front of each of the four divinities detailed in paṭala 2. An altar is to be built in the middle of each pavilion with four firepits all around. The pavilions are to be decorated. One water pot is to be placed on each altar and the corresponding deity is to be invoked in it. Four kinds of fire-sticks and eleven kinds of materials are prescribed as oblations which are given twenty-eight times. Then there is the final oblation.

A small altar is to be constructed in front of each of the four divinities, so that after consecration the daily ritual may be performed on it.

On the fixed auspicious day, the pots are to be taken near the corresponding deities and after transferring the deity invoked in the pot to the image the water is sprinkled over it and also over the small altar. Then the deities are to be worshipped in the images and also in the altars. After the concluding fire ritual, the priests are to be honoured and brahmins are to be fed.

Paṭala 7. Installation of eight *dinmūrti*-s

A pavilion should be constructed in front of the eight divinities detailed in paṭala 3, with an altar in its middle and one firepit near each altar.

The divinities which are on the attic of the temple are to be covered with cloth and darbha grass. Then pots with water, duly decorated are to be placed on each altar and the corresponding deity in whose front they are placed is to be invoked

and worshipped in it. Fire ritual is to be done in each firepit; eight kinds of sticks for the eight firepits are prescribed; eleven materials are prescribed as oblations and there should be twenty-eight oblations of each of them. After the final oblation, the pots are taken near the corresponding deity; after transferring the deity to the image, the water of the pot is to be sprinkled on the image and also on the small altar constructed in front of the image for the purpose of daily worship. After having worshipped the deities, the priests are honoured and brahmins are fed.

Paṭala 8. Installation of five *diṁmūrti*-s.

As prescribed in the previous chapters a pavilion with an altar and one firepit is to be arranged in front of each of the five divinities detailed in paṭala 4. One pot with water is to be placed on each altar and the respective deity is to be invoked in it and duly worshipped. Five kinds of fire-sticks and eleven materials for oblation are given; there must be twenty-eight oblations of each material.

As explained in previous chapters one small altar is to be constructed in front of each of the deities; the water from the pot is to is to be sprinkled on the image as well as on the altar. After worshipping the deities, the priests are to be honoured and brahmins are to be fed.

Paṭala 9. Installation of Gaṇeśa

From paṭala 9 to paṭala 13, installation and consecration ceremonies for Gaṇeśa, Dakṣiṇāmūrti, Viṣṇu, Brahmā and Durgā in separate temples are detailed.

A temple for Gaṇeśa is to be constructed either to the South of ardhamaṇḍapa of a Śiva temple or in any other prescribed place. The image of Gaṇeśa is to be made of stone, of wood or of metal; when it is ready and after the ceremony of the opening of eyes (*nayanonmīlana*), it is to be purified by rituals. The image is to be immersed in water but a substitute in form of a mirror is placed in water in the case of images which cannot be put in water such as those made of mud, stucco...etc.

After this *jalādhivāsa*, a pavilion is to be constructed in front of the temple with an altar in its centre; there are four firepits around the altar and the pavilion should be decorated as usual. A bed with five prescribed materials is to be prepared on the altar; the image, taken from the water, is to be placed in a lying position on it with its face upwards and its head towards the East; it should be duly worshipped after having been covered with new cloths. This is called *śayanādhivāsa*.

Then eight pots duly decorated representing eight Attendants of Gaṇeśa should be placed on the altar in the eight directions and the main pot representing Gaṇeśa is to be placed in the centre. Once these divinities have been invoked and worshipped in the pots the fire ritual is to be performed with four kinds of fire-sticks for the four firepits and eleven materials (each being offered twenty-

eight times). The oblations are done with a stick, one material, cooked rice and ghee. Then the final oblation (*pūrṇāhuti*) is to be offered.

Next day morning taking the image from the bed, entering the temple, having placed nine gems in the pedestal in the sanctum, the image is to be installed together with its pedestal. Then taking pots from the altar, the water is to be poured on the image after placing the divinities by reciting the relative mantras in the image. Then the image is to be duly worshipped and special food such as jaggerymixed rice (*gulānna*) rice cooked with milk and sugar (*pāyasa*) is to be offered. After completing the fire ritual, the priests and assistants are to be honoured and brahmins are to be fed.

Paṭala 10. Installation of Dakṣiṇāmūrti

This image is to be installed in the southern direction of the temple or in any other prescribed place in an independant temple; it is to be made of stone or of metal.

After completion of the image one is to make the ceremony for the opening of eyes placing it on an altar in a shed in front of the temple. Then the image is to be purified. Placing it either in a chariot or in a palanquin, one must go around the village or the town, then immerses it in water either in a tank or in a river for the *jalādhivāsa* ceremony. Then the *śayanādhivāsa* ceremony is to be done as explained in the previous chapter. A pavilion is to be constructed in front of the temple with an altar in the centre, and nine firepits around it, eight in the eight directions and one between East and North-East. There are nine water pots on the altar, in the southern direction; one in the centre and eight around and nine divinities are to be invoked and worshipped.

For the oblations nine kinds of fire sticks and thirteen materials are prescribed; there must be twenty-eight oblations of each material.

After the final oblation the image is to be placed in the temple; before, gems have been placed in the pedestal. The water of the pots is to be poured on the image and the usual worship is to be conducted and food offered. After completion of the fire ritual, the priests are honoured and the brahmins are to be fed.

Paṭala 11. Installation of Viṣṇu

Viṣṇu will be installed in the western direction of Śiva temple, or in any other prescribed place. The image is to be made either in stone, wood or metal.

The usual ceremonies are to be done: opening of the eyes, *śayanādhivāsa*, placing and worship of pots, fire ritual...etc.

Four firepits should be in four directions around the altar in the pavilion and five pots on the altar, one in the middle and four in the four directions. There are four fire-sticks and eleven materials for oblations; the number of oblations is twenty-eight for each material.

The installation of the image, the pouring of water from the pots on the image,

the worship, the offering of food, the final fire ritual, honour to priests and brahmin feeding are all to be conducted as prescribed, but the special *mantra*-s related to Viṣṇu should be used.

Paṭala 12. Installation of Brahmā

His place will be either in the north of the Śiva temple or in any other prescribed place in an independant temple. The image is to be done of stone or of metal; the usual ceremonies are to be performed. There are nine water pots and four firepits; four kinds of fire-sticks, eleven materials and twenty-eight oblations of each material are prescribed. The image is installed in the prescribed place with the usual ceremonies.

Paṭala 13. Installation of Durgā

The goddess may be installed in the North of the *ardhamaṇḍapa* of Śiva temple or in any other prescribed place in an individual temple. The image is made from stone or metal. The usual ceremonies from the opening of eyes up to the fire ritual are to be conducted as for other divinities. There would be four firepits, nine waterpots, four kinds of fire-sticks, eleven materials for oblation and twenty-eight oblations of each material.

After the final oblation in the fire, five gems and gold are to be placed where the goddess is to be installed. The image, duly worshipped, is to be placed there and as usual the water from the pots is to be poured on it. Then there are the worship, the offering of *gulānna* (jaggery mixed rice) or *pāyasa* (rice cooked in milk with sugar) as food, the end of the fire ritual, the honour to the priests and the feeding of brahmins.

Paṭala 14. Installation of Dvārapāla-s

A temple will have normally four entrances in the four directions and for each there are two door keepers, one on each side of the door. Their names are as follows:

East	Nandin	Mahākāla
South	Ananta	Paśupati
West	Mahācaṇḍa	Mahāmuṇḍa
North	Piṅgala	Vijaya

The usual ceremonies such as *jalādhivāsa, śayanādhivāsa* are prescribed. In each direction there must be a pavilion with two altars, one for each Dvārapāla, and two firepits. It is stated that the remaining ceremonies are to be done as told in other chapters.

Paṭala 15. Differents kinds of Liṅga

Four kinds of Liṅga are mentioned: sarvatobhadra, vardhamāna, śivādhika

and trairāśika. It is told that each of them has four varieties and each of those again has four varieties. Thus there are sixty-four kinds of Liṅga-s but neither their definitions nor their names are given.

The sarvatobhadra Liṅga is to be installed in the nāgara temple, the vardhamāna in drāviḍa temple, the śivādhika in vesara temple and the trairāśika Liṅga is to be installed in the miśraka temple as well as the Sahasradhārāliṅga. For the Mukhaliṅga no specification of temple is given.

Then the details of the method for building the temple following the measurement of the Liṅga and for making the Liṅga according to the dimensions of the temple are given.

Lastly, another series of sixty-four Liṅga-s are described without details about their names or definitions.

Paṭala 16. Installation of the Liṅga made of stone

The installation of the Śailaliṅga is made in a temple such as nāgara, or in a temple built on an elevated platform (*māṭa*) or in a *kūṭa* type of pavilion, or in an ordinary pavilion. The pedestal is to be made according to the measurement of the Liṅga. For the purpose of all preparatory ceremonies, one has to make a provisional Liṅga (pratiliṅga or bālaliṅga), which will have to be abandoned in a river or in the sea after the installation of the main Liṅga.

When the Liṅga is ready it is to be put in *pañcagavya* for purification; then instead of the *nayanonmīlana* ceremony, there is the ceremony of the drawing of the lines on the Liṅga. Then *jalādhivāsa, maṇḍapanirmāṇa, kumbhasthāpana*... etc., are to be performed.

There will be nine firepits. In the middle of the altar there are the main *kumbha* representing Śiva and a smaller one for his Śakti; all around eight other pots represent other divinities. There are nine kinds of fire-sticks and thirteen materials, of which twenty-eight oblations of each have to be performed.

Having placed nine gems and other auspicious materials in the place of installation, one is to take the Liṅga into the temple and after placing the *brahmaśilā* and the pedestal the Liṅga is to be fixed with a strong gum called *aṣṭabandhana*. Then the water from the pots is to be poured and other ceremonies follow as usual.

Paṭala 17. Installation of Mukhaliṅga

Here the ceremony of opening the eyes is to be done as the face of Śiva is represented on the Liṅga. In this chapter Liṅga-s with five, three and one face are mentioned; however, Liṅga with four faces are mentioned elsewhere in the book. Other ceremonies are same as for the Śailaliṅga.

Paṭala 18. Installation of Bāṇaliṅga

Bāṇaliṅga-s are not manmade but just found in rivers or other places; thus

there is no work for the craftsman. The ceremony of the opening of the eyes is not performed but all the others must be followed as in the case of the Liṅga made of stone.

Paṭala 19. Installation of Iṣṭaliṅga

The Iṣṭaliṅga is a Liṅga to be worshipped for the self by a fully initiated person. It may be procured from a mountain, a forest, a river...etc. Here also the ceremony of the opening of the eyes has no place, but all the others are to be performed.

Paṭala 20. Installation of the Liṅga made of gem.

The nine well-known gems, and also the Liṅga made of sun-stone (*sūrya-kānta*), are prescribed here. The pedestal for those Liṅga-s could be prepared either from the same material or from other one such as gold, silver or copper. When the pedestal and the Liṅga are made up from different materials they are to be joined by the help of metal and oil, so as to make it strong. All the ceremonies are to be followed for the installation of this kind of Liṅga.

Content of the Appendix

Installation of Reṇukā (*Reṇukāpratiṣṭhā*)

The image of Reṇukā is to be made from wood, metal, stucco (*sudhā*) or by painting. The usual ceremonies for the new image such as opening of eyes, immersion in water, placing on bed on the altar in the pavilion, installation of water pots, fire ritual...etc, are to be done. In the case of an image made from lime or in the case of a painting, a mirror or a crystal is to be substituted to it for immersion in water. After the consecration ceremony offering of goat, cock...etc. as bali to the Bhūtarāja, the main Attendant of Reṇukā, is prescribed.

Reṇukā must be meditated thus: her colour is red, she has three eyes, twelve hands and wears a *karaṇḍamakuṭa*; in left to right from upwards, she holds *śaṅkha* and *cakra, kheṭaka* and *khaḍga, kapāla* and *śūla, pāśa* and *ḍamaru*, and she makes *varadamudrā* and *abhayamudrā*.

Festival for Reṇukā (*Reṇukotsava*)

By performing the yearly Reṇukā festival, the king will be victorious, the kingdom will have prosperity and there will be appeasement of illnesses. The festival could be of seven days, fifteen days or of one month duration. The different kinds of vehicles in which the goddess is to be taken around are detailed. Ceremonies from flag-hoisting up to bath in the river (*tīrtha*) performed in festivals, are briefly explained.

Atonements for festival (*Utsavaprāyaścitta*)

In this chapter the expiation ceremonies to be performed for the lapses in the rituals during the festival are detailed. Either in case some prescribed vehicle is not available, or if any material prescribed for the ceremonies is not found and if the festival is conducted without them, special expiation ceremonies are to be performed to atone for these faults. Even though the ceremonies have not been completely done due to something missing, these expiations will help to obtain the fruits of performing the complete festival.

Installation of Cāmuṇḍā (*Cāmuṇḍāpratiṣṭhā*)

In order to remove the fear from the semi-divinities such as Bhūta, Preta, Piśāca, Gandharva, Rākṣasa and also from harmful animals one should install goddess Cāmuṇḍā in villages, cities, on top of hills or forests, in which places people reside.

The usual ceremonies for the installation and consecration are to be followed here also. The number of firepits is eight which are to be in eight directions around the altar in the special pavilion built for this purpose. Nine water pots, one in the middle representing the main deity and eight around representing her Attendents, are to be installed.

The meditation of Cāmuṇḍā is explained thus: Four hands, three big eyes, hanging lips, two legs, right leg in hanging positing and the left one in lying position, terrible form, four hands holding *ḍamaru* and *pāśa*, *śūla* and *kapāla*, blue in colour, in angry mood and with a demon laughing under her left feet.

Installation of Mahākālī (*Mahākālīpratiṣṭhā*)

Installation of the image of Mahākālī is to be done on an auspicious prescribed day.

The usual ceremonies, such as opening of eyes, immersion in water, construction of pavilion with an altar in the centre, placing of water pots, firepits, then rituals are prescribed. The number of firepits is eight in eight directions. The number of water pots are nine, the middle one representing the main deity and the eight around representing her attendants. The number of oblations is prescribed as 1000, or 100 or at least 50. Apart from the normal materials which are prescribed for other deities, flesh of cock or tortoise is also prescribed in addition. Remaining procedure of the installation and consecration are to be completed.

Installation of Candraśekhara (*Candraśekharapratiṣṭhā*)

The image of Candraśekhara is to be made with four hands holding deer, chisel, *varada* and *abhaya*, and with the digit of the moon on the head. The image may be with the goddess or without her. All the ceremonies for the installation and consecration are similar to those which have been described for Dakṣiṇāmūrti (paṭala 10).

रौरवोत्तरागमः

प्रथमः पटलः

[1]प्रासादभेदः

सुखासीनं शिवं शम्भुं मुनिभिः [2]परिसेवितम् ।
प्रणम्य दण्डवद्भूमौ रुरुः संप्रति [3]पृच्छति ॥१॥

[4]**रुरुरुवाच --**

पुरा प्रोक्तं महातन्त्रं [5]विस्तरेण त्वया मम ।
संक्षेपादुत्तरं तन्त्रं श्रोतुमिच्छाम्यहं प्रभो ॥२॥

[6]**ईश्वर उवाच --**

साधु साधु महाप्राज्ञ[7] यत्त्वया[8] परिचोदितम् ।
तदहं संप्रवक्ष्यामि संक्षेपाच्छृणु ते रुरो ॥३॥

[9]**रुरुरुवाच --**

प्रासादानां कथं [10]भेदो [11]मूर्तिभेदः कथं पुनः ।
[12]लिङ्गलक्षणभेदश्च गौरीभेदश्च देवता[13] ॥४॥
प्रतिष्ठा [14]कथमेतेषां श्रोतुमिच्छामि तत्त्वतः ।

[15]**ईश्वर उवाच --**

प्रासादानां पृथग्भेदं [16]मूर्तिभेदं पृथक् पृथक् ॥५॥

---

[1] प्रासादभेदविषये **'अंशुमत्काश्यपे'** २४, **अजिते** १२, **पूर्वकामिके** ४९, **पूर्वकारणे** ७, **कालोत्तरे** ५३, **दीप्ते** ७, **मकुटे** २, **रौरवे** क्रियापादे ३९, **संतानसंहितायां** ५, **सुप्रभेदे** क्रियापादे ३१, **सूक्ष्मे** ८७ पटला द्रष्टव्याः ।

[2] परिवेष्टितम्--अ, आ, इ, उ.

[3] पूजति--अ.

[4] 'रुरुरुवाच' इति 'आ, ई' मातृकयोर्न दृश्यते ।

[5] विस्तारेण--उ.

[6] 'ईश्वर उवाच' इति 'आ, ई' मातृकयोर्न दृश्यते ।

[7] ०प्राज्ञा--उ.

[8] त्वया यत्--आ, ई.

[9] 'रुरुरुवाच' इति 'आ, ई' मातृकयोर्न दृश्यते ।

[10] अस्मिन् श्लोके भेदशब्दः सर्वत्र नपुंसके प्रयुक्तः ।

[11] कर्तृभेदं--ई; मुक्तिभेदं--उ.

[12] लिङ्गं च लक्षभेदं--उ.

[13] अत्र देवताप्रतिष्ठा इति समस्तपदत्वेनान्वयं कृत्वा व्याख्येयम् । अन्यथा देवताशब्दस्यानन्वयः स्यात् । उत्तरत्र प्रतिष्ठाविधिमेतेषामित्युत्तरमप्येवमेव समञ्जसं भवति ।

[14] महमेतेषां--आ; मह्यमेतेषां--ई.

[15] 'ईश्वर उवाच' इति 'आ, ई' मातृकयोर्न दृश्यते ।

[16] मुक्तिभेदं--उ.

लिङ्गलक्षणभेदं च गौरीभेदं विशेषतः ।
[17]प्रतिष्ठाविधिमेतेषां वक्ष्यामि शृणु ते रुरो ॥६॥

[[18]षण्णवतिप्रासादभेदाः]

नागरं [19]द्राविडं चैव वेसरं मिश्रकं तथा ।
[20]चतुरश्रमुपानादि [21]स्थूप्यन्तं नागरं स्मृतम् ॥७॥

---

[17] प्रतिमाविधि०—ई; प्रतिष्ठां विधि०—उ.

[18] प्रासादभेदविषये **अजितागमे** १२, ६५ उ०–७५, **रौरवागमे** क्रियापादे ३९, २३ उ०–२५ पू० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः । तथा —
'प्रथमं मेरुप्रासादं द्वितीयं मन्दरं भवेत् ।
तृतीयं कैलासनाम च चतुर्थं मलयं भवेत् ॥
पञ्चमं वलभिश्चैव नन्द्यावर्तं तु षष्ठकम् ।
स्वस्तिकं सप्तमं ज्ञेयं सिंहप्रासादमष्टमम् ॥
नवमं गरुडप्रासादं दशमं वृषभं भवेत् ।
एकादशं हस्तिपृष्ठं द्वादशं विपुलं भवेत् ॥
त्रयोदशं तु सुक्षेत्रं चतुर्दशं मानवं भवेत् ।
महादशं पञ्चदशं विमानं छलं हि षोडशम् ॥
प्रासादानां षण्णवतिः प्रधानं षोडशं भवेत् ।
शैवं ब्राह्मं वैष्णवं च उत्तमोत्तममेव च ॥
नागरं द्राविडं चैव वेसरं त्रिविधं भवेत् ।
पूर्वं हि सप्तनागरं [चतुर्नागरं हि] मध्यषष्ठं तु द्राविडम् ॥
अपरं षष्ठकं वत्स वेसरमुत्तमं भवेत् ।
द्वात्रिंशन्नागरं प्रोक्तं द्वात्रिंशद्द्राविडं भवेत् ॥
द्वात्रिंशद्वेसरं प्रोक्तं षण्णवतिः प्रकीर्तिता ।'
(**कालोत्तरे** ५३. २ उ०–९);
'मनांसि च प्रसीदन्ति प्रासादास्तेन कीर्तिताः ।
नानामानविधानत्वाद्विमानं शास्त्रतः कृतम् ॥
पितामहेन मुनिभिर्मयेन च यथा पुरा ।
मुख्यादीनि विमानानि कथितान्यनुपूर्वशः ॥
यानि तान्यत्र कथ्यन्ते देवादीनां समासतः ।
तत्रेशब्रह्मविष्णूनां मुख्यानां मुख्यविंशतिः ॥
जातीतराणि द्वात्रिंशत्सार्वदेवानि तान्यपि ।
अथ जातिविमानानां द्वादशैव द्विजन्मनाम् ॥
राज्ञां संकृतिसंख्यानि तथाष्टौ वैश्यशूद्रयोः ।
क्षुद्राल्पाख्यान्यसामर्थ्ये सर्वेषां विहितानि हि ॥
तत्र **मुख्यादिषण्णवतिविमानानां** नामानि भवन्ति । तद्यथा —
नलिनं च प्रलीनं च स्वस्तिकं च चतुर्मुखम् ।
ततः स्यात्सर्वतोभद्रं हस्तिपृष्ठं समुज्ज्वलम् ॥
श्रीच्छन्दं वृत्तभद्रं च श्रीकान्तं श्रीप्रतिष्ठितम् ।
शिवभद्रं शिवच्छन्दमष्टाङ्गं पद्मकाकृति ॥
विष्णुच्छन्दं च सौभद्रं छन्दे कैलासरुद्रयोः ।
ततो ललितभद्राख्यं विमानं चेति विंशतिः ॥
[मुख्यविंशतिः]
मेरुमन्दरकैलासा जयाङ्गविमलाकृती ।
कुम्भाख्यं विमलाङ्गं च वृषच्छन्दं सुदर्शनम् ॥
हंसच्छन्दं पद्मकान्तं गरुडच्छन्दमेव च ।
भोगिच्छन्दं पद्मभद्रं ततः कैलासकान्तकम् ॥
रुद्रकान्तं स्कन्दकान्तं योगभद्रं च मङ्गलम् ।
विन्ध्यच्छन्दं मेरुकूटं महेन्द्रं चित्रकूटकम् ॥
श्रीमण्डनं च सौमुख्यं नीलं निषधसंज्ञितम् ।
ततो ललितकान्ताख्यं विजयं श्रीकरं तथा ॥
श्रीविशालं च कथितं तथैव जयमङ्गलम् ।
जातीतराणि द्वात्रिंशद्विमानानि दिवौकसाम् ॥
[द्वात्रिंशद्दैविकविमानानि]
नागभागाह्वयच्छन्दे कुडयावर्तं त्रिकूटकम् ।
श्रीवर्धनं पद्मगृहं प्रेक्षागृहमुखं तथा ॥
अत्यन्तभानुचन्द्राणां कान्तानि ऋतुवर्धनम् ।
वृत्तं च द्वादशैतानि विमानानि द्विजन्मनाम् ॥
[ब्राह्मणविमानानि द्वादश]
चतुष्कूटं मन्त्रपूतमावन्त्यं माहिषं तथा ।
तन्त्रीकान्तं कर्णभद्रं विजयाङ्गं विशालकम् ॥
विशालभद्रं गणिकाविशालं कर्णशालकम् ।
पद्मासनं चेन्द्रकान्तं स्यात्सर्वललितं ततः ॥
योगप्रत्यन्तकान्ताख्ये ततश्चोत्पलपत्रकम् ।
महाराजाह्वयच्छन्दं मालागृहमतः परम् ॥
पृथिवीविजयं चाथ भवेन्नन्दिविशालकम् ।
सर्वाङ्गसुन्दरं चापि छायागृहमतः परम् ॥

[22]उपानादि [23]स्थूपिका[24]न्तमष्टाश्रं द्राविडं भवेत् ।
[25]स्थूपिकान्तमुपानादि वृत्तं भवति वेसरम् ॥८॥
[26]चतुरश्रमुपानादि ग्रीवाद्यष्टाश्रकं पुनः ।
तलमेकमनेकं वा [27]नागरद्राविडं भवेत् ॥९॥
उपानाच्चतुरश्रं तु [28]ग्रीवावृत्तं तथैव च ।
तलमेकमनेकं वा भवेन्नागरवेसरम् ॥१०॥
[29]अष्टाश्रकमुपानादि भवेद्ग्रीवादिवर्तुलम् ।
तलमेकमनेकं वा भवेद्द्राविडवेसरम् ॥११॥
नागरादित्रिवर्गं तु त्रिवर्गं च विमिश्रकम् ।
एकैकं [30]षोडशभेदं भवेत्षण्णवतिः क्रमात्[31] ॥१२॥

[32]इति श्रीमद्रौरवोत्तरे [33]प्रतिष्ठातन्त्रे [34]प्रासादभेदो नाम
प्रथमः पटलः ॥

रतिवर्धनमित्येवं चतुर्विंशतिकं स्मृतम् ।
[चतुर्विंशतिर्विमानानि क्षत्रियाणाम्]
विशालालयसंज्ञं च चतुष्पादिकमेव च ।
तुरङ्गवदनं तद्वद् गणिकापिण्डिकं तथा ॥
श्येनच्छन्दं चोत्पलाग्रं ततः कुक्कुटपुच्छकम् ।
(मुण्डप्रासादकाभिख्यं विमानं तु ततः परम् ।)
इत्यष्टौ जातिहर्म्याणि वासार्थं वैश्यशूद्रयोः ॥
[विट्शूद्रविमानान्यष्टौ]'
(**ईशानशिवगुरुदेवपद्धतौ** तृतीयभागे पृ० २६५–२६७)
'नागरं द्राविडं चैव वेसरं च त्रिधा भवेत् ।
स्तूप्यन्तं चतुरश्रं यन्नागरं तदुदाहृतम् ॥
कण्ठप्रभृति वस्वश्रं प्रासादं द्राविडं भवेत् ।
कण्ठात्प्रभृति वृत्तं यद्वेसरं तत्प्रशस्यते ॥'
(**मकुटे** २. ४९५, ४९६);

[19] द्राविव्यं––अ; द्राविपं––इ.

[20] चतुरश्रमपा०––आ.

[21] सव्यं तन्नागरं––अ, आ, ई; समं ततांगर–इ.

[22] अपानादि––आ.

[23] स्तूपि०––अ, इ.

[24] ०न्तमष्टासृग्द्राविडं––इ; ०न्तं व अष्टाश्रं–उ.

[25] स्तूपिकान्त०–अ; स्थूपिकादि ह्यपानान्तं–आ; स्थूपिकादि हचुपानान्तं––ई.

[26] 'आ, ई' मातृकयोः ९, १० श्लोकौ न दृश्येते ।

[27] नागरं––अ, उ.

[28] ग्रीवावृत्तम्––ग्रीवाया आरभ्य वृत्तमित्यर्थः ।

[29] अष्टारुक०––उ.

[30] षोडशं भेदं––अ, आ, इ, ई; षोडशं भवेत्षण्णवत्यादीनि क्रमात्––उ; षोडश भेदाः यस्मिन् तदिति बहुव्रीहिसमासः

[31] षण्णवतिक्रमात्––अ, आ, इ.

[32] इति श्रीरौरवोत्तरे––अ; इति प्रासाद०––आ; इति रौरवोत्तरे––इ, ई.

[33] 'ई' मातृकायां 'प्रतिष्ठातन्त्रे' इति न दृश्यते ।

[34] प्रासादभेदपटलः प्रथमः––अ, इ; प्रासादविधिप्रथमपटलः––उ.

द्वितीयः पटलः

[1]चतुर्मूर्तिभेदः

अतः परं प्रवक्ष्यामि [2]चतुर्मूर्तिप्रभेदकम् ।
[3]नागरं द्राविडं चैव वेसरं [4]मिश्रकं तथा ॥१॥
[5]चतुरश्रं [6]चतुर्वृत्तं त्वष्टाश्रं चैव [7]वर्तुलम् ।
कल्पयेत्तु [8]चतुर्मूर्ति[9]प्रासादं [10]कृतवास्तुभिः ॥२॥
पूर्वे च दक्षिणे चैव पश्चिमे चोत्तरेऽपि च ।

[[11]चतुर्मूर्तयः, तासां स्थानानि च]

इन्द्रमूर्तिस्तु पूर्वे [12]स्याद्दक्षिणामूर्तिर्दक्षिणे[13] ॥३॥
पश्चिमे [14]विष्णुमूर्तिश्च [15]ब्रह्ममूर्तिस्तथोत्तरे[16] ।
एवमेव क्रमेणैव [17]चतुर्मूर्ति [18]तु कल्पयेत् ॥४॥

[19]इति [20]श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे चतुर्मूर्तिभेदो नाम
द्वितीयः पटलः[21] ॥

---

[1] चतुर्मूर्तिभेदविषये **अंशुमदागमे** ४९, **अंशुमत्काश्यपे** २६, **पूर्वकारणे** ७, **रौरवे** क्रियापादे ३९ पटला द्रष्टव्याः ।

[2] चतुर्मूर्ति च—अ; चतुर्मूर्तिश्च—इ, उ.

[3] नागरे द्राविडे चैव वेसरे—अ, इ, उ.

[4] मिश्रकेऽपि च—अ, इ, उ.

[5] चतुरश्रे—अ, इ, उ.

[6] चतुर्ग्रीवे त्वष्टाश्रे—अ, उ; चतुर्ग्रीवमष्टाश्रं—आ, ई; चतुर्वृत्ते . . . इ; चतुर्वृत्तशब्देन प्रथमपटले दशमश्लोके निर्दिष्टं ग्रीवावृत्तमेव बोध्यते । ग्रीवावृत्तशब्दवदत्रापि चतुर्वृत्तशब्दस्य चतुर्थादारभ्य वृत्तमित्यर्थोऽवगन्तव्यः । चतुःशब्देन लक्षणया चतुर्थो बोध्यते । तच्चात्र मिश्रकमित्यस्य विशेषणम् ।

[7] वर्तुले—अ, इ, उ.

[8] चतुर्मूर्ति—अ, आ, ई, उ.

[9] प्रासादकृतवास्तुवित्—अ, इ.

[10] कृतवास्तुवित्—आ, ई; कृतम् अभ्यस्तं वास्तुशास्त्रं यैः ।

[11] 'स्कन्दं वा पूर्वदिग्भागे शक्रो वा हस्तिरोपितः ।
दक्षिणे दक्षिणामूर्ति वीरभद्रमथापि वा ॥
पश्चिमे नारसिंहं तु सौम्यमूर्तिमथापि वा ।
उत्तरे तु विधातारं धनदं वा द्विजोत्तम ॥
प्रस्तरोपरि कर्तव्यमेकद्वित्रितले तथा ।'
(**अंशुमत्काश्यपे** २६. ६३ उ०–६५);
'कुमारं पूर्वदिग्भागे दक्षिणामूर्तिकं यमे ।
वारुणे तु नृसिंहं वा केशवं वापि कारयेत् ॥
ब्रह्माणमुत्तरे देशे कन्धरे तु विशेषतः ।
पश्चिमद्वारहर्म्ये तु स्कन्दं पश्चिमके कुरु ॥
केशवं पूर्वभागे तु कल्पयेत्कल्पवित्तमः ।'
(**पूर्वकारणे** ७.९०–९२ पू०);
एतद्विषये **रौरवे** क्रियापादे ३९.३३–३५ श्लोकाः टिप्पणी च द्रष्टव्याः ।

[12] तु दक्षिणा—अ, इ, उ.

[13] ०मूर्तिदक्षिणे—अ, ई, उ.

[14] मूर्तिविष्णुश्च—उ.

[15] प्राङ्मूर्तिश्च स्तुवोत्तरे—इ.

[16] ०मूर्तिस्तु चोत्तरे—अ, उ.

[17] चतुर्मूर्तिस्तु—इ; चतुःसंख्याका मूर्तिः चतुर्मूर्तिः ताम्; 'चतुर्मूर्तीस्तु' इति चेत्सुष्ठु ॥

[18] प्रकल्पयेत्—ई.

[19] इति श्रीरौरवोत्तरे—अ; इति रौरवोत्तरे—इ.

[20] 'श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे' इति 'आ, ई' मातृकयोर्न दृश्यते ।

[21] ०भेदपटलो द्वितीयः—अ; ०भेदपटलद्वितीयः—इ; ०भेदविधिद्वितीयपटलः—उ.

तृतीयः पटलः

[1]अष्टमूर्तिभेदः

अतः परं प्रवक्ष्यामि [2]ह्यष्टमूर्तिप्रभेदकम् ।
[3]अष्टाश्रे वेसरे वापि कल्पयेद्दैवतामुनीन्[4] ॥१॥

[5][अष्टमूर्तयः, तासां स्थानानि च]

कुमारादि वसिष्ठान्तं [6]पूर्वाद्यष्टासु दिक्षु वै ।
कुमारं पूर्वदिग्भागे [7]चाग्नेय्यां काश्यपं तथा ॥२॥
[8]याम्ये तु दक्षिणामूर्तिमगस्त्यं चैव[9] नैर्ऋते[10] ।
पश्चिमे [11]नारसिंहं च [12]वायव्ये नारदं तथा ॥३॥
उत्तरे ब्रह्म[13]मूर्तिं च वसिष्ठं [14]चैश्वरे [15]दिशि ।

---

[1] अष्टमूर्तिप्रभेदविषये **अंशुमदागमे** ४९, **अंशुमत्काश्यपे** २६ तमपटलौ द्रष्टव्यौ ।

[2] अष्टमूर्ति०—अ, इ, ई, उ.

[3] अष्टाश्रकेसरं—अ, आ, इ, ई, उ.

[4] ०द्दैवतात्मकान्—इ; ०द्दैवतामुनिम्—उ.

[5] 'तलं प्रति विमानानां दिङ्मूर्तिरथ वक्ष्यते ।
स्कन्दं वै पूर्वदिग्भागे दक्षिणामूर्तिं दक्षिणे ॥
पश्चिमे विष्णुमूर्तिं वा लिङ्गोद्भवमथापि वा ।
धातारमुत्तरे विप्र द्वारस्थानं तु वर्जयेत् ॥
मण्टपे दक्षिणे भद्रे स्थापयेत्तु विनायकम् ।
पूर्वे च पश्चिमे तस्य नृत्तमूर्तिं प्रकल्पयेत् ॥
दुर्गामुत्तरदिग्भागे क्षेत्रपालं तथैव च ।
स्थानकं वासनं वाथ दिशामूर्तिं प्रकल्पयेत् ॥
एवं धरातलोऽर्ध्वे तु कर्तव्यं द्विजसत्तम ।'
'कलान्तं युगभूम्यादि ग्रीवे च प्रस्तरान्तके ।
एष्वष्टमूर्तिमष्टासु कल्पयेत्कल्पवित्तमः ॥'
(**अंशुमत्काश्यपे** २६. ५८ उ०–६२; ६७ उ०, ६८ पू०)

[6] पूर्वाद्यष्टसु—अ, इ, उ; पूर्वास्वष्टसु—आ; पूर्वास्वष्टासु—ई.

[7] आग्नेय्यां—अ, आ, इ, उ.

[8] वामे तु — इ.

[9] ०स्त्यश्चैव—इ.

[10] नैर्ऋतौ—अ; नैर्ऋतम्—इ.

[11] नारसिंहश्च—इ.

[12] वायव्यां— उ.

[13] ०मूर्तिं तु—अ, इ; ०मूर्तिस्तु—उ.

[14] चेश्वरे—आ, ई, उ; श्चेश्वरे—इ.

[15] अत्र दिक्शब्दस्य पुल्लिङ्गे प्रयोगः, अथवा ऐश्वरशब्दस्य दिक्शब्दविशेषणस्य स्त्रीलिङ्गे प्रयोगे वृत्तभङ्गभिया पुल्लिङ्गे प्रयोग इत्यूहनीयम् । आगमेषु लिङ्गादिविषये व्यत्यासेन प्रयोगो बहुशो दृश्यत इत्ययं विषयः **रौरवे** प्रथमभागे ६९ तमपृष्ठे टिप्पण्यां निर्दिष्टोऽस्ति ।

[१६]स्कन्दादि च वसिष्ठान्तमेवमेव[१७] प्रकल्पयेत् ॥४॥

[१८]इति [१९]श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे अष्ट[२०]मूर्तिप्रभेदको[२१] नाम
तृतीयः पटलः[२२] ॥

---

[१६] स्कन्दादी च—उ.

[१७] ०मेवं—आ, इ, ई, उ.

[१८] इति श्री रौरवोत्तरे—अ; इति रौरवोत्तरे —इ.

[१९] 'श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे' इति 'आ, ई' मातृकयोर्न दृश्यते ।

[२०] ०मूर्तिस्तृतीयः पटलः—अ; ०मूर्तिविधिस्तृतीयपटलः—उ.

[२१] ०प्रभेदकं—आ, ई.

[२२] 'पटलः' इति 'ई' मातृकायां न दृश्यते ।

चतुर्थः पटलः

[1]पञ्चमूर्तिभेदः

अतः परं प्रवक्ष्यामि पञ्चमूर्तिप्रभेदकम् ।
[2]नागरादिविमानानां पादभागे[3] विशेषतः ॥१॥
विमानं कल्पयेत्तत्र पञ्चमूर्तीः[4] प्रकल्पयेत् ।

[[5]पञ्चमूर्तयः, तासां स्थानानि च]

[6]विघ्नेशं दक्षिणामूर्ति विष्णुमूर्ति तथैव च ॥२॥
ब्रह्ममूर्ति च [7]दुर्गां च [8]पञ्चमूर्ति प्रकल्पयेत् ।
अर्धमण्डपदक्षिण्यां[9] स्थानं विघ्नेश्वरस्य तु ॥३॥
स्थानं तु दक्षिणा[10]मूर्तेः प्रासादस्य तु दक्षिणे[11] ।
पश्चिमे विष्णु[12]मूर्तेश्च ब्रह्म[13]मूर्तेस्तथोत्तरे ॥४॥

---

[1] पञ्चमूर्तिभेदविषयमधिकृत्य **पूर्वकामिके** ५५, **दीप्ते** ६, **संतानसंहितायां** ५ पटला द्रष्टव्याः ।

[2] नागरात्तिविमानां—इ.

[3] ०भागं—आ, ई.

[4] ०मूर्ति—अ, आ, इ, उ.

[5] 'गुहासु देवताः स्थाप्याः प्रासादस्य समन्ततः ।
दक्षिणे दक्षिणामूर्तिं लिङ्गोत्थं तस्य पश्चिमे ॥
ब्रह्माणमुत्तरे देशे स्थापयेद्देशिकोत्तमः ।
अर्धमण्डपदक्षांशे विघ्नेशं नृत्तरूपिणम् ॥
दुर्गा चोत्तरभागे स्याद्रुद्रं वा सार्वदेशिके ।
नानाकारयुतं वापि सर्वत्रैकं तु वा न्यसेत् ॥
प्रतिमालक्षणोक्तेन मार्गेणैव समाचरेत् ।
तले तले तु देवांश्च गले चाप्येवमाचरेत् ॥
क्वचिदस्मिन्विशेषोऽस्ति सुब्रह्मण्यं तु पूर्वतः ।
इन्द्रं वाहनयुक्तं वा रुद्ररूपं तु वा न्यसेत् ॥'
(**पूर्वकामिके** ५५.७२–७६)
'प्रासादपार्श्वे पृष्ठे च दिशामूर्तिं तु विन्यसेत् ॥
सेनापतिर्भवेत्पूर्वे दक्षिणामूर्तिर्दक्षिणे ।
पश्चिमे नारसिंहं तु उत्तरे च पितामहम् ॥
तन्मण्डपस्य पार्श्वे तु विघ्नमूर्तिं प्रकल्पयेत् ।
सौम्ये कात्यायनीं कुर्यान्महिषस्य शिरःस्थिताम् ॥'
(**दीप्ते** ६.७८उ०–८०);
'प्रासादपार्श्वे पृष्ठे च दिशामूर्तिं च विन्यसेत् ॥
स्कन्दं तु पूर्वदेशे तु दक्षिणामूर्तिं दक्षिणे ।
पश्चिमे लिङ्गोद्भवं च उत्तरे तु पितामहम् ॥
तन्मण्डपस्य पार्श्वे तु विघ्नमूर्तिं तु दक्षिणे ।
उत्तरे चैव दुर्गां च कुर्यादेकतलस्य तु ॥'
(**संतानसंहितायाम्** ५.६२उ०–६४)

[6] 'उ' मातृकायां '२' श्लोकस्योत्तरार्धं '३' श्लोकस्य पूर्वार्धं च न दृश्यते ।; विप्रेश—इ.

[7] दुर्गं—इ.

[8] पञ्चसंख्याका मूर्तिः पञ्चमूर्तिः ताम् । पञ्चमूर्तीरिति चेत्सुष्ठु ।

[9] 'दक्षिण्याम्' इत्यत्र 'दक्षिणायाम्' इति भवितव्यम् । उत्तरत्राष्टमपटले ९, १० श्लोकयोर्दक्षिण्यामित्येव पाठस्य दर्शनादत्र 'दक्षे तु' इति पाठान्तरे विद्यमानेऽपि 'दक्षिण्याम्' इत्येव पाठः साधितः ।; दक्षे तु—आ, ई; दक्षिणां—इ.

[10] ०मूर्ति—इ; ०मूर्ति—उ.

[11] प्रासाददक्षिणेऽपि वा—उ.

[12] मूर्तिं च —अ, इ, उ; ० मूर्तिश्च—आ, ई.

[13] मूर्तिं तु चोत्तरे—अ; ०मूर्तिस्तु चोत्तरे—आ, ई, उ; ०मूर्तिस्तथोत्तरे— इ.

अर्धमण्डपसौम्यायां दुर्गास्थानं प्रकीर्तितम् ।
प्रतिमां कल्पयेत्तत्र [१४]प्रासादे [१५]कृतवास्तुभिः ॥५॥
सुधाभिर्वा शिलाभिर्वा दारुभिः शिल्पिकर्मणि ।
[१६]कम्बुग्रीवादि दुर्गान्तं स्थापयेदादिशैवकः[१७] ॥६॥

[१८]इति [१९]श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे पञ्च[२०]मूर्तिप्रभेदको नाम

चतुर्थः पटलः ॥

---

[१४] प्रासादकृत०——अ, इ, उ; प्रासादं कृत०——आ, ई.

[१५] कृतम् अभ्यस्तं वास्तुशास्त्रं यैः ।; २.२. श्लोकं पश्यत ।

[१६] 'कम्बुः=गजः' इति **वैजयन्तीकोशे** (३.७.६२) तस्य ग्रीवेव ग्रीवा यस्य सः कम्बुग्रीवः विघ्नेश्वरः ।; अम्बुग्रीवादि——इ, कम्बुग्रीवार्द्र–उ.

[१७] ०शैवकम्——आ, ई.

[१८] इति श्रीरौरवोत्तरे——अ; इति रौरवोत्तरे–इ.

[१९] 'श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे' इति 'आ, ई' मातृकयोर्न दृश्यते ।

[२०] ०मूर्तिभेदपटलश्चतुर्थः——अ, इ; ०मूर्तिप्रभेदकं नाम——आ, ई; ०मूर्तिभेदचतुर्थपटलः——उ.

पञ्चमः पटलः

[1]प्रासादप्रतिष्ठाविधिः

[[2]मण्टपः, तत्र वेदिकाकुण्डकल्पनं च]

[3]प्रतिष्ठां संप्रवक्ष्यामि प्रासादानां विशेषतः।
आदौ [4]प्रासादकरणे [5]पुनरुत्थापनेऽपि च ॥१॥
प्रासादपुरतो[6] बाह्ये चतुर्दिक्षु च मध्यमे।
मण्डपं वा प्रपां वापि कल्पयेत्सप्तहस्तकैः ॥२॥
षोडशस्तम्भसंयुक्तं चतुर्द्वारसमन्वितम्।
वेदिकां कल्पयेन्मध्ये मण्डपस्य [7]त्रिभागके ॥३॥
विस्तारस्याष्टभागैकं[8] [9]वेदिकायाः समुच्छ्रयम्।
[10]वेदिकां परितो बाह्ये भूतकुण्डानि कल्पयेत् ॥४॥

---

[1] प्रासादप्रतिष्ठाविधिविषये **पूर्वकामिके** ६९; **पूर्वकारणे** ७०; **उत्तरकारणे** ९०; **दीप्ते** ६४; **वीरे** ६८; **संतानसंहितायाम्** २३; **सहस्रे** ४६ पटलाः; **स्वायम्भुवे** विमानस्थापनविधिपटलश्च द्रष्टव्याः।

[2] 'धिष्ण्यावसाने पूर्वोक्ते काले च त्वङ्कुरार्पणम् ॥
प्रासादस्याग्रतः कुर्यान्मण्डपं वेदिकान्वितम्।
नवकुण्डसमायुक्तं पञ्चकुण्डयुतं तु वा ॥'
(**पूर्वकामिके** ६९.१उ०—२);
'अङ्कुराण्यर्पयेद्विद्वान् पूर्वोक्तविधिना सह।
प्रागुक्तविधिना कुर्यान्मूर्तीनामक्षिमोचनम् ॥
जलाधिवासनं नोक्तं पुण्याहं वाचयेत्ततः।
प्रासादस्य चतुर्दिक्षु मण्टपं तु प्रकल्पयेत् ॥
नवममष्टहस्तं [नवहस्ताष्टहस्तं ?] वा सप्तहस्तमथापि वा।
कलास्तम्भसमायुक्तं द्वादशस्तम्भमेव वा ॥
मण्टपस्य त्रिभागैकमध्यभागैकवेदिकाम्।
रत्निमात्रसमुत्सेधां दर्पणोदरसंनिभाम् ॥
कुण्डानि परितः कुर्यान्मानुषे तु पदे क्रमात्।
युगाश्रं योनिचापं च त्र्यश्रं वृत्तमथाब्जकम् ॥
सप्ताश्रं चैव वस्वश्रमिन्द्रादिषु प्रकल्पयेत्।
प्राक्कुण्डईशयोर्मध्ये वृत्तं प्राधानिकं कुरु ॥
हर्म्याग्रे मण्टपं ह्येवं कारयेल्लक्षणैः सह।
अन्येषां मण्टपे ह्येवं कुर्यात्सर्वं युगाश्रकम् ॥
नवाग्न्यायतनं वापि पञ्चाग्न्यायतनं तु वा।
पञ्चाग्न्यायतनं चेत्तु विदिशासु विसर्जयेत् ॥
प्रासादस्याग्रभागे तु मण्टपं स्कन्दमण्टपम्।
हर्म्यस्यैवापरे भागे मण्टपं विष्णुमण्टपम् ॥
सौम्येऽब्जमण्टपं प्रोक्तं दक्षिणे त्वीशमण्टपम्।'
(**पूर्वकारणे** ७०.५–१४ पू०)

[3] प्रतिष्ठाः सं०—इ, उ.

[4] प्रासादे करणे —इ.

[5] पुनरात्थापिने—उ.

[6] परितो—अ, आ; प्रायश आगमेषु प्रासादाग्रे मण्डपनिर्माणं विधीयते। अत्र पुनः प्रासादाग्रे तथा प्रासादबाह्ये चतुर्दिक्षु मध्ये च आहत्य पञ्चमण्डपकल्पनं विधीयते। आगमान्तरेषु 'प्रासादाग्रे' इति विधिमनुसृत्यात्र 'प्रासादपुरतः' इति पाठः स्वीकृतः। 'प्रासादपरितः' इति पाठे प्रासादस्य परितो बाह्ये चतुर्दिक्षु तथा 'मध्यमे 'प्रासादाग्रे' मण्डपकल्पनमिति साधनीयम्।

[7] त्रिभागिकम्—अ, इ, उ.

[8] भागेकं—ई.

[9] वेदिकायां—अ, आ, इ, उ.

[10] वेदिकापरितो—अ, इ, ई, उ; वेदिकापरतो —आ.

चतुष्कुण्डं चतुर्दिक्षु [११]चैककुण्डं तु मध्यमे ।
चतुरश्रं धनुर्वृत्तं त्रिकोणं च षडश्रकम् ॥५॥
पूर्वे च दक्षिणे चैव पश्चिमे चोत्तरे तथा ।
मध्यमे पञ्चकुण्डानि [१२]मेखलातिसृभिर्युतम् ॥६॥

[[१३]मण्डपालंकारः]

प्रोक्षयेत्पञ्चगव्येन [१४]गोमयेनानुलेपयेत् ।
दर्भमालाभिरावेष्ट्य पुष्पमालाप्रलम्बितम् ॥७॥
द्वारतोरणसंयुक्तं [१५]कुम्भैरेवाष्टमङ्गलैः ।

[[१६]अधिवासः]

स्थण्डिलं कल्पयेत्तत्र वेदिकोपरि शालिभिः ॥८॥

---

[११] एककुण्डं—अ, आ, इ, उ; चेककुण्डं—ई.

[१२] मेखलाभिस्त्रिभिर्युतम् —अ, आ, इ, ई, उ; 'मेखलात्रयसंयुतम्' इति चेत् साधु ।

[१३] 'मण्डपं मण्डयित्वा तु कुर्याच्छिल्पिविसर्जनम् ।
ब्राह्मणान्भोजयेत्तत्र तद्दिनात्प्राग्दिनत्रये ॥
तदा प्रासाददेहस्थे बेराणां दृष्टिमोचनम् ।
मध्वाज्यधान्यगोविप्रकन्यानां दर्शनं द्विजाः ॥
तत्तद्धृदयमन्त्रेण कृत्वा संप्रोक्ष्य गव्यतः ।
संपूज्य गन्धपुष्पाद्यैः प्रासादं प्रोक्षयेत्ततः ॥
जङ्घायुगलचूडान्तं तत्त्वतत्त्वेश्वरान्न्यसेत् ।
मूर्तिमूर्तीश्वरान्न्यस्त्वा बेरेष्वपि तथाचरेत् ॥
वस्त्रैराच्छाद्य सर्वं तु पुष्पैर्दर्भैः परिस्तरेत् ।
मण्डपं संप्रविश्याथ पुण्याहं वाचयेत्ततः ॥'
(**पूर्वकामिके** ६९.३–७);
'अलंकृत्य वितानाद्यैर्मण्डपानि विशेषतः ।
भूसुरान्भोजयेत्पश्चान्मण्डपं प्रति बुद्धिमान् ॥
पश्चादुच्छिष्टमुद्वास्य गोमयेनोपलेपयेत् ।'
(**पूर्वकारणे** ७०.१४ उ०, १५)

[१४] गोमयेन तु लेपयेत्—अ; गोमयेनानुलिप्य च—ई.

[१५] 'कुम्भैरेव' इत्यत्र एवकारोऽप्यर्थः । कुम्भैरष्टमङ्गलैरपि संयुक्तमित्यर्थः । कुम्भाश्चात्र पूर्णकुम्भाः । मण्डपालंकारविषये १०.२२; ११.११ श्लोकयोः पूर्णकुम्भा निर्दिश्यन्ते । **अजितेऽपि** मण्डपालंकारविषये कुम्भा अष्टमङ्गलानि चोक्तानि (१८.१०८) ;
अष्टमङ्गलानि —
'चित्रकेतुपताकाश्रीभेरीकुम्भाश्च दीपिका ।
नन्द्यावर्तं च देवानां सर्वेषामष्टमङ्गलम् ॥
भेरी वृषो गजश्चैव चामरौ केसरी झषः ।
पताका च प्रदीपश्च देवानामष्टमङ्गलम् ॥
दर्पणं पूर्णकुम्भं च वृषभो युग्मचामरम् ।
श्रीवत्सं स्वस्तिकं शङ्खं दीपश्चैवाष्टमङ्गलम् ॥'
(**पूर्वकामिके** ५५.८६–८८);
अत्र विषये **रौरवे** क्रियापादे १८.७८ उ०, ७९ पू० श्लोकः, तदीयटिप्पणी च द्रष्टव्याः ; तथा **रौरवोत्तरे**ऽत्र १६,६१ श्लोकेऽष्टमङ्गलानि निर्दिश्यन्ते ।

[१६] 'स्थण्डिले वेदिकायां तु वसुद्रोणैश्च शालिभिः ।
तदर्धतण्डुलैः शुद्धैस्तिलैर्लाजैस्तदर्धकैः ॥
मध्यमे शिवकुम्भं तु वर्धनीसहितं न्यसेत् ।
दिङमूर्तिसंख्यया कुम्भांस्तद्बहिः परितो न्यसेत् ॥
ससूत्रान्सापिधानांश्च सवस्त्रान्हेमसंयुतान् ।
चन्दनोदकसंपूर्णान्सकूर्चान्पल्लवान्वितान् ॥
गन्धादिभिः समभ्यर्च्य नैवेद्यान्तैः समन्ततः ।'
(**पूर्वकामिके** ६९.८–११पू०);

[17]अधिवास्यादि[18]रात्रौ तदधि[19]वासनमारभेत् ।
मध्ये मण्डपवेद्यां तु नवशक्तिसमन्वितम् ॥९॥
ईशानमूर्तिमावाह्य नवकुम्भेषु विन्यसेत् ।
[20]वेदिकायां ततः पूर्वे विद्येश्वरसमन्वितम् ॥१०॥
[21]पौरुषीं मूर्तिमावाह्य नवकुम्भेषु विन्यसेत् ।
दक्षिणे वेदिकायां तु गणेश्वरसमन्वितम् ॥११॥
[22]अघोरमूर्तिमावाह्य नवकुम्भेषु विन्यसेत् ।

'वेद्यूर्ध्वे स्थण्डिलं कुर्यादष्टद्रोणैश्च शालिभिः ।
पूर्वे तु रक्तधान्यैश्च दक्षिणे श्वेतशालिभिः ॥
अपरे कृष्णधान्यैश्च सौम्यायां पीतशालिभिः ।
तदर्धैस्तण्डुलैर्भूष्य तदर्धैश्च तिलैरपि ॥
लाजदर्भैः परिस्तीर्य स्थण्डिलं पूजयेद्बुधः ।'
'पूर्वोक्तलक्षणोपेतान्घटान्संगृह्य वर्मणा ।
शुक्लसूत्राम्बुसंयुक्तान्सकूर्चान्सापिधानकान् ॥
सवस्त्रान्पल्लवोपेतान्विन्यसेत्स्थण्डिलोपरि ।
स्कन्दस्य मण्डपे वेद्यां शिवकुम्भं तु मध्यमे ॥
विन्यस्त्वा तस्य मध्ये तु पञ्चरत्नं विशेषतः ।
ध्यात्वा सदाशिवं तस्मिञ्शिवमन्त्रं तु विन्यसेत् ॥
वर्धनीं तस्य वामे तु तस्यां हेमं विनिक्षिपेत् ।
ध्यात्वा मनोन्मनीं तस्यां तन्मूलेनैव विन्यसेत् ॥
स्कन्दकुम्भं न्यसेद्धीमाञ्शिवकुम्भस्य दक्षिणे ।
पञ्चरत्नं क्षिपेत्तस्मिन्ध्यात्वा तु स्कन्दरूपकम् ॥
तन्मूलं तु न्यसेत्तस्मिन्गन्धपुष्पादिभिः क्रमात् ।
तत्तदीशानमन्त्रैश्च पूजयेत्तु विशेषतः ॥
लिङ्गमुद्रां च पद्माख्यां शक्तिमुद्रां प्रदर्शयेत् ।
अभितस्तु घटानष्टौ पूर्वाशादिषु विन्यसेत् ॥
कुमारं षण्मुखं चैव सुब्रह्मण्यं सुराष्ट्रजम् ।
सेनापतिं सुरेशं च कार्तिकेयं गुहं क्रमात् ॥
पूर्वादिषु घटेष्वेतान्यसेत्तद्बीजमन्त्रकैः ।
तत्तदीशानमन्त्रेण गन्धपुष्पादिभिर्यजेत् ॥
ईशस्य मण्टपे वेद्यां स्थण्डिले परितो न्यसेत् ।
प्रधानकुम्भं न्यस्त्वा तु दक्षिणामूर्तिरूपकम् ॥
ध्यत्वा महेशबीजं तु विन्यसेद्धटमध्यमे ।
परितोऽष्टघटेष्वेतान्भवादीन्पूर्वतो यजेत् ॥
भवं शर्वं तथेशानं पशुपतिं रुद्रमेव च ।
उग्रं भीमं महादेवं यजेत्पूर्वादितः क्रमात् ॥
गन्धादिभिर्यजेद्धीमानीशानेनैव मन्त्रतः ।
अभितः कलशानष्टौ शक्रादिषु च विन्यसेत् ॥
विद्येशानां स्वबीजैश्च न्यस्त्वा संपूजयेद्बुधः ।
विष्णुमण्डपके वेद्यां स्थण्डिलोपरि मध्यमे ॥
प्रधानकुम्भं विन्यस्त्वा तन्मध्ये विष्णुरूपकम् ।
ध्यात्वा बीजं न्यसित्वा तु गन्धादिभिर्यजेद्बुधः ॥
अभितस्तु घटानष्टौ शक्रादिषु च विन्यसेत् ।
संकर्षणश्च प्रद्युम्नो वासुदेवोऽनिरुद्धकः ॥
रामश्चैवाच्युतश्चैव नारसिंहश्च वामनः ।
क्रमेणैतानि सर्वाणि अष्टकुम्भेषु विन्यसेत् ॥
ब्रह्ममण्टपके वेद्यां स्थण्डिलोपरि मध्यमे ।
प्रधानकुम्भं विन्यस्त्वा तन्मध्ये ब्रह्मरूपकम् ॥
ध्यात्वा बीजं न्यसित्वा तु पूजयेत्पुरुषेण तु ।
अभितस्तु घटानष्टौ इन्द्रादिषु क्रमान्न्यसेत् ॥
त्रयीमयं त्रिमूर्तिं च पद्माक्षं पद्मयोनिकम् ।
चतुर्मुखं च धातारं पितामहमजं तथा ।
तत्तन्मन्त्रं क्रमान्न्यस्त्वा ईशानेनैव पूजयेत् ॥
ऋगाद्यध्ययनं कुर्याच्चतुर्दिक्षु क्रमेण तु ।'
(**पूर्वकारणे** ७०.१९–२१ पू०; २३ उ०–४४ पू०)

[17] 'अधिवास्यादिरात्रौ' इत्यनेन पदेन अधिवासार्हादिरात्रौ इत्यर्थो बोध्यते । सा रात्रिः प्रतिष्ठादिवसात्पूर्वदिनरात्रिः ।; 'प्रतिष्ठादिवसस्यादौ रात्रौ' इति उत्तरत्र (६.५. उ०; ८.६. पू०) श्लोकयोर्दृश्यते ।;

[18] ०रात्रौ तु अधि०–अ, इ, ई, उ; ०रात्रेषु अधि०–आ.

[19] ०वनस्तमारभेत्––इ.

[20] वेदिकोपान्ततः––इ.

[21] पुरुषमूर्ति समावाह्य––अ, इ; पुरुषं मूर्तिमावाह्य––आ, ई; पुरुषमूर्ति समावाह्य––उ.

[22] अघोरं मूर्ति०––उ.

पश्चिमे वेदिकायां तु लोकपालसमन्वितम् ॥१२॥
सद्यमूर्ति समावाह्य नवकुम्भेषु विन्यसेत् ।
[२३]उत्तरे वेदिकायां तु धर्माधर्मादिसंयुतम्[२४] ॥१३॥
वाममूर्ति समावाह्य नवकुम्भेषु विन्यसेत् ।
[२५]कुशोदक[२६]समायुक्तान्पञ्चगव्यप्रपूरितान् ॥१४॥
[२७]सरत्नान्कूर्चसंयुक्तान्सवस्त्रान्सापिधानकान्[२८] ।
परितो मूर्तिसंयुक्तान्मूर्तिकुम्भान्समर्चयेत् ॥१५॥
गन्धैः पुष्पैश्च धूपैश्च दीपैरर्घ्यैर्यथाक्रमम् ।
[२९]कुशैर्वस्त्रैः [३०]पटैश्चैव प्रासादं परिवेष्टयेत् ॥१६॥
[३१]तोरणांश्च चतुर्दिक्षु ध्वजांश्च परिकल्पयेत् ।
कृत्वाधिवासनं ह्येवं ततो होमं समाचरेत् ॥१७॥

[[३२]होमः]

[३३]पलाशं बिल्वमश्वत्थं न्यग्रोधं [३४]चाप्युदुम्बरम् ।

---

[२३] 'आ, ई' मातृकयोः १३ श्लोकस्योत्तरार्धं १४ श्लोकस्य पूर्वार्धं च न दृश्यते ।

[२४] अत्र नवमदशमैकादशद्वादशत्रयोदशश्लोकेषु 'नवशक्तिसमन्वितम्' 'विद्येश्वरसमन्वितम्' 'गणेश्वरसमन्वितम्' 'लोकपालसमन्वितम्' 'धर्माधर्मादिसंयुतम्' इत्यादीनि पदानि 'आवाह्य' इति क्रियाया विशेषणतया नेतव्यानि । अन्यथा मूर्तिशब्दविशेषणत्वे स्त्रीलिङ्गत्वेन 'समन्विताम्' इति पाठः स्यात् । विद्येश्वरगणेश्वर-लोकपाल-परिवारपरिगणनं **रौरवागमे** प्रथमभागे ४४ पृष्ठे टिप्पण्यां द्रष्टव्यम् । धर्माधर्मादिपरिवारपरिगणनं तत्रैव ३९तमे पृष्ठे २२-२३ श्लोकयोः कृतमस्ति । नवशक्तयः शैवसमये प्रसिद्धाः—वामा, ज्येष्ठा, रौद्री, काली, कलविकरणी, बलविकरणी, बलप्रमथनी, सर्वभूतदमनी, मनोन्मनी इति ।

[२५] कुम्भोदक०—इ.

[२६] ०समायुक्ता पञ्च०—ई.

[२७] सवस्त्रान्कूर्चसंयुक्तान्सरत्नान्सापि०—ई.

[२८] सपिधानकान्—आ.

[२९] 'प्रासादं तन्तुना वेष्टय दर्भमालाभिरावृतम् ।
स्थूप्याद्युपानपर्यन्तं नववस्त्रेण वेष्टयेत् ॥
दुकूलपट्टदेवाङ्गैः कार्पासैश्च विभूषयेत् ।'
(**पूर्वकारणे** ७०.१७, १८ पू०); क्रमशैर्वस्त्रैः—इ; वस्त्रैः=सामान्यवस्त्रैः । पटैः=विशेषवस्त्रैः ।

[३०] पुटैश्चैव—इ, उ.

[३१] महातोरणांश्चतुर्दिक्षु दिग्बन्धान्परि०—अ; महातोरणश्चतुर्दिक्षु दिग्ध्वजान्परि०—इ; तोरणं च चतुर्दिक्षु ध्वजानि परि०—ई; महातोरणाश्चतुर्दिक्षु दिग्ध्वजान्परि०—उ.

[३२] 'कृत्वा तथाग्निसंस्कारमग्निकार्योक्तमार्गतः ।
प्रधानकुण्डे हर्म्यस्य शिवाङ्गब्रह्मशम्बरैः ॥
पूर्वस्मिन्पूर्वदिग्देवमन्त्रैर्दक्षे तु विन्यसेत् ।
पश्चिमे वरुणस्थैश्च सोमे सोमदिशि स्थितैः ॥
विदिक्षु हृदयाद्यैश्च जुहुयाच्छतसंख्यया ।
पञ्चहोमेऽङ्गहीनैश्च मन्त्रैर्होमं समाचरेत् ॥
समिदाज्यचरू लाजतिलसस्येन्दुवैणवाः ।
उदुम्बरवटाश्वत्थन्यग्रोधा दिक्षु संस्थिताः ॥
शम्यपामार्गखदिरबिल्वाः कोणेषु संस्थिताः ।
प्रधानस्य पलाशः स्यादेवं ज्ञात्वा समाचरेत् ॥
तत्त्वतत्त्वेश्वराद्यैश्च हुत्वा पूर्णां समाचरेत् ।'
(**पूर्वकामिके** ६९.११.उ०-१६);
'देशिको मूर्तिपैः सार्धं होमकर्म समारभेत् ।

मध्यमादि समारभ्य समिधः संप्रकीर्तिताः ।।१८।।
समिद्घृतचरुक्षीरयववेणुप्रियङ्गवः ।
लाजसर्षप[३५]माषाश्च तिला मधुगुळाः स्मृताः ।।१९।।
[३६]उक्तं त्रयोदशद्रव्यं [३७]शतं हुत्वा सदा प्रियम् ।
प्रविश्य पञ्चकुण्डानि पुण्याहं वाचयेत्ततः ।।२०।।
अग्नेरुपसमाधानमाज्यभागान्तमाचरेत् ।
[३८]समिदीशानमन्त्रेण घृतं तत्पुरुषेण तु ।।२१।।
अघोरेण चरुं हुत्वा क्षीरं वामेन होमयेत् ।
[३९]सद्योजातैर्यवं हुत्वा [४०]कवचेनैव वैणवम् ।।२२।।
नेत्रेणैव गुलं हुत्वा [४१]चास्त्रेणैव [४२]प्रियङ्गवम् ।
अस्त्रेणाज्यं [४३]पुनर्हुत्वा [४४]त्वष्टाविंशतिसंख्यया ।।२३।।
[४५]हुत्वाष्टा[४६]विंशदेकैकं प्रासादं संस्पृशेत्ततः ।
[४७]द्रव्यशेषसमायुक्तं घृतेनैव [४८]परिप्लुतम् ।।२४।।
[४९]प्रासादमन्त्रमुच्चार्य [५०]स्रुचा पूर्णाहुतिं ददेत् ।

अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ।।
पलाशखदिराश्वत्थन्यग्रोधं प्लक्ष एव च ।
शमी बिल्वमपामार्गमौदुम्बरं क्रमेण तु ।।
इन्द्रादीनां च कुण्डानां समिधः संप्रकीर्तिताः ।
समिदाज्यचरूँल्लाजान्सर्षपं च यवं तिलान् ।।
आढकं शालिमाषं च निष्पावं च क्रमेण तु ।
तत्तद्ब्रह्मषडङ्गैश्च समिदादीनि होमयेत् ।।
शतमर्धं तदर्धं वा प्रत्येकं जुहुयात्क्रमात् ।
द्रव्यान्ते व्याहृतिं हुत्वा भवनं स्पर्शयेत्क्रमात् ।।
द्रव्यं प्रति च हुत्वा तु तत्तद्दिशासु वर्मणा ।
स्पृष्ट्वाधिष्ठानभागं तु व्याहृतिं जुहुयात्ततः ।।
तेषां स्वनाममात्रेण जुहुयाच्छतसंख्यया ।
एवं जागरणं रात्रौ'

(**पूर्वकारणे** ७०.४५-५१)

[३३] समित्प्रकरणे वृक्षवाचकशब्दाः प्रायेणास्मिंस्तन्त्रे नपुंसकलिङ्ग एव प्रयुज्यन्ते। अस्मिन् विषये **रौरवे** प्रथमभागे ६९ तमपृष्ठे टिप्पणीं पश्यत ।; पालाश्वं—इ.

[३४] चाप्युदुंपरम्—उ.

[३५] ०माषानि तिला—ई.

[३६] उक्तत्रयो०—उ.

[३७] हुत्वा शतं सदा०—अ, इ, उ; होमस्यानन्तरश्लोक एवारभ्यमाणत्वात् 'हुत्वा' इत्यत्र जुहुयाद् इति साधु। परं छन्दोभङ्गो भविष्यति। अथवा 'हुत्वा सदा प्रियम्' लभते इत्यध्याहारेणार्थः साधीयान् ।

[३८] अत्र 'होतव्या' इति पदमध्याहृत्य समिदीशानमन्त्रेण होतव्येति व्याख्येयम्। त्रयोदशद्रव्यैर्होमकरणविषये लाजसर्षपमाषतिलमधूनां पञ्चानां द्रव्याणां मन्त्रप्रतिपादकग्रन्थोऽत्र लुप्तः ।

[३९] सद्योजातैर्यवां—इ.

[४०] कवचेणैव वेणुवम्—उ.

[४१] अस्त्रेणैव—अ, आ, इ, उ.

[४२] प्रियङ्गुशब्दस्य 'प्रियङ्गवम्' इत्यकारान्ते प्रयोगोऽत्र वृत्तार्थ इति भाति। एवं १०.३४ पूर्वार्धेऽपि प्रियङ्गवमिषेत्वेति' इति प्रयोगो दृश्यते ।

[४३] पुनस्कृत्वा—इ.

[४४] अष्टा०—अ, उ.

[४५] हुत्वाष्टविंश०—इ, उ; अत्र 'हुत्वाष्टाविंशमेकैकं' इति पाठो भवितव्य इति भाति। एवं सति 'विंशम्' इत्यस्य पूरणप्रत्ययान्तस्य संख्यामात्रे प्रयोग इति समर्थयितुं शक्यते। एतादृशप्रयोगो १२.२८ उत्तरार्धेऽपि दृश्यते ।

[४६] ०विंशदेकेकं—ई.

[४७] द्रव्यशेषं समा०—इ.

[४८] परिप्पतम्—उ.

[४९] प्रासादं मन्त्र०—अ, आ, ई, उ.

[५०] ऋचा—आ, ई; स्रुचां—इ.

[51]प्रासादाभ्यन्तरे बाह्ये प्रासादोच्चारणेन च ॥२५॥
पर्यग्निकरणं कृत्वा मूर्तिकुम्भान्समर्चयेत् ।

[[52]कुम्भाम्भःसंप्रोक्षणम्]

प्रभाते सुमुहूर्ते तु सुनक्षत्रे शुभे तिथौ ॥२६॥
शक्तिभिः संहितां[53] मूर्ति प्रासादाभ्यन्तरे न्यसेत् ।
मध्यादीशानपर्यन्तं गन्धपुष्पादिभिः सह ॥२७॥
विद्येश्वरावृतां[54] मूर्ति प्रासाद[55]शिखरे न्यसेत् ।
गणेशैरा[56]वृतां ग्रीवे [57]प्रस्तरे लोक[58]पालकैः ॥२८॥
धर्माद्यैरा[59]वृतां मूर्ति [60]पादभागेषु विन्यसेत् ।
प्रासादं प्रोक्षयेत्पश्चात्प्रासादोच्चारणेन च ॥२९॥
अर्चयेद्गन्धपुष्पाद्यैः स्विष्टान्तं होममाचरेत् ।

---

[51] 'विमानाभ्यन्तरे पश्चाद्वास्तुहोमं समाचरेत् ।
पर्यग्निकरणं हर्म्ये कुर्यात्तेनैव वह्निना ॥'
(**पूर्वकारणे** ७०.१६)

[52] 'प्रभाते तु गुरुः स्नात्वा विशुद्धो मूर्तिपैः सह ।
नववस्त्रस्रगुष्णीषः सोत्तरीयः समालकः ॥
पञ्चाङ्गभूषणोपेतो दशनिष्कादिदक्षिणः ।
नववस्त्रादिसंयुक्तमूर्तिपैश्च समन्वितः ॥
प्रासादान्तःस्थितान्देवानिष्ट्वा कुम्भांश्च पावकान् ।
प्रायश्चित्तं च पूर्णां च हुत्वा मूर्तिधरैः सह ॥
कुम्भान्संगृह्य हर्म्यस्य प्रदक्षिणमथाचरेत् ।
प्रासाददक्षिणे देशे स्थण्डिले विन्यसेद्धटान् ॥
प्रासादं पूजयित्वा तु वस्त्वाधारे शिवासनम् ।
मूर्तिविद्यातनुं देहे अष्टत्रिंशत्कलान्वितम् ॥
विन्यस्य सावधानः सन्कुम्भादादाय शम्बरम् ।
न्यसेत्प्रासाददेहे तु वस्त्वाधारे मनोन्मनीम् ॥
तत्तज्जलेन संप्रोक्ष्य ततो दिङ्मूर्तिषु न्यसेत् ।
अर्चयेदथ गन्धाद्यैर्नैवेद्यान्तं पृथक्पृथक् ॥'
(**पूर्वकामिके** ६९.१७–२३);
'प्रभाते स्थापनं कुरु ।
वस्त्रहेमाङ्गुलीयाद्यैर्देशिकं संप्रपूजयेत् ॥
दक्षिणां दापयेत्तेषां त्रिंशन्निष्कं तु चोत्तमम् ।
तदर्धं मध्यमं ज्ञेयं तदर्धं कन्यसं भवेत् ॥
दक्षिणां द्विगुणं दद्याद् गुरवे स्कन्दमण्टपे ।
कलाभुवनवर्णाख्यं मन्त्राख्यं शिखरे न्यसेत् ॥
प्रथमं गुरुणा ध्यात्वा न्यस्त्वाधिष्ठानमेरुके ।
तत्त्वाख्यं पाद अग्रे तु पदाख्यं प्रस्तरे न्यसेत् ॥
गलवर्गे तु वर्णाख्यं मन्त्राख्यं शिखरे न्यसेत् ।
स्थूपिवर्गे कलाध्वानं विन्यसेद्विधिपूर्वकम् ॥
देहं विमानमित्युक्तं देही लिङ्गमिति स्मृतम् ।
सुमुहूर्ते सुलग्ने तु मन्त्रन्यासं समारभेत् ॥
ध्यात्वा सदाशिवं कुम्भं मन्त्रं स्थूप्यग्रके न्यसेत् ।
वर्धन्या बीजमादाय तद्घटेशानं पूजयेत् ॥
तत्तद्दिक्ष्वीशदेवानां तत्तत्कुम्भाभिषेचनम् ।
गन्धपुष्पादिभिश्चैव ईशानेन च पूजयेत् ॥
नैवेद्यं दापयित्वा तु ताम्बूलं दापयेत्ततः ।
उत्सवं कारयेत्पश्चात्पूर्वोक्तविधिना सह ॥'
(**पूर्वकारणे** ७०.५१.उ०–६०.पू०)

[53] सहितं—अ, आ, इ, उ.

[54] ०वृतं—अ, आ, इ, उ.

[55] ०शिखरोन्न्यसेत्—उ.

[56] ०वृतग्रीवे—अ, इ, उ; ०वृतं ग्रीवे—आ, ई.

[57] विस्तारे—अ, आ, इ, ई, उ; प्रासादषड्वर्गेषु मध्ये शिखरग्रीवयोः प्रोक्तत्वात् पादवर्गस्य चानुपदमेव वक्ष्यमाणत्वाच्चात्र प्रस्तरवर्ग एव भवितव्यः। अतोऽत्र 'प्रस्तरे' इति पाठः शोधितः।

[58] ०पालकम्—आ, ई.

[59] ०वृतं—अ, आ, इ, उ.

[60] पाटागेषु—उ.

आचार्यं [६१]पूजयेत्तत्र ब्राह्मणानपि भोजयेत् ॥३०॥

[६२]इति [६३]श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे प्रासाद[६४]प्रतिष्ठाविधिर्नाम

पञ्चमः पटलः ॥

---

[६१] पूजयेत्पश्चाद् ब्राह्मणानपि—ई.

[६२] इति श्रीरौरवोत्तरे—अ; इति रौरवोत्तरे—इ.

[६३] 'श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे' इति 'आ, ई' मातृकयोर्न दृश्यते।

[६४] ०प्रतिष्ठाविधिः पञ्चमः पटलः—अ, इ; ०प्रतिष्ठाविधिपञ्चमपटलः—उ.

[1] षष्ठः पटलः

चतुर्मूर्तिप्रतिष्ठाविधिः

चतुर्मूर्तिप्रतिष्ठां [2] च प्रवक्ष्यामि [3] रुरो शृणु [4]।

[मण्डपः, तत्र वेदिकाकुण्डकल्पनं च]

प्रासादस्य चतुर्दिक्षु मण्डपं चतुरश्रकम् ॥१॥
[5] मूर्तेरभिमुखं कुर्याच्चतुर्द्वारसमन्वितम् ।
मध्यमे वेदिकां कुर्याद्दर्पणोदर [6] संनिभाम् ॥२॥
वेदिका [7] बाह्यतो [8] मूर्तेरग्रे कुण्डं प्रकल्पयेत् ।
[9] चतुरश्रं धनुर्वृत्तं त्रिकोणं च यथाक्रमम् ॥३॥
[10] त्रिमेखलासमायुक्तं नाभियोनिसमन्वितम् ।

[मण्डपालंकारः]

प्रोक्षयेत्पञ्चगव्येन [11] गोमयेनानुलेपयेत् ॥४॥
ध्वजतोरणसंयुक्तं दर्भमालाभिरावृतम् ।

[अधिवासः]

प्रतिष्ठादिवसस्यादौ रात्रौ [12] तत्राधिवासयेत् ॥५॥

---

[1] षष्ठसप्तमपटलद्वयमात्रं आर्. इ. २५१९३ इत्यङ्कितेऽस्मद्ग्रन्थालयस्थे तालपत्रकोशे १८० तमे पृष्ठे दृश्यते। तदीयपाठभेदाः 'ऊ' इति निर्दिश्य लिख्यन्ते। अस्यां मातृकायामादौ 'रौरवे शिवालयनिर्माणस्थापनदीपिकाग्रन्थे चतुर्मूर्तिस्थापनम्। अथ चतुर्मूर्तिस्थापनविधिरुच्यते। यद्वा रौरवोक्तप्रकारेण चतुर्मूर्तिप्रतिष्ठां कुर्यात्।' इति दृश्यते।

[2] तु—ऊ.

[3] रुरूत्तम—अ; रुरोत्तमम्—इ; रुरोत्तमः—उ; रुरो तवाम्—ऊ.

[4] प्रथमश्लोकस्य पूर्वार्धानन्तरम् 'ऊ' मातृकायाम्—
'इन्द्रमूर्तिस्तु पूर्वे स्याद् दक्षिणामूर्ति दक्षिणे।
पश्चिमे विष्णुमूर्तिश्च ब्रह्ममूर्तिं तु चोत्तरे॥
कल्पयेत्तु चतुर्मूर्ति प्रासासक्तवर्धतः।'
इति सार्धश्लोकोऽधिकतया दृश्यते। एतत्समानार्थकः सार्धश्लोको द्वितीयपटलस्थ ३ उ०, ४ श्लोकतया दृश्यते। अतोऽत्र मूले पाठतया न संघटितः।

[5] मूर्तेरभिमुखीकुर्या०—अ, इ; उत्तराभिमुखं कुर्यां०—उ; मूर्तयेरभिमुखीकुर्या०—ऊ.

[6] संनिभम्—अ आ, इ, ई, उ.

[7] बाह्यते—ऊ.

[8] मूर्तिमग्रे—अ; मूर्तेरग्रकुण्डं—आ, ई; मूर्तिरग्रे—इ, ऊ; मूर्तिरग्रकुण्डं—उ.

[9] चतुरश्राद्धनुवृत्तं पत्मकोणं यथा०—ऊ.

[10] त्रिमेखलसमा०—इ, उ, ऊ.

[11] गोमयेन तु लेप०—अ; गोमयेनोपलेप०—ऊ.

[12] तस्याधि०—उ.

षष्ठः पटलः

स्थण्डिलं कल्पयेत्तत्र वेदिकोपरि शालिभिः।
स्थापयेत्कुम्भमेकैकं[13] वेदिकामध्यमे क्रमात् ॥६॥
[14]ससूत्रं वस्त्रसंयुक्तं [15]सकूर्चं सापिधानकम्।
[16]सरत्नं हेमसहितं कुशवारि[17]सुपूरितम् ॥७॥
[18]आवाहयेत्कुम्भमूर्तिं त्विन्द्र[19]मूर्तिं सनातनम्।
[20]प्राग्भवे दक्षिणे कुम्भे दक्षिणामूर्तिमव्ययम् ॥८॥
पश्चिमे विष्णु[21]मूर्तिं च ब्रह्ममूर्तिं तथोत्तरे।
[22]स्वैः स्वैर्नामादिभि[23]र्मन्त्रैरावाह्य [24]क्रमशोऽर्चयेत् ॥९॥
[25]स्वस्वनामादि[26]पञ्चाङ्गैः [27]षडङ्गैर्मूर्ति[28] विन्यसेत्।
[29]कुशैश्च नववस्त्रैश्च वेष्टयेत्प्रतिमां पुनः ॥१०॥
पुण्याहं वाचयेत्तत्र होमकर्म समारभेत्।

[होमः]

[30]खादिरं बिल्वमश्वत्थं [31]पालाशं क्रमशः [32]समित् ॥११॥
[33]समिद्घृत[34]चरुक्षीरयववेणु[35]प्रियङ्गवः।

---

[13] कुम्भतोयैश्च--ऊ.

[14] इदमर्धं 'इ' मातृकायां न दृश्यते।; सकूर्चं वस्त्र०--आ, ई; ससूत्रान्वस्त्रसंयुक्तां--ऊ.

[15] सदर्भं सपिधानकम्--आ, ई.

[16] सरत्नहेमसंयुक्तं कुशवारसुपूजितम्--ऊ.

[17] ०सुपूजितम्--अ, आ, इ, ई.

[18] आवाह्य प्रावृते कुम्भे त्विन्द्र०--अ, आ, ई, उ, ऊ.

[19] ०मूर्ति स्वनातनम्--ऊ.

[20] प्राक्भागे--आ; प्राक्भवेद्--इ; प्राग्भागे --ई; प्राक्भवे--उ, ऊ.

[21] ०मूर्तिश्च--ऊ.

[22] स्वस्वैर्नामा०--अ, इ, ई, उ, ऊ.

[23] ०मूर्तेरतिवाह्य--इ.

[24] क्रमशो न्यसेत्--ऊ.

[25] स्वैः स्वैर्नामादिभिः गं षं सं गं मूर्ति--अ; स्वस्वर्नामादि०--उ.

[26] ०पञ्चाङ्गं--आ, इ, ई, उ, ऊ; पञ्चाङ्ग-षडङ्गविवरणम् ९.२२; ११.२२ श्लोकयोर्दृश्यते।

[27] षडङ्गं मूर्ति--आ, इ, ई, ऊ; षडम्मूर्ति च --उ.

[28] 'मूर्ति' इत्यत्र 'मूर्तिं' इति भवितव्यम्। वृत्तानुगुण्येन 'मूर्ति' इति क्लीबे प्रयोग इति भाति।

[29] कुशैर्दर्भैश्च वस्त्रैश्च--अ, इ, उ; कुशैर्वस्त्रैश्च दर्भैश्च--आ, ई, ऊ; अत्र पाठे कुशदर्भयोः पर्यायत्वात्पुनरुक्तिर्भवति। पटलान्तरेष्वधिवासविषये 'कुशैर्वस्त्रैश्च वेष्टयेत्' (७.९.पू०); 'कुशादिनववस्त्रैश्च' (८.१४.उ०); 'कुशैर्वस्त्रैः समाच्छाद्य' (१०.२५.उ०) इति दृश्यते। तद्वदत्रापि पाठः साधितः।

[30] समित्प्रकरणे वृक्षवाचकशब्दानां क्लीबे प्रयोगः।; एतद्विषये ५.१८पू० टिप्पणीं पश्यत।; खदिरं--अ; खतिरं--इ.

[31] पलाशं--इ, उ, ऊ.

[32] सकृत्--इ.

[33] समित्धृत--अ; समित्भूत--उ.

[34] ०मधुक्षीर०--ई.

[35] ०प्रियङ्गवा--ऊ.

लाजसर्षप[36]माषाश्च [37]तिला [38]द्रव्याः प्रकीर्तिताः ॥१२॥
अग्नेरुप[39]समाधानमाज्यभागान्तमाचरेत् ।
[40]पञ्चाङ्गैश्च षडङ्गैश्च [41]समिदादीन्क्रमाद्धुनेत्[42] ॥१३॥
अष्टाविंशति[43]मेकैकं हुत्वा मूर्ति [44]स्पृशेत्ततः ।
द्रव्यशेषसमायुक्तं [45]स्रुचा [46]पूर्णाहुतिं हुनेत् ॥१४॥

[कुम्भाम्भःसंप्रोक्षणम्]

[47]प्रतिमाबद्धवस्त्राणि [48]कुशांश्च परिवर्जयेत् ।
प्रभाते सुमुहूर्ते तु सुनक्षत्रे शुभे तिथौ[49] ॥१५॥
[50]कुम्भस्थिताश्चतुर्मूर्तीः प्रतिमासु न्यसेत्क्रमात् ।
[51]स्वमन्त्रैः प्रोक्षयेन्मूर्ति तत्तन्नामानि विन्यसेत् ॥१६॥
अर्चयेद्गन्धपुष्पाद्यैः [52]स्वस्वमन्त्रैः पृथक् पृथक् ।

[मूर्त्यग्रेऽर्चनापीठकल्पनम्, तत्र कुम्भाम्भःसंप्रोक्षणम्]

[53]मूर्तेरग्रेऽर्चनापीठं [54]तत्त्रिमेखलया युतम् ॥१७॥
[55]इष्टकाभिः शिलाभिर्वा [56]बलवत्कल्पयेत्सुधीः[57] ।

---

[36] ०माषांश्च—ऊ.

[37] तिलं—आ, ई; तिलद्रव्या प्र०—ऊ.

[38] द्रव्यशब्दस्यात्र तन्त्रे पुंसि प्रयोगः।; रौरवेऽपि क्रियापादे 'द्रव्यास्त्वेकादश स्मृताः' (१८.८१.उ०) इति प्रयोगो दृश्यते। रौरवे प्रथमभागे ६९ पृष्ठे टिप्पणीं पश्यत।

[39] ०समाधानामाज्य०—उ; ०समाधानादाज्य० —ऊ.

[40] पञ्चाङ्गषडङ्गविवरणम् ९.२२; ११.२२.

[41] सदिदादीन्—अ; समिदादिः—उ; समिधादीन्—ऊ.

[42] क्रमाशुनेत्—उ.

[43] ०रेकैकं—अ, आ, इ, उ, ऊ; ०रेकेकं—ई.

[44] स्पृशेद् ततः—अ; हुनेत्तदा—इ; स्पृशेत्तथा —ऊ.

[45] सृचा—आ; ऋचा—'आ' पाठान्तरम्।

[46] पूर्णां हुनेत्क्रमा—ऊ.

[47] प्रतिमां बद्धवस्त्राणि—इ; प्रतिमाबन्धवस्त्राणि —उ; प्रतिमा बन्धयेद्वस्त्रं—ऊ.

[48] कुशान्दर्भान्परिस्तरेत्—अ, आ, ई, ऊ; कुशदर्भान्परिस्तरेत्—इ; कुशा दर्भान्परिस्तरेत् —उ; प्रकृतविषये ७.२३. पू०, ८.२२. पू० उभयत्रापि 'कुशांश्च परिवर्जयेत्' इत्येव पाठस्य विद्यमानत्वादत्रापि स एव पाठः साधितः।

[49] १५ तमश्लोकानन्तरम् 'ऊ' मातृकायाम् 'प्रतिमां बन्धवस्त्राणि कुशदर्भान्परित्यजेत्' इत्यर्धमेकमधिकतया दृश्यते।

[50] कुम्भस्थितांश्चतुमूर्तीन्प्रतिष्ठासु—अ; कुम्भस्थितं चतुर्मूर्तिं प्रतिष्ठा (मा) सु—आ; कुम्भस्थिता चतुर्मूर्तिं प्रतिष्ठासु—इ; कुम्भान्वितं चतुर्मूर्तिं प्रतिष्ठासु—ई; कुम्भस्थिता चतुर्मूर्तिं प्रतिष्ठासी—उ; कुम्भस्थिताञ्चतुर्मूर्तिप्रतिष्ठासु—ऊ.

[51] सुमन्त्रै प्रोक्षये मूर्तिं पुनरङ्गानि—ऊ.

[52] स्वैः स्वैर्मन्त्रैः—आ, ई; स्वस्वै मन्त्रैः—ऊ.

[53] मूर्तिरग्नेऽर्चनापीठं—अ; मूर्तिरग्रेर्च्चनापीठं —उ; मूर्तेरग्रे च न वा पीठे—ऊ.

[54] तत्तिमेखलया—उ; त्रिद्विमेखलसमायुतम्—ऊ.

[55] इष्टिकाभिः—आ, ई; इष्टकैर्वा—इ; इष्टिकैर्वा—उ, ऊ.

[56] बलबलवत्कल्पयेत्—उ; बन्धयेत्कल्पयेत्—ऊ.

[57] सुधौ—अ, इ; सुधा—उ, ऊ.

प्रोक्षयेन्मूर्तिभिर्मन्त्रैर्गन्धाद्यैरर्चयेत्क्रमात् ॥१८॥
नित्यपूजां ततः कुर्यात्स्विष्टान्तं होममाचरेत् ।
आचार्यं [58]पूजयेत्तत्र वस्त्रैराभरणैरपि ॥१९॥

[59]इति [60]श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे चतुर्मूर्ति[61]प्रतिष्ठाविधिर्नाम
षष्ठः पटलः ॥

[58] पूजयेत्पश्चा वस्त्रै—ऊ.

[59] इति श्रीरौरवोत्तरे—अ; इति रौरवोत्तरे—इ.

[60] 'श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे' इति 'आ, ई' मातृकयोर्न दृश्यते ।

[61] ०प्रतिष्ठाविधिपटलः षष्ठः—अ; ०प्रतिष्ठाविधिपटलः षष्ठमः—इ; ०प्रतिष्ठाविधिषष्ठमपटलः—उ; 'ऊ' मातृकायाम् पटलान्ते 'इति शिवालयनिर्माणस्थापनदीपिकायां चतुर्मूर्तिस्थापनदीपिकायां चतुर्मूर्तिप्रतिष्ठाविधिपटलः' इति दृश्यते ।

सप्तमः पटलः

[1]अष्टमूर्तिप्रतिष्ठाविधिः

[2]प्रतिष्ठामष्टमूर्तीनां वक्ष्यामि [3]शृणु ते [4]रुरो[5]।

[मण्डपः, तत्र वेदिकाकुण्डकल्पनं च]

[6]प्रासादपूर्वदिग्भागे [7]वह्नौ याम्ये च [8]नैर्ऋते ॥१॥
[9]वारुणे वायुदिग्भागे सौम्ये [10]शूलधरे [11]दिशि।
मण्डपं कल्पयेत्तत्र मध्ये कुर्यात्तु [12]वेदिकाम् ॥२॥
वेदिकापुरतो बाह्ये होमकुण्डं प्रकल्पयेत्।
[13]पूर्वदिग्वेदिकापूर्वे चतुरश्रं प्रकल्पयेत् ॥३॥
वह्निदिग्वेदिकावह्नौ[14] कुण्डमश्वत्थपत्रवत्।
[15]याम्यदिग्वेदिकायाम्ये [16]कल्पयेदर्धचन्द्रवत्[17] ॥४॥
[18]निर्ऋतेर्नैर्ऋते भागे कुर्यात्कुण्डं त्रिकोणकम्।
[19]वरुणस्य च वारुण्यां वृत्तकुण्डं प्रकल्पयेत् ॥५॥

---

[1] 'ऊ' मातृकायां पटलादौ 'अष्टमूर्तिस्थापनम्। अथाष्टमूर्तिस्थापनविधिरुच्यते। तदुक्तं रौरवोत्तरे' इति दृश्यते।

[2] प्रतिष्ठाष्टमूर्तीनां—इ; प्रतिष्ठा त्वष्टमूर्तीनां—ऊ.

[3] श्रुणुतो—उ.

[4] रुरौ—इ, ऊ.

[5] प्रथमश्लोकस्य पूर्वार्धानन्तरम् 'ऊ' मातृकायाम्—'कुमारादि वसिष्ठान्तं पूर्वाद्यष्टासु दिक्षु वै।
कुमारं पूर्वदिग्भागे आग्नेय्यां काश्यपं तथा ॥
दक्षिणे दक्षिणामूर्तमगस्त्यं नैर्ऋते तथा ॥
पश्चिमे नारसिंहं तु वायव्यां नारदं तथा ॥
उत्तरे ब्रह्ममूर्तिस्तु वसिष्ठं पूर्वके दिशि।'
इति सार्धद्विकश्लोकोऽधिकतया दृश्यते। एतत्समानार्थकाः श्लोकास्तृतीयपटले (२–४ पू०) श्लोकतया दृश्यन्त इति नात्र मूले संघटिताः।

[6] प्रासादं पूर्व०—उ.

[7] सौम्ये शूलधरे दिशि—आ, ई; आग्ने याम्ये—ऊ.

[8] नैर्ऋतौ—उ.

[9] वह्नौ याम्ये च नैर्ऋत्यां वारुणे वायुदेशके—आ, ई.

[10] शूलधने—अ; शूले धरे—उ.

[11] दिक्शब्दस्य पुंसि प्रयोगः।; ३.४ पू० टिप्पणी द्रष्टव्या।

[12] वेदिकम्—उ.

[13] पूर्वदिक्वेदिका०—अ, इ; पूर्वादिवेदिका०—ई; पूर्वादिवेदिकां पूर्वे—ऊ.

[14] ०वेदिकां वह्नौ—ऊ.

[15] याम्यदिक्वेदिका०—इ; याम्यादिवेदिका०—ई; याम्ये दिक् वेदिकां बाह्ये—ऊ.

[16] कल्पयेत्वर्ध—अ; कल्पयेद्वार्ध—इ, उ.

[17] ०चन्द्रवित्—इ; ०चन्द्रकम्—ऊ.

[18] नैर्ऋतेर्नैर्ऋते—अ; नृत्ते नेरुते—इ; निर्ऋतौ निर्ऋते—ई; निरुते नैरुते—उ; नैर्ऋते नेश्चते—ऊ.

[19] वारुणस्य—ऊ.

[20]वायोर्वायौ षडश्रं तु पद्मं [21]सौम्यस्य सौम्यके ।
[22]ईशानस्य च दिग्भागे [23]ह्यष्टकोणं प्रकल्पयेत् ॥६॥
[24]त्रिमेखलासमायुक्तं नाभियोनिसमन्वितम् ।

[मण्डपालंकारः]

[25]वेदिकाश्चाष्टकुण्डानि गोमयेनानुलेपयेत् ॥७॥
द्वारतोरणसंयुक्तं दर्भमालाभिरावृतम् ।

[अधिवासः]

प्रतिष्ठा[26]दिवसस्यादौ रात्रौ [27]चैवाधिवासयेत् ॥८॥
[28]प्रासादस्य गले मूर्तीः [29]कुशैर्वस्त्रैश्च वेष्टयेत् ।
स्थण्डिलं कल्पयेत्तत्र वेदिकोपरि शालिभिः ॥९॥
[30]ससूत्रान् [31]सोदकान् [32]रत्नवस्त्रकूर्चसमन्वितान्[33] ।
[34]अष्टकुम्भान्यसे[35]दष्टवेदिकास्वष्टमूर्तिकान् ॥१०॥
अर्चयेद्गन्धपुष्पाद्यै[36]रष्टमूर्तीः [37]समावहेत् ।
[38]पूर्वदिग्वेदिकायां तु कुम्भे स्कन्दं [39]समावहेत् ॥११॥
वह्निदिग्वेदिकायां तु कुम्भे [40]काश्यपमावहेत् ।
[41]दक्षिणे वेदिकाकुम्भे दक्षिणामूर्तिमावहेत्[42] ॥१२॥
[43]नैर्ऋते वेदिकायां तु कुम्भेऽगस्त्यं समावहेत् ।

---

[20] वायोर्वायें—उ; वायोवायो—ऊ.

[21] पद्मस्य—आ, ई.

[22] ईशानस्यैकदिक्भागे—ऊ.

[23] अष्टकोणं—अ, इ, उ; त्वष्टकोणं—ऊ.

[24] त्रिमेखलसमा०—अ, इ, उ, ऊ.

[25] वेदिका चाष्ट०— ऊ

[26] ०दिवसादौ रात्रौ न चेवाधि०—इ.

[27] तामधि०—आ, ई.

[28] प्रासादस्यागळो मूर्ति—अ; प्रासादस्य गळमूर्ति—आ, ई; प्रासादस्यागळो मूर्तिः—इ; प्रासादस्य गळो मूर्ति—उ; प्रासादस्य गळैर्मूर्ति—ऊ; अत्र 'स्थिताः' इति पदमध्याहृत्य 'प्रासादस्य गले स्थिता मूर्तीः कुशैर्वस्त्रैश्च वेष्टयेत्' इति व्याख्येयम् ।

[29] कुशैर्वास्त्रैश्च—इ.

[30] स सूत्रार्थ . . . दकान्रक्तान्वस्त्र०—इ; ससूत्रं असोदकनृत्तान्वस्त्र०—उ.

[31] सोदको रक्तान्—ऊ.

[32] रत्नान्वस्त्र०—अ.

[33] ०समन्वितम्—ऊ.

[34] अष्टमूर्ति न्यसेदष्टवेदकास्त्वष्ट मूर्तिका—ऊ.

[35] ०दष्टौ वेदिकास्त्विष्टमूर्तिकान्—अ; ०दष्टौ वेदिका०—इ; ०दष्टो वेदिका०—उ.

[36] ०रष्टमूर्ति—अ, आ, इ, उ, ऊ.

[37] सावहेत्—ऊ.

[38] 'ऊ' मातृकायामिदमर्धं न दृश्यते । ; पूर्वादिवेदिकायां—उ.

[39] समर्चयेत्—इ.

[40] . . . समावहेत्—अ; काश्यपमावहन्—आ.

[41] 'ऊ' मातृकायां १२ श्लोकोत्तरार्धप्रभृति १४ श्लोकपूर्वार्धान्तं न दृश्यते ।

[42] ०मावहन्—आ.

[43] 'उ' मातृकायामिदमर्धं न दृश्यते ।

वारुणे वेदिकाकुम्भे [44]नारसिंहं समावहेत् ॥१३॥
वायुदिग्वेदिकायां तु कुम्भे नारदमावहेत् ।
[45]सौम्यदिग्वेदिकायां तु कुम्भे [46]ब्रह्माणमावहेत् ॥१४॥
[47]ऐशानवेदिकाकुम्भे [48]वसिष्ठमावहेत्क्रमात् ।
प्रणवं [49]प्रोच्य वै पूर्वं मूर्ति[50]नाम ततः परम् ॥१५॥
[51]द्वितीयान्तं [52]ततः पश्चात् [53]क्रमेणैव समावहेत् ।
अर्चयेद्गन्धपुष्पाद्यै[54]र्मूर्तिमन्त्रेण मन्त्रवित् ॥१६॥
[55]प्रणवाद्यर्च्यमानानां [56]चतुर्थ्यन्तं नमोऽन्तकम् ।
[57]मूर्तीनामुक्तमन्त्रेण [58]ह्येतेनैव समर्चयेत् ॥१७॥
स्वस्व[59]नामादि[60]पञ्चाङ्गैः [61]षडङ्गैर्मूर्ति विन्यसेत् ।
[62]विदिक्षु [63]वृषभान्पूज्य [64]वृषकुम्भान्वृषाणुभिः ॥१८॥
कृत्वाधिवासनं ह्येवं ततो होमं [65]समाचरेत् ।

[होमः]

[66]शमीन्यग्रोधबिल्वं च प्लक्षाश्वत्थमुदुम्बरम् ॥१९॥
[67]पलाशं खादिरं चाष्टौ [68]पूर्वादिसमिदाहृताः ।

---

[44] 'उ' मातृकायां १३ श्लोकस्य चतुर्थपादप्रभृति १५ श्लोकस्य प्रथमपादान्तं न दृश्यते ।

[45] सौम्ये दिग्वेदिकायां—ऊ.

[46] ब्राह्मणमा०—इ.

[47] 'ऊ' मातृकायां १५ श्लोकः १६ श्लोकपूर्वार्धं च न दृश्येते।; ऐशाने वेदिका०—अ; ईशानवेदिका०—आ, ई; ईशाने वेदिका०—इ.

[48] वसिष्टां च समावहेत्—उ.

[49] प्रोच्यमापूर्वं—अ, इ; प्रोच्यमापूर्व०—उ.

[50] ०नाममतः परम्—अ, इ, उ.

[51] द्वितीया . . . क्रमेणैव—अ; द्वितीयावाहयामीति क्रमेणैव—इ; द्वितीयावहयातीति क्रमेणैव०—उ.

[52] चैव पश्चात्—ई.

[53] क्रमेणैवमावहेत्—उ.

[54] ०मूर्ति मन्त्रेण—आ, ई.

[55] प्रणवाद्यर्चनानां च—अ, आ, इ; प्रणवाद्यर्चनान्तं च—ई; प्रणवभ्यर्चनानां च—उ; प्रणवाद्यर्चने नाम—ऊ.

[56] चतुर्थं तन्नमो०—इ.

[57] मूर्तीनां मूर्तिमन्त्रेण—ऊ.

[58] एतेनैव—अ, इ, उ; यत्नेनैव—ऊ.

[59] ०नामानि प . . . षडङ्गं—अ; ०नामाग्निपञ्चाङ्गं—आ, इ, उ; ०नामानि पञ्चाङ्गं—ई.

[60] ०पञ्चाङ्गं—ऊ; पञ्चाङ्गषडङ्गविवरणम् ९.२२; ११.२२ श्लोकयोर्दृश्यते

[61] षडङ्गं मूर्ति—अ, आ, इ, ई, उ; षडङ्गमूर्ति—ऊ; 'मूर्ति' इत्यत्र 'मूर्तिं' इति भवितव्यम् । वृत्तार्थमत्र क्लीबे प्रयोग इति भाति । अत्रैतद्विषये ६.१० पू० टिप्पणी द्रष्टव्या ।

[62] 'ऊ' मातृकायामिदमर्धं न दृश्यते ।

[63] वृषभं पूज्य—आ, ई.

[64] वृषभान्वृषभाणुभिः—आ, ई.

[65] समारभेत्—ऊ.

[66] समित्प्रकरणे वृक्षवाचकशब्दानां क्लीबे प्रयोगः; अस्मिन् विषये ५.१८ पूर्वार्धटिप्पणी द्रष्टव्या ।; शमिन्यग्रोधबल्पं च पुष्पाश्वत्थमुदुम्बरम्—उ.

[67] पलाशं . . . चाष्टौ—अ; पलाशखदिरं चाष्टौ—इ; पलाशखादिरं चाष्टौ—उ; पलाशघदिरश्चाष्ट—ऊ.

[68] पूर्वादिसमिधो हृदा—आ, ई; पूर्वाधिसमिदा हृदा—इ; पूर्वादिसमिदा हृदा—उ; पूर्वादौ समिधा हृदा—ऊ; समिदिति आहृताः समिदाहृताः । धातूनामनेकार्थत्वाद् 'आहृताः' इत्यस्यात्र 'उदाहृताः' इत्यर्थो बोध्यः ।

समिदाज्यचरु[६९]क्षीरयववेणुप्रियङ्गवः[७०] ॥२०॥
लाजसर्षप[७१]माषाश्च [७२]तिला [७३]द्रव्याः प्रकीर्तिताः[७४] ।
[७५]पञ्चाङ्गैश्च षडङ्गैश्च समिदादि [७६]क्रमाद्धुनेत् ॥२१॥
अष्टा[७७]विंशतिमेकैकं हुत्वा मूर्ति स्पृशेत्पुनः ।
[७८]द्रव्यशेषसमायुक्तं [७९]मूर्त्या पूर्णाहुतिं हुनेत् ॥२२॥

[कुम्भाम्भःसंप्रोक्षणम्]

[८०]प्रतिमा[८१]बद्धवस्त्राणि [८२]कुशांश्च परिवर्जयेत् ।
प्रोक्षयेत्पञ्चगव्येन मूर्तिमन्त्रैश्च मन्त्रवित् ॥२३॥
कुम्भेषु [८३]संस्थिता मूर्तीः [८४]प्रतिमास्वेव विन्यसेत् ।
मूर्तिमन्त्रं समुच्चार्य मूर्त्यावाहनमुद्रया ॥२४॥
स्वमूर्तिमन्त्रैः [८५]पञ्चाङ्गैः [८६]षडङ्गैर्मूर्ति विन्यसेत् ।
[८७]कुम्भशेषोदकेनैव प्रोक्षयेत्प्रतिमासु च ॥२५॥

---

[६९] ०क्षीरं यवा वेणु प्रियंगवा––ऊ.

[७०] ०प्रियङ्गवत्––उ.

[७१] ०माषश्च––उ.

[७२] तिलं––आ, ई.

[७३] द्रवं प्रकीर्तितः––उ; द्रव्यशब्दस्य पुंसि प्रयोगः।; अत्रैतद्विषये ६.१२ उ० टिप्पणी द्रष्टव्या ।

[७४] 'ऊ' मातृकायां २१ तमश्लोकपूर्वार्धानन्तरम्–– 'ऋषीणां च प्रतिष्ठा च उत्तरे तु प्रकाशितम् । इति शिवालयनिर्माणस्थापनदीपिकायामष्ट-मूर्तिस्थापनविधिपटलः ।' इति दृश्यते ।

[७५] 'ऊ' मातृकायां २१तमश्लोकोत्तरार्धप्रभृति पटलपुष्पिकान्तो भागो न दृश्यते ।; पञ्चाङ्ग-षडङ्गविवरणम् ९.२२; ११.२२ श्लोकयो-र्दृश्यते ।; पञ्चाङ्गैश्च समिदाज्ये पञ्चम-न्त्रादि क्रमाद्––उ.

[७६] क्रमेण तु––आ, ई.

[७७] ०विंशतिरेकैकं––अ, आ, इ, उ; ०विंशतिरे-केकं––ई.

[७८] द्रव्यशेषं युक्तममूर्त्या पूर्णाहुतिं हुनेत्क्रमात्–– उ.

[७९] मूर्त्याः––अ; कर्ता––आ, ई; पूर्णाहुति-विषये ८.२१ पूर्वार्धे 'स्वमूर्तिमन्त्रमुच्चार्य स्रुचा पूर्णाहुतिं ददेत्' इति दर्शनादत्र 'मूर्त्या' इति पदं 'मूर्तिमन्त्रेण' इत्यर्थे स्त्रीलिङ्गे प्रयुक्तमिव भाति । वस्तुतस्तु प्रतिष्ठाविधिषु मुखलिङ्गरत्नलिङ्गप्रतिष्ठाविधी विनान्येषु ५,६,८,९,१०,११ १२,१३,१६ पटलेषु 'स्रुचा पूर्णाहुतिं' इति दर्शनादत्रापि 'स्रुचा' इति पाठश्चेत्साधु भवेत् ।

[८०] प्रतिमां बन्धवस्त्राणि––उ.

[८१] ०बन्धवस्त्राणि––अ.

[८२] कुशानि परि०––आ.

[८३] संस्थितां मूर्ति––अ, आ, इ; संस्थितान्मूर्ति ––ई; संस्थितं मूर्ति––उ.

[८४] प्रतिमास्वैव––अ, इ.

[८५] पञ्चाङ्गषडङ्गविवरणं ९.२२; ११.२२ श्लोक-योर्दृश्यते ।

[८६] षडङ्गै मूर्ति––अ, ई; 'मूर्ति' इत्यत्र 'मूर्तिं' इति भवितव्यम् । अत्र विषये ६.१० पूर्वार्धटि-प्पणीं पश्यत ।

[८७] कुम्भे शेषोदकेनैव––अ, उ.

[मूर्त्यग्रेऽर्चनापीठकल्पनम्; तत्र कुम्भाम्भःसंप्रोक्षणं च]

कल्पयेदर्चना[88]पीठं मूर्तीनामग्रतः स्थले।
[89]इष्टकाभिः शिलाभिर्वा [90]त्रिमेखलासमायुतम् ॥२६॥
[91]कुम्भशेषोदकैश्चापि [92]पीठान्संप्रोक्षयेत्पुनः।
गन्धादिभिः समभ्यर्च्य पुण्याहं [93]वाचयेत्ततः ॥२७॥
आचार्यं पूजयेत्तत्र स्विष्टान्तं होममाचरेत्।
होमकान्पूजकांस्तत्र[94] भक्तांश्च परिचारकान् ॥
ब्राह्मणान्भोजयेत्तत्र यथाविभवविस्तरैः ॥२८॥

[95]इति [96]श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे अष्टमूर्ति[97]प्रतिष्ठाविधिर्नाम सप्तमः पटलः ॥

---

[88] ०पीठे—उ.

[89] इष्टिकाभिः—इ, उ.

[90] त्रिमेखलसमा०—अ, आ, इ, उ.

[91] 'अ' मातृकायां २७ पूर्वार्धस्य स्थाने —'कुम्भशेषोदकेनैव प्रोक्षयेत्प्रतिमासु च। कल्पयेदर्चनापीठं पीठान्संप्रोक्षयेत्पुनः ॥' इति दृश्यते।

[92] पीठशब्दस्यात्र पुंसि प्रयोगः।; अत्र विषये **रौरवे** प्रथमभागे ६९ पृष्ठे टिप्पणी द्रष्टव्या।

[93] तत्र कारयेत्—अ, आ, इ, उ.

[94] पूजयेत्तत्र—ई.

[95] इति श्रीरौरवोत्तरे—अ; इति रौरवोत्तरे—इ.

[96] 'आ, ई' मातृकयोः 'श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे' इति न दृश्यते।

[97] ०प्रतिष्ठाविधिसप्तमः—अ, इ; ०प्रतिष्ठा नाम सप्तमः—आ; ०प्रतिष्ठाविधिसप्तमपटलः—उ.

अष्टमः पटलः

पञ्चमूर्तिप्रतिष्ठाविधिः

प्रतिष्ठां पञ्चमूर्तीनां वक्ष्यामि [1]शृणु ते रुरो ।

[मण्डपः, तत्र वेदिकायाः कुण्डस्य च कल्पनम्]

मूर्तीनामग्रतः कुर्यान्मण्डपं चतुरश्रकम् ॥१॥
तन्मध्ये वेदिकां कुर्यान्नवभागैकभागिकाम्[2] ।
वेदिकाबाह्यतो मूर्तेरग्रे कुण्डं प्रकल्पयेत् ॥२॥
[3]चतुरश्रं धनुर्वृत्तं त्रिकोणं च षडश्रकम् ।
विघ्नेश्वरादिदुर्गान्तं पञ्चकुण्डं प्रकल्पयेत् ॥३॥
त्रिमेखलासमायुक्तं नाभियोनिसमन्वितम् ।

[मण्डपालंकारः]

वेदिकां चैव कुण्डानि गोमयेनानुलेपयेत् ॥४॥
ध्वजतोरणसंयुक्तं स्वकुम्भैरष्टमङ्गलैः[4] ।
दर्भमालाभिरावेष्टय पुष्पमालां प्रलम्बयेत् ॥५॥

[अधिवासः]

[5]स्थापनादिवसस्यादौ[6] रात्रौ [7]चैवाधिवासयेत् ।
स्थण्डिलं कल्पयेत्तत्र वेदिकोपरि शालिभिः ॥६॥
तन्मध्ये स्थापयेत्कुम्भमेकैकं प्रतिमूर्तिकम् ।
ससूत्रं [8]सोदकं वस्त्रैरावृतं हेम[9]संयुतम् ॥७॥
सरत्नं कूर्चसंयुक्तं [10]सापिधानं कुशान्वितम् ।
[11]अर्चयेद्गन्धपुष्पाद्यै[12]र्मूर्तिनामादिमन्त्रवित् ॥८॥

---

[1] श्रुणुतो रुरो—उ.

[2] ०भागिकम्—अ, इ, ई, उ; ०भागकम्—आ.

[3] 'आ ई' मातृकयोस्तृतीयचतुर्थश्लोकौ न दृश्येते ।

[4] **अष्टमङ्गलानि**—
'याज्ञिकं वृक्षमादाय कारयेल्लक्षणान्वितम् ।
कलाङ्गुलसमायामं विस्तारं तु तदर्धतः ॥
पद्मासनमधस्तात्तु विस्तारार्धेन कारयेत् ।
श्रीवत्सादीनि तस्योर्ध्वे लेखयेत्तु विशेषतः ॥
श्रीवत्सं मस्त्ययुग्मं च स्वस्तिकं दर्पणं गजम् ।
पूर्णकुम्भं च वृषभं दीपं स्यादष्टमङ्गलम् ॥'
(पूर्वकारणे १८.५३. उ०—५६. पू०) ; एतद्विषये ५.८ पूर्वार्धटिप्पणी द्रष्टव्या ।

[5] प्रतिष्ठादिवस०—उ.

[6] ०दिवसर्वादौ—अ, इ.

[7] चावाधि०—उ.

[8] सौदकैर्वस्त्रै०—आ, ई.

[9] ०संवृतम्—अ.

[10] सपिधानं—आ.

[11] कल्पयेद्गन्ध०—अ, आ, ई.

[12] ०र्मूर्तीनामादि—अ, आ, इ, ई.

अर्धमण्डप[13]दक्षिण्यां वेदिकोपरि [14]संस्थिते ।
कुम्भे [15]विघ्नेश्वरं [16]ध्यात्वा गन्धाद्यैरर्चयेत्ततः ॥९॥
[17]प्रासादस्य तु [18]दक्षिण्यां वेदिकायां तु मध्यमे ।
कुम्भे तु दक्षिणामूर्तिमावाह्याभ्यर्चयेत्ततः ॥१०॥
प्रासादस्य [19]प्रतीच्यां तु वेदिकामध्यमे स्थिते ।
कुम्भे तु विष्णुमावाह्य गन्धादिभिरथार्चयेत् ॥११॥
भवनस्य तु सौम्यायां वेदिकोपरि संस्थिते ।
कुम्भे ब्रह्माणमावाह्य गन्धाद्यैरर्चयेत्ततः ॥१२॥
अर्धमण्डपसौम्यायां [20]वेदिकायास्तु मध्यमे ।
कुम्भे दुर्गां समावाह्य गन्धाद्यैरर्चयेत्ततः ॥१३॥
मूर्तिनामादिभि[21]र्मन्त्रैरावाह्य स्थापयेत्पुनः ।
कुशादिनववस्त्रैश्च प्रतिमां परिवेष्टयेत् ॥१४॥
[22]स्वपञ्चाङ्गषडङ्गानि [23]स्वकुम्भे विन्यसेत्क्रमात् ।
अर्चयेद्गन्धपुष्पाद्यैर्होमकर्म समारभेत्[24] ॥१५॥

[होमः]

[25]खादिरं बिल्वमश्वत्थं पालाशं प्लक्षमेव च ।
[26]उक्तक्रमेण [27]समिधो द्वादशाङ्गुलसंमिताः[28] ॥१६॥
समिद्घृतचरुक्षीरयववेणुप्रियङ्गवः ।
लाजसर्षपमाषाश्च [29]तिला [30]द्रव्याः प्रकीर्तिताः ॥१७॥

---

[13] 'दक्षिणायां' इत्यत्र 'दक्षिण्यां' इति प्रयोगः।; एतादृशः प्रयोगो दशमश्लोकपूर्वार्धेऽपि दृश्यते।; अत्र विषये ४.३.उ० टिप्पणीं पश्यत ।

[14] संस्थितः—उ.

[15] विघ्नेशं . . . गन्धाद्यै०—इ.

[16] . . . गन्धाद्यै०—अ; पूज्य गन्धाद्यै०—उ.

[17] 'आ, ई' मातृकयोरिदमर्धं न दृश्यते ।

[18] एतद्विषये ८.९ पू० टिप्पणीं पश्यत ।

[19] 'प्रतीच्यां तु' इत्यत्र 'पश्चिम्याम्' इति पाठान्तरमत्र 'अ, इ, उ' मातृकासु दृश्यते । 'पश्चिमायाम्' इति तु साधु । एतादृशः प्रयोगः १४. ३,७ श्लोकयोरपि दृश्यते । तत्र १४. ३श्लोके मातृकान्तरासु 'प्रतीच्याम्' इति साधुपाठ उपलभ्यत इति स एव मूले साधितः । परं १४.७ श्लोके 'पश्चिम्याम्' इत्येव सर्वत्र मातृकासु पाठः । एवं पूर्वं 'दक्षिणायाम्' इत्यत्र 'दक्षिण्याम्' इति प्रयोगः ४.३; ८.९,१० श्लोकेषु दृश्यते । एतद्विषये तत्रत्यटिप्पण्यो द्रष्टव्याः ।

[20] वेदिकायां तु—आ, ई.

[21] ०र्मन्त्रैः स्थापयेत पुनः पुनः—आ, ई.

[22] स्वपञ्चाङ्गा षडङ्गानि—अ; पञ्चाङ्गषडङ्गविवरणम् ९.२२; ११.२२ श्लोकयोर्दृश्यते ।

[23] स्वस्वकुम्भे च विन्यसेत्—ई.

[24] ०र्होमाक्कं समारभेत्—उ.

[25] समित्प्रकरणे वृक्षवाचकशब्दानां क्लीबे प्रयोगः ।; एतद्विषये ५.१८ पू० टिप्पणीं पश्यत ।; खदिरं —अ, इ.

[26] उक्तकर्मेण—उ.

[27] सर्वेऽपि—आ, ई; समिधा—उ.

[28] ०संमताः—आ, उ; ०समा मताः—इ; ०संयुताः —ई.

[29] तिलं—आ, ई.

[30] द्रव्यशब्दस्य पुंसि प्रयोगः ।; अत्र ६.१२ उ० टिप्पणी द्रष्टव्या ।

पुण्याहं वाचयेत्तत्र [31]होमकाः पूर्वदिङमुखाः ।
अग्नेरुपसमाधानमाज्यभागान्तमाचरेत् ॥१८॥
मूर्तीनां स्वैश्च [32]पञ्चाङ्गैः स्वैः षडङ्गैश्च [33]मूर्तिभिः ।
[34]समिदादीन्क्रमाद्धुत्वा [35]प्रतिद्रव्यं स्पृशेत्ततः ॥१९॥
अष्टाविंशतिमेकैकं[36] हुत्वा पूर्णाहुतिं ददेत् ।
द्रव्यशेष[37]समायुक्तमाचार्यः [38]प्राङमुखः स्थितः ॥२०॥
स्वमूर्तिमन्त्रमुच्चार्य [39]स्रुचा पूर्णाहुतिं ददेत् ।

[कुम्भाम्भःसंप्रोक्षणम्]

प्रभाते सुमुहूर्ते तु [40]मूर्तिस्थापनमारभेत् ॥२१॥
प्रतिमा[41]वृतवस्त्राणि कुशांश्च परिवर्जयेत् ।
प्रोक्षयेत्पञ्चगव्येन कुशवारियुतेन च ॥२२॥
सकुशेन करेणैव [42]वह्निं दृष्ट्वा स्वमन्त्रवित् ।
संस्पृशेत्प्रतिमां तत्र [43]स्वैः स्वैर्मन्त्रैर्यथाक्रमम्[44] ॥२३॥
कुम्भेषु [45]संस्थिता मूर्तीः प्रतिमासु क्रमान्न्यसेत् ।
[46]स्वपञ्चाङ्गषडङ्गानि स्वस्थानेषु क्रमान्न्यसेत् ॥२४॥
प्रोक्षयेन्मूर्तिभि[47]र्मूर्तीर्नवकुम्भोदकैः[48] क्रमात् ।
अर्चयेद्गन्धपुष्पाद्यैर्होमकर्म [49]समाचरेत् ॥ २५॥
पुण्याहं वाचयेत्तत्र गन्धपुष्पैश्च पूजयेत् ।

---

[31] 'इ' मातृकायां 'होमकाः' इत्यस्य स्थाने 'होमकर्म' इति दृश्यते ।; अत्र 'भवेयुः' इति क्रियापदमध्याहृत्य 'होमकाः पूर्वदिङमुखा भवेयुः' इति व्याख्येयम् ।

[32] पञ्चाङ्गषडङ्गविवरणं ९.२२; ११.२२ श्लोकयोर्दृश्यते ।

[33] 'आ, ई' मातृकयोः 'मूर्तिभिः' इत्यस्य स्थाने 'तिसृभिः' इति दृश्यते ।

[34] समिधादीन्—इ, उ.

[35] प्रतिमव्यं—इ.

[36] ०रेकैकं—अ, आ, इ, उ; रेकेकं—ई.

[37] ०समायुक्तमाचार्याः—अ, आ, इ, ई; ०समायुक्ताचार्यं—उ.

[38] प्राङमुखाः स्थिताः—अ. आ, इ, ई; प्राङमुखस्थितम्—उ.

[39] सृचा—आ; ऋचा—'आ' पाठान्तरम् ।

[40] मूर्तेः स्थापनमाचरेत्—आ, ई.

[41] ०प्रतानि वस्त्राणि—इ; ०वृतानि वस्त्राणि—उ.

[42] बहिन्दृष्ट्वा—उ.

[43] स्वस्वमन्त्रै०—आ, ई.

[44] ०क्रमात्—इ.

[45] संस्थितान्मूर्तीन्—अ. आ, इ; संस्थिता मूर्तीन्—उ.

[46] पञ्चाङ्गषडङ्गविवरणं ९,२२; ११.२२ श्लोकयोर्दृश्यते ।

[47] ०र्मूर्तीन्नव०—अ, आ; ०र्मूर्तिनव—इ, उ.

[48] पूर्वं कुम्भस्थापनविषये सप्तमे श्लोके पञ्चमूर्तीनां प्रत्येकमेक एव कुम्भो विहितः । अत्र नवकुम्भोदकैः प्रोक्षणस्य विधीयमानत्वात् प्रत्येकं मूर्तीनामन्येऽष्टपरिवारकुम्भाः स्थापनीयाः । पूर्वं विहितकुम्भस्थापनं प्रधानकुम्भविषयमिति भाति ।

[49] समारभेत्—आ, ई.

[मूर्त्यग्रेऽर्चनापीठकल्पनम्; तत्र कुम्भाम्भःसंप्रोक्षणं च]

कल्पयेदर्चनापीठं मूर्तीनामग्रतः स्थले ॥२६॥
[50]इष्टकाभिः शिलाभिर्वा त्रिमेखलसमायुतम् ।
प्रोक्षयेन्मूर्तिभिर्मन्त्रैः कुम्भशेषोदकैरपि ॥२७॥
नित्यपूजां ततः [51]कुर्यात्स्विष्टान्तं होममाचरेत् ।
आचार्यं पूजयेत्तत्र [52]वस्त्रैराभरणैरपि ॥२८॥
होमकान्पूजयेत्तत्र [53]पूजकान्परिचारकान् ।
ब्राह्मणान्भोजयेत्तत्र यथाविभव[54]विस्तरैः ॥२९॥

[55]इति [56]श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे पञ्चमूर्ति[57]प्रतिष्ठाविधिर्नाम

अष्टमः पटलः ॥

---

[50] इष्टकैर्वा शिला०—इ, उ.
[51] कृत्वा स्विष्टान्तं—आ, ई.
[52] वस्त्रहेमाङ्गुलीयकैः—ई.
[53] 'आ, ई' मातृकयोः २९ श्लोकस्य द्वितीयतृतीयपादौ न दृश्येते ।
[54] ०विस्तरम्—आ, ई.
[55] इति श्रीरौरवोत्तरे—अ; इति रौरवोत्तरे—इ.
[56] 'आ, ई' मातृकयोः 'श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे' इति न दृश्यते ।
[57] ०प्रतिष्ठाविधिरष्टमः—अ, इ; प्रतिष्ठा नामाष्टमः—आ; प्रतिष्ठाविधि अष्टमपटलः—उ.

नवमः पटलः

[1]विघ्नेश्वरप्रतिष्ठाविधिः

विघ्नेशस्थापनं वक्ष्ये [2]विशेषाच्छृणु ते रुरो।

[[3]प्रतिष्ठायोग्यस्थानम्]

स्थाने [4]विघ्नेश्वरस्योक्ते [5]प्रासादं परिकल्पयेत् ॥१॥

[[6]प्रतिमाद्रव्याणि]

प्रतिमां [7]कारयेच्छैललोहदारुभिरेव वा[8] ।

---

[1] अस्मद्ग्रन्थालयस्थे आर्. इ. ४८०१८ इत्यङ्किते तालपत्रकोशे १२६––१३० पत्रेषु **रौरवोत्तरस्य** ९, १० पटलौ ११.१–७ श्लोकाश्च दृश्यन्ते। तदीयपाठभेदाः 'ए' इति सङ्केतेन निर्दिष्टाः।; विघ्नेश्वरप्रतिष्ठाविधिमधिकृत्य **अचिन्त्यविश्वसादाख्ये** ५३, **अजिते** ४९, **उत्तरकामिके** ४५, **पूर्वकारणे** ५७, **उत्तरकारणे** ९२, **चन्द्रज्ञाने** (टि. १४६. पृ० ११८,) **दीप्ते** ७४, **योगजे** ३, **वीरे** ५८, **संतानसंहितायां** २७, **सुप्रभेदे** क्रियापादे ४३ पटला द्रष्टव्याः।

[2] विशेषाच्छ्रुणुतो रुरो––उ; विशेषं शृणु––ए.

[3] 'अर्धमण्डपदक्षिण्यां स्थानं विघ्नेश्वरस्य तु'
(**रौरवोत्तरे** ४.३. उ०);
'पुरादावष्टदिक्ष्वन्ते वान्तराले तदालयः।
शिवधाम्न्यष्टदिक्ष्वष्टस्तद्देशो मण्टपादिषु ॥
चैत्यवृक्षादिदेशेषु तन्मूले वाखिलालये।
आपणे वाथ रथ्यायां गृहे वा यत्र कुत्रचित् ॥
यथेष्टदिशि वक्त्रं स्याद्विघ्नेशस्य हि कीर्तितम्।
अथैकादित्रयस्त्रिशद्धस्तविस्तारसंयुतः ॥
एकादिनवभूम्यन्तभूमिभागसमन्वितः।
विशेषाद्गजपृष्ठाभस्त्वन्यरूपयुतोऽथवा ॥
दिक्षु विघ्नेश्वरोपेतः कोणे मूषिकसंयुतः।
गणो वा स्कन्दरूपाढ्यस्त्ववधमालय ईरितः ॥
पूर्ववत्कृतसद्गर्भः प्रथमेष्टकयान्वितः।
दिग्देवमूर्तिसंयुक्तो मध्यकुम्भयुतो न वा।
धाम्नः संस्थापनेनापि युक्तः प्रागुक्तवर्त्मना।
प्राकारमण्टपोपेतो मण्टपाद्यैश्च मण्डितः ॥
मण्टपो वालयस्तस्य कूटाद्याकार एव वा।'
(**उत्तरकामिके** ४५.१उ०––८);
एतद्विषये पुनः **अजिते** ४९.१५, १६ श्लोकौ तदीयटिप्पणी च द्रष्टव्याः।

[4] विघ्नेश्वस्योक्ते––अ.

[5] प्रासादे पूर्वकल्पिते––अ, आ, इ, ई, उ; प्रासादं पूर्वकल्पयेत्––ए.

[6] 'द्रव्यैः शिलादिभिः कुर्यात्पञ्चतालोत्तमेन तु।'
(**उत्तरकामिके** ४५.२३ उ०)

[7] कारयेच्चैव लोह०––इ; रोपयेच्छैल०––ए.

[8] प्रतिमाकरणानन्तरं दशमपटलप्रभृति त्रयोदशान्तेषु चतुर्षु पटलेषु दक्षिणामूर्ति-विष्णु-ब्रह्म-दुर्गारूपदेवताप्रतिष्ठाप्रतिपादकेषु नेत्रोन्मीलनं विधीयते। तद्वदत्रापि नेत्रोन्मीलनविषयप्रतिपादकग्रन्थो भवितव्यः। सोऽत्र लुप्त इति भाति।

नेत्रोन्मीलनम्––
'नेत्रयुग्मदिने दिने।
स्थण्डिलं तु प्रकर्तव्यं शालिभिर्विमलैः शुभैः ॥
पूर्वस्याभिमुखं विघ्नं स्थापयेत्स्थण्डिलोपरि।
हेमसूचिप्रहाराभ्यां पक्ष्मरेखां समालिखेत् ॥

शिल्पि[९]कर्मणि पूर्णे तु पञ्चगव्याभिषेचनम्[१०] ॥२॥
[११]आपो [१२]हि ष्ठेति मन्त्रेण सेचयेच्छुद्धवारिणा ।
पलाशपर्णवस्त्रैश्च वेष्टयेत्प्रतिमां [१३]तथा ॥३॥

[[१४]जलाधिवासः]

[१५]नद्यां वापि तटाके वा [१६]जले चैवाधिवासयेत् ।
[१७]महत्यां मृण्मये [१८]चित्रे दर्पणे [१९]जलवासनम् ॥४॥

असितं मण्डलं लिख्य दृष्टिमण्डलमालिखेत् ।
ज्योतिर्मण्डलमालिख्य कुर्याच्छिल्पिविसर्जनम् ॥
तदग्रे स्थण्डिलं कृत्वा बिम्बं तत्रोपरि न्यसेत् ।
तर्जन्यनामिकामध्यै रविचन्द्रानलाधिपैः ॥
सुवर्णनखसंयुक्ताङ्गुलीभिश्च क्रमेण तु ।
उच्चार्य नेत्रमन्त्रं तु प्रोत्य नेत्रत्रयेषु च ॥
सुवर्णदूर्वयास्त्रेण मध्वाज्याभ्यां च तर्पयेत् ।
मधुना च घृतेनैव पात्रे प्रस्थेन पूरयेत् ॥
मध्वाज्यसूक्तमुच्चार्य दर्शयेत्तु क्रमात्सुधीः ।
धेनुं गौर्धेनुभव्येति ब्रह्मसूक्तेन भूसुरान् ॥
प्रच्छन्नपटमावर्ज्य जनसङ्घान्प्रदर्शयेत् ।
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ॥
स्नापयेत्पञ्चगव्यैश्च अष्टमृत्सलिलैरपि ।
वस्त्रैराभरणैर्माल्यैर्भूषयेद्भूषणार्हकैः ॥'
(**पूर्वकारणे** ५७.१९ उ०—२८ पू०) ;
एतद्विषये पुनः **अजिते** ४९.२१–२५ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[९] ०कर्मसमाप्ते तु—अ, इ, उ; ०कर्माणि—आ; ०कर्म समाप्नोति—ए.

[१०] ०षेचयेत्—इ, ए.

[११] **ऋग्वेदे** १०.९.१; **तै० संहिता** ४.१.५.२

[१२] इष्ठेति—उ; हिष्ठे हि—ए.

[१३] ततः—ए.

[१४] 'बेरशुद्धिं ततः कृत्वा ग्रामादीनां प्रदक्षिणम् ।
तोयेऽधिवासयेद्देवं लम्बकूर्चयुतं हृदा ॥
परितोऽष्टौ न्यसेत्कुम्भानाशेशैरप्यधिष्ठितान् ।'
(**उत्तरकामिके** ४५.६९उ०, ७०) ;
एतद्विषये पुनः **अजिते** ४९. २६–२८ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[१५] नद्याश्चापि—इ; नद्यामेव—ए.

[१६] जलौघे अधि०—ए.

[१७] महाति मृण्मये—अ; महातीव्रमये—आ; महती मन्मये—इ; महातीर्वमये—ई; महातीमृण्मये—उ; महति मृण्मये—ए;
'ग्रामप्रदक्षिणं वापि चित्रादौ परिवर्जयेत् ।
महत्तरे वा तत्त्याज्यम्'
'जलाधिवासनं कुर्याच्चित्रादौ दर्पणे न वा ।'
(**पूर्वकामिके** ६८.५४उ०, ५५.पू०; ६० उ०) ;
'मृन्मये त्वर्धचित्रे च भित्तिचित्रे पटे तथा ।
ग्रामप्रदक्षिणं नोक्तमेतेषां तु प्रजापते ॥
जलाधिवासनं चैषामग्रे तु शालिभिः कुरु ।
वेदतालप्रविस्तारमुत्सेधं तु युगाङ्गुलम् ॥
स्थण्डिलं चतुरश्रं तु तन्मध्ये नलिनं लिखेत् ।
तस्योर्ध्वे जलभाण्डं तु विन्यसेत्सूत्रवेष्टितम् ॥
वस्त्रेणास्तीर्य तस्योर्ध्वे दर्पणं विन्यसेत्ततः ।
प्रतिबिम्बयुतं तत्र स्थापयेद्दर्पणं हृदा ॥
त्रिंशत्काशैः समायुक्तमग्रं तु चतुरङ्गुलम् ।
ग्रन्थिर्व्योमाङ्गुलं दैर्घ्यं प्रतिमाजानुमात्रकम् ॥
तत्कूर्चं हृदयेनैव विन्यसेद्दर्पणोपरि ।
चतुष्पादं न्यसेत्तत्र याज्ञिकैर्वृक्षसंभवैः ॥
रत्निमात्राधिकं बिम्बमानाद्गात्रस्य दैर्घ्यकम् ।
युगाश्रं वाथ वृत्तं वा द्वादशाङ्गुलनाहकम् ॥
पक्षतालप्रमाणेन तदूर्ध्वे फलकां कुरु ।
अब्ध्यङ्गुलेन सुषिरं वृत्तं मध्ये प्रकल्पयेत् ॥
द्वात्रिंशत्प्रस्थसंपूर्णं कुम्भं बिम्बसमप्रभम् ।
सूत्रेण वेष्टयेत्कुम्भं यवान्तरक्रमेण तु ॥
एवमेवोपकुम्भं तु कल्पयेत्कल्पवित्तमः ।

एकरात्रं[२०] त्रिरात्रं वा पञ्चरात्रमथापि वा।

[[२१]मण्डपः, तत्र वेदिकाकुण्डकल्पनं च]

[२२]प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम् ॥५॥
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम्।
[२३]तन्मध्ये वेदिकां कुर्यान्नव[२४]भागैक[२५]भागिकाम् ॥६॥
[२६]एकहस्तसमुत्सेधां[२७] दर्पणोदरसंनिभाम्[२८]।
[२९]वेदिकायाश्चतुर्दिक्षु चतुष्कुण्डं प्रकल्पयेत् ॥७॥
चतुरश्रं धनुर्वृत्तं त्रिकोणं च यथाक्रमम्।
[३०]त्रिमेखलासमायुक्तं नाभियोनिसमन्वितम् ॥८॥
[३१]प्रोक्षयेत्पञ्चगव्येन गोमयेनानुलेपयेत्।
दर्भमालाभिरावेष्टय पुष्प[३२]माल्यैर्विभूषयेत् ॥९॥

[[३३]शयनाधिवासः]

स्थण्डिलं [३४]कल्पयेत्तत्र वेदिकोपरि शालिभिः।

चतुष्पाद्युपरि न्यस्त्वा पृष्ठे तु सुषिरं कुरु ॥
वेदतारप्रमाणेन नालं हैमेन संयुतम्।
तन्नालान्तरतोयैश्च स्नापयेद्दर्पणोपरि ॥
कुम्भाम्भःशोषणात्पूर्वमुपकुम्भं तु पूरयेत्।
जलाधिवासनं ह्येवम्'
(**पूर्वकारणे** ७५.३६–४७); तथैतद्विषये **रौरवे** क्रियापादे ३४.१८,१९ श्लोकौ तदीयटिप्पणी; **अजिते** ४०, १२४–१३२ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः।

[१८] पात्रे—इ.

[१९] जलवासयेत्—अ, आ, इ, ई, उ, ए; 'दर्पणं चाधिवासयेत्' इति पाठश्चेत्सुष्ठु।

[२०] ०रात्रि०—उ.

[२१] 'यागार्थं मण्टपं कुर्याद्धाम्नोऽग्रे तस्य पार्श्वयोः।
यमाप्येन्दुषु वा पद्मनिभकुण्डादिमण्डितम् ॥
कुण्डानि नवपञ्चैकसंख्यया कथितानि तु।
तानि वृत्तानि चाश्राणि दिगश्राणि मुनीश्वराः ॥
प्रधानकुण्डं सर्वत्र वृत्तमेव प्रकीर्तितम्।
मण्डपं कल्पयित्वैवं प्रागुक्तेन च वर्त्मना ॥'
(**पूर्वकामिके** ४५.७१–७३)
पुनरप्येतद्विषये **अजिते** ४९.१७–२० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः।

[२२] प्रासादस्याग्रके कुर्या०—ए.

[२३] मध्यमे वेदि०—ए.

[२४] ०भागेक०—ई.

[२५] ०भागिकम्—अ, इ, उ; ०भागकम्—आ, ई; ०भागिनम्—ए.

[२६] एकाङ्गुल०—आ, ई.

[२७] ०समुत्सेधं—अ, आ, इ, ई, उ; ०समोत्सेधं—ए.

[२८] ०संनिभम्—अ, आ, इ, ई, उ, ए,

[२९] वेदिकायां चतु०—आ, इ, ई, उ, ए.

[३०] त्रिमेखलसमा०—अ, इ, उ, ए.

[३१] 'उद्वास्य शिल्पिनं पश्चाद् द्विजान् संभोजयेत्ततः।
पुण्याहप्रोक्षणं कृत्वा वास्तुहोमं तु कारयेत् ॥
(**पूर्वकामिके** ४५.७४)

[३२] ०दाम्ना वि०—आ, ई; ०मालैर्वि०—इ, ए.

[३३] जलादानीय विघ्नेशं स्नानवेद्यां तु विन्यसेत्।
मण्डपे चोत्तरस्थे च स्नपनं प्राग्वदाचरेत् ॥
कौतुकं बन्धयित्वान्ते मन्त्रं सर्वात्मकं पठन्।
संकल्प्य शयनं वेद्यां स्थण्डिलोर्ध्वेऽण्डजादिभिः ॥
वस्त्रैर्वा पञ्चभिः शुद्धैस्तस्मिंस्तं शाययेद्बुधा।
आवेष्टय रक्तवासोभ्याम्'
(**पूर्वकामिके** ४५.७५उ०—७८पू०); पुनरेतद्विषये **अजिते** ४९.२९–३२ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः।

[३४] कल्पयेद्रात्रीं—ए.

संप्रमृज्य [३५]कुशाँल्लाजान् [३६]वस्त्राणि च [३७]तथोपरि[३८] ॥१०॥
[३९]अण्डजैर्मुण्डजैर्वापि शयनं [४०]परिकल्पयेत् ।
[४१]जलादुद्धृत्य प्रतिमां मण्डपं संप्रवेशयेत् ॥११॥
[४२]तिलतण्डुललाजैश्च कुशैः पुष्पैश्च पूजयेत् ।
क्षालयेच्छुद्धतोयेन गन्धाद्यैरर्चयेत्क्रमात्[४३] ॥१२॥
नववस्त्रैः समाच्छाद्य शाययेच्छयनोपरि ।
[४४]ऊर्ध्ववक्त्रं शिरः प्राच्यां शाययेत्पीठिकां[४५] सह ॥१३॥
अर्चयेद्गन्धपुष्पाद्यैः'

[[४६]कुम्भाधिवासः]

'अष्टकुम्भाधिवासनम्[४७] ।
[४८]ससूत्रान्वस्त्रसंयुक्ता[४९]न्सरत्नान्हेमसंयुतान् ॥१४॥
[५०]सकूर्चान्सोदकान्कुम्भान्स्थापयेत्सापिधानकान्[५१] ।
[५२]क्रमात्प्रतिमामावृत्य पूर्वादीशान्तदिक्षु च ॥१५॥
वेदिकास्थेषु कुम्भेषु [५३]ह्यष्टमूर्तीः समावहेत् ।
विघ्नेश्वरं महाकर्णं गजवक्त्रं महोदरम् ॥१६॥
एकदन्तं महाकायं [५४]विनायकगणाधिपौ[५५] ।

---

[३५] कुशान्दर्भान्––अ, आ, इ, उ.

[३६] सवस्त्रांश्च––अ.

[३७] ततोपरि––अ, उ.

[३८] 'ए' मातृकायामिदमर्धं न दृश्यते ।

[३९] 'अण्डजं चेति जानीयात्पक्षीणां पिञ्छसंभवम् ।
कार्पासादिकृतं यत्तु मुण्डजं चेति तत्स्मृतम् ॥
(**सुप्रभेदे** क्रियापादे ३६.४२ उ०, ४३ पू०)

[४०] कल्पयेत्ततः–– आ, इ, ई, उ, ए.

[४१] जलात्प्रतिममुद्धृत्य––अ, ए; जलात्प्रतिममुत्थत्य––इ, जलात्प्रतिमामुद्धृत्य––उ.

[४२] 'ए' कोशे इदमर्धं न दृश्यते ।

[४३] ०रर्चयेद्बुधः––आ, ई; अर्चयेत्ततः––ए.

[४४] ऊर्ध्वं वक्त्रं––ए.

[४५] ०त्पीठिका––अ, ई, उ, ए; ०त्पीठया––आ; प्रतिमयेति पदमध्याहृत्य प्रतिमया सह पीठिकां च शाययेदित्यन्वयः कार्यः ।

[४६] सर्वलक्षणसंयुक्तं सूत्रेणैव तु वेष्टितम् ॥
सकूर्चं सापिधानं च सवस्त्रं वारिपूरितम् ॥
सहिरण्यं न्यसेत्कुम्भं गन्धपुष्पादिनार्चयेत् ।
तद्रूपं मूलमन्त्रेण प्रत्यङ्गमङ्गसंयुतम् ॥
ध्यात्वा कुम्भे तु विन्यस्य स्वापमुद्रां प्रदर्शयेत् ।
आवृतान् कलशानष्टौ लोकपालादिकान्क्रमात् ॥
(**सुप्रभेदे** क्रियापादे.४३.२१ उ०–२४ पू०); एतद्विषये पुनः **अजिते** ४९.३३,३४; ४१–४७ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[४७] ०कुम्भाधिवासयेत्––अ, आ, इ, ई,ए; ०कुम्भादिवासयेत्––उ; अत्र 'पुष्पाद्यैः कुम्भानष्टाधिवासयेत्' इति पाठश्चेत्सुष्ठु । अत्र प्रधानकुम्भस्थापनं प्रतिमायाः शिरोभागे दक्षिणे (**अजिते** ४९,३३–३४) ततः परितोऽष्टकुम्भस्थापनमित्यागमप्रक्रिया । अत्र प्रधानकुम्भस्थापनप्रतिपादकग्रन्थो लुप्त इति भाति ।

[४८] त्रिसूत्रान्वस्त्र०––ए.

[४९] ०न्सकूर्चान् हेम०––आ; ०न्सकूर्चान् सापिधानकान्––ई; न्सरत्नहेम०––ए.

[५०] सरत्नान् सोदकान्––आ; 'ई' मातृकायामिदमर्धं न दृश्यते ।

[५१] सपिधानकान्––आ.

[५२] क्रमात्प्रतिममावृत्य––इ.

[५३] अष्टमूर्ति––अ, इ, उ; ह्यष्टमूर्ति––आ; ष्यष्टमूर्तीः––ई; अष्टमूर्तीं––ए.

[५४] विनायकं तु गणाधिपम्––इ, उ, ए; विनायकं गणाधिपम्––ई.

[५५] ०गणाधिपम्––आ.

[56]आवहेदष्टकुम्भेषु [57]स्वैः स्वैर्मन्त्रैर्विशेषतः ॥१७॥
अर्चयेद्गन्धपुष्पाद्यैस्ततो होमं समाचरेत्।

[[58]होमः]

[59]पलाशोदुम्बराश्वत्थप्लक्षं पूर्वादिषु क्रमात् ॥१८॥
[60]इध्मं पलाशमेतेषां [61]समिधो द्वादशाङ्गुलाः।
[62]समिद्घृत[63]चरुक्षीरयववेणुप्रियङ्गवः ॥१९॥
लाजसर्षपमाषाश्च [64]तिला [65]द्रव्याः प्रकीर्तिताः।
अग्नेरुप[66]समाधानमाज्यभागान्तमाचरेत्[67] ॥२०॥
[68]यस्यां दिशि [69]स्थिता मूर्तिस्तस्यां[70] कुण्डाधिपस्तथा[71]।
[72]स्वस्वनामादि[73]पञ्चाङ्गैः षडङ्गैर्होमयेत्क्रमात् ॥२१॥

---

[56] आवाहयेदष्टकुम्भे—आ, ई; आवाहयेदष्टकुम्भेषु—इ, आवहनेदष्टकुम्भेषु—उ; आवाहयेऽष्टकुम्भेषु—ए.

[57] स्वस्वमन्त्रै०—आ, इ, ए.

[58] 'ततो होमं प्रकर्तव्यं नव वा पञ्च एव वा।
वृत्तं वा चतुरश्रं वा सर्वकुण्डानि कारयेत् ॥
ईशानइन्द्रयोर्मध्ये प्रधानाग्निर्विधीयते।
प्लक्षाश्वत्थं च न्यग्रोधं बिल्वं चैव विशेषतः ॥
उदुम्बरं शमी चैव अपामार्गं च खादिरम्।
पालाशं चैव विप्रेन्द्र नवकुण्डेषु होमयेत् ॥
चतुर्दिक्षु च ईशान्यां पञ्चकुण्डेषु होमयेत्।
सर्वेषामप्यलाभे तु पलाशसमिधा युतम् ॥
समिदाज्यचरूँल्लाजान्सक्तुमाषयवांस्तथा।
कदलीफलसंयुक्तं होमयेद्देशिकोत्तमः ॥
सद्योवाममघोरं च तत्पुरुषं तथैव च।
हृदयं च शिरश्चैव शिखामन्त्रेण होमयेत् ॥
शतमर्धं तदर्धं वा होमयेदादिशैवकः।
हुत्वा हुत्वा स्पृशेद्बिम्बं द्रव्यं प्रति विशेषतः ॥
द्रव्यान्ते व्याहृतिं हुत्वा संप्रोक्ष्य चैव होमयेत्।
लड्डुकं नालिकेरं च मातुलङ्गफलानि च ॥
सर्वभक्ष्यं च पनसं गणानां चैव होमयेत्।
चतुर्दिक्षु चतुर्वेदैः कुर्यादध्ययनं ततः ॥'
(**वीरे** ५८.७०–७८); एतद्विषये पुनः **अजिते** ४९.४८–५७ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः।

[59] समित्प्रकरणे वृक्षवाचकशब्दानां प्रायेण क्लीबे प्रयोगः।; ५.१८ पू० टिप्पणीं पश्यत।

[60] इत्थं—अ, इ, उ; शुद्धं पालश०—ए.

[61] समिधा द्वादशाङ्गुलाम्—उ; समयाद्य दशाङ्गुला—ए.

[62] समिद्घृतं—आ, ई, ए.

[63] मधुक्षीर—ई; चरुक्षीरं—ए.

[64] तिलं—आ, ई.

[65] द्रव्यं प्रकीर्तितम्—उ; द्रव्यं प्रकीर्तिताम्—ए; द्रव्यशब्दस्य पुंसि प्रयोगः।; एतद्विषये ६.१२ उ० टिप्पणी द्रष्टव्या।

[66] ०समाधानाज्य०—उ.

[67] 'ए' मातृकायाम् इदमर्धं न दृश्यते।

[68] यस्मिन्—अ, इ, ए.

[69] स्थितो—अ, आ, इ, ई, ए.

[70] ०स्तस्मिन्—अ, इ, ए.

[71] ०धिपास्तथा—अ, आ, ई; ०धिपस्थिता—उ; ०धिपस्ततः—ए.

[72] स्वैः स्वैर्नामादि—अ, इ, ए; स्वस्वर्नामादि—उ.

[73] पञ्चाङ्गषडङ्ग०—आ, ई; पञ्चाङ्गषडङ्गविवरणम् ११.२२ श्लोकेऽपि दृश्यते।

[पञ्चाङ्गानि षडङ्गानि च]

[74]मूर्धा वदनहृद्गुह्य[75]पादाः पञ्चाङ्गसंस्थिताः[76]।
[77]हृच्छिरःशिखाकवचनेत्रास्त्राणि[78] षडङ्गकाः[79] ॥२२॥
समिधो होमयेन्मूर्ध्ना[80] वदनेन घृतं हुनेत्।
ओदनं च [81]हृदा हुत्वा [82]क्षीरं गुह्येन होमयेत् ॥२३॥
[83]पादेनैव यवं हुत्वा हृदयेनैव वैणवम्।
प्रियङ्गुं शिरसा हुत्वा [84]लाजांश्च शिखया हुनेत् ॥२४॥
सर्षपं कवचेनैव माषं नेत्रेण होमयेत्।
तिलं हुत्वास्त्रमन्त्रेण प्रत्येकं [85]चाष्टविंशतिः ॥२५॥
[86]प्रतिद्रव्यं कुशैः स्पृष्ट्वा [87]स्वेष्वङ्गेषु च मन्त्रवित्।
[88]गणेशमूर्तिपञ्चाङ्गैः [89]षडङ्गैर्होमयेत्क्रमात् ॥२६॥
[90]पुनराहुतिरेवं [91]स्याद्द्रव्यं प्रति कुशैः स्पृशेत्।
द्रव्यशेषसमायुक्तं पूर्वाभिमुखसंस्थितः[92] ॥२७॥
स्रुचा पूर्णाहुतिं हुत्वा सर्वाङ्गं [93]तु कुशैः स्पृशेत्।

[[94]प्रतिमास्थापनम्]

शयनाद्बिम्बमुत्थाप्य गन्धाद्यैरर्चयेत्ततः ॥२८॥
प्रभाते सुमुहूर्ते तु प्रासादं संप्रवेशयेत्[95]।

---

[74] मूर्धा—आ, ई, उ; मूर्ध्वा—ए.

[75] पदानपञ्चा०—अ; पदान्—आ, इ, ए; पादान्—ई, उ.

[76] संस्थितान्—अ, आ, इ, ई, उ; संस्थितः—ए.

[77] शिरः शिखाहृत्कवच०—आ, ई; हृत् शिरशखां याव— ए.

[78] नेत्राणि—अ; नेत्राश्चात्र—ए.

[79] षडङ्गकम्—आ; षडङ्गकान्—ई; षडङ्गकैः —ए.

[80] समिधा होमये मूर्ध०—उ; समिधान् होमये मूर्ध्वा—ए.

[81] हृदिर्हुत्वा—इ.

[82] क्षिमगुह्येन—उ.

[83] 'आ, ई' मातृकयोः २४ तमश्लोकः २५ पूर्वार्धं च न दृश्यते।; सद्येनैव यवं—ए.

[84] लाजाश्नैश्च शिखा हुनेत्—ए.

[85] 'होतव्या' इत्यध्याहार्यम्। आहुतीनामष्टाविंशतिर्होतव्येति व्याख्येयम्। अष्टविंशतिरिति पाठो वृत्तार्थ इति भाति।

[86] प्रतिद्रव्यकुशैः—उ; प्रतिद्रव्यकुशे—ए.

[87] स्वस्ववर्गेषु—आ, ई; स्वे स्वर्गेषु च नेत्रवित्—ए.

[88] गणेशं—ए.

[89] पञ्चाङ्गषडङ्गविवरणम् ९.२२, ११.२२ श्लोकयोर्दृश्यते।

[90] पूर्णाहुति०—ए.

[91] स्यात्कव्यां—इ.

[92] संस्थितम्—अ, आ, इ, ई, उ, ए.

[93] कुशया—अ, इ, ए; च कुशैः—उ.

[94] एतद्विषये **अजिते** ४९.५८—६३ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः।

[95] संप्रपूजयेत्—अ, आ, इ, ई, उ; सुप्रवेशयेत्—ए.

ततो गर्भगृहं गत्वा [९६]नवरत्नानि विन्यसेत् ॥२९॥
[९७]बिम्बे वा स्थण्डिले वापि पीठोपरि बिलेऽपि वा ।
[९८]सुवर्णं [९९]विन्यसेत्तत्र प्रतिमां स्थापयेत्ततः ॥३०॥
[१००]गणगायत्रिमुच्चार्य स्थापयेत्पीठिकां[१०१] सह ।
[१०२]वज्रकैरष्टबन्धैर्वा [१०३]दृढं सम्यक्प्रबन्धयेत् ॥३१॥

[[१०४]कुम्भतोयाभिषेकः]

[१०५]वेदिकायां स्थितान्कुम्भान्प्रासादं संप्रवेशयेत् ।
कुम्भेषु स्थापितां मूर्ति प्रतिमायां[१०६] न्यसेत्क्रमात् ॥३२॥
कुम्भकूर्चोदकेनैव [१०७]मूर्तिनामादिमन्त्रकैः ।
[१०८]स्वस्वनामादि पञ्चाङ्गं षडङ्गं[१०९] विन्यसेत्क्रमात् ॥३३॥
[११०]कुम्भस्थेनोदकेनैव [१११]स्वमन्त्रैश्चाभिषेचयेत् ।
अर्चयेद्गन्धपुष्पाद्यैर्वस्त्रमाल्यानुलेपनैः ॥३४॥

---

[९६] 'माणिक्कं चेन्द्रनीलं च वैडूर्यं च प्रवालकम् ।
मुक्ता वज्रं ततः पुष्यरागं स्फटिकखण्डकम् ॥
मरतकं च रत्नानि नवरत्नानि'
(**उत्तरकामिके** ४.१०१ उ०, १०२)

[९७] फले वा––ए.

[९८] सुवर्णान्––अ, ए; स्वर्णान्––इ.

[९९] विरसे तत्रा प्रतिकंका विपीठितः––ए

[१००] मन्त्रेणैव समुच्चार्य––ए; गणेशगायत्रीमधिकृत्य **अजिते** ४९.१३,१४ श्लोकौ तदीयटिप्पणी च द्रष्टव्या।; गणगायत्री––अ; अत्र गायत्रीशब्दस्य ह्रस्वान्तप्रयोगो वृत्तार्थ इति भाति ।

[१०१] एतद्विषये ९. १३ उ० टिप्पणी द्रष्टव्या।; पीठिका––अ, इ, ई, उ, ए.

[१०२] यज्ञकै अष्टबन्धैश्च–ए; वज्रबन्धाष्टबन्धविषये **अजिते** १८.२१६–२१८ श्लोकास्तदीयटिप्पणी, **रौरवे** क्रियापदे २९.२८ श्लोकस्तदीयटिप्पणी च द्रष्टव्याः ।

[१०३] रन्ध्रे––आ, ई; रन्ध्रं––इ, उ, ए.

[१०४] 'देवाग्रे तु घटान्न्यस्य कुम्भाद्बीजं तु तद्धृदि ।
विन्यसेदन्यकुम्भेभ्यः पीठस्य पुरतो मनून् ॥
तत्तत्कुम्भोदकैश्चैव तत्तद्देशेऽभिषेचयेत् ।
तत्त्वमूर्त्यादिविन्यासं पूर्ववत्कारयेत्ततः ॥
स्नपनं कारयेदन्ते नैवेद्यं चोत्सवं नयेत् ।'
(**उत्तरकामिके** ४५. ९९––१०१ पू);
'कलशस्थं यथातत्त्वं प्रतिमायां तु विन्यसेत् ।
कलशैः स्नाप्य विघ्नेशं गन्धपुष्पादिभिः सह ॥
गुलोदनं तु हविषं फलयुक्तं निवेदयेत् ।
कर्तव्यमुत्सवं तत्र कर्म वित्तानुसारतः ॥
तवैतत्स्थापनं प्रोक्तम्'
(**सुप्रभेदे** क्रियापादे ४३. २८–३० पू०); एतद्विषये पुनः **अजिते** ४९.६४–७५ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[१०५] वेदिकास्थितान्––इ.

[१०६] प्रतिमासु––अ, इ; प्रतिमाया––उ.

[१०७] मूर्तिहोमादि०––अ, आ, इ, ई, उ, ए; अनन्तरपटलेषु क्रमेण मन्त्रन्यासविषये 'स्वैः स्वैर्नामादिभिर्मन्त्रैः' (११.२९ उ०); 'मूर्तिनामादिभिर्मूर्ति' (१२.३३ पू०); 'मूर्तिनामादिभिर्मन्त्रैः' (१३.३९ उ०) इति दृश्यमानत्वादत्र 'मूर्तिनामादिमन्त्रकैः' इति पाठः साधितः ।

[१०८] स्वस्वनाम्नादि०––ए.

[१०९] पञ्चाङ्गषडङ्गं––आ, इ; पञ्चाङ्गैः षडङ्गैः–ए; पञ्चाङ्गषडङ्गविवरणम् ९.२२, ११.२२ श्लोकयोर्दृश्यते ।

[११०] कुम्भस्थानोद०––ए.

[१११] समन्त्रं चाभि०––ए.

[[११२]आचार्यादिपूजा]

आचार्यं पूजयेत्तत्र वस्त्रैराभरणैरपि ।
होमकान्पूजकांश्चैव पूजयेत्परिचारकान्[११३] ॥३५॥
[११४]स्वस्वनामादिपञ्चाङ्गैराज्याहुतिं [११५]हुनेत्क्रमात् ।
प्रायश्चित्ताहुतिं [११६]हुत्वा स्विष्टान्तं होममाचरेत् ॥३६॥
विघ्नेशस्य [११७]हविर्दद्याद्गुलान्नं[११८] पायसं[११९] तु वा ।
ब्राह्मणान्भोजयेत्तत्र यथाविभवविस्तरैः[१२०] ॥३७॥

[१२१]इति [१२२]श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे [१२३]विघ्नेश्वरप्रतिष्ठा[१२४]विधिर्नाम
नवमः पटलः ॥

---

[११२] 'आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ।
दक्षिणां दापयेत्पश्चाद्गोभूमिकाञ्चनैः सह ॥
पञ्चनिष्काधमं प्रोक्तं द्विगुणं मध्यमं भवेत् ।
त्रिगुणं चोत्तमं प्रोक्तं देशिकस्य तु दक्षिणा ॥
अध्येतॄमूर्तिधारांश्च पूजयेद्विधिपूर्वकम् ।'
(**पूर्वकारणे** ५७. ८१–८३ पू०)

[११३] ०वारकान्––ए.

[११४] स्वैः स्वैर्नामानि—अ, इ; स्वस्वैर्नामादि—उ; स्वस्वैनमी––ए.

[११५] क्रमाद्धुनेत्—आ, ई.

[११६] कृत्वा––उ.

[११७] हविं दद्यात्––इ, ए;
'पूजयित्वा विशेषेण प्रभूतहविषं ददेत् ।
गुलान्नं पायसान्नं च मुद्गान्नं च निवेदयेत् ॥
भक्ष्याणि विविधान्यत्र गणानां त्वेति दापयेत् ।
भोजयेद् ब्रह्मचारींश्च तेषां भक्ष्याणि दापयेत् ॥'
(**पूर्वकारणे** ५७.९५ उ०–९७ पू०)

[११८] **गुलान्नम्**––'तण्डुलार्धेन पयसा तदर्धेन गुलेन च ।
पाचितं गौलमाख्यातम्'
(**अजिते** २२.१०६ उ०, १०७ पू०)

[११९] **पायसम्**—
'तण्डुलेन समे क्षीरे पाचितं पायसं भवेत्'।
(**अजिते** २२.१०६ पू०)

[१२०] ०विस्तरम्—आ, ई; ०विस्तरेत्––ए.

[१२१] इति श्री रौरवोत्तरे—अ; इति रौरवोत्तरे—इ, ए.

[१२२] 'श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे' इति 'आ, ई' मातृकयोर्न दृश्यते ।

[१२३] गणेश्वरप्रतिष्ठा––अ; गणेशप्रतिष्ठा––आ, ई.

[१२४] ०विधिनवमः पटलः––अ, इ; 'विधिः' इति 'आ, ई' मातृकयोर्न दृश्यते ।; ०विधिनाम पटलः—उ; विधी नामाध्यायः—ए.

दशमः पटलः

[1]दक्षिणामूर्तिप्रतिष्ठाविधिः

प्रतिष्ठां दक्षिणामूर्तेर्वक्ष्यामि शृणु ते गुरो।
प्रासादं [2]कल्पयेदुक्तस्थाने[3] द्वारस्य दक्षिणे ॥१॥

[[4]प्रतिमाद्रव्यम्]

शिलाभिर्वाथ लोहैर्वा प्रतिमां कारयेत्पृथक्।

[[5]नेत्रोन्मीलनम्]

[6]प्रासादपुरतो बाह्ये [7]प्रपां कुर्यात्सवेदिकाम् ॥२॥
प्रक्षाल्य [8]प्रतिमामद्भिर्वेदिकायां [9]निवेशयेत्।
पूर्वाभिमुखमास्थाप्य[10] प्रतिमां वेष्टयेत्पटैः[11] ॥३॥

---

[1] दक्षिणामूर्तिप्रतिष्ठाविषये **उत्तरकामिके** ५१, **पूर्वकारणे** ७६, **उत्तरकारणे**६८, **दीप्ते** ४६, **पारमेश्वरे** (टि.१४६) ४५, ४६ पृष्ठयोः, **सहस्रे** ३५, पटलाः, **सुप्रभेदे** (टि.४७ पृ० २८१—२८७) द्रष्टव्याः।

[2] कल्पयेद्युक्तं—ए.

[3] 'स्थानं तु दक्षिणामूर्तेः प्रासादस्य तु दक्षिणे'। (४.४ पू०)

[4] 'पटे वा भित्तिचित्रे वा लोहजे वाश्मजेऽपि वा।' (**सहस्रे** ३५.३ पू०)

[5] 'ततोऽक्षिमोक्षणं कुर्यान्नेत्रद्वययुते दिने।
मण्टपेऽलंकृते मध्ये स्थण्डिलं शालिभिः कुरु ॥
बिम्बं तस्योपरि न्यस्त्वा तस्य वामे न्यसेदृषीन्।
पक्ष्मरेखां पुरालिख्य कृष्णमण्डलमालिखेत् ॥
ज्योतिर्मण्डलमालिख्य हेमसूच्या प्रहारयुक्।
नेत्रमन्त्रमनुस्मृत्य लेखयेद्देशिकोत्तमः ॥
ऋषीणां चैव नेत्रेषु नेत्रेणैव समं लिखेत्।
हेमाङ्गुलीयवस्त्राद्यैः संपूज्योद्वास्य शिल्पिनम् ॥
तस्याग्रे स्थण्डिलं कृत्वा शालिभिश्च विशेषतः।
प्राङ्मुखं प्रतिमां तस्य तन्मध्ये विन्यसेद्बुधः ॥
ऋषीनुत्तरतो न्यस्त्वा प्रोक्षयेदस्त्रमन्त्रतः।
नेत्रेषु नेत्रमुच्चार्य प्रोतहैमनखैरपि ॥
ततो मध्वाज्यसूक्ताभ्यां मध्वाज्याभ्यां च तर्पयेत्। मधुना च घृतेनैव पात्रे तु प्रस्थपूरिते ॥
तत्सूक्ताभ्यां क्रमेणैव दर्शयेद्देशिकोत्तमः।
गौर्धेनुभव्यमन्त्रेण सवत्सां गां प्रदर्शयेत् ॥
धान्यराशिं हृदा मन्त्री ब्रह्मसूक्तेन भूसुरान्।
मधुना च घृतेनैव ऋषिनेत्रेषु तर्पयेत् ॥
प्रच्छन्नपटमावर्ज्य जनसंघान्प्रदर्शयेत्।
स्नापयेत्पञ्चगव्यैश्च अष्टमृत्सलिलैर्हृदा ॥'
(**पूर्वकारणे** ७६. ७–१६)

[6] प्रासादे—उ; प्रासादं—ए.

[7] प्रभा कुर्यात्सवेदिका—ए

[8] प्रतिमां मृद्भिः—अ, आ, इ, ई, ए.

[9] प्रवेशयेत्—ए.

[10] ०मास्थाय—ई.

[11] वेष्टयेत्प्रते—ए.

[12]प्रपां पटैः समावेष्टच [13]लोचनानि विमोचयेत् ।
[14]लेखयित्वा यथा सूच्या [15]पक्ष्मरेखां च मण्डलम् ॥४॥
ततः [16]सुवर्णसूच्या तु नेत्रमन्त्रेण लेखयेत् ।
[17]अर्पयेन्मधुसर्पिभ्यां हेमदूर्वाभिरक्षिषु ॥५॥
कृष्णां गां कपिलां वापि स्थापयेत्प्रतिमाग्रतः ।
[18]पृष्ठवत्सं च [19]गोवक्त्रं [20]गोलिङ्गेनैव दर्शयेत् ॥६॥
तदग्रे स्थण्डिलं [21]कुर्याच्छालिभिश्चतुरङ्गुलम् ।
गोमूत्रं गोमयं[22] क्षीरं दधि [23]सर्पिः कुशोदकम् ॥७॥
मध्विक्षुरससारं च[24] स्थापयित्वार्चयेत्क्रमात् ।
[25]आपो हि ष्ठेति मन्त्रेण प्रतिमामभिषेचयेत् ॥८॥
अर्चयेद्गन्धपुष्पाद्यैर्वस्त्रैराभरणैरपि ।

[[26]ग्रामप्रदक्षिणम्]

रथे वा शिबिकायां वा रङ्गे [27]वारोप्य यत्नतः[28] ॥९॥
ग्रामं वा नगरं वापि शनैः कुर्यात्प्रदक्षिणम् ।

[[29]जलाधिवासः]

नद्यां वापि तटाके वा प्रतिमां संप्रवेशयेत् ॥१०॥

---

[12] प्रपां पट्टैः सदा०—अ; पटैः प्रपां समावेष्टच—ए.

[13] लोचनान्यभिमो०—ए.

[14] लोकयित्वा—ए.

[15] पक्षं रेखांश्च—अ, इ; पक्ष्मं रेखाण्डमण्डलम्—आ; पक्ष्मरेखाण्डमण्डलम्—ई; पक्ष्मरेखाश्च मण्डलम्—ए.

[16] स्वर्णसूच्या—इ; स्वर्णा सुसूच्या तु—ए.

[17] अर्चयेन्मधु—उ; अत्र पूर्वोत्तरसामरस्याय मधुसर्पिभ्यां मन्त्राभ्यां मधुसर्पिषी अर्पयेदिति व्याख्येयमिति भाति। अत्र **११**.४ उ०, तथा १२.७ पू० तथा तयोष्टिप्पणी च द्रष्टव्या ।

[18] पृष्ठं वक्त्रस्य—अ, आ, इ, ई, उ; पटं वक्त्रस्य—ए; 'सवत्सां गां प्रदर्शयेत्' **रौरवे** क्रियापादे (३१.१५ पू०; ३४.१७ पू०)' 'कृष्णां गां वा सुतान्विताम्' (**रौरवोत्तरे** १७.११. उ०) इति दर्शनादत्र 'पृष्ठवत्सं च गोवक्त्रम्' इति पाठः शोधितः ।

[19] गोवक्त्रं—इ; गोर्वक्त्रं—ए.

[20] गोलिङ्गेन—गोमन्त्रेण; 'गौर्धेनुभव्यमन्त्रेण सवत्सां गां प्रदर्शयेत्' (**रौरवे** क्रियापादे ३१.१५पू०); 'गौर्धेनुभव्या' इति **याजुषमन्त्रप्रश्ने** २.१०.८ स्थितेन मन्त्रेण ।

[21] कृत्वा शालिभिः—आ, ई, ए.

[22] गोमया—उ.

[23] सर्पिकुशो०—आ, उ, ए.

[24] मधुरिक्षुरसं चैव—अ; मधरिक्षुरसारं च—इ, ए; मधुनिक्षुरसांश्चापि—उ.

[25] **तै० संहिता** ४.१.५.२.

[26] 'मालाभरणवस्त्राद्यैर्बिम्बान्संभूष्य देशिकः ।
रङ्गे वा शिबिकायां वा रथे वारोप्य भक्तितः ।
सर्वालंकारसंयुक्तं कृत्वा ग्रामप्रदक्षिणम् ।'
(**पूर्वकारणे** ७६.१७, १८ पू०)

[27] वा योप्य—अ, इ; वा स्थाप्य—उ.

[28] रत्नतः—ए.

[29] 'ततो जलाशयं प्राप्य तीरे समतलं कुरु ।
स्थण्डिलं शालिभिः कृत्वा बिम्बं तत्रैव विन्यसेत् ॥

[30]जलाशये प्रपां [30]कुर्यात्पटेनावेष्टयेत्प्रपाम् ।
[31]कुशैश्च नववस्त्रैश्च प्रतिमां [32]वेष्टयेत्ततः ॥११॥
प्रवेशयेत्प्रपामध्ये शाययेत्प्राचि शीर्षकम् ।
[33]अब्लिङ्गानि जपित्वा तु पुण्याहं वाचयेत्ततः ॥१२॥
एकरात्रं त्रिरात्रं वा [34]पञ्चरात्रमथापि वा ।

[[35]प्रतिमायाः प्रासादप्रवेशनम्]

[36]जलादुत्तार्य[37] बिम्बं तु प्रोक्षयेत्तु [38]कुशोदकैः ॥१३॥
अर्चयेद्गन्धपुष्पाद्यैर्वस्त्रैराभरणैरपि ।
[39]रथमारोप्य यत्नेन प्रासादं संप्रवेशयेत् ॥१४॥

[[40]मण्डपः, तत्र वेदिकाकुण्डकल्पनं च]

[41]प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम् ।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ॥१५॥

हृदा गन्धादिभिः पूज्य बिम्बान्वस्त्रेण वेष्टयेत् ।
जलमध्ये प्रपां कृत्वा वितानध्वजसंयुताम् ॥
दर्भमालासमायुक्तां चतुर्गात्रसमन्विताम् ।
तन्मध्ये कण्ठदघ्ने तु जले वै फलकोपरि ॥
प्रतिमां शाययेद्विद्वान् प्राक्शिरश्चोर्ध्ववक्त्रकम् ।
ऋषींस्तत्रोत्तरे पार्श्वे पूर्ववच्छाययेद्बुधः ॥
अभितः कलशानष्टौ लोकपालाधिदैवतान् ।
सूत्रादिभिः समोपेतानीशानेन तु पूजयेत् ॥
एकरात्रं द्विरात्रं वा त्रिरात्रं वा जलोषितम् ।'
(**पूर्वकारणे** ७६.१८ उ०––२३)

[30] कृत्वा पटे०––आ, ई.

[31] आशाभिर्नव०––इ; कुशाभिर्नव०––ए.

[32] परिवेष्टयेत्––ए.

[33] अम्बिकानि––अ, इ, उ, ए; अम्बकानि––आ, ई; अब्लिङ्गानि 'आपो हि ष्ठा इत्यादि सूक्तानि (**तै० संहिता** ५. ६.१); १२. ८ पू० टिप्पणी द्रष्टव्या.

[34] पञ्चराात्राधिवासयेत्––अ; पञ्चरात्रेऽधिवासयेत्––आ, ई; पञ्चरात्रमधिवासयेत्––इ; पञ्चरात्रिशिवासयेत्––ए.

[35] 'सर्वातोद्यसमायुक्तं सर्वालङ्कारसंयुतम् ।
जलादुत्तीर्य बिम्बांश्च स्थापयेद्ब्रह्मपञ्चकैः ॥
तस्य पश्चिमभागे तु फलकोर्ध्वे न्यसेदृषीन् ।
वस्त्रकूर्चादिकं त्यज्य पूर्ववच्छुद्धिमाचरेत् ॥
गन्धपुष्पादिभिस्तत्र ईशानेन तु पूजयेत् ।'
(**पूर्वकारणे** ७६.३५ उ०––३७)

[36] शिलादिप्रतिमा पूर्वं पूजयेत्सकुशाम्भसा––ए.

[37] ०दुत्तीर्य––अ, इ, ई, उ.

[38] कुशाम्भसा––आ, इ, ई, उ.

[39] प्रतिमारोप्य रत्नेन––ए.

[40] 'आलयस्याग्रके वापि दक्षिणे चोत्तरेऽपि वा ।
द्वादशं दशहस्तं वा नवहस्तमथापि वा ॥
विकारस्तम्भसंयुक्तं मण्डपं चतुरश्रकम् ।
मध्यमे वेदिकां कुर्याद्गुणभागैकभागया ॥
रत्निमात्रसमुत्सेधां दर्पणोदरसंनिभाम् ।
कुण्डानि कल्पयेद्धीमान्मानुषे तु पदे हि तत् ॥
वेदाश्रं शशिखण्डं च भूताश्रं तु गुणाश्रकम् ।
महाशासु प्रकल्प्याथ कोणेष्वेव सरोरुहम् ॥
शक्रशांकरयोर्मध्ये वृत्तं प्राधानिकं कुरु ।
स्नानश्वभ्रे ततः प्राग्वत्कल्पयेन्मण्टपोत्तरे ॥'
(**पूर्वकारणे** ७६.२४––२८)

[41] 'ए' मातृकायां १५ पूर्वार्धं न दृश्यते ।

तन्मध्ये वेदिकां [४२]कुर्यान्नव[४३]भागैकभागिकाम्[४४]।
एकहस्तसमुत्सेधां[४५] दर्पणोदरसंनिभाम्[४६] ॥१६॥
[४७]वेदिकायास्ततो बाह्ये नवकुण्डं प्रकल्पयेत्।
चतुरश्रं भवेत्प्राच्यामाग्नेय्यां योनिरेव[४८] च ॥१७॥
दक्षिणे त्वर्धचन्द्रं [४९]च त्रिकोणं नैरृते दिशि[५०]।
प्रतीच्यां [५१]वर्तुलं कुण्डं [५२]वायव्यां तु षडश्रकम् ॥१८॥
उदीच्यां पद्मकुण्डं तु [५३]ऐशान्यामष्टकोणकम्।
[५४]ईशानेन्द्रकयोर्मध्ये वृत्तकुण्डं प्रकल्पयेत् ॥१९॥
[५५]त्रिमेखलासमायुक्तं नाभियोनिसमन्वितम्।

[[५६]मण्डपालंकारः]

प्रोक्षयेत्पञ्चगव्येन गोमयेनानुलेपयेत् ॥२०॥
[५७]स्तम्भान्वस्त्रैः समावेष्टय दर्भमालाभिरावृतम्[५८]।
मुक्तादामैर्वितानैश्च[५९] ध्वजैश्च फलपल्लवैः ॥२१॥
अङ्कुरैः पूर्णकुम्भैश्च [६०]दशास्त्रैरष्टमङ्गलैः[६१]।
मण्डपं समलंकृत्य [६२]वेष्टयेच्चित्रकैः पटैः ॥२२॥

---

४२ कृत्वा नव०—आ, ई.

४३ ०भागेक०—उ.

४४ ०भागिकम्—अ, इ, ई; ०भागकम्—आ; ०भागिके—उ; ०भागिनम्—ए.

४५ ०समुत्सेधं—अ, आ, इ, ई, उ, ए.

४६ ०संनिभम्—अ, आ, इ, ई, उ, ए.

४७ वेदिकायां ततो—आ, ई, ए.

४८ योनिमेव—आ, इ, ई, उ, ए.

४९ तु—अ, इ, उ, ए.

५० दिक्शब्दस्य पुंसि प्रयोगः। ३,४ पू० टिप्पणीं पश्यत।

५१ वर्तुलीकृत्य कुण्डं—ए.

५२ वायव्ये—आ, ई; वायव्यं—ए.

५३ ईशान्यामष्ट०—ए.

५४ ईशान इन्द्रयो०—अ, उ, ए; ईशानकोणयो०—इ; ईशानेन्दयो०—ई.

५५ त्रिमेखलसमा०—उ; त्रिमेकलसमा०—ए.

५६ 'पश्चाच्छिल्पिनमुद्वास्य गोमयेन तु लेपयेत्।
मण्टपं भूषयेद्धीमान्कृतद्वारसमन्वितम् ॥
वेदतोरणसंयुक्तं गात्रवेष्टनसंयुतम्।
वितानदर्भमालाभिरङ्कुरैरष्टमङ्गलैः ॥
तरङ्गवेष्टनोपेतं भूसुरान् भोजयेत्ततः।
उच्छिष्टं तु ततोद्वास्य गोमयेनानुलेपयेत् ॥'
'पुण्याहं वाचयित्वा तु द्वारपूजादिपूर्वकम्' ॥
(**पूर्वकारणे** ७६.२९—३१,३२ उ०)

५७ स्ताम्भान्—अ, आ, इ.

५८ ०राजितम्—आ, ई; ०रावृतौ—इ, ए.

५९ ०विदानैश्च—इ.

६० दशास्त्रैः=दशायुधैः—
'वज्रं च शक्तिं दण्डं तथैव च ॥
खड्गं चैव तथा पाशं सृणिं पश्चाद्गदामपि।
त्रिशूलं पद्मचक्रे च स्वदिग्भागे तु पूजयेत् ॥'
(**अजिते** २०.२२१ उ०, २२२)

६१ ०मङ्गलम्—उ, ए; अष्टमङ्गलानि — **रौरवोत्तरे** ५.८ पू०; ८.५ पू० टिप्पण्याम्; तथा १६.६१ श्लोके च द्रष्टव्यानि

६२ वेष्टयेच्छत्रकैः—अ, इ, उ; वेष्टयेत्श्चत्रकैः—ए.

[[६३]शयनाधिवासः]

स्थण्डिलं कल्पयेत्तत्र वेदिकोपरि शालिभिः ।
[६४]शयनं कल्पये[६५]त्तत्र [६६]ह्यण्डजाद्यैरनुक्रमात् ॥२३॥
कुशैर्वस्त्रैः समाच्छाद्य [६७]प्रतिमां समलंकृताम् ।
[६८]शयने शाययेद्रात्रौ प्राक्शिरश्चोर्ध्ववक्त्रकम् ॥२४॥

[[६९]कुम्भाधिवासः]

कुशैर्वस्त्रैः समाच्छाद्य; [७०]नवकुम्भेऽधिवासयेत् ।
[७१]ससूत्रान्सोदका[७२]न्वस्त्ररत्नहेमकुशान्विता[७३] ॥२५॥
सकूर्चान्सापिधानांश्च[७४] नवकुम्भान्प्रकल्पयेत् ।
दक्षिणे [७५]कर्णपार्श्वे तु मूर्तिकुम्भं[७६] न्यसेत्पृथक् ॥२६॥
परितश्चाष्टकुम्भान्वै[७७] [७८]विन्यसेद्वेदिकोपरि ।
[७९]ईशानमूर्ति पुरुषं [८०]शर्वं घोरं कर्पादिनम् ॥२७॥
[८१]सद्यमीश्वरकं वामं शिवमावाहयेत्ततः[८२] ।

---

[६३] 'वेद्यां च स्थण्डिलं कृत्वा अष्टद्रोणेन शालिना ।
स्थण्डिलैः समलंकृत्य तिलदर्भैः परिस्तरेत् ॥
शयनं कल्पयेद्धीमानण्डजाद्यैरनुक्रमात् ।
शाययेद्दक्षिणामूर्ति प्राक्शिरश्चोर्ध्ववक्त्रकम् ॥
रक्तवस्त्रेण संवेष्टच हृदयमन्त्रं समुच्चरन् ।
शयनोपरि विन्यस्य कूर्चं चेद्वर्तनान्वितम् ॥'
(दीप्ते ४६.१६–१८)

[६४] नयने कल्प०––ए.

[६५] ०त्तत्रारण्ड०––उ.

[६६] 'हि' नास्ति––अ, इ, ए.

[६७] 'ए' मातृकायां २४ द्वितीयपादमारभ्य २५ प्रथमपादान्तं न दृश्यते ।

[६८] प्रतिमां––अ.

[६९] 'शिरःस्थाने न्यसेत्कुम्भं दक्षिणामूर्तिदैवतम् ।
अभितः कलशानष्टौ लोकपालाधिदैवतान् ॥
सकूर्चान्सापिधानांश्च सवस्त्रान्वारिपूरितान् ।
रत्नहेमसमायुक्तान्पल्लवैरुपशोभितान् ॥
पूजयित्वा यथान्यायं गन्धपुष्पादिना हृदा ।
मङ्गलाष्टकरूपाणि द्वारकुम्भानि योजयेत् ॥
यकारादष्टमं बीजं मायानलसमन्वितम् ।
औकारस्वरसंयु तं बिन्दुनादसमायुतम् ॥
कुम्भमध्ये न्यसेद्देवं तद्रूपं च विभावयेत् ।
इन्द्रादिलोकपालानां बीजं तत्तद्घटे न्यसेत् ॥
नैवेद्यं दापयित्वा तु'
(दीप्ते ४६.१९––२४ पू०)

[७०] नवकुम्भाधिवासयेत्––अ, इ, उ, ए; 'नवकुम्भाधिवासनम्' इति पाठश्चेत्सुष्ठु ।

[७१] सकुशान्––ए.

[७२] ०न्वस्त्रान्––अ, इ, ए.

[७३] ०न्वितम्––ई.

[७४] सपिधानांश्च––आ.

[७५] कपालपार्श्वे––ए.

[७६] ०कुम्भान्––अ, इ, उ.

[७७] ०कुम्भानि––अ, इ, ए; ०कुम्भस्य––उ.

[७८] निविन्यसे०––उ.

[७९] ईशानं मूर्तिपुरुषं––अ, आ, इ, ई; ईशानमूर्तिपुरुषं––उ, ए.

[८०] सर्वं––आ; शतघोरं––ए.

[८१] सव्यमीश्वरकं––इ; सद्याशष्टकं––ए.

[८२] अत्र नवकुम्भेषु ईशानमूर्ति-तत्पुरुष-शर्व-अघोर-कर्पादि-सद्योजात-ईश्वर-वामदेव-शिवाख्यान् आवाहयेदित्यर्थः ।

स्वस्वलिङ्गं समुच्चार्य गन्धाद्यैरर्चयेत्क्रमात् ॥२८॥

[[८३]होमः]

[८४]पालाशं [८५]खादिरं प्लक्षं [८६]शम्यश्वत्थमुदुम्बरम् ।
अपामार्गं [८७]वटं बिल्वं समित्पूर्वादिषु[८८] क्रमात् ॥२९॥
[८९]समिद्घृतचरुक्षीरयववेणुप्रियङ्गवः[९०] ।
[९१]लाजसर्षपमाषाश्च[९२] तिला[९३] मधुगुलाः[९४] स्मृताः[९५] ॥३०॥
[९६]अग्नेः [९७]सदनमासाद्य [९८]ह्याज्यभागान्तमाचरेत् ।
यस्यां [९९]दिशि [१००]स्थिता [१०१]मूर्तिस्तस्यां [१०२]कुण्डाधिपः स्मृतः ॥३१॥
तस्मिन्कुण्डे समावाह्य स्वलिङ्गेनार्चयेत्क्रमात् ।
[१०३]स्वलिङ्गैः समिधो [१०४]हुत्वा हृदयेन घृतं हुनेत् ॥३२॥
अन्नमन्त्रेन[१०५] जुहुयादाप्यायेन[१०६] पयो हुनेत् ।

---

[८३] 'स्थापको मूर्तिपैः सार्धं होमकर्म समारभेत् ।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ॥
समिदाज्यचरूँल्लाजान् बिल्वपत्रं यवं तिलम् ।
होमद्रव्याणि सप्तैताञ्जुहुयादादिशैवकः ॥
महाशासु पलाशं तु बिल्वं च विदिशासु च ।
प्रधानस्य पलाशं तु सर्वेषामिध्ममेव हि ॥
समिधः सद्यमन्त्रेण घृतं मूलेन होमयेत् ।
चरुं वामेन जुहुयाल्लाजं तु हृदयेन तु ॥
बिल्वपत्राणि शिरसा यवं नेत्रेण होमयेत् ।
पुरुषेण तिलं हुत्वा द्रव्यान्ते व्याहृतिं हुनेत् ॥
प्रत्येकं शतमर्धं वा तदर्धं वापि होमयेत् ।
रुद्रायेति मन्त्रेण हुत्वाज्येनैव षोडशम् ॥
स्पृष्ट्वा तु मस्तकं पश्चादघोरायेति मन्त्रतः ।
आज्येन पूर्ववद्धुत्वा स्पृशेत्तत्तत्प्रदेशतः ॥
त्रियम्बकेन मन्त्रेण प्राग्धृत्वा संस्पृशेत्कटिम् ।
शिवाङ्गैश्चैव विद्याङ्गैः पञ्चब्रह्मैश्च मूलकैः ॥
बीजमुख्यं घृतेनैव प्रत्येकं तु शतं हुनेत् ।
नृत्तगेयैश्च विविधैं रात्रिशेषं व्यपोह्य च ॥'
(पूर्वकारणे ७६.५१—५९)

[८४] समित्प्रकरणे वृक्षवाचकशब्दानां क्लीबे प्रयोग इति ५.१८ पू० टिप्पण्यां निर्दिष्टम् ।; पलाशं—अ, इ, उ; पालाश०—ए.

[८५] खदिरं—अ, इ.

[८६] शम्याश्वत्थ०—इ,उ, ए; शाम्यश्वत्थ०—ई.

[८७] घटं—अ, इ, उ.

[८८] पूर्वादिकं—इ.

[८९] समित्कुशचरु०—आ, ई; समिद्घृतं चरु—उ; समित्सृतं चरुक्षीरं—ए.

[९०] ०प्रियङ्गु वा—ए.

[९१] लाजं—ए.

[९२] ०माषश्च—उ.

[९३] तिलं—आ, ई.

[९४] गुलं—अ, आ, इ, ई, ए; गुठे—उ.

[९५] स्मृतम्—उ.

[९६] अनेनवसमाद्यामा—ए.

[९७] सदनामासाद्य—अ.

[९८] आज्य०—अ, इ, उ, ए.

[९९] निशि—इ.

[१००] स्थिते—अ, इ; स्थितो—आ, ई, ए.

[१०१] मूर्ति तस्मिन्—इ, ए; मूर्तिस्तस्मिन्—उ.

[१०२] कुण्डाधिपाः स्मृताः—अ, आ, इ, ई; कुण्डाधिप स्मृतः—उ; कुण्डोऽधिपः स्मृतः—ए.

[१०३] स्वैलिङ्गसमिधां हुत्वा घृतेनैव हृदं हुनेत्—ए.

[१०४] कृत्वा—उ.

[१०५] अन्नेन=अन्नसूक्तेन; **तै० ब्रा०** २.८.८.

[१०६] आप्यायने—ए; आप्यायेन='आप्यायस्व' इति मन्त्रेण; **ऋग्वेदे** १.९१.१६; **तै० संहिता** ३.२.५.३.

[107]यवं हुत्वाग्निमीलेन[108] सावित्र्या[109] वैणवं हुनेत् ॥३३॥
[110]प्रियङ्गवमिषे त्वेति[111] त्र्यम्बकेणैव[112] लाजकम् ।
[113]सर्षपं [114]चाग्न आयेति [115]मानस्तोकेन माषकम् ॥३४॥
[116]शं नो देव्या तिलं हुत्वा [117]स्वलिङ्गेन [118]मधुं हुनेत् ।
[119]कद्रुद्रेण गुलं हुत्वा प्रत्येकं [120]चाष्टविंशतिः[121] ॥३५॥
प्रतिद्रव्यं कुशैः स्पृष्ट्वा [122]प्रतिमां [123]स्पर्शयेत्ततः ।
[124]पञ्चाङ्गैश्च षडङ्गैश्च [125]मूर्तिनामादिबीजकैः ॥ ३६॥
पुनराहुतिमाज्येन हुत्वाङ्गैस्तु कुशैः स्पृशेत् ।
त्रयोदशद्रव्ययुतं[126] पूर्वाभिमुखमास्थितः[127] ॥३७॥
[128]स्वर्मूर्तिलिङ्गमुच्चार्य स्रुचा पूर्णाहुतिं हुनेत् ।
कुशैः स्पृष्ट्वा तु सर्वाङ्गम्'

[[129]रत्नन्यासः, [130]प्रतिमास्थापनं च]

'शयनाद्बिम्बमुद्धरेत्[131] ॥३८॥

---

[107] यवां—ए.
[108] ०मीशेन—अ, इ, उ, ए; 'अग्निमीले' इत्यादिमन्त्रेण; **ऋग्वेदे** १.१.१; **तै० संहिता** ४.३.१३.३.
[109] सावित्र्या=गायत्र्या 'तत्सवितुः' इति मन्त्रेण; **ऋग्वेदे** ३.६२.१०; **तै० संहिता** १.५.६.१२.
[110] प्रियङ्गवम् ऋतं त्वेति—अ; प्रियङ्गवा ऋषेत्वेति—इ; प्रियङ्गवमिषो त्वेति—ई; प्रियङ्गवम् ऋषेत्वेति—उ; प्रियङ्गवं गषेत्वेति—ए; प्रियङ्गुशब्दस्य 'प्रियङ्गव' इत्यकारान्ते प्रयोग इति भाति।; ५.२३ पू० श्लोकेऽप्येवं दृश्यते।
[111] **तै० संहिता** १.१.१.१.
[112] त्र्यम्बकेनैव—अ, इ, ई, उ, ए; **ऋग्वेदे** ७.५९.१२; **तै० संहिता** १.८.६.२.
[113] समित्पञ्चाग्निमायेन—अ.
[114] चाग्न आयेन—आ; चाग्निमायेन—इ, उ, ए; 'अग्न आयाहि' इति मन्त्रेण; **ऋग्वेदे** ६.१६.१०; **तै० ब्राह्मणे** ३.५.२; **सामवेदे** १.६६०.
[115] **ऋग्वेदे** १.११४.८; **तै० संहिता** ४.५.१०.६.
[116] **ऋग्वेदे** १०.९.४; **तै० आरण्यके** ४.९२; **अथर्ववेदे**—१.६.१.
[117] स्वलिङ्गेन—मधुमन्त्रेण 'मधु वाता ऋतायेति मधुना तर्पयेद् बुधः' **रौरवे** क्रियापादे ३१,१४ पू०; **ऋग्वेदे**—१.९०.६. **तै० संहिता** ४.२.९.७.
[118] मधु हुनेत्—ई; मधू हुनेत्—ए; मधुशब्दस्यात्र पुंसि प्रयोगो वृत्तार्थ इति भाति।
[119] 'कद्रुद्राय' इति मन्त्रेण; **ऋग्वेदे** १.४३.१; **तै० आरण्यके** १०.२५; कर्तृकेण—इ; कमृन्द्रोण—उ; रुद्र रौद्र गुलं—ए;
[120] एतद्विषये ९.२५.उ० टिप्पणी द्रष्टव्या।
[121] ०विंशति—इ, ए.
[122] मूलेन—उ.
[123] स्पर्शशे—ई; स्वनियोत्ततः—ए.
[124] पञ्चाङ्गेन षडङ्गेन—अ, आ, इ, ई, उ; पञ्चाङ्गषडङ्गविवरणम् ९.२२; ११.२२. श्लोकयोर्दृश्यते।
[125] मूतीनामादि०—इ; मूर्तनामादि०—ए.
[126] ०द्रव्यसंयुक्तं—अ, इ, उ, ए; ०द्रव्ययुतैः—आ, ई.
[127] ०मुखसंस्थितैः—ए.
[128] स्वमूर्तेलिङ्ग०—ई.
[129] 'प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम् ।
तण्डुलैः समलंकृत्य तिलदर्भैः परिस्तरेत् ॥
तन्मध्ये विन्यसेत्पीठं तत्र रत्नानि विन्यसेत् ।

पूर्वाभिमुखमास्थाप्य गन्धादिभिरथार्चयेत् ।
[१३२]प्रासादे स्थापनस्थाने[१३३] [१३४]नवरत्नानि विन्यसेत् ॥३९॥
सुवर्णं विन्यसेत्तत्र प्रतिमां संप्रवेशयेत् ।
ईशानेनैव मन्त्रेण स्थापयेन्मूर्तिपैः[१३५] सह ॥४०॥
सकुशेन [१३६]करेणैव कुम्भकूर्चोदकेन च ।
स्वस्वलिङ्गं समुच्चार्य [१३७]प्रतिमायां न्यसेत्क्रमात् ॥४१॥
[१३८]पञ्चाङ्गानि षडङ्गानि [१३९]स्वस्थानेषु च विन्यसेत् ।
प्रोक्ष्याभिषेचनं कृत्वा गन्धाद्यैरर्चयेत्क्रमात् ॥ ४२॥
आचार्यं पूजयेत्तत्र वस्त्रैराभरणैरपि ।
होमकान्पूजकान्मूर्तिधारकान्परिचारकान्[१४०] ॥४३॥
पूजयेद्धेमवस्त्राद्यैः शिवभक्तान् द्विजानपि ।
प्रायश्चित्ता[१४१]हुतिं हुत्वा स्विष्टान्तं जुहुयात्ततः ॥४४॥
[१४२]गुलान्नं पायसान्नं च गुलाज्यदधिभिर्ददेत्[१४३] ।

माणिक्यं चेन्द्रनीलं च मरकतं चैव मौक्तिकम् ॥
वज्रं चैव हृदा धीमान् मध्यादिक्रमशो न्यसेत् ।
तत्र देवं समायोज्य सुस्निग्धं कारयेत्ततः'
(दीप्ते ४६.३--५)

[१३०] 'प्रभाते स्थापनं भवेत् ।
आचार्यो मूर्तिपैः सार्धं स्नानत्रयमथाचरेत् ॥
बिम्बं कुम्भं च वह्निं च पूजयित्वा विशेषतः ।
जयादिरभ्याधानं च राष्ट्रभृच्च हुनेत्क्रमात् ॥
उत्थापयेत्ततो देवं शयनात्कुम्भसंयुतम् ।
प्रदक्षिणं ततः कृत्वा प्रासादं घोषसंयुतम् ॥
स्नानवेद्यां न्यसेद्देवमासनोपरि देशिकः ।
मुहूर्तं निरीक्ष्य दैवज्ञो गुरवे संनिवेदयेत् ॥
कुम्भाद् बीजं समादाय तत्तद्दिशि सुविन्यसेत् ।
व्योमव्यापिनमुच्चार्य अभिषेकं समाचरेत् ॥
कलाङ्गानि ततो न्यस्त्वा पूजयित्वा विधानतः ।
स्नपनं कारयेदन्ते यथाशक्ति विशेषतः ॥
अचलं चालये स्थाप्यं प्रोक्षणादेव शुध्यति ।
शुद्धदेशे समादाय पूजयेद्विधिना सह ॥
आचार्यमूर्तिपांश्चैव पूजयित्वा यथाविधि ।
एवं यः कुरुते मर्त्यो ज्ञानं मुक्तिमवाप्नुयात् ॥'
दीप्ते(४६.२८--३५)

[१३१] ०मुच्चरेत्--इ.

[१३२] प्रासाद०--इ, ई; प्रासादं--ए.

[१३३] ०स्थापने स्थाने--आ; स्थापनं स्थान--उ.

[१३४] 'माणिक्यं पद्मरागं च वैडूर्यं च प्रवालकम् ।
मौक्तिकं स्फटिकं वज्रमिन्द्रनीलं तथैव च ॥
पुष्परागमपीत्येतन्नवरत्नमुदाहृतम् ।'
(रौरवे क्रियापादे २४.३९, ४० पू०);
नवरत्नादि--ए.

[१३५] मूर्तिभिः--ए.

[१३६] क्रमेणैव--अ, आ, इ, ई, उ, ए; '११.२९,१३.३९'श्लोकयोः 'सकुशेन करेणैव' इति दर्शनात्तदनुसारेणात्रापि तथैव पाठः साधितः ।

[१३७] प्रतिष्ठायां--आ; प्रदीच्यय्यां--ए.

[१३८] अयं श्लोकः 'आ, ई' मातृकयोर्न दृश्यते ।; पञ्चाङ्गषडङ्गविवरणं ९.२२,११.२२ श्लोकयोर्दृश्यते ।

[१३९] स्वस्वस्थानेषु--ए.

[१४०] ०वारकान्--ए.

[१४१] ०हुतिहुत्वा विष्ठान्तं--इ.

[१४२] एतद्विषये ९.३७ पू० टिप्पणी द्रष्टव्या ।

[१४३] ०दधिभिर्यजेत्--आ, ई.

ब्राह्मणान्भोजयेत्तत्र यथाविभवविस्तरैः[१४४] ॥४५॥

[१४५]इति [१४६]श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे दक्षिणामूर्तिप्रतिष्ठा[१४७]विधिर्नाम
दशमः पटलः ॥

[१४४] ०विस्तरम्--आ, ई.
[१४५] इति रौरवोत्तरे--ए.
[१४६] श्रीरौरवोत्तरे--अ; 'श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे' इति 'आ, ई' मातृकयोर्न दृश्यते।
[१४७] 'विधिः' इति 'आ, ई' मातृकयोर्न दृश्यते।; विधिदशमपटलः--उ; विधिर्दशमाध्यायः--ए.

एकादशः पटलः

[1]विष्णुप्रतिष्ठाविधिः

[2]विष्णुप्रतिष्ठां [3]वक्ष्यामि विशेषाच्छृणु ते रुरो।

[[4]प्रतिष्ठायोग्यस्थानम्]

प्रासादं कारयेदुक्तस्थाने विष्णोर्विशेषतः ॥१॥

[[5]प्रतिमाद्रव्यम्]

शिलाभिर्दारुभिर्लोहैः कुर्याद्वा प्रतिमां पृथक्।

[[6]नयनोन्मीलनम्]

[7]प्रासादपुरतः कुर्यात्प्रपां वेदिकया सह ॥२॥
पूर्वाभिमुखमास्थाप्य[8] प्रतिमां वेदिकोपरि।
[9]पटेनावेष्टयेत्तत्र लोचने द्वे [10]विमोचयेत् ॥३॥
[11]सूचिभ्यां हेमताम्राभ्यां[12] नेत्रमन्त्रेण लेखयेत्।

---

[1] विष्णुप्रतिष्ठाविषये **अचिन्त्यविश्वसादाख्ये** ६४; **पूर्वकारणे** ९९; **पारमेश्वरे** (टि. १४६. पृ० ४६, ४७); **रौरवे** क्रियापादे ३६; **वीरे** (टि.१२३ पृ० ३२––३७); **संतानसंहितायां** ३३ पटला द्रष्टव्याः।

[2] विष्णोः प्रतिष्ठां––आ, ई.

[3] प्रवक्ष्यामि श्रुणु तो रुरुरो तथा––ए.

[4] 'पश्चिमे विष्णुमूर्तिं च' ४.४उ०' एतद्विषये पुनः **रौरवे** क्रियापादे ३६.१––३पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः।

[5] 'शिलालोहमृदा कुर्याच्छास्त्रदृष्टेन कर्मणा।'
(**वीरे** पृ०३३ श्लो० १० उ०);
'शिलालोहमयं रक्तं मृण्मयं वापि कारयेत्'
(**संतानसंहितायाम्** ३३.७ उ०);
'कृत्वैवं प्रतिमां लोहैर्मृदा वा धातुजैरपि'
(**रौरवे** क्रियापादे ३६.७ उ०)

[6] 'नयनमोक्षणं कुर्यान्नेत्रद्वययुते दिने।
क्षीरं मधु घृतं चैव कांस्यपात्रे तु विन्यसेत् ॥
आढकं वा तदर्धं वा तदर्धं चाथवा भवेत्।
स्वर्णसूच्चा तु संलिख्य कपिलां दर्शयेत्ततः ॥
विष्णुमूलेन देवेशि नेत्रे क्षीरं तु विन्यसेत्।
पञ्चब्रह्मेण देवेशि घृतं चैव तु संस्पृशेत् ॥
षडङ्गेन तु देवेशि मधुना संस्पृशेत्ततः।
ब्राह्मणान् दर्शयेत्तत्र स्वस्तिसूक्तोक्तिसंयुतम् ॥'
(**संतानसंहितायाम्** ३३.१७ उ०––२१ पू०); एतद्विषये पुनः **रौरवे** क्रियापादे ३६.१२ उ०, १३ श्लोकस्तदीयटिप्पण्यश्च द्रष्टव्याः

[7] प्रासादं पुरतः कृत्वा प्रपायां वेदिका सः––ए.

[8] ०मुखसंस्थाप्य––ए.

[9] पटेन वेष्टये०––ए.

[10] विमोचने––ए.

[11] 'इ' मातृकायां '४' श्लोकः '५' पूर्वार्धं च न दृश्येते।; सूचिभ्यो––ए.

[12] ०ताम्रादि––अ, उ, ए.

[13]तर्पयेन्मधुसर्पिभ्यां [14]स्वलिङ्गाभ्यां द्विनेत्रयोः ॥४॥
[15]तल्लिङ्गं मन्त्रमुच्चार्य गोमुखं संप्रदर्शयेत् ।
[16]विप्रांश्च [17]सप्त[18]धान्यं च [19]स्वैः [20]स्वैर्लिङ्गैश्च दर्शयेत् ॥५॥

[[21]बेरशुद्धिः, जलाधिवासश्च]

[22]ततः [23]प्रतिमामुद्धृत्य [24]पञ्चगव्येन सेचयेत् ।
[25]जलेऽधिवासयेत् पश्चात्तल्लिङ्गैः[26] प्राग्विशेषतः ॥६॥
[27]जलात्प्रतिमामुद्धृत्य प्रासादं संप्रवेशयेत् ।

[[28]मण्डपः, तत्र कुण्डवेदिकाकल्पनं च]

प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम् ॥७॥

---

[13] अर्पये०—अ, उ; अर्चये०—ए.

[14] स्वलिङ्गाभ्यां—मधुघृतमन्त्राभ्यां 'मधुवाता ऋतायेति मधुना तर्पयेद्बुधः ।' **रौरवे** क्रियापादे ३१.१४ पू०; **ऋग्वेदे** १.९०.६; **तै० संहिता** ४.२.९.७; 'घृतं मिमिक्षेति मन्त्रेण नेत्रयोस्तु घृतार्पणम्' **रौरवे** क्रियापादे ३१.१४ उ०; **ऋग्वेदे** २.३.११; **तै० आरण्यके** १०.१२.

[15] यल्लिङ्गं—अ, उ, ए; तल्लिङ्गं मन्त्रं=गोमन्त्रम्; 'गौर्धेनुभव्यमन्त्रेण सवत्सां गां प्रदर्शयेत् ।' **रौरवे** क्रियापादे ३१.१५पू०; **याजुषमन्त्रप्रश्ने** २.१०.८.

[16] विप्राश्चा—उ.

[17] **सप्तधान्यम्**—'तिलसर्षपमुद्गानि माषशिम्बाढकानि तु । कुलुत्थं सप्तबीजानि' (**पूर्वकारणे** २०.३९उ०—४०पू०)

[18] ०धान्यांश्च—अ, आ, इ, ई; ०धान्यश्च—उ; ०धान्याश्च—ए.

[19] स्वस्वरङ्गैश्च—उ; स्वस्वलिङ्गैश्च—ए.

[20] स्वैरङ्गैश्च—अ, इ; स्वैरङ्गैः प्रदर्श०—उ; 'स्वलिङ्गाभ्यां द्विनेत्रयोः' (११.४ उ०) इतिवत् 'स्वैर्लिङ्गैश्च' इति पाठः शोधितः।; स्वैर्लिङ्गैः=विप्रधान्यमन्त्रैः; 'ब्रह्मजज्ञानमन्त्रेण ब्राह्मणान्दर्शयेत्ततः' **रौरवे** क्रियापादे ३१.१५ उ०; **तै० संहिता** ४.२.८.४; 'येषामीशेति मन्त्रेण धान्यराशिं प्रदर्शयेत्' **सूक्ष्मे** ५६.२८ पू०; **तै० संहिता** ३.१.४.४.

[21] 'ग्रामप्रदक्षिणं कुर्याच्छिलालोहे विधीयते ।
जलाधिवासनं कुर्यात्पञ्चगव्येन स्नापयेत् ॥
प्रतिमां कण्ठदघ्ने तु जले चैवाधिवासयेत् ।
वस्त्रयुग्मेन संवेष्टय प्रच्छन्नपटसंयुतम् ॥
मूलमन्त्रेण विप्रेन्द्र जले चैवाधिवासयेत् ।
अभितः कलशानष्टौ लोकपालाधिदेवतान् ॥
गन्धपुष्पादिना पूज्य पायसान्नं बलिं ददेत् ।
एकरात्रं त्रिरात्रं वा पञ्चरात्रमथापि वा ॥
जलादुत्तीर्य पूर्वेद्युः स्नापयेत्पञ्चगव्यकैः ।'
(**वीरे** पृ० ३४ श्लो० २० उ०—२४); एतद्विषये पुनः **रौरवे** क्रियापादे ३६.१४, १५ पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[22] 'ए' मातृकायामिदमर्धं न दृश्यते ।

[23] ०प्रतिममुद्धृत्य—अ, इ.

[24] पञ्चगव्याभिषेचयेत्—अ, इ, उ.

[25] जलाधि—अ, इ, उ; जलपित्वासये०—ए.

[26] पश्चाद्यल्लिङ्गं—अ, आ, इ, उ, ए; पश्चात्तल्लिङ्गं—ई; तल्लिङ्गैः—अब्लिङ्गैः—'आपो हि ष्ठा' इत्यादिभिः; (**तै० संहिता**, ५.६.१).

[27] जलादुद्धृत्य प्रतिमां—आ, ई; जलात्प्रतिममुद्धृत्य—इ, ए.

[28] 'मण्डपं कारयेत्तत्र सप्ताष्टनवहस्तकम् ।
मध्यमे वेदिकां कुर्याद्रत्निमात्रसमुच्छ्रिताम् ॥
तालमात्रोच्छ्रितां वापि दर्पणोदरवत्कृताम् ।
वेदिबाह्ये तु परितो नव कुण्डानि कारयेत् ॥

चतुर्द्वारसमायुक्तं चतुस्तोरणसंयुतम् ।
तन्मध्ये वेदिकां कुर्यादेकहस्तसमुच्छ्रयाम्[२९] ॥८॥
वेदिकायास्ततो बाह्ये चतुष्कुण्डं प्रकल्पयेत् ।
चतुरश्रं धनुर्वृत्तं त्र्यश्रं पूर्वादिषु क्रमात् ॥९॥
[३०]त्रिमेखलासमायुक्तं नाभियोनिसमन्वितम् ।

[मण्डपालंकारः]

गोमयालेपनं कृत्वा [३१]वेष्टयेद्दर्भमालया[३२] ॥१०॥
मुक्ता[३३]दामवितानैश्च फलपल्लवदिग्ध्वजैः ।
अङ्कुरैः पूर्णकुम्भैश्च [३४]ह्यलंकृत्य तु मण्डपम् ॥११॥

[[३५]शयनाधिवासः]

स्थण्डिलं कारयेत्तत्र [३६]वेदिकोपरि शालिभिः ।
शयनं कल्पयेत्तत्र [३७]पटैर्वस्त्रैश्च कम्बलैः ॥१२॥
शाययेत्प्रतिमां तत्र [३८]प्राक्शिरश्चोर्ध्ववक्त्रकम् ।
पलाशपर्णदर्भाग्रैः[३९] कुशैर्वस्त्रैश्च वेष्टयेत् ॥१३॥

पूर्वे च दक्षिणे चैव पश्चिमे चोत्तरे तथा ।
चतुरश्रकुण्डमित्युक्तमीशान्यामष्टकोणकम् ॥
आग्नेय्यां निर्ऋतौ चैव वायव्ये तु तथैव च ।
वृत्तं कुण्डं प्रतिष्ठाप्य त्रिमेखलसमन्वितम् ॥
इन्द्रईशानयोर्मध्ये षडश्रं कुण्डमुच्यते ।
दर्पणोदरवत्कृत्वा गोमयेनानुलेपयेत् ॥'
(**संतानसंहितायाम्** ३३.२५ उ०–३० पू०) ; एतद्विषये पुनः **रौरवे** क्रियापादे ३६.१५ उ० श्लोकस्तदीयटिप्पणी च द्रष्टव्ये ।

[२९] ०समुच्छ्रयम् —अ, आ, इ, ई; ०समुच्छ्रितम् —उ.

[३०] त्रिमेखलसमा०—ई.

[३१] वेष्टयेत्पुष्प०—अ.

[३२] ०मालिकाम्—अ; ०मालिका—इ; ०मालिकाः —उ.

[३३] ०दामैर्वितानैश्च—अ, इ, उ,

[३४] अलं कृत्वा तु—अ, इ, उ.

[३५] 'द्रोणाष्टकशालीस्तु विन्यसेद्वेदिमध्यमे ।
तदर्धं तण्डुलं न्यस्य तदर्धं तु तिलानपि ॥
पद्ममष्टदलं लिख्य दर्भैश्चैव परिस्तरेत् ।
अण्डजैर्मुण्डजैश्चैव रोमजैश्चर्मजैस्तथा ॥
वामजैश्चैव कौशेयैः शयनं पञ्चकं स्मृतम् ।
शयने शाययेद्विष्णुं तन्मूलेन तु मन्त्रतः ॥'
(**सन्तानसंहितायाम्** ३३.३० उ०—३३पू०) ; एतद्विषये पुनः **रौरवे** क्रियापादे ३६.१६–२० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[३६] 'अ' मातृकायां १२ श्लोकस्य द्वितीयतृतीयपादौ न दृश्येते ।

[३७] वस्त्रैः—सामान्यवस्त्रैः पटैः—विशेषवस्त्रैः; ५.१६ उत्तरार्धेऽप्येवं प्रयोगः, तत्रैवमेव टिप्पणी दत्तास्ति ।

[३८] प्राक्छिरश्चोर्ध्व०—आ; प्राक्छिरञ्चोर्ध्व—इ.

[३९] ०दर्भाभि—अ, इ, उ; ०दर्भाद्यैः —ई.

[[40]कुम्भस्थापनं तत्पूजा च]

स्थापयेत्पञ्चकुम्भान्वै[41] मध्ये पूर्वे च दक्षिणे ।
पश्चिमे चोत्तरे चैव [42]पञ्चमूर्ति समावहेत् ॥१४॥
आवाह्य मध्यकुम्भे तु [43]विष्णुमूर्ति सनातनम् ।
सहस्रशीर्षं पुरुषं पूर्वकुम्भे समावहेत् ॥१५॥
दक्षिणे [44]सत्यमावाह्य अच्युतं पश्चिमे घटे ।
आवाह्य [45]चोत्तरे कुम्भे [46]ह्यनिरुद्धं [47]स्वनामकैः ॥१६॥
अर्चयेद्गन्धपुष्पाद्यैस्ततो होमं [48]समारभेत् ।

[[49]होमः]

[50]शमी[51]पलाशमश्वत्थं [52]खादिरं क्रमशः समित् ॥१७॥

---

[40] 'अभितः कलशानष्टौ विन्यसेद्विष्णुबीजतः ।
सवस्त्रान्सापिधानांश्च सहिरण्यान्सकूर्चकान् ॥
विष्णुं चैव महाविष्णुं सदाविष्णुं तथैव च ।
नारायणं वासुदेवं संकर्षणं तथैव च ॥
प्रद्युम्नमनिरुद्धं च पूर्वाशादिषु विन्यसेत् ।
स्वस्वनाम्नैव संस्थाप्य गन्धपुष्पादिनार्चयेत् ॥
दद्याद्गुलोदनं चैव ताम्बूलं दापयेत्ततः ।'
(**वीरे** पृ० ३६ श्लो० ३०––३३ पू०) ; एतद्विषये पुनः **रौरवे** क्रियापादे ३६.२१–२३ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[41] कुम्भानि––अ, इ, उ.

[42] पञ्चमूर्ति पञ्चसंख्याका मूर्तिः पञ्चमूर्तिः, ताम् पञ्चमूर्तिम् । 'पञ्चमूर्तीः' इति पाठश्चेत्सुष्ठु ।

[43] 'आ, ई' मातृकयोः १५ द्वितीयपादप्रभृति १६ तृतीयपादान्तं न दृश्यते ।

[44] सद्यमावाह्यमच्युतं––इ; सद्यमावाह्याच्युतं––उ.

[45] उत्तरे––अ, इ; च्युतोत्तरे––उ.

[46] अग्निरुध्वं––अ; अग्निमूर्ध्वं०––आ; अग्निरूर्ध्वं––इ, उ; अग्निमूर्ध०––ई.

[47] सनामकैः––अ; स्वनामके––उ.

[48] समाचरेत्––आ, ई.

[49] 'ततो होमं प्रकर्तव्यं लक्षणेन समन्वितम् ।
समिदाज्यचरूँल्लाजान्सर्षपांश्च यवांस्तिलान् ॥
माषमुद्गकुलुत्थांश्च दश द्रव्यांस्तु कीर्तितान् ।
पलाशखदिराश्वत्थप्लक्षन्यग्रोधमेव च ॥
अपामार्गं शमीं चैव औदुम्बरं तथैव च ।
वटं च समिधश्चोक्तक्रमात्कुण्डेषु होमयेत् ॥
समिधं मूलमन्त्रेण आज्यं वै शिरसा तथा ।
वामेन तु चरुं हुत्वा लाजान्घोरेण मन्त्रतः ॥
सर्षपं सद्यमन्त्रेण नेत्रेण तु यवं तथा ।
तिलमीशानमन्त्रेण माषं वै हृदयेन तु ॥
शिरोमन्त्रेण मुद्गं तु कुलुत्थं कवचेन तु ।
एकैकं पञ्चविंशं तु होमयेद्देशिकोत्तमः ॥
इदं विष्णिवति मन्त्रेण सर्वपञ्चाहुतिर्भवेत् ।
सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन् ॥
स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरम् ।
हुत्वा हुत्वा स्पृशेद्विष्णुं द्रव्यान्ते तु विशेषतः ॥
चतुर्दिक्षु चतुर्वेदैः कुर्यादध्ययनं ततः ।'
'ततः प्रभाते विमले पूर्णाहुतिमथाचरेत् ।'
(**संतानसंहितायाम्** ३३.३८–४६पू०,४९पू०) ; एतद्विषये पुनः **रौरवे** क्रियापादे ३६.२४––२६ पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[50] समित्प्रकरणे वृक्षवाचकशब्दानां क्लीबे प्रयोगः ।; अत्र ५.१८ पू० टिप्पणीं पश्यत ।

[51] ०पालाश०––अ, ई.

[52] खदिरं––अ, इ.

इध्मं [५३]पलाशकं [५४]त्वेषां समिधो द्वादशाङ्गुलाः[५५]।
समिद्घृतचरुक्षीरयववेणुप्रियङ्गवः ॥१८॥
लाजसर्षपमाषाश्च [५६]तिला [५७]द्रव्याः प्रकीर्तिताः।
अग्नेरायतनं प्राप्य [५८]ह्याज्यभागान्तमाचरेत् ॥१९॥
पूर्वे पुरुषमावाह्य दक्षिणे [५९]सत्यमावहेत्।
पश्चिमेऽच्युत[६०]मावाह्य [६१]त्वनिरुद्धं तथोत्तरे ॥२०॥
अर्चयेद्गन्धपुष्पाद्यैः [६२]समिदादीन्क्रमाद्धुनेत्।
मूर्ति[६३]नामादिपञ्चाङ्गैः[६४] षडङ्गैर्होमयेत्क्रमात् ॥२१॥

[पञ्चाङ्गानि षडङ्गानि च]

[६५]मूर्ध्ना वदनहृद्गुह्य[६६]पादं पञ्चाङ्गसंज्ञकम्।
[६७]हृच्छिरश्च शिखा वर्म [६८]नेत्रमस्त्रं षडङ्गकम् ॥२२॥
अष्टाविंशतिमेकैकं[६९] हुत्वाङ्गेषु कुशैः [७०]स्पृशेत्।
द्रव्यशेषसमायुक्तं पूर्वाभिमुखसंस्थितः[७१]। ।२३॥
[७२]विष्णोर्नुकं जपित्वा तु स्रुचा पूर्णाहुतिं ददेत्[७३]।
[७४]इदं विष्णुर्विचक्रेति[७५] सर्वाङ्गं तु कुशैः स्पृशेत् ॥२४॥

[[७६]रत्नन्यासः]

शयनाद्बिम्बमुद्धृत्य गन्धादिभिरथार्चयेत्।

---

[५३] पलाशके—अ, इ, उ.

[५४] तेषां—ई.

[५५] ०शाङ्गुलान्—अ, इ, उ.

[५६] तिलं—आ ई.

[५७] द्रव्यशब्दस्य पुंसि प्रयोगः।; अत्र ६.१२ उ० टिप्पणी द्रष्टव्या।; द्रव्यं प्रकीर्तितम्—उ.

[५८] आज्य०—अ, इ, उ.

[५९] सद्यमाधवम्—अ, आ, इ, ई, उ; पूर्वं कुम्भपूजायां १६ पूर्वार्धे 'दक्षिणे सत्यमावाह्य' इति दर्शनात्तदनुसारेणात्र पाठः साधितः।

[६०] ०मावाह्याग्निरूर्ध्वं—उ.

[६१] अग्निरूर्ध्वं—अ इ; अग्निमूर्ध्वं—आ; अग्निमूर्ध—ई

[६२] इध्मादीनि—अ; समिधादीन्—इ.

[६३] ०नामानि—अ, आ, इ, ई, उ; पूर्वं दशमपटले ३६ उत्तरार्धे 'मर्तिनामादिबीजकैः' इति दर्शनात्तदनुसारेणात्र पाठः साधितः।

[६४] ०पञ्चांशे—इ; पञ्चाङ्गषडङ्गविवरणं ९.२२ श्लोकेऽपि दृश्यते।

[६५] मूर्ध्नो—अ, इ; मूर्धा—आ ई, उ.

[६६] ०पादपञ्चाङ्ग०—अ, इ, उ.

[६७] हृदं शिरः—आ; हृच्छिरः शिखा—इ.

[६८] नेत्रवक्त्रं—इ; नेत्रवस्त्रं—उ.

[६९] ०विंशतिरेकैकं—अ, आ, इ, ई, उ.

[७०] पृथक्—आ, ई.

[७१] ०संस्थितम्—अ, आ, इ, ई, उ.

[७२] **ऋग्वेदे** १.१५४.१; **तै० संहिता,** १.२.१३.९; विष्णोर्णुकं—इ.

[७३] हुनेत्—आ, ई.

[७४] **ऋग्वेदे** १.२२.१७; **तै० संहिता** १.२.१३.४.

[७५] विष्णुर्विचक्रमाणं तु—अ, इ, उ.

[७६] एतद्विषये **रौरवे** क्रियापादे ३६.१२ उ० श्लोकस्तदीयटिप्पणी च द्रष्टव्ये।

[77]प्रासादे स्थापन[78]स्थाने पञ्चरत्नानि विन्यसेत् ॥२५॥
[79]माणिक्यं मुक्तावैडूर्यमिन्द्रनीलं प्रवालकम् ।
मध्यादिसोमपर्यन्तं न्यस्त्वा [80]हेमं विनिक्षिपेत् ॥२६॥

[[81]प्रतिमास्थापनम्]

ततः प्रभाते विमले सुनक्षत्रे [82]शुभे तिथौ[83] ।
सुमुहूर्ते सुलग्ने च प्रतिमां संप्रवेशयेत् ॥२७॥
[84]स्वस्तिसूक्तं जपित्वा तु पुण्याहं वाचयेत्ततः ।
[85]इदं विष्णुं जपित्वा तु स्थापयेन्मूर्तिभिः सह ॥२८॥
सकुशेन करेणैव कुम्भकूर्चोदकेन च ।
[86]स्वैः स्वैर्नामादिभिर्मन्त्रैः प्रतिमायां न्यसेत्क्रमात् ॥२९॥
स्वस्वनामादि[87]पञ्चाङ्गं षडङ्गं विन्यसेत्ततः ।
प्रोक्ष्याभिषेचनं कृत्वा मूर्तिनामादिमन्त्रकैः ॥३०॥
अर्चयेद्गन्धपुष्पाद्यैराज्ययुक्तं हविर्ददेत् ।
आचार्यं पूजयेत्तत्र वस्त्रैराभरणैरपि ॥३१॥
होमकान्पूजकान्विप्रान्पूजयेन्मूर्तिधारकान् ।
पूजयेत्परिवारांश्च वस्त्रहेमादिभूषणैः ॥
ब्राह्मणान्भोजयेत्तत्र[88] नित्य[89]पूजादि कारयेत् ॥३२॥

[90]इति [91]श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे विष्णुप्रतिष्ठा[92]विधिर्नाम
एकादशः पटलः ॥

---

[77] प्रासादस्था०—अ, आ, इ, ई, उ.

[78] ०स्यान्ते—ई.

[79] माणिक्कमुक्तां—आ, इ, ई, उ.

[80] होमं—अ, आ, इ, उ.

[81] 'मुहूर्तमन्वीक्ष्य तत्रैवाचार्यं पूजयेत्सुधीः ।
ऋत्विजः पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ॥
प्रतिष्ठाकुम्भमादाय विष्णुमूलेन मन्त्रतः ।
प्रतिमां स्नानवेद्यां च मध्यमे स्थापयेत्ततः ॥
इदं विष्ण्वति मन्त्रेण मूलमन्त्रेण संयुतम् ।
अभिषेकं क्रमात्प्राप्य कारयेच्छिवमन्त्रवित् ॥
मूर्तीनामष्टकुम्भैश्चाभिषेकं कारयेद्बुधः ।
गन्धैः पुष्पैश्च धूपैश्च दीपैरर्घ्यैश्च पूजयेत् ॥
पञ्चवर्णं हविर्दद्यात्ताम्बूलं दापयेत्ततः ।
ब्राह्मणान्भोजयेत्तत्र पर्यष्टिपरिचारकान् ॥
नित्यं नित्यार्चनं कुर्याद्विष्णुमूलेन मन्त्रतः ।
विष्णोश्च स्थापनं प्रोक्तम्'
(**संतानसंहितायाम्** ३३.४९ उ०–५५ पू०); एतद्विषये पुनः **रौरवे** क्रियापादे ३६.२४–२८ पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[82] तिथौ शुभौ—इ.

[83] दिने—आ, ई.

[84] **ऋग्वेदे** १.९.६; **तै० आरण्यके** १.१.

[85] **ऋग्वेदे** १.२२.१७; **तै० संहिता** १.२.१३.४.

[86] स्वस्वनामादि०—उ.

[87] पञ्चाङ्गषडङ्गविवरणम् ९.२२; ११. २२ श्लोकयोः कृतम् ।

[88] भोजयेत्पश्चात् —ई,

[89] ०पूजादिकं चरेत्—ई.

[90] इति श्रीरौरवोत्तरे—अ; इति रौरवोत्तरे—ई.

[91] 'श्रीमद्रौरवोत्तरे प्रतिष्टातन्त्रे' इति 'आ, ई' मातृकयोर्न दृश्यते.

[92] ०विधिरेकादशः पटलः—अ, इ; 'आ, ई' मातृकयोः 'विधिः' इति न दृश्यते ।; ०विधि एकादशपटलः—उ.

द्वादशः पटलः

[१]ब्रह्मप्रतिष्ठाविधिः

[[२]प्रतिष्ठायोग्यस्थानम्]

प्रतिष्ठां ब्रह्मणो वक्ष्ये संक्षेपाच्छृणु ते रुरो ।
[३]पूर्वोक्ते [४]ब्रह्मणः स्थाने प्रासादं कल्पयेत्पृथक् ॥१॥

[[५]प्रतिमाद्रव्यम्]

शिलाभिर्वाथ लोहैर्वा प्रतिमां [६]कारयेत्पृथक् ।

[[७]नेत्रोन्मीलनम्]

प्रासादपुरतः कुर्याद्वेद्या वै सह[८] सुप्रपाम् ॥२॥
स्थण्डिलं कल्पयेत्तत्र वेदिकोपरि शालिभिः ।
दर्भमालाभिरावेष्टच [९]पटैरावेष्टयेत्प्रपाम् ॥३॥
[१०]प्रक्षाल्य [११]प्रतिमामद्भिः प्रपायां संप्रवेशयेत् ।
पूर्वाभिमुखमास्थाप्य प्रतिमां वेदिकोपरि ॥४॥
वस्त्रैरावेष्टच सर्वाङ्गं नयनानि विमोचयेत् ।
लेखयेत्पूर्ववत्सूच्या [१२]पक्ष्मरेखाश्च[१३] मण्डलान् ॥५॥
प्रक्षाल्य पञ्चगव्येन [१४]ततः शुद्धोदकेन च ।
सूचिभ्यां हेमताम्राभ्यां [१५]नेत्रमन्त्रेण लेखयेत् ॥६॥

15494

---

[१] ब्रह्मप्रतिष्ठाविषये **अजिते** ४७, **पूर्वकामिके** ७२, **पूर्वकारणे** ६०, **चन्द्रज्ञाने** (टि० १४६. ११—१३ पृष्ठेषु) **पारमेश्वरे** (टि० १४६. १३,१४ पृष्ठयोः) **विमलागमे** ३० पटला द्रष्टव्याः ।

[२] 'ब्रह्ममूर्ति तु चोत्तरे (**रौरवोत्तरे** ४.४ उ०)
'प्रासादस्योत्तरे भागे स्थापयेन्मन्त्रवित्तमः'
(**विमलागमे** ३०.६उ०)

[३] पूर्वोक्त०——अ, इ, उ.

[४] ०ब्रह्माणास्थाने——उ.

[५] 'चतुर्वक्त्रः पितामहः ।
शुद्धहेममयः कार्यो बृहत्काष्ठोऽथवा तरुः ॥
कार्यः श्रीपर्णिसंज्ञस्तु'
(**मतङ्गपारमेश्वरे** क्रियापादे १४.२८,२९ पू०)

[६] कल्पयेत्पृथक्——ई.

[७] एतद्विषये **अजिते** ४७.४–७ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[८] कुर्याद्वेदिका सह ——अ, इ, उ.

[९] पटेनावेष्ट०——आ, इ, ई, उ.

[१०] प्रक्षालप्रतमामृद्भिः——इ.

[११] प्रतिमां मृद्भिः——अ, आ, ई.

[१२] पद्मरेखां च——आ, ई; पाक्षरेखाश्च——इ; पक्ष०——उ.

[१३] ०रेखांश्च——अ.

[१४] पुनः——इ, उ.

[१५] 'आ, ई' मातृकयोः षष्ठश्लोकस्य चतुर्थपादः, सप्तमस्य प्रथमपादश्च न दृश्येते ।

[16]मधुघृताभ्यां [17]मन्त्राभ्यां [18]मध्वाज्याभ्यां [19]समर्पयेत् ।
[20]अद्भिरेनां तु [21]प्रक्षाल्य गां [22]गोमन्त्रेण [23]दर्शयेत् ॥७॥

[[24]जलाधिवासः]

[25]अब्लिङ्गैः शाययेदप्सु पुण्याहं तत्र वाचयेत् ।
जलात्प्रतिमामुद्धृत्य प्रासादं संप्रवेशयेत् ॥८॥

[[26]मण्डपस्तत्र वेदिकाकुण्डकल्पनं च]

प्रासाद[27]स्याग्रतः कुर्यान्मण्डपं चतुरश्रकम् ।
दशहस्तं वाष्टहस्तं[28] सप्तहस्तमथापि वा ॥९॥
षोडशस्तम्भसंयुक्तं द्वादशस्तम्भमेव [29]वा ।
चतुर्द्वारसमायुक्तं चतुस्तोरणसंयुतम्[30] ॥१०॥

---

[16] मधुव्रताभ्यां—इ.

[17] मन्त्राभ्याम्=मधुघृतमन्त्राभ्याम्; ते च ११. ४ उ० टिप्पण्यां सूचिते ।

[18] 'मध्वाज्याभ्याम्' इत्यत्र 'मध्वाज्ये तु' इति चेत्पाठः सुष्ठु ।; तन्मन्त्रेण—उ.

[19] समर्चयेत्—अ, आ, इ, ई, उ.

[20] अद्भिरेनाम प्र०—अ; अद्भिरेतां प्र०—इ; तथाद्भिरेनां प्र०—उ.

[21] संक्षाल्य—आ.

[22] गोमन्त्रविवरणं १०.६उ०; ११. ५ पू० टिप्पण्योः पश्यत ।

[23] प्रदर्शयेत्—आ.

[24] 'लोहजं शैलजं चेत्तु कुर्याज्जलाधिवासनम् ।
जलमध्ये प्रपां कृत्वा चतुर्गात्रसमन्वितम् ॥
वस्त्रेणावेष्ट्य बिम्बानि कण्ठमात्रे जले ततः ।
शाययेत्तु त्रिरात्रं वा एकं वा युगयामकम् ॥'
(**पूर्वकारणे** ६०.९४ उ०—९६ पू०); एतद्विषये पुनः **अजिते** ४७.८,९ श्लोकौ तदीयटिप्पणी च द्रष्टव्याः ।

[25] अर्ध्वंशैः—अ; अन्वंशैः—आ, ई; अब्वंशैः—इ; अब्लिङ्गमेगः—उ; 'अब्लिङ्गाः अब्देवत्याः ताश्च 'आपो हि' इति तिस्रः (**तै० संहिता** ५.६.१)' इति **बोधायनधर्मसूत्रे** २.४.२ **गोविन्दस्वामिव्याख्याने** दृश्यते ।

[26] 'परिवारालयाग्रे तु मण्टपं लक्षणान्वितम् ।
नवहस्तमष्टहस्तं वा सप्तहस्तमथापि वा ॥
षोडशस्तम्भसंयुक्तं द्वादशस्तम्भमेव वा ।
कृत्वा मण्टपमध्ये तु त्रिभागैकेन वेदिका ॥
कलाङ्गुलसमायामा दर्पणोदरसंनिभा ।
परितश्चाग्निकुण्डानि महाशासु प्रकल्पयेत् ॥
चतुरश्रं धनुर्वृत्तं कोणं पूर्वादितः क्रमात् ।
हस्तमात्रप्रविस्तारं मेखलात्रयसंयुतम् ॥
नाभियोनिसमायुक्तं कारयेल्लक्षणान्वितम् ।
एकाग्निं वाथ कुर्वीत प्रासादस्याग्रके बुधः ॥
वर्तुलं नलिनं योनि भूताश्रं तु युगाश्रकम् ।
त्रिकोणं चैव वस्वश्रमष्टाश्रं तु क्रमेण तु ॥
वृषादिभास्करान्तानां कारयेद्देशिकोत्तमः ।'
(**पूर्वकारणे** ६०.८४ उ०—९०); एतद्विषये पुनः **अजिते** ४७.१ उ०—३ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[27] ०स्याग्रदं—इ.

[28] ०हस्तमष्टहस्तं वा—अ, इ, उ.

[29] च—अ, इ, ई, उ.

[30] ०भूषितम्—ई.

तन्मध्ये वेदिकां कुर्यान्नव[३१]भागैकभागिकाम्[३२] ।
एक[३३]हस्तसमुत्सेधां दर्पणोदरसंनिभाम्[३४] ॥११॥
[३५]वेदिकायाश्चतुर्दिक्षु चतुष्कुण्डानि कल्पयेत् ।
चतुरश्रं धनुर्वृत्तं त्रिकोणं च यथाक्रमम् ॥१२॥
[३६]त्रिमेखलासमायुक्तं नाभियोनिसमन्वितम् ।

[[३७]मण्डपालंकारः]

प्रोक्षयेत्पञ्चगव्येन गोमयेनानुलेपयेत् ॥१३॥
दर्भमालाभिरावेष्टच पुष्पमालां प्रलम्बयेत् ।
ध्वजैर्वितानैर्वस्त्रैश्च[३८] भूषयेत्फलपल्लवैः ॥१४॥

[[३९]शयनाधिवासः]

स्थण्डिलं कल्पयेत्तत्र वेदिकोपरि शालिभिः ।
तत्रैव शयनं कुर्यात्कुशैर्वस्त्रैः परिस्तरेत् ॥ १५॥
शाययेत्प्रतिमां तत्र प्राक्शिरश्चोर्ध्ववक्त्रकम् ।
[४०]कुशैश्च नववस्त्रैश्च वेष्टयेत्प्रतिमां ततः ॥१६॥
अर्चयेद्गन्धपुष्पाद्यैः'

[[४१]कुम्भाधिवासः]

[४२]नवकुम्भेऽधिवासयेत् ।

---

[३१] ०भागेक––ई.

[३२] ०भागिकम्––अ, इ, ई, उ; ०भागकम्––आ.

[३३] ०हस्तं समारभ्य––अ, आ, इ, ई, उ; ९.७ पू० १०.१६ उ०; १३.१५ पू० श्लोकेषु 'एकहस्तसमुत्सेधाम्' इति दर्शनात्तदनुसारेणात्र पाठः साधितः ।

[३४] ०संनिभम्––अ, आ, इ, ई, उ.

[३५] वेदिकायां चतु०––अ, आ, उ.

[३६] त्रिमेखलसमा०––आ, इ, ई, उ.

[३७] 'ब्राह्मणान् भोजयेत्पश्चाद्यथावित्तानुसारतः ॥
मण्टपं भूषयेत्पश्चाद्यथावित्तानुसारतः ।
मण्टपं भूषयेत्पश्चाद्वितानाद्यैर्विशेषतः ॥
पुण्याहं वाचयेत्तत्र स्वस्तिसूक्तं तु वाचयेत् ।'
(**पूर्वकारणे** ६०.९६ उ०––९८ पू०)

[३८] ०वितानवस्त्रैश्च––आ, इ, ई, उ.

[३९] 'स्थण्डिलं कारयेद्वेद्यामष्टद्रोणैस्तु शालिभिः ।
लाजपुष्पतिलैर्दर्भैर्विकिरैः समलंकृतम् ॥
जलादुत्तीर्य बिम्बानि शुद्धिं कृत्वा तु पूर्ववत् ।
कौतुकं बन्धयेत्पश्चात्सद्यमन्त्रेण देशिकः ॥
शयनं वस्त्रकाशाभ्यां कल्पयेत्स्थण्डिलोपरि ।
शाययेत्तत्र बिम्बं तु प्राक्शिरश्चोर्ध्ववक्त्रकम् ॥
वस्त्रेणाच्छाद्य बिम्बं तु पूजयेद्धृदयेन तु ।'
(**पूर्वकारणे** ६०.९८ उ०––१०१); एतद्विषये पुनः **अजिते** ४७.१०–१५ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[४०] कुशाभिर्नव०––इ; कुशादिनव०––उ.

[४१] 'सर्वलक्षणसंयुक्तं द्रोणतोयप्रपूरितम् ॥
सूत्रकूर्चपिधानाढ्यं सोदकं वस्त्रसंयुतम् ॥
बिम्बस्य तु शिरोभागे स्थापयेद्व्योमकुम्भकम् ।
ध्यात्वा तु तत्स्वरूपाणि तत्तत्कुम्भे तु देशिकाः ॥
तेषां बीजानि संन्यस्य पूजयेयुर्हृदा तथा ।'
(**पूर्वकारणे** ६०.१०२–१०४ पू०); एतद्विषये पुनः **अजिते** ४७.१६––२१ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[४२] नवकुम्भाधि०––अ, उ; नवकुम्भादि०––इ.

ससूत्रान्सोदकान्कुम्भान्सरत्नान्वस्त्रसंयुतान्[४३] ॥१७॥
सकूर्चान्हेमसंयुक्तान्सपुष्पान्सापिधानकान्[४४] ।
मध्यादीशानपर्यन्तं स्थापयेन्नवमूर्तिकान्[४५] ॥१८॥
मध्ये ब्रह्माणमावाह्य पूर्वकुम्भे पितामहम् ।
दक्षिणे तु विधातारं पश्चिमे तु प्रजापतिम् ॥१९॥
अजमुत्तरकुम्भे तु [४६]आग्नेय्यां विधिमावहेत् ।
त्वष्टारं नैर्ऋते कुम्भे वायौ पद्मोद्भवं न्यसेत् ॥२०॥
[४७]वक्तारमीशकुम्भे तु [४८]स्वैः स्वैर्नामादिभिर्यजेत् ।

[[४९]होमः]

[५०]पलाशखदिराश्वत्थं शमी[५१] प्राच्यादिषु क्रमात् ॥२१॥
[५२]इध्मं पलाशमेतेषां द्वादशाङ्गुलसंयुतम् ।
[५३]कनिष्ठाङ्गुलि[५४]परीणाहं परिधिर्द्विगुणो[५५] भवेत् ॥२२॥
समिद्घृत[५६]चरुक्षीरयववेणुप्रियङ्गवः ।
लाजसर्षपमाषाश्च[५७] [५८]तिला [५९]द्रव्याः प्रकीर्तिताः ॥२३॥
अग्नेरुप[६०]समाधानमाज्यभागान्तमाचरेत् ।
यस्यां दिशि [६१]स्थिता [६२]मूर्तिस्तत्कुण्डे [६३]चाधिपः [६४]स्मृतः ॥२४॥

---

[४३] ०न्हेमसंयुतान्—उ.

[४४] ०न्सपिधानकान्—आ.

[४५] ०मूर्तिमान्—अ, आ, इ, उ.

[४६] 'उ' मातृकायां २० द्वितीयपादप्रभृति २१ प्रथमपादान्तं न दृश्यते ।

[४७] वक्त्रार०—ई.

[४८] स्वस्वर्नामादि०—उ.

[४९] 'पश्चाद्धोमं समाचरेत् ।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ॥
पलाशोदुम्बराश्वत्थवटाः पूर्वादितः क्रमात् ।
समिदाज्यचरूँल्लाजान्सर्षपं च क्रमेण तु ॥
सद्यादिब्रह्ममन्त्रैश्च जुहुयुर्वै क्रमेण तु ।
शतमर्धं तदर्धं वा प्रत्येकं जुहुयात्ततः ॥
द्रव्यान्ते व्याहृतिं हुत्वा स्पृशेयुर्हुतमन्त्रकैः ।
व्यपोह्य रात्रिशेषं तु प्रभाते विमले ततः ॥
आचार्यो मूर्तिपैः सार्धं स्नानं कृत्वा विशेषतः ।
कुम्भं च प्रतिमां चैव पूजयेयुर्हृदा तथा ॥
जयादिरभ्याधानं च राष्ट्रभृज्जुहुयुः क्रमात् ।
मूलमन्त्रैश्च जुहुयुः प्रत्येकं शतसंख्यया ॥'
(**पूर्वकारणे** ६०.११३–११८); एतद्विषये पुनः **अजिते** ४७.२२—३० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[५०] समित्प्रकरणे वृक्षवाचकशब्दानां प्रायेण क्लीबे प्रयोगः । एतद्विषये ५.१८ पू० टिप्पणीं पश्यत ।

[५१] ०श्वत्थशमी—अ, आ, इ, ई, उ.

[५२] इध्मपलाश०—इ.

[५३] कनिष्ठाङ्गुल०—अ, उ; अष्टाङ्गुलि०—आ; अष्टाङ्गुल०—ई.

[५४] ०परीणाहपरि०—ई.

[५५] ०धिद्विगुणं—अ, इ, ई, उ; ०धिर्द्विगुणं—आ.

[५६] ०मधुक्षीरं०—ई.

[५७] ०माषैश्च—उ.

[५८] तिलं—आ, ई; तिल०—उ.

[५९] द्रव्यशब्दस्य पुंसि प्रयोगः । अत्र ६.१२उ० टिप्पणी द्रष्टव्या; द्रव्याणि कीर्तिताः—ई.

[६०] ०समाधाद्या आज्य०—उ.

[६१] स्थितो—अ, आ, इ, ई.

[६२] मूर्ति तत्कुण्डे—अ, इ.

[६३] वाधिप स्मृतः—उ.

[६४] स्मृताः—ई.

ततः कुण्डे तमावाह्य गन्धाद्यैरर्चयेत्क्रमात् ।
[६५]ब्रह्मजज्ञानमन्त्रेण [६६]समिधो जुहुयात्ततः ॥२५॥
घृतं [६७]मिमिक्षेति मन्त्रेण[६८] [६९]ह्यन्नमग्नौ हुनेत्ततः ।
क्षीरमाप्यायमन्त्रेण[७०] प्रणवेन [७१]यवं हुनेत् ॥२६॥
[७२]सावित्र्या वैणवं हुत्वा [७३]प्रियङ्गुं च हुनेत्क्रमात् ।
[७४]ब्रह्मदेवाय लाजं तु [७५]भूः स्वाहेति च सर्षपम् ॥२७॥
[७६]भुवः स्वाहेति [७७]माषांश्च [७८]स्वः स्वाहेति तिलं हुनेत् ।
प्रत्येकमष्टाविंशं च [७९]हुत्वाङ्गेषु कुशैः स्पृशेत् ॥२८॥
मूर्तिनामादि[८०]पञ्चाङ्गैरग्नौ हुत्वा कुशैः स्पृशेत् ।
द्रव्यशेषसमायुक्तं [८१]पूर्वाभिमुखसंस्थितः ॥२९॥
[८२]ब्रह्मजज्ञानमन्त्रेण स्रुचा पूर्णाहुतिं हुनेत् ।
[८३]सर्वाङ्गं [८४]तु कुशैः स्पृश्य'

[[८५]रत्नन्यासः प्रतिमास्थापनं[८६] च]

'शयनाद्बिम्बमुद्धरेत् ॥३०॥

---

[६५] **तै० संहिता** ४.२.८.४.

[६६] समिधा—अ; समिधां—इ.

[६७] मिक्षेतिमन्त्रेण—अ; **ऋग्वेदे** २.३.११; **तै० आरण्यके** १०.११.

[६८] अत्र 'घृतं जहुयात्' इत्यध्याहृत्य व्याख्येयमिति भाति ।

[६९] अन्नमग्नौ—अ, इ, उ; दशमपटले ३३तम श्लोके 'अन्नमन्त्रेन जुहुयात्' इति दर्शनात्तदनुसारेणात्रापि 'अन्नमन्त्रेन' इति पाठो युक्त इति भाति ।

[७०] 'आप्यायस्व' इति मन्त्रेण; **ऋग्वेदे** १.९१.९६; **तै० संहिता** ३.२.५.३.

[७१] यथा हुनेत्—आ; तथा हुनेत्—ई.

[७२] आ, ई' मातृकयोः २७ श्लोकादारभ्य ३० पूर्वार्धपर्यन्तं न दृश्यते ।; सावित्र्या गायत्र्या 'तत्सवितुः' इति मन्त्रेण; **ऋग्वेदे** ३.६.१.१०; **तै० संहिता** १.५.६ १२

[७३] प्रियङ्गुश्च—इ; प्रियङ्गुद्रव्यस्य मन्त्रो न दृश्यते ।

[७४] ब्रह्मदेवालयाजन्तु—अ, उ; ब्रह्मदेवलयजन्तु—इ; उपलभ्यमानासु मातृकासु शुद्धः पाठो नोपलभ्यते । 'ब्रह्मजज्ञेति लाजं तु' इति पाठो युक्त इति भाति ।

[७५] **याजुषमन्त्रप्रश्ने** १.१०.८; स्वभूस्वाहेति—उ.

[७६] **याजुषमन्त्रप्रश्ने** १.१०.८.

[७७] माषान्तु—इ; माषं च—उ.

[७८] **याजुषमन्त्रप्रश्ने** १.१०.८.

[७९] ०मष्टाविंशच्च—अ; ०मष्टविंशश्च—इ; ०विंशश्च—उ; अष्टाविंशम् इति पूरणप्रत्ययान्तस्य संख्यामात्रे प्रयोगः ।

[८०] पञ्चाङ्गविवरणम् ९.२२,११—२२ श्लोकयोर्दृश्यते ।

[८१] पूर्वादिमुख०—उ.

[८२] **तै० संहिता** ४.२.८.४.

[८३] सर्वाङ्ग्लि—ई.

[८४] कुशया स्पृश्य—अ, इ.

[८५] एतद्विषये **अजिते** ४७.३१,३२. श्लोकौ द्रष्टव्यौ

[८६] 'मुहूर्तनाडिकापूर्वे स्थापनं तु समारभेत् ।
प्रासादाभ्यन्तरे तत्तन्मानुषे प्रतिमां न्यसेत् ॥
सुस्निग्धं कारयित्वा तु पुण्याहं वाचयेत्ततः ।
पूर्णाहुतिं च शिरसा यदस्येति तदन्तिके ॥
जुहुयुर्वै क्रमेणैव पश्चादग्निं विसर्जयेत् ।

[87]अर्चयेद्गन्धपुष्पाद्यैः प्रासादं संप्रवेशयेत् ।
तन्मध्ये स्थापयेत्स्थाने [88]पञ्चरत्नानि विन्यसेत् ॥३१॥
[89]हेमं तत्रैव निक्षिप्य [90]ध्रुवं ब्रह्माणमव्ययम्[91] ।
[92]ब्रह्मजज्ञानमन्त्रेण स्थापयेन्मूर्तिभिः सह ॥३२॥
मूर्तिनामादिभिर्मूर्तिं प्रतिमायां न्यसेत्क्रमात् ।
[93]स्वस्वनामादि [94]पञ्चाङ्गं षडङ्गं विन्यसेत्क्रमात् ॥३३॥
अर्चयेद्गन्धपुष्पाद्यैर्वस्त्रैराभरणादिभिः ।
प्रायश्चित्ताहुतिं हुत्वा स्विष्टान्तं होममाचरेत् ॥३४॥
पायसेन हविर्दद्या[95]द्व्यञ्जनाद्यैर्गुलैर्युतम्[96] ।
[97]आचार्यं पूजयेत्तत्र वस्त्रैराभरणैरपि ॥३५॥
होमकान्पूजयेन्मूर्ति[98]धारकान्परिचारकान् ।
[99]पूजकान्प्रतिपद्येत ब्राह्मणान्भोजयेत्ततः ॥३६॥

[100]इति [101]श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे ब्रह्मप्रतिष्ठा[102]विधिर्नाम[103]

द्वादशः पटलः ॥

मुहूर्ते समनुप्राप्ते स्थापिते स्नापनं कुरु ॥
तत्तत्कुम्भं समुद्धृत्य स्थाप्य बिम्बाग्रकेषु च ।
न्यासक्रमेण विन्यस्य पञ्चब्रह्मषडङ्गकम् ॥
बीजान्यादाय कुम्भेभ्यो न्यसेयुर्बिम्बहृत्सु च ।
यजेयुर्गन्धपुष्पाद्यैर्नैवेद्यान्तं हृदा क्रमात्' ॥
(**पूर्वकारणे** ६०.१२० उ०–१२५ पू०);
एतद्विषये पुनः **अजिते** ४७.३३–४४ श्लोकास्त-दीयटिप्पण्यश्च द्रष्टव्याः ।

[87] 'उ' मातृकायां प्रथमपादो न दृश्यते ।

[88] ११.२५ उ०, २६ पू० श्लोकार्धयोः पञ्चरत्नानि निर्दिष्टानि ।

[89] हेम––आ, ई.

[90] धृत्वा––इ, उ.

[91] ०मप्यधम्––इ.

[92] **तै० संहिता** ४.२.८.४.

[93] 'इ' मातृकायां ३३ उत्तरार्धं न दृश्यते ।

[94] पञ्चाङ्गषडङ्गविवरणम् ९.२२, ११.२२ श्लोकयोर्दृश्यते ।

[95] द्व्यञ्जनाद्यं गुलै०–अ, इ, उ.

[96] ०र्घृतम्––आ, ई.

[97] 'आचार्यं पूजयेत्पश्चाद्वस्त्रहेमाङ्गुलीयकैः ।
निष्कद्वयं ददेद्धीमान्प्रत्येकं तु विशेषतः ॥
पूजयेन्मूर्तिधारांश्च भक्तान्संपूजयेत्ततः ।'
(**पूर्वकारणे** ६०.११९,१२० पू०)

[98] ०वारकान्––इ.

[99] पूजयेद्वस्त्रहेमाद्यैः ब्रा०––आ, ई.

[100] इति श्रीरौरवोत्तरे––अ; इति रौरवोत्तरे––इ.

[101] 'आ, ई' मातृकयोः 'श्रीमद्रौरवोत्तरे प्रतिष्ठा-तन्त्रे' इति न दृश्यते ।; 'उ' मातृकायां 'प्रतिष्ठातन्त्रे' इति न दृश्यते ।

[102] 'आ, ई' मातृकयोः 'विधिः' इति न दृश्यते ।

[103] 'अ, इ' मातृकयोः' 'नाम' इति न दृश्यते ।

[1]त्रयोदशः पटलः

[2]दुर्गाप्रतिष्ठाविधिः

शृणु दुर्गाप्रतिष्ठां च [3]प्रवक्ष्यामि रुरो तव।

[[4]प्रतिष्ठायोग्यस्थानं [5]प्रतिमाकरणं च]

[6]दुर्गायाः प्रतिमां कुर्याच्छिलाभिर्वाथ [7]लोहकैः ॥१॥
[8]उक्तस्थाने तु दुर्गायाः प्रासादं [9]कल्पयेत्पृथक्।

[[10]नेत्रोन्मीलनं बेरशुद्धिश्च]

[11]प्रासादपुरतः कुर्यान्मण्डपं चतुरश्रकम् ॥२॥
स्थण्डिलं कारयेत्तत्र वेदिकोपरि शालिभिः।
[12]प्रतिमां [13]शिल्पिकर्मान्ते क्षालयेत्तु [14]कुशाम्भसा ॥३॥
पूर्वाभिमुखमास्थाप्य [15]वेदिकायां तु मध्यमे।
वेष्टयेत्प्रतिमां [16]वस्त्रैर्दर्भैरावेष्टयेत्क्रमात् ॥४॥

---

[1] **रौरवोत्तरस्य** त्रयोदशचतुर्दशपटलौ **शैवागमपटलसंग्रहाख्यमातृकाद्वये** (टि० १४६. २,३; ११४–११८ पृष्ठेषु); (टि० ७४२. २–४; १३३–१३७ पृष्ठेषु च) दृश्येते। तदीयपाठभेदाः क्रमेण 'ऋ, ॠ' इति सङ्केतेन निर्दिष्टाः।

[2] दुर्गाप्रतिष्ठाविधिविषये **अजिते** ५३; **पूर्वकारणे** ९८; **दीप्ते** ५४,६८; **संतानसंहितायां** ३०; **सुप्रभेदे** क्रियापादे ४६; **स्वायम्भुवे** ५२ पटला द्रष्टव्याः।

[3] वक्ष्यामि रुरुरौ ततः––ऋ, ॠ.

[4] 'ग्रामे वास्तुविमाने वा स्थापनं स्याच्छिवालये।' (**पूर्वकारणे** ९८.२ उ०);
'ग्रामे वास्तुविधिप्रोक्ते स्थाने दुर्गालयं कुरु।' (**स्वायम्भुवे** ५२.१ उ०);
'अर्धमण्डपसौम्यायां दुर्गास्थानं प्रकीर्तितम्।
प्रतिमां कल्पयेत्तत्र प्रासादे कृतवास्तुभिः॥' (**रौरवोत्तरे** ४.५);
एतद्विषये पुनः **अजिते** ५३.१६––१८ पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः।

[5] 'शैलजं लोहजं वापि बेरं कुर्याद्विचक्षणः।' (**पूर्वकारणे** ९८.३ पू०)

[6] दुर्गायां प्रतिमा––ऋ.

[7] लोहजैः––अ, आ, इ, उ; लोहयेत्––ऋ, ॠ.

[8] उत्तरे स्थानदुर्गायां––ऋ, ॠ.

[9] कारयेत्पृथक्––आ, ई.

[10] 'नेत्रद्वययुते ऋक्षे कारयेदक्षिमोक्षणम्।
पक्ष्मरेखां पुरा कृत्वा कृष्णमण्डलमालिखेत्॥
ज्योतिर्मण्डलमालिख्य नेत्रमन्त्रमुदाहरन्।
तर्पयेद्धृदयेनैव देशिको मधुसर्पिषा॥
स्नापयेत्पञ्चगव्येन पवमानमुदीरयन्।
शुद्धोदकेन संस्नाप्य शुद्धरुद्धेति मन्त्रतः॥' (**दीप्ते** ६८.२१ उ०–२४ पू०);
एतद्विषये पुनः **अजिते** ५३.२१––२८ पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः।

[11] प्रासादं––इ.

[12] प्रतिमा––ऋ, ॠ.

[13] शिल्प०––अ.

[14] शिवाम्भसा––ऋ, ॠ.

[15] वेदिकायास्तुः––आ, ई.

[16] वस्त्रैः पटैरावेष्टयेत्पृथक्––ऋ, ॠ.

[17]रजतस्यैव [18]सूच्या तु पक्ष्मरेखाश्च[19] लेखयेत् ।
नेत्रमन्त्रं समुच्चार्य कृष्णमण्डलमालिखेत्[20] ॥५॥
ज्योतिर्मण्डलमालिख्य [21]मध्वाज्यं च [22]समर्पयेत् ।
[23]मन्त्राभ्यां मधुसर्पिभ्यां नेत्रमन्त्रेण [24]कारयेत् ॥६॥
कृष्णां [25]गां केवलां गां [26]वा [27]सवत्सां [28]प्रतिमामुखे ।
प्रच्छन्नपट[29]मावर्ज्य [30]गोलिङ्गेनैव दर्शयेत् ॥७॥
अभितः [31]कलशान्पञ्च पञ्चगव्येन पूरितान् ।
पूर्वादिमध्यपर्यन्तं स्थापयेच्छालिकोपरि[32] ॥८॥
गोमूत्रं गोमयं क्षीरं दधि [33]सर्पिर्यथाक्रमम् ।
वेष्टयेन्नववस्त्रैश्च गन्धाद्यैरर्चयेत्ततः[34] ॥९॥
[35]पवमानं समुच्चार्य पञ्चगव्याभिषेचनम्[36] ।
पुनः शुद्धोदकेनैव क्षालयित्वा तु सेचयेत् ॥१०॥
नववस्त्रेण संवेष्टच गन्धादिभिरथार्चयेत्[37] ।

[[38]जलाधिवासः]

[39]ततः [40]प्रतिमामुद्धृत्य वेशयेत्सलिलाश्रये[41] ॥११॥
जलमध्ये प्रपां कुर्यात्पटेनावेष्टयेत्प्रपाम् ।

---

[17] 'आ, ई' मातृकयोः '५, ६' श्लोकौ न दृश्येते ।; रजतेनैव—अ, इ, उ, ऋ; रजितेनैव—ॠ.

[18] सूच्यान्तु—इ; शूच्यन्तु—ऋ; सूच्यं तु—ॠ.

[19] ०रेखांश्च—अ, इ.

[20] ०लरेखयेत्—ऋ, ॠ.

[21] मध्वाज्याभ्यां—अ, मध्वाज्यां च—इ; मध्वाज्यान्तं—ऋ, ॠ.

[22] समर्चयेत्—अ, इ, उ.

[23] मधुसर्पिमन्त्रविवरणं ११.४ उ० टिप्पण्यां दत्तम् ।

[24] कूप्यकैः—ऋ, ॠ.

[25] गा केवलां गा—उ.

[26] च—आ, ई.

[27] सावत्सां—उ.

[28] पश्चिमे मुखे—अ, आ, इ, ई, उ, ऋ, ॠ; अर्थानुसारेणात्र 'प्रतिमामुखे' इति पाठः शोधितः ।

[29] ०मावेष्टच—ऋ, ॠ.

[30] गोलिङ्गेन—गोमन्त्रेण; गोमन्त्रविवरणाय ११.५ पू० टिप्पणी द्रष्टव्या ।; सप्तमश्लोकस्य चतुर्थपादस्थाने 'आ, ई' मातृकयोः चतुर्थश्लोकस्य द्वितीयतृतीयचतुर्थपादाः पुनर्लिखिता दृश्यन्ते ।

[31] कलशान्कुम्भान् पञ्च—ऋ, ॠ.

[32] ०येज्जालिकोपरि—अ; ०येस्थालिपरि—इ.

[33] ०सर्पियथा०—उ.

[34] ०येत्क्रमात्—ऋ, ॠ.

[35] **तै० ब्राह्मणे** १.४.४६.

[36] ०षेचयेत्—अ, इ, उ, ऋ, ॠ.

[37] ०भिर्यथार्चयेत्—ॠ.

[38] एतद्विषये **अजिते** ५३.२८ उ०—३० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[39] प्रतिमां तत उद्धृत्य—ॠ.

[40] प्रतिमामुद्धृत्य—इ; प्रतिमामुत्थाप्य—ई.

[41] सलिलाशये—आ, ई; सलिलाश्रयेत्—उ; सालिलाश्रयेत्—ऋ; शालिलाश्रयेत्—ॠ.

शाययेत्प्रतिमां तत्र प्राक्शि[४२]रश्चोर्ध्ववक्त्रकम् ॥१२॥
एकत्रिपञ्चरात्रं वा [४३]प्रतिमामप्सु शाययेत् ।

[[४४]मण्डपस्तत्र वेदिकुण्डकल्पनम्]

प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम् ॥१३॥
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ।
तन्मध्ये वेदिकां कुर्यान्नव[४५]भागैकभागिकाम्[४६] ॥१४॥
एकहस्तसमुत्सेधां[४७] दर्पणोदरसंनिभाम्[४८] ।
[४९]वेदिकायास्ततो बाह्ये चतुष्कुण्डं प्रकल्पयेत् ॥१५॥
चतुरश्रं धनुर्वृत्तं [५०]त्रिकोणं[५१] च यथाक्रमम् ।
[५२]त्रिमेखलासमायुक्तं [५३]नाभियोनिसमन्वितम् ॥१६॥
प्रोक्षयेत्पञ्चगव्येन गोमयेनानुलेपयेत् ।
[५४]स्तम्भान्वस्त्रैः समावेष्टच दर्भमालां प्रलम्बयेत्[५५] ॥१७॥
मुक्ता[५६]दामवितानैश्च ध्वजैश्च फलपल्लवैः ।
अङ्कुरैः पूर्णकुम्भैश्च [५७]मण्डपं समलंकृतम्[५८] ॥१८॥

---

[४२] ०रस्कोर्ध्व०—इ.

[४३] आब्धिके शाययेद्बुधः—ऋ; अब्धिके शाययेद्बुधः—ॠ.

[४४] 'दुर्गालयाग्रे च कुर्यान्मण्टपं चतुरश्रकम् ।
दशहस्तप्रमाणेन षोडशस्तम्भसंयुतम् ॥
मण्टपं चाम्रशाखाभिर्वेष्टयित्वा बहिर्यथा ।
तस्य मध्ये प्रकर्तव्या वेदिस्तत्त्रिविभागतः ॥
हस्तमानोच्छ्रया वापि मुष्टिमात्रा त्वथापि वा ।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ॥'
'दर्भमालासमायुक्तं घण्टाचामरभूषितम् ।
मुक्तादामप्रलम्बैस्तु गोमयेनानुलेपयेत् ॥
पुण्याहं वाचयित्वा तु ब्राह्मणान् भोजयेत्क्रमात् ।
ब्राह्मणोच्छिष्टमुद्वास्य पुनः पुण्याहमाचरेत् ॥
वास्तुहोमं प्रकुर्वीत पर्यग्निकरणं तथा ।'
'चतुर्दिशि ॥
चतुरश्रं धनुर्वृत्तं त्रिकोणं च यथाक्रमम् ।
मेखलात्रयसंयुक्तमेकैकं चतुरङ्गुलम् ॥
अनुक्रमेण कर्तव्यं निम्नोन्नतविवर्जितम् ।
ऐशान्यामपमीकुण्डे [मप्यब्जकुण्डे] देव्यग्निं कल्पयेद्यथा ॥
अथवा चतुरश्रं तु कर्तव्यम्'
(**स्वायम्भुवे** ५२.२–४; ७उ०–९; १८ उ०–२१ पू०); एतद्विषये पुनः **अजिते** ५३.१८ उ०–२१ पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[४५] ०भागेक०–ई.

[४६] ०भागिकम्—अ, इ, उ; ०भागकम्—आ, ऋ, ॠ.

[४७] ०समुत्सेधं०—अ, आ, इ, ई, उ, ऋ, ॠ.

[४८] ०सन्निभम्—अ, आ, इ, ई, उ; ०संयुतम्–ऋ, ॠ.

[४९] वेदिकायां ततो—आ, ऋ; वेदिकायास्तथा–ई.

[५०] त्रिणेकाणं पूर्वादिषु क्रमात्—ऋ.

[५१] पूर्वादिषु क्रमात्—ॠ.

[५२] त्रिमेखलस०—इ, उ, ऋ, ॠ.

[५३] नान्तयोनि०—इ.

[५४] स्तम्भाद्वस्त्रसमा०—ऋ, ॠ.

[५५] ०मालैः प्रलम्बितम् — ऋ, ॠ.

[५६] ०दामैर्विता०—अ, इ, उ, ऋ, ॠ.

[५७] मण्डपैः समलङ्कृतैः — ऋ, ॠ.

[५८] अत्र 'कुर्यात्' इति शेषः ।

[[59]शयनाधिवासः]

स्थण्डिलं कल्पयेत्तत्र वेदिकोपरि शालिभिः ।
शयनं कल्पयेत्तत्र [60]ह्यण्डजाद्यैरनुक्रमात् ॥१९॥
कुशैर्वस्त्रैः समाच्छाद्य शयनं संप्रपूजयेत् ।
जलात्प्रतिमामुद्धृत्य[61] वेष्टयेन्नववस्त्रकैः ॥२०॥
अर्चयेद्गन्धपुष्पाद्यैः प्रासादं [62]संप्रवेशयेत् ।
शाययेत्प्रतिमां तत्र [63]प्राक्शिरश्चोर्ध्ववक्त्रकम् ॥२१॥
[64]कुशैर्वस्त्रैः [65]समाच्छाद्य गन्धाद्यैः संप्रपूजयेत् ।

[[66]कुम्भस्थापनम्]

[67]प्रतिमासव्यभागे तु न्यसेत्कुम्भं प्रधानकम्[68] ॥२२॥
[69]परितश्चाष्टकुम्भान्वै[70] स्थापयेद्दिग्विदिक्षु[71] च[72] ।
[73]ससूत्रान्सोदकांश्चैव[74] सवस्त्रान्रत्नसंयुतान् ॥२३॥
सकूर्चान् [75]सापिधानांश्च [76]सहेमान्सकुशांस्तथा[77] ।
[78]मङ्गलाष्टक[79]संयुक्तान्सुवस्त्रैरावृतान्शुभान् ॥२४॥
मध्ये दुर्गां समावाह्य [80]पूर्वे कात्यायनीं यजेत्[81] ।
कुमारीं दक्षिणे कुम्भे पश्चिमे [82]विन्ध्यवासिनीम् ॥२५॥

---

[59] 'संकल्प्य शयनादीनि शाययेत्प्रतिमां ततः' (**सुप्रभेदे** क्रियापादे ४६.६ पू०); एतद्विषये पुनः **अजिते** ५३.३१, ३२ श्लोकौ तदीयटिप्पणी च द्रष्टव्याः ।

[60] अण्डजाद्यैः—अ, इ, ई, उ, ऋ, ॠ.

[61] प्रतिममुद्धुत्य—अ, इ, उ, ऋ, ॠ.

[62] संप्रपूजयेत्—उ.

[63] प्राक्शिरस्कोर्ध्व०—ॠ.

[64] 'आ, ई' मातृकयोरिदमर्धं न दृश्यते ।

[65] समावेष्टच— ऋ, ॠ.

[66] 'अभितस्तु ततो देवीं कुम्भान्न्यसेत्क्रमाद्बुधः ।
सकूर्चान्सापिधानांश्च ससूत्रान्साधिदेवताबू ॥
द्रोणार्धतोयसंपूर्णान्हेमवस्त्रसमायुतान् ।
इन्द्रादिदिशि विन्यस्य मध्ये दौर्गं च दक्षिणे ॥
दुर्गाकुम्भं न्यसेत्पूर्वं कुर्यादावाहनादिकम् ।
वस्त्रैरावेष्टयेत्कुम्भान्गन्धपुष्पादिभिर्यजेत् ॥
अर्घ्यं दत्त्वा यथान्यायं परिवारघटान्क्रमात् ।
(**स्वायम्भुवे** ५२. १४उ०–१७); एतद्विषये पुनः अजिते ५३.३३, ३४ पू० श्लोकौ तदीयटिप्पणी च द्रष्टव्याः ।

[67] प्रतिमां सव्य०—उ, ॠ.

[68] प्रधानके—ॠ.

[69] ततश्चाष्ट०—इ.

[70] ०कुम्भानि—अ, इ, उ, ऋ, ॠ.

[71] ०द्दिक्षु विदिक्षु—ॠ.

[72] वै—उ, ऋ, ॠ.

[73] ससूत्रकान् — उ.

[74] सोदकान्सर्वान्—ऋ, ॠ.

[75] सपिधानांश्च—आ.

[76] सहेमान्—ऋ, ॠ.

[77] सकुशं तथा—उ.

[78] **मङ्गलाष्टकम्**—अष्टमङ्गलानि; तद्विवरणाय ५.८ पू०; ८.५ पू० टिप्पणीं पश्यत ।

[79] संयुक्तान्सवस्त्रै०—उ, ॠ.

[80] प्राच्यां—ऋ, ॠ.

[81] भवेत्—ऋ, ॠ.

[82] पिण्डवासिनीम्—इ; विन्धवासिनीम्—उ.

[८३]अम्बिकामुत्तरे कुम्भे [८४]वह्नौ [८५]भगवतीं [८६]यजेत् ।
[८७]भवानीं नैर्ऋते कुम्भे वायव्ये[८८] [८९]कीर्तिमावहेत् ॥२६॥
[९०]ईशाने मोहिनीं न्यस्य[९१] स्वैः स्वैर्नामादिमन्त्रकैः ।
[९२]जातवेदसमन्त्रेण[९३] गन्धाद्यैरर्चयेत्क्रमात् ॥२७॥
[९४]अष्टमङ्गलरूपाणि [९५]दशास्त्राणि च विन्यसेत् ।
[९६]शयनं [९७]कल्पयेदेवं ततो होमं समाचरेत् ॥२८॥

[[९८]होमः]

[९९]पलाशखादिराश्वत्थं[१००] शमी[१०१] पूर्वादिषु क्रमात् ।
[१०२]कनिष्ठाङ्गुलिपरीणाहं द्वादशाङ्गुलसंयुतम्[१०३] ॥२९॥
[१०४]समिद्घृत[१०५]चरुक्षीरयववेणुप्रियङ्गवः[१०६] ।
लाजसर्षपमाषाश्च [१०७]तिला [१०८]द्रव्याः प्रकीर्तिताः ॥३०॥
अग्न्याधानादिकं कृत्वा [१०९]ह्याज्यभागान्तमाचरेत् ।

---

[८३] अम्बिके उत्तरे––ऋ.
[८४] बाहौ–– इ.
[८५] भगवती––ऋ, ॠ.
[८६] भवेत्–– अ, इ, उ, ऋ, ॠ.
[८७] भगिनीं––अ, आ, इ, ई; भगिनि––उ.
[८८] वायव्यां––अ, इ, उ, ऋ, ॠ.
[८९] कृत्तिका भवेत्–– ऋ, ॠ.
[९०] ऐशान्यां––ऋ, ॠ.
[९१] मोहिनी न्यां वै––अ, उ; मोहिनीभ्यां वै–– इ; मोहिनी नित्यं––ऋ; मोहनां नित्यं––ॠ.
[९२] **ऋग्वेदे** १.९९.१; **तै० आरण्यके** १०.२.१.
[९३] ०वेदसि मन्त्रेण––अ, इ, उ; ०वेदसेति मन्त्रेण ––ऋ, ॠ.
[९४] एतद्विषये ५.८पू०; ८.५पू० टिप्पणी द्रष्टव्या।
[९५] दशास्त्राणि––दशायुधानि; एतद्विषये १०.२२ पू० टिप्पणी द्रष्टव्या ।
[९६] शयने––अ, आ, ई.
[९७] कल्पयेद्देवीं––अ, आ, ई, ऋ, ॠ; कल्पयेद्देवं ––इ, उ.
[९८] 'ततो होमं प्रकुर्वीत शास्त्रदृष्टेन कर्मणा ।
पलाशोदुम्बराश्वत्थवटं पूर्वादितः क्रमात् ॥
समिदाज्यचरूँल्लाजांस्तिलसिद्धार्थमाषकान् ।
प्रत्येकं जुहुयाद्धीमाञ्शतमर्धार्धमेव च ॥
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ।
तत्तद्बीजं समुच्चार्य हुनेद्ध्यानविशेषतः ॥
आज्यादिमाषपर्यन्तं जुहुयाद्धृदयादिभिः ।
द्रव्यान्ते व्याहृतिं हुत्वा द्रव्यान्ते तु त्रियम्बकम् ॥
एवं जागरणं रात्रौ'
(**दीप्ते** ६८.३४–३८ पू०);
एतद्विषये पुनः **अजिते** ५३.३४उ०–३७ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।
[९९] समित्प्रकरणे वृक्षवाचकशब्दानां प्रायेण क्लीबे प्रयोगः। एतद्विषये ५.१८ पू० टिप्पणीं पश्यत।; पालाश०––ऋ, ॠ.
[१००] ०खदिराश्वत्थ०––अ, आ, इ, ई, उ; ०खादिराश्वत्थं०––ऋ, ॠ.
[१०१] ०शमीः––आ, ई.
[१०२] कनिष्ठाङ्गुल०––आ, ई.
[१०३] ०लमायतम्––अ, आ, इ, ई, ऋ, ॠ.
[१०४] समिद्धृतं––ऋ, ॠ.
[१०५] ०मधुक्षीर०––ई; चरुक्षीरं––ऋ, ॠ.
[१०६] ०वेणीप्रियङ्गवम्––ऋ; ०प्रियङ्गवम्––ॠ.
[१०७] तिलं––आ, ई; तिलद्रव्या प्र०––उ, ऋ.
[१०८] द्रव्यशब्दस्य पुंसि प्रयोगः; तद्विषये ६.१२ उ० टिप्पणी द्रष्टव्या ।
[१०९] आज्यं––अ, इ, उ; पूजाहोमान्तमेव च––ऋ, ॠ.

यस्यां [११०]दिशि स्थिता [१११]शक्तिस्तत्तत्कुण्डे समावहेत् ॥३१॥
अर्चयेद्गन्धपुष्पाद्यैः [११२]स्वस्वनामादिमन्त्रकैः ।
[११३]स्वपञ्चाङ्गषडङ्गैश्च [११४]समिदादीन्हुनेत्क्रमात् ॥३२॥
[११५]अष्टाविंशतिमेकैकं [११६]हुत्वाङ्गेषु[११७] [११८]कुशैः स्पृशेत् ।
पुनराहुति[११९]माज्येन [१२०]हुत्वाङ्गेषु च संस्पृशेत् ॥३३॥
द्रव्यशेषसमायुक्तं पूर्वाभिमुखसंस्थितः[१२१] ।
[१२२]जातवेदसमन्त्रेण [१२३]स्रुचा पूर्णाहुतिं हुनेत् ॥३४॥
सर्वाङ्गं [१२४]च कुशैः [१२५]स्पृष्ट्वा'

[[१२६]रत्नन्यासः]

'शयनाद्बिम्बमुद्धरेत्[१२७] ।
पूर्वाभिमुखमास्थाप्य [१२८]गन्धादिभिरथार्चयेत् ॥३५॥
[१२९]प्रासादे [१३०]स्थापनस्थाने पञ्चरत्नानि विन्यसेत् ।
[१३१]माणिक्यं मुक्तावैडूर्यमिन्द्रनीलं प्रवालकम् ॥३६॥
मध्यादिसोमपर्यन्तं [१३२]न्यस्य [१३३]हेमं तु विन्यसेत् ।

[[१३४]प्रतिमास्थापनम्]

प्रभाते सुमुहूर्ते तु प्रासादं संप्रवेशयेत् ॥३७॥

---

[११०] स्थिति दिशां शक्ति--ऋ, ॠ.
[१११] शक्तितत्कुण्डे--उ.
[११२] स्वैः स्वैर्नामादि०--अ, इ, उ.
[११३] पञ्चाङ्गानि षडङ्गैश्च--ऋ, ॠ; पञ्चाङ्ग-षडङ्गविवरणम् ९.२२; ११.२२. श्लोकयोर्दृश्यते
[११४] समिधादीन्--इ, ऋ, ॠ; समिधादि हु०--उ
[११५] षष्ठाविंशति--ऋ, ॠ.
[११६] ०रेकैकं--अ, आ, इ, ई, उ; रेकेकं--ई; एकैकं--ऋ, ॠ.
[११७] कृत्वाङ्गेषु--उ.
[११८] स्पृशेत्कुशैः--आ, ई.
[११९] ०राज्येन--आ, ई.
[१२०] हुत्वांशेषु--ऋ.
[१२१] ०मुखमास्थितः--आ, ई; ०संस्थितम्--इ, ऋ, ॠ.
[१२२] **ऋग्वेदे १.९९.१; तै० आरण्यके १०.२.१;** जातवेतस--उ, ॠ; जातवेतसि--ऋ.
[१२३] सृजा--ऋ.
[१२४] कुशया स्पृश्य--अ, इ, उ, ऋ, ॠ.
[१२५] स्पृश्य--आ.
[१२६] 'रत्नन्यासः प्रकर्तव्यो हैमं वा तत्र निक्षिपेत् ।' **(दीप्ते** ६८.२१ पू०)
[१२७] शयनाद्भिः समुद्धरेत्--आ.
[१२८] गन्धादिभिर्यथा०--ऋ.
[१२९] प्रासादस्था०--अ, आ, इ, उ.
[१३०] स्थापने स्थाने--ऋ, ॠ.
[१३१] माणिक्कं--आ, इ, उ, ऋ; माणिक्क०--ई.
[१३२] न्यस्त्वा--अ, इ, उ, ऋ, ॠ.
[१३३] होमं तु--अ, होमं च--ऋ, ॠ.
[१३४] 'प्रभाते स्थापनं भवेत् ।
आचार्यो मूर्तिपैः सार्धं स्नानं कृत्वा विशेषतः ॥
निद्राकुम्भांस्तु संपूज्य ततो होमं समाचरेत् ।
जयादिरभ्याधानं च राष्ट्रभृच्च हुनेत्क्रमात् ॥
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ।

वेशयेत्स्थापनस्थाने[१३५] प्रतिमां[१३६] शक्तिभिः सह ।
[१३७]जातवेदसमन्त्रेण प्रतिमां स्थापयेत्ततः ॥३८॥
[१३८]सकुशेन करेणैव कुम्भकूर्चोदकेन च ।
मूर्तिनामादिभिर्मन्त्रैः [१३९] प्रतिमायां [१४०]न्यसेत्क्रमात् ॥३९॥
[१४१]स्वस्वनामादि[१४२]पञ्चाङ्गं षडङ्गं विन्यसेत्क्रमात् ।
प्रोक्ष्याभिषेचनं कृत्वा गन्धादिभिरथार्चयेत्[१४३] ॥४०॥
आचार्यं पूजयेत्तत्र वस्त्रैराभरणादिभिः[१४४] ।
होमका[१४५]न्पूजयेत्पश्चात्पूजयेच्छक्तिधारकान् ॥४१॥
[१४६]स्विष्टमग्नेति मन्त्रेण स्विष्टान्तं होममाचरेत् ।
[१४७]पायसं च हविर्दद्याद्गुलान्नं [१४८]व्यञ्जनैः सह ।
ब्राह्मणान्भोजयेत्तत्र नवकन्याश्च भोजयेत् ॥४२॥

[१४९]इति [१५०]श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे [१५१]दुर्गाप्रतिष्ठा[१५२]विधिर्नाम[१५३]
[१५४]त्रयोदशः पटलः ॥

सर्वातोद्यसमायुक्तं नृत्तगेयसमन्वितम् ॥
कुम्भमादाय हृदिना [तु हृदा ?] प्रतिमाग्रे विनिक्षिपेत् ।
समुहूर्ते सुलग्ने तु नक्षत्रकरणान्विते ॥
कुम्भाद्बीजं समादाय प्रतिमाया हृदि न्यसेत् ।
सकलावयवं ध्यात्वा पूजयित्वा यथाविधि ॥
नैवेद्यं दापयेत्तस्माद्धृदयेन तु मन्त्रतः ।
पुनराचमनं दद्यात्ताम्बूलं च निवेदयेत् ॥
पूजयेत्तत्र मन्त्रेण तदाप्रभृति नित्यशः ।'
(**दीप्ते** ६८.३८––४४ पू०);

एतद्विषये पुनः **अजिते** ५३.३७उ०––४४ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः

[१३५] ०त्प्रतिमास्थाने––ई; स्थापने स्थाने––उ, ऋ, ॠ.

[१३६] प्रतिमा––ॠ.

[१३७] **ऋग्वेदे** १.९९.१; **तै० आरण्यके** १०.२.१; जातवेतस०––उ; जातवेतस्य––ऋ; जातवेदस्य––ॠ.

[१३८] कुशेन च करेणैव––उ.

[१३९] प्रतिमां विन्यसे०––उ, ॠ.

[१४०] क्रमान्न्यसेत्––आ, ई.

[१४१] 'आ, ई, ऋ, ॠ' मातृकासु इदमर्धं न दृश्यते ।

[१४२] पञ्चाङ्गषडङ्गविवरणं ९.२२.११.२२ श्लोकयोर्दृश्यते ।

[१४३] ०भिः समर्चयेत्––ई.

[१४४] ०राभरणैरपि––ऋ, ॠ.

[१४५] ०न्पूजकान्पश्चात्––आ, ई.

[१४६] **तै० ब्राह्मणे** २.४.४.

[१४७] 'आ' मातृकायामिदमर्धं न दृश्यते ।; पायसेन––अ, इ, ई, उ; पायसे च––ऋ, ॠ; पायसं, गुलान्नम्––एतद्विवरणाय ९.३७ पू० टिप्पणी द्रष्टव्या ।

[१४८] वाजनैः––इ.

[१४९] इति श्रीरौरवोत्तरे––अ; इति रौरवोत्तरे––इ; इति रौरवागमे––ऋ, ॠ.

[१५०] 'आ, ई' मातृकयोः 'श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे' इति न दृश्यते ।

[१५१] दुर्गाप्रतिष्ठापटलः पञ्चमः––ऋ, ॠ.

[१५२] 'आ, ई' मातृकयोः 'विधिः' इति न दृश्यते ।

[१५३] 'अ, इ, उ' मातृकासु 'नाम' इति न दृश्यते ।

[१५४] त्रयोदशपटलः––ई, उ.

चतुर्दशः पटलः[1]

[2]द्वारपालप्रतिष्ठाविधिः

[रुरुरुवाच]

[3]द्वारपालादिनामानि स्थानानि स्थापनानि च।
श्रोतुमिच्छामि संक्षेपा[4]त्कथयस्व मम प्रभो ॥१॥

[5]ईश्वर उवाच--

द्वारपालादिनामानि स्थानानि स्थापनानि च।
[6]चतुर्द्वारिषु [7]संक्षेपाद्वक्ष्यामि[8] [9]शृणु ते रुरो[10] ॥२॥

[[11]द्वारपालस्थानं तेषां नामानि च]

[12]पूर्वस्यां चैव दक्षिण्यां[13] [14]प्रतीच्यामुत्तरेऽपि च[15]।

---

[1] **रौरवोत्तर**स्यायं पटलः **शैवागमपटलसंग्रहाख्ये** ग्रन्थे (टि. १२३.) १८, १९ पृष्ठयोर्दृश्यते। तदीयपाठभेदाः 'लृ' इति सङ्केतेन निर्दिष्टाः।

[2] द्वारपालप्रतिष्ठाविषये **अंशुमदागमे** २३; **उत्तरकारणे** ८६; **दीप्ते** ६७; **योगजे** ६; **रौरवे** क्रियापादे ३२; **वीरे** ४१; **सहस्रे** ४४; **सुप्रभेदे** क्रियापादे ३९ पटला द्रष्टव्याः।

[3] प्रथमश्लोकः 'अ, आ, इ, ई, उ' मातृकासु न दृश्यते। 'लृ' मातृकायां '१' श्लोकस्योत्तरार्धं परं दृश्यते। तच्च द्वितीयश्लोकानन्तरं लिखितम्।

[4] ०त्कथयः सुकर्म प्रभो—लृ.

[5] 'अ, आ, ई' मातृकासु 'ईश्वर उवाच' इति न दृश्यते।; 'इ' मातृकायां 'ईश्वर उवाच' इत्यस्य स्थाने 'रुरुरुवाच' इति दृश्यते।

[6] चतुर्द्वारस्य—अ, आ, इ, ई, उ; चतुर्द्वारे तु—ऋ, लृ.

[7] संक्षेपं जपा संश्रृणु भो गुरो—लृ.

[8] ०द्वक्षामि—ई.

[9] श्रृणु तो—उ.

[10] रुरौ—ॠ.

[11] 'पूर्वदिग्द्वारपालौ तु नन्दी कालस्तथैव च।
नन्दिनं दक्षिणे स्थाप्य कालं चोत्तरदेशके ॥
दक्षिणद्वारपालौ तु दण्डी मुण्डी तथैव च।
दण्डिनं पश्चिमे स्थाप्य मुण्डिनं पूर्वके न्यसेत् ॥
पश्चिमद्वारपालौ तु भृङ्गिणं विजयं तथा।
भृङ्गिणं चोत्तरे स्थाप्य दक्षिणे विजयं तथा ॥
उत्तरद्वारपालौ तु अनन्तं पशुपतिं तथा।
अनन्तं पूर्वतः स्थाप्य पशुपतिं पश्चिमे न्यसेत् ॥
एवमेव क्रमेणैव स्थापयेद्द्वारदेवताः।'
(**वीरे** ४१.२४–२८पू०);
एतद्विषये पुनः **अजिते** ३६,३४६–३४७ श्लोकौ तदीयटिप्पणी, तथा **रौरवे** क्रियापादे ३२.६उ०–१६पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः।

[12] पूर्वद्वारस्य—अ, आ, इ, ई, उ, ऋ, ॠ; पूर्वद्वारं च—लृ.

[13] 'दक्षिणायाम्' इत्यत्र दक्षिण्यामिति प्रयोगः। एतद्विषये ४.३उ० टिप्पणी द्रष्टव्या।; राक्षण्यां—लृ.

[14] 'प्रतीच्याम्' इत्यस्य स्थाने 'पश्चिम्याम्' इति 'अ, इ, उ' मातृकासु पाठः। एवमेव ८.११ पूर्वार्धेऽपि एतासु मातृकासु पाठो दृश्यते। 'पश्चिमायाम्' इति भवितव्यम्। परं छन्दोभङ्गो भविष्यति। एवमेव 'दक्षिण्याम्' 'उत्तर्याम्' इति प्रयोगो बहुशो दृश्यते। अत्र विषये ८.११पू० टिप्पणी द्रष्टव्या।; पश्चिमादुत्तरे—ऋ; पश्चिम उत्तरे—ॠ; पश्चिमे उत्तरे—लृ.

[15] वा—उ, लृ.

द्वारस्य [16]दक्षिणादि स्याद्वामान्तं स्थानमुच्यते ॥३॥
महा[17]नन्दिमहाकालौ[18] पूर्वद्वारस्य पालकौ ।
[19]अनन्तः पशुपतिश्चैव[20] दक्षिणद्वारपालकौ ॥४॥
महा[21]चण्डमहामुण्डौ पश्चिमद्वारपालकौ ।
पिङ्गलो विजयश्चैव [22]चोत्तरद्वारपालकौ ॥५॥
पूर्व[23]द्वारस्य [24]दक्षिण्यां महा[25]नन्दि प्रकल्पयेत् ।
महा[26]कालस्योत्तरायां [27]क्रमात्स्थानं प्रकल्पयेत् ॥६॥
[28]दक्षिणद्वार[29]पश्चिम्या[30]मनन्तं [31]संप्रकल्पयेत् ।
[32]पूर्वे [33]पशुपतेः स्थानं [34]क्रमेणैव प्रकल्पयेत् ॥७॥
[35]पश्चिमद्वार [36]उत्तर्यां महाचण्डं प्रकल्पयेत् ।
महा[37]मुण्डस्य [38]दक्षिण्यां [39]क्रमात्स्थानं प्रकल्पयेत् ॥८॥
उत्तरद्वार[40]पूर्वस्यां पिङ्गलं [41]च प्रकल्पयेत् ।

---

[16] दक्षिणादिः—ई; दक्षिणादिश्यां वामान्ता—ॠ; दक्षिणादिश्यां—ॠ.

[17] ०नन्दि—अ, इ, ॠ; ०नदी—ॠ.

[18] ०कालं—अ, इ, उ, ऋ, ॠ; ०कालो—ॡ.

[19] अनन्तपशु०—इ.

[20] ०पतिश्च—आ, ई.

[21] ०चण्डं महामुण्डं—अ, इ; ०चण्डो महामुण्डि—उ; ०चण्डमहामुण्डि—ॠ; ०चण्डो महामुण्डिः—ॠ; ०चण्डा महामुण्डि—ॡ.

[22] उत्तर०—अ, ऋ, ॠ.

[23] ०द्वारदक्षिण्यां—ॠ.

[24] दक्षिणायाम्' इत्यत्र 'दक्षिण्याम्' इति प्रयोगः।; अत्र ४.३ उ० टिप्पणी द्रष्टव्या।; दक्षे तु—आ, ई.

[25] ०नन्दीं—अ, ॡ; ०नन्दि०—उ; ०नदीं—ॠ.

[26] ०कालमुत्तरस्यां—अ, इ; उ, ०कालं चोत्तरस्यां—आ, ई; ०कालस्य चोत्तर्य—ॠ; ०कालस्य चोत्तर्यां—ॠ.

[27] क्रमस्थानं—ऋ, ॠ; क्रमादेनं—ॡ.

[28] 'ॡ' मातृकायां '७, ८' श्लोकौ न दृश्येते ।

[29] 'पश्चिमायाम्' इत्यत्र 'पश्चिम्याम्' इति प्रयोगः 'दक्षिणायाम्' इत्यत्र 'दक्षिण्याम्' इति ४.३; ८.९, १० श्लोकेषु प्रयोगवद् वर्तते। तद्विषये तत्रत्यटिप्पणीं पश्यत। तथा ८.१०; १४.३ श्लोकयोः टिप्पण्यपि द्रष्टव्या ।

[30] ०मनन्तस्य प्र०—ऋ, ॠ.

[31] संप्रपूजयेत्—आ, ई.

[32] 'उ' मातृकायां ७ उत्तरार्धं ८ श्लोकश्च न स्तः।; पूर्वां—आ; पूर्वं—ई.

[33] पशुपतिः स्थाने—अ; पशुपतिस्थानं—आ, ई; पशुपतिस्थाने—इ; पशुपते स्थानं—ॠ.

[34] व्युत्क्रमेण—ॠ.

[35] 'अ, आ, ई' मातृकासु '८, ९' श्लोकौ न स्तः।

[36] चोत्तर्यां—इ, ऋ, ॠ; 'दक्षिणायां' 'पश्चिमायाम्' इत्येतयोः पदयोर्यथा 'दक्षिण्यां' 'पश्चिम्याम्' इति प्रयोगस्तथा 'उत्तरायाम्' इत्यत्र 'उत्तर्याम्' इति प्रयोग इति भाति। अत्र विषये ४,३; ८,९; ८,११; १४,३ टिप्पण्यो द्रष्टव्याः।

[37] मुण्डस्तु—इ, ॠ; ०चण्डस्य—ॠ.

[38] 'दक्षिणायाम्' इत्यत्र 'दक्षिण्याम्' इति प्रयोगः। अत्र ४.३ उ० टिप्पणी द्रष्टव्या।

[39] क्रमास्थानं—ऋ, ॠ.

[40] ०पूर्वस्य—ऋ, ॠ.

[41] गां—ऋ, ॠ.

[42]विजयं पश्चिमे चैव क्रमेणैव प्रकल्पयेत् ॥९॥
[43]द्वौ द्वौ तु [44]कल्पयेदेवं [45]देशिको [46]द्वारपार्श्वयोः ।

[जलाधिवासः]

[47]शिल्पिकर्मसमाप्तौ तु [48]जले चैवाधिवासयेत् ॥१०॥

[[49]मण्डपस्तत्र वेदिकायाः कुण्डस्य च कल्पनम्]

द्वारस्य पुरतः कुर्यान्मण्डपं पार्श्ववेदिकम्[50] ।
[51]पार्श्ववेदिकयोः पूर्वे [52]वृत्तकुण्डं प्रकल्पयेत् ॥११॥
[53]त्रिमेखलासमायुक्तं नाभियोनिसमन्वितम् ।

[मण्डपालंकारः]

गोमयालेपनं कृत्वा दर्भमालाभिरावृतम् ॥१२॥
मुक्ता[54]दामवितानैश्च फलपल्लवशोभितम् ।
स्थण्डिलं शालिभिः कुर्या[55]त्पार्श्ववेदिकयोः[56] क्रमात् ॥१३॥
वस्त्रैर्दर्भैः [57]समाच्छाद्य मण्डपं वेष्टयेत्प्रति[58] ।

[शयनाधिवासः]

[59]जलादुद्धृत्य शयने [60]वेशयेद्द्वारपालकौ ॥१४॥

---

[42] विजयस्य तु पश्चिम्यां—ऋ, ॠ, ऌ.
[43] द्वे द्वे तु—ऌ.
[44] कल्पयेद्देवं—अ, ऋ, ॠ, ऌ; कल्पयेदेव—आ, उ; कल्पयेद्देवीं—इ; कल्पयेद्देवौ—ई.
[45] देशिकद्वार०—आ, इ, उ; देशिका—ऋ.
[46] द्वारपालयोः—ऋ, ॠ.
[47] शिल्पिकृत्यं समाप्ते—अ, इ; शिल्पिकृत्ये समाप्ते—उ; शिल्पी तु तत्समाप्नोति—ऋ; शिल्पिकृत्य समाप्नोति—ॠ; कल्पितस्य समाप्नोति—ऌ.
[48] जलेनैवाधि०—अ; जलैश्चैवाधि०—ऋ, ॠ.
[49] 'षोडशस्तम्भसंयुक्तं चतुर्द्वारसमन्वितम् ।
मध्ये वेदिं प्रकल्प्याथ नवकुण्डं प्रकल्पयेत् ॥'
(**उत्तरकारणे** ८६.२५ उ०, २६ पू०); एतद्विषये पुनः**रौरवे** क्रियापादे ३२.१७ उ०, १८ श्लोकौ द्रष्टव्यौ ।
[50] ०वेदिका—अ, ऌ; ०वेदिकाः—इ; ०वेदिकाम्—ई, उ.
[51] पार्श्वे वेदिकयोः—अ.
[52] 'इ' मातृकायां ११ चतुर्थपादस्थाने 'शिल्पी कृत्यं समापूर्वे वृत्तकुण्डं प्रकल्पयेत्' इति दृश्यते ।
[53] त्रिमेखलसमा०—इ, उ, ऋ, ॠ, ऌ.
[54] ०दामैर्विता०—अ, इ, उ, ऋ, ऌ.
[55] ०त्पार्श्वे—अ, ऌ.
[56] वेदिका—ऌ.
[57] समावेष्टचाच्छाद्य—ऋ, ॠ; समासाद्य—ऌ.
[58] 'ऋ ॠ' मातृकयोः 'प्रति' इति नास्ति ।
[59] जलादुत्थाप्य—ई; जलानुद्धृत्य—ऋ; जलादुत्तीर्य—ऌ.
[60] शाययेद्द्वार०—ऋ, ॠ.

शयने शाययेद्द्वारपालकौ वेदिकाद्वये[६१]।
[६२]ऊर्ध्ववक्त्रं शिरः प्राच्यां शाययेच्छयनद्वये[६३] ॥१५॥

[[६४]होमः प्रतिमास्थापनं च]

[६५]कारयेद्यजनं होमं पूर्ववद्बिम्बमुद्धरेत् ।
स्थापयेत्पञ्चरत्नानि [६६]समासात्पूर्वदेशिकः ॥१६॥
[६७]स्वस्वनामादिमन्त्रेण स्थापयेत्तस्य मन्त्रकैः ।
[६८]उपचाराणि सर्वाणि [६९]निवेदयेत्तु पूर्ववत् ॥१७॥
आचार्यं पूजयेत्तत्र [७०]वस्त्रहेमाङ्गुलीयकैः ।
[७१]प्रतिष्ठातन्त्रविधिवच्छेषकर्म समाचरेत् ॥१८॥

[७२]इति [७३]श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे द्वारपालप्रतिष्ठा[७४]विधिर्नाम[७५]
चतुर्दशः पटलः ॥

---

[६१] ०द्वयोः—अ, इ, उ; ०द्वयौ—ऋ, ॠ, ॡ.
[६२] ऊर्ध्वे वक्त्रं—अ.
[६३] ०च्छयनद्वयोः—ऋ, ॠ; ०च्छयने द्वयौ—ॡ.
[६४] 'पूर्वोक्तविधिना चैव होमं कृत्वा समाचरेत् ।
प्रायश्चित्ताहुतिं कृत्वा सुमुहूर्ते सुलग्नके ।
अभिषेकं ततः कृत्वा हविर्दत्त्वा निवेदयेत् ।
ब्राह्मणान्भोजयेत्तत्र आचार्यं पूजयेत्ततः ।'
(**उत्तरकारणे** ८६.३० उ०–३२ पू०); एतद्विषये पुनः**रौरवे** क्रियापादे ३२.२२–२६ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।
[६५] 'ऋ, ॠ, ॡ' मातृकासु १६, १७ श्लोकौ न दृश्येते ।
[६६] समासात्सर्वं—आ, ई.
[६७] स्वस्वैर्नाम्नादि०—इ.
[६८] उपचारशब्दोऽत्र क्लीबे प्रयुक्तः ।
[६९] पूर्ववत्तु निवेदयेत्—आ, ई.
[७०] वस्त्राभरणैरपि—ॡ.
[७१] इदमर्धं 'ऋ, ॠ' मातृकयोरेव दृश्यते ।
[७२] इति श्रीरौरवोत्तरे—अ; इति रौरवोत्तरे—इ, ॡ; इति रौरवागमोत्तरे—ऋ, ॠ.
[७३] 'आ, ई' मातृकयोः 'श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे' इति न दृश्यते ।
[७४] 'आ, ई' मातृकयोः 'विधिः' इति नास्ति ।; ०विधिपटलः—ऋ; ०विधिपटलः अष्टमः—ॠ; ०विधिः समाप्तः—ॡ.
[७५] 'नाम' इति 'अ, उ' कोशयोर्न दृश्यते ।

पञ्चदशः पटलः

[1]लिङ्गभेदः

[2]रुरुरुवाच —

बालेन्दु[3]मौले भगवन्कपर्दिन्कालनाशक[4]।
लिङ्गानि श्रोतुमिच्छामि कथयस्व मम प्रभो ॥१॥

[5]ईश्वर उवाच —

[6]शिवाङ्कं परमं [7]प्राज्ञ [8]शिवभक्त शिवात्मकम्।
लिङ्गभेदं प्रवक्ष्यामि शृणु ते मुनिपुङ्गव ॥२॥

[चतुःषष्टिलिङ्गभेदाः]

[9]प्रथमं [10]सर्वतोभद्रं द्वितीयं [11]वर्धमानकम्।
[12]शैवाधिक्यं तृतीयं तु [13]त्रैराशिकं चतुर्थकम् ॥३॥

---

[1] लिङ्गभेदविषये **अंशुमत्काश्यपे** ५१, **अजिते** ४, **पूर्वकामिके** ६२, **पूर्वकारणे** ९, **किरणे** चर्यापादे २१, **दीप्ते** १३, **मकुटे** २, **योगजे** (टि० ३१७(३) पृ०१५८४-१६०२, **सुप्रभेदे** क्रियापादे ३३, **स्वायम्भुवे** ५१ पटला द्रष्टव्याः।

[2] 'आ, ई' मातृकयोः 'रुरुरुवाच' इति न दृश्यते।; रुरूवाच—इ.

[3] ०फाल—अ; कुण्डे—इ.

[4] ०नाशन—अ, आ, इ, ई.

[5] 'आ ई' मातृकयोः 'ईश्वर उवाच' इति न दृश्यते।; ईश्वरोवाच—इ.

[6] शिवाङ्गं—आ, ई, उ.

[7] प्राज्ञं—अ, आ, इ, ई, उ.

[8] शिवभक्तं—अ, इ, उ.

[9] अत्रत्याः ३-८ पू० श्लोकाः **शैवागमपरिभाषामञ्जर्यां** चतुर्थवर्गे ६५उ०-७० श्लोकतया समुद्धृताः।;
'समलिङ्गं वर्धमान शैवाधिक्यं च स्वस्तिकम्।
सर्वतोभद्रलिङ्गं च सार्वदेशिकमेव च ॥
धारालिङ्गं मुखलिङ्गं लिङ्गमष्टविधं भवेत्।'
(**अंशुमत्काश्यपे** ५१.१०७ उ०, १०८);
एतद्विषये पुनः **अजिते** ४.३३ श्लोको द्रष्टव्यः।

[10] 'सर्वतोभद्रमुच्यते।
मूलादग्रं सुवृत्तं तु लिङ्गोत्तुङ्गे त्रिभागिके ॥
तलवेशं तदेकांशं व्योमांशं योनिबन्धनम्।
पूजाभागं तदेकांश सर्वतोभद्रमेव हि ॥'
अंशुमत्काश्यपे ५१.१२९उ०-१३१पू०.

[11] भानुद्व्यंशे तदायामे सप्तांशं चतुरश्रकम्।
अष्टांशेनाष्टकोणं तु नवांशं वृत्तमुच्यते ॥
षट्सप्तवसुभागं वा पञ्चषट्सप्त एव वा।
चतुष्पञ्चषडंशं वा वर्धमानं चतुर्विधम् ॥
(**अंशुमत्काश्यपे** ५१.१२४,१२५);
एतद्विषये पुनः **अजिते** ४.३४ श्लोको द्रष्टव्यः।; तथा **रौरवे** क्रियापादे २८.९-११पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः।

[12] 'लिङ्गायामे दशांशे तु गुणांशं चतुरश्रकम्।
वस्वश्रं चैव तत्तुल्यं युगांशं स्याच्छिवांशकम् ॥
शिवाधिकमिति ख्यातमथवान्यप्रकारतः।
वेदवेदशरं वापि पञ्चपञ्चषडंशकम् ॥
षट्षट्सप्तांशकैर्वापि शैवाधिक्यं चतुर्विधम्।
(**अंशुमत्काश्यपे** ५१.१२६-१२८पू०);

एवं लिङ्गं [१४]चतुर्वर्गं महालिङ्गमितीरितम् ।
एकैकं तु चतुर्भेदमेकैकं तु [१५]चतुर्विधम् ॥४॥
चतुःषष्टि[१६]विधं लिङ्गं [१७]समासात्संप्रकीर्तितम् ।
सहस्रधारलिङ्गं तु [१८]चतुर्मूर्धादिलिङ्गकम् ॥५॥
महालिङ्गमिति [१९]प्रोक्तं [२०]धारालिङ्गं [२१]सहस्रकम् ।

एतद्विषये पुनः **अजिते** ४.३५ श्लोको द्रष्टव्यः ।; तथा **रौरवे** क्रियापादे २८.११उ०, १२ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[१३] 'समलिङ्गोच्छ्रयं नन्दभागं कृत्वा विशेषतः ।
षडंशैर्वर्तुले नाहं सप्तांशैर्मध्यनाहकम् ॥
वसुभागमधोनाहं यत्तत्त्रैराशिकं भवेत् ।
सर्वजात्यर्हकं चैव त्रैराशिकमिदं परम् ॥'
(**अंशुमत्काश्यपे** ५१.१३३उ०–१३५पू०);
'आयामं नवधा कृत्वा वृत्तं षड्भागमुच्यते ।
सप्तभागमथाष्टाश्रं तुर्याश्रं वसुभागिकम् ॥
त्रैराशिकमिति ज्ञेयं धनधान्यसुखावहम् ।'
(**पूर्वकारणे** ९.१२३ उ०, १२४)

[१४] 'चतुर्वर्गं' इत्यारभ्य 'एकैकं तु' इत्यन्तं 'आ, ई' मातृकयोर्न दृश्यते ।; चतुर्वर्जं—अ.

[१५] चतुर्विधिम्—उ.

[१६] ०विधि—उ.

[१७] समासात्परिकीर्तितम्—ई.

[१८] चतुर्मूर्धादिलिङ्गं=मुखलिङ्गम्;
'मुखलिङ्गं ततो वक्ष्ये सर्वकामार्थसाधनम् ।
पूजाभागं समस्तं तु द्विषष्टयंशं भजेत्क्रमात् ॥
त्रयोदशाङ्गुलार्धं तु मुखमेकं प्रकीर्तितम् ।
शराननं चतुर्वक्त्रं त्रिवक्त्रं चैकवक्त्रकम् ॥
चतुर्दिक्षु चतुर्वक्त्रं त्रिवक्त्रं पृष्ठहीनकम् ।
कुर्वेकवक्त्रमूर्ध्वे तु मुखमानेन बुद्धिमान् ॥
मकुटेनोर्ध्ववक्त्रं तु त्रयोदशार्धाङ्गुलेन तु ।
ग्रीवामूलात्स्तनान्तं स्यादर्धाधिकं त्रयोदश ॥
स्तनसूत्रविधिर्यावत्कारयेद्द्विभुजान्वितम् ।
प्रतिमालक्षणोक्तेन मार्गेणैव समाचरेत् ॥
शेषं लिङ्गवदाकारं कारयेल्लक्षणान्वितम् ।
वक्त्रलिङ्गप्रमाणं तु प्रोक्तम् '
(**पूर्वकारणे** ९.१३५–१४०);

एतद्विषये पुनः **रौरवोत्तरे** १७.३–६ श्लोका द्रष्टव्याः ।

[१९] प्रोक्तमाधारलिङ्गसहस्रकम्—इ.

[२०] धारलिङ्गं—अ, आ, इ, ई, उ;
'एकादिधारया बद्धं शतधारावसानकम् ।
धारालिङ्गं प्रशस्तं स्यात्'
(**पूर्वकामिके** ६२.३७);
'धारालिङ्गमथो वक्ष्ये श्रूयतां तु प्रजापते ।
पादादूर्ध्वकपर्यन्तं धारालिङ्गं प्रशस्तकम् ॥
अधो वेदाश्रकं कुर्यात्तदूर्ध्वे त्वष्टधारया ।
एतद्द्विज महाप्राज्ञ सर्वकामप्रसाधनम् ॥
ऊर्ध्वे षोडशधाराश्च भोगार्थी लभते सुखम् ।
एवं क्रमेण संयुक्तं धारालिङ्गमिति स्मृतम् ॥'
(**पूर्वकारणे** ९.१२५–१२७);
एतद्विषये पुनः**अजिते** ४.४८–५२ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[२१] 'सर्वतोभद्रलिङ्गे तु धाराः स्युः पञ्चविंशतिः ।
सप्तपर्णदलाकाराः समाः सर्वाः समान्तराः ॥
एकैकस्यां तु धारायां चत्वारिंशत्प्रसंख्यया ।
कुर्यात्समानि लिङ्गानि स्यात्तल्लिङ्गसहस्रकम् ॥'
(**ईशानशिवगुरुदेवपद्धतौ** क्रियापादे उत्तरार्धे ३७. ६५,६६);
'पूजाभागे सर्वतोभद्रलिङ्गे
धारा कार्या पञ्चपञ्चक्रमेण ।
एकैकस्यामष्टपञ्चोपरिष्टात्
साहस्रं तद्रेखया लिङ्गमुक्तम् ।'
(**मयमते** ३३.८३);
'सहस्राख्यस्य लिङ्गस्य वक्ष्यते लक्षणं ततः ।
आद्याख्यस्य च लिङ्गस्य रुद्रभागस्य कारयेत् ॥
तत्संख्याकानि लिङ्गानि भवेच्चैकसहस्रकम् ।
सहस्रलिङ्गमित्युक्तं सर्वकामप्रदं नृणाम् ॥
(**सिद्धान्तशेखरे** काम्यकाण्डे ६.२९५,२९६)

[22]नागरे सर्वतोभद्रं [23]द्राविडे वर्धमानकम् ।।६।।
शिवाधिकं [24]वेसरे च त्रैराशिकं तु [25]मिश्रके ।
क्रमाच्चतुर्विधं लिङ्गं स्थापयेद्विधिपूर्वकम् ।।७।।
धारालिङ्गसहस्राणि [26]मिश्रके [27]स्थापयेद्बुधः ।

[[28]प्रासादलिङ्गयोर्मानम्]

आदौ कृतं चेत्प्रासादं लिङ्गं प्रासादमानतः[29] ।।८।।
[30]गर्भमानं द्वारमानं हस्तमानं त्रिधा भवेत् ।
लिङ्गमादौ कृतं चेत्तु प्रासादं लिङ्गमानतः ।।९।।
[31]लिङ्गद्विगुणं त्रिगुणं चतुर्गुणं तथा भवेत् ।
आदौ लिङ्गं प्रकुर्याच्च [32]ह्यादौ प्रासादमेव वा ।।१०।।
[33]हस्तैर्वितस्तिभिर्मात्रैर्मानोन्मानं त्रिधा भवेत् ।

---

[22] नागरद्राविडवेसरमिश्रकशब्दानां प्रथमान्तानां सप्तम्यन्तपाठः **शैवागमपरिभाषामञ्जरी**पाठानुसारेण साधितः ।; नागरप्रासादलक्षणं १.७ उत्तरार्धे दृश्यते ।

[23] द्राविडप्रासादलक्षणम् १.८ पूर्वार्धे दृश्यते ।

[24] वेसरप्रासादलक्षणम् १.८ उत्तरार्धे दृश्यते ।

[25] मिश्रकप्रासादलक्षणम् १.९–११ श्लोकेषु दृश्यते ।

[26] मिश्रकम्—आ, ई.

[27] स्थापयेद्गुरुः—ई.

[28] 'तच्छैलं नवहस्तान्तं पार्थिवं च तथा मतम् ।
त्र्यंशेन दारुजं लोहमस्यार्धेनोत्तमं मतम् ।।
षट्षडङ्गुलहान्या तु मध्यमं मानमुच्यते ।
तदलाभे तु तन्मध्ये त्वेकैकाङ्गुलहानितः ।।
मानं शतं च नवतिर्हस्तयुक्तप्रमाणतः ।
धामगर्भप्रमाणेन अधमं लिङ्गमुच्यते ।।
गर्भार्धं मध्यमं ज्ञेयं पञ्चत्र्यंशं परं भवेत् ।
मध्यमेऽष्टविभागेन नवलिङ्गोदयानि च ।।
ज्येष्ठे ज्येष्ठात्समारभ्य पादह्रासाद्द्विजोत्तमाः ।
मानानि च त्रयस्त्रिंशल्लिङ्गानां कीर्तितानि तु ।।
अथवान्यप्रकारेण गर्भमानं विधीयते ।
अधमं गर्भपादं स्यात्त्रिपादं ज्येष्ठमानकम् ।।
पूर्ववन्मध्यमं कृत्वा त्रयस्त्रिंशत्प्रमाणकम् ।'
(**पूर्वकामिके** ६२.१४–२० पू०);
'अथेदानीं विशेषेण लिङ्गात्प्रासाद उच्यते ।
स्वायम्भुवं बाणलिङ्गं दैविकं चार्षकं त्विति ।।
सिद्धविद्याधराद्यैश्च स्थापितं यन्महात्मभिः ।
तेषां लिङ्गवशाद्विद्वान् प्रासादं परिकल्पयेत् ।।
पूजांशमानतो नाहाद्विस्ताराादुच्छ्रयादपि ।
एतेषां कर्णमानैश्च प्रासादं परिकल्पयेत् ।।
तत्समं द्विगुणं वापि त्रिगुणं वा चतुर्गुणम् ।
पञ्चषड्गुणितं वापि द्विगुणाद्यं प्रगृह्यताम् ।।
अष्टौ वा देवमानानि नवमानानि सुव्रताः ।'
(**उत्तरकामिके** ४०.१–५ पू०);
'प्रासादस्य वशाल्लिङ्गं लिङ्गमानेन हर्म्यकम् ।'
(**दीप्ते** १३.४० पू०);
एतद्विषये पुनः**अजिते** ४.५–१० श्लोकास्तदीयटिप्पणी, तथा **रौरवे** क्रियापादे २८.३–७ पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[29] 'ई' मातृकायां '८' श्लोकानन्तरं '१०' श्लोकस्योत्तरार्धं दृश्यते ।

[30] गर्भमानद्वार०—उ.

[31] लिङ्गाद् द्विगुणं—अ; 'ई' मातृकायां १० श्लोकस्य पूर्वार्धं न दृश्यते ।

[32] आदौ—अ, इ, उ.

[33] हस्तः—
'अङ्गुलैः सूर्यसंख्यातैर्वितस्तिरिह कथ्यते ।
तद्द्वयं हस्तमुद्दिष्टं स किष्कुरिह संमतः ।।
पञ्चविंशतिमात्रं तु प्राजापत्य इति स्मृतः ।

प्रासादलिङ्गयोरत्र नवधा [३४]मानमीरितम् ॥११॥
प्रासादं चापि लिङ्गं च कुर्यान्नवविधं[३५] क्रमात् ।

[चतुःषष्टिविधं लिङ्गम्]

उत्तमं मध्यमं चैव [३६]त्वधमं चाधमाधमम् ॥१२॥
चतुर्विधं [३७]तदेकैकं तदेकैकं चतुर्विधम् ।
चतुःषष्टिविधं लिङ्गं मानमेवं प्रकीर्तितम् ॥१३॥

[३८]इति [३९]श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे लिङ्ग[४०]भेदो नाम
पञ्चदशः पटलः ॥

मात्रैस्तु षड्विंशतिभिर्धनुर्मुष्टिः प्रकीर्तितः ॥
सप्तविंशतिभिर्मात्रैर्धनुर्ग्रह उदाहृतः ।
मानाङ्गुलोत्थहस्तास्तु शास्त्रेऽस्मिन् संप्रकी-
र्तिताः ॥'

वितस्तिः—
'पौरुषः पुरुषाज्जातस्त्वङ्गुष्ठाद्दक्षिणादिह ।
तलं प्रसार्य चाङ्गुष्ठसहितैश्चतुरङ्गुलैः ॥
कनिष्ठाद्यैः क्रमेणैव यवगोकर्णसंज्ञकैः ।
वितस्तिः कथितश्चैवं प्रादेशस्तदनन्तरम् ॥
एवं विविध उद्दिष्टो हस्तः सर्वेषु वास्तुषु ।'
(**पूर्वकामिके** १६.९–१४ पू०)

मात्राङ्गुलम्—
'मध्यमाङ्गुलिमध्यस्थपर्वदीर्घं तु यद्भवेत् ।
श्रेष्ठं मात्राङ्गुलं प्रोक्तं पादहीनं तु मध्यमम् ॥
अर्धोनमधमं प्रोक्तं मात्राङ्गुलविभेदतः ।'
(**पूर्वकामिके** १६.६ उ०, ७);
हस्तैर्ऽपतस्त्रिभिर्मात्रैः—अ, हस्तैर्विंशतिभि-
र्मात्रैः—ई.

३४ मानमीप्सितम्—उ.

३५ ०विधि—उ.

३६ अधमं—अ, इ; समं चाप्यधमा०—आ; समं चाधमा०—ई.

३७ तदैकैकं तदैकैकं—आ, इ; तदेकेकं तदेकेकं—ई.

३८ इति श्रीरौरवोत्तरे—अ; इति रौरवोत्तरे—इ.

३९ 'आ, ई' मातृकयोः 'श्रीमद्रौरवोत्तरे प्रतिष्ठा-तन्त्रे' इति न दृश्यते ।

४० ०भेदः पञ्चदशः—अ, इ; ०भेदविधिपञ्चदश-पटलः—उ.

षोडशः पटलः

[1]शैललिङ्गप्रतिष्ठाविधिः

[2]**रुरुरुवाच --**

प्रासादे [3]नागराद्ये च [4]माटकूटे च मण्डपे।
[5]प्रतिष्ठां शैललिङ्गस्य श्रोतुमिच्छाम्यहं प्रभो ॥१॥

[6]**ईश्वर उवाच --**

[7]नागराद्यविमाने च मण्डपे माटकूटयोः।
[8]प्रतिष्ठां [9]शैललिङ्गस्य वक्ष्यामि [10]शृणु ते रुरो ॥२॥

[[11]लिङ्गपीठिकयोर्मानम्]

प्रासादगर्भमानेन द्वारमानेन वा पुनः।

---

[1] शैललिङ्गप्रतिष्ठाविधिविषये **अजिते** १८, **पूर्वकामिके** ६४, **पूर्वकारणे** ५९, **उत्तरकारणे** २१, **किरणे** चर्यापादे २६, **चिन्त्ये** २०, **दीप्ते** २०, **मकुटे** ९, **मतङ्गपारमेश्वरे** क्रियापादे १३, **योगजे** ४, **रौरवे** क्रियापादे २८, **सन्तानसंहितायाम्** १९, **सुप्रभेदे** क्रियापादे ३६, **सूक्ष्मे** ४२ पटला द्रष्टव्याः।

[2] 'आ, ई' मातृकयोः 'रुरुरुवाच' इति न दृश्यते।

[3] नागरोद्ये--आ.

[4] 'माट' इत्ययं शब्दः संस्कृतकोशेषु नोपलभ्यते। द्राविडकोशेऽस्य शब्दस्य एकतलादिगृहविशेष इत्यर्थो दृश्यते। 'कूटं'='गृहम्' इति शब्दरत्नावली इति **शब्दकल्पद्रुमे**।

[5] प्रतिष्ठा--आ, इ, ई, उ.

[6] 'आ, ई' मातृकयोः 'ईश्वर उवाच' इति नास्ति।

[7] नागराद्यैर्विमानेन--अ, इ, उ; नागरस्य विमाने च--ई.

[8] प्रतिष्ठा--उ.

[9] शैवलिङ्गस्य--इ.

[10] श्रुणु तो--उ.

[11] लिङ्गमानम्--

'यस्य गर्भगृहस्यार्धं लिङ्गोत्सेधं तु कन्यसम्।
नवभागस्य पञ्चाङ्गं मध्यमं लिङ्गमुच्यते ॥
पञ्चभागविभक्ते तु त्रिभागे ज्येष्ठमुच्यते।
एवं स्याद्गर्भमानं तु नवलिङ्गं विकल्पयेत् ॥
ज्येष्ठकन्यसयोर्मध्ये चाष्टभागेन भाजयेत्।
एवं कृते विशेषेण नवलिङ्गं तु जायते ॥
उत्तमस्योत्तमं नास्ति अधमाधममेव च।
गर्भमानमिति प्रोक्तं हस्तमानं विधीयते ॥
एकहस्तं द्विहस्तं च त्रिहस्तं चाधमं भवेत्।
चतुर्हस्तं पञ्चहस्तं षष्ठहस्तं तु मध्यमम् ॥
सप्तमं चाष्टहस्तं च नवहस्तं चोत्तमं भवेत्।
गर्भमानेन वा कुर्याद्धस्तमानेन वा पुनः ॥
यजमानेच्छया लिङ्गं कारयेत्तु विशेषतः।
एकहस्तप्रमाणं तु हीनलिङ्गं न कारयेत् ॥
कारयेज्जङ्गमं लिङ्गं स्फटिकामयमेव वा।
गृध्रकाकादिदोषेण स्थानभङ्गो भवेत्तथा ॥
एवं लिङ्गोच्छ्रयं प्रोक्तं वक्ष्यते लिङ्गविस्तरः।
आयामं यस्य लिङ्गस्य तत्समं नाहमुच्यते ॥
उत्तमोत्तमलिङ्गस्य विष्कम्भं तु विधीयते।'
(**दीप्ते** १३.६०-६९ पू०);

एतद्विषये पुनः **अजिते** ४.५-१०; **रौरवे** क्रियापादे २८.३-५, तथात्र **रौरवोत्तरे** १५.८-

स्तम्भमानेन वा [12]कुर्यात्कलाहस्तमितेन वा ॥३॥
लिङ्गं कुर्यात्त्रि[13]भागैकां लिङ्गमानेन [14]पीठिकाम् ।

[[15]सूत्रवर्तनम्]

पूजा[16]भागत्रिभागैके [17]द्विभागे[18] वा त्रिभागके[19] ॥४॥
पार्श्वयोः पृष्ठसंयुक्तं लिखेत् सूत्रं शिवाधिके[20] ।
लिङ्गमानेन वार्धेन पादेनार्धेन वा पुनः ॥५॥

[[21]प्रतिलिङ्गम्]

कुर्यात्तु [22]याज्ञिकैर्वृक्षैः प्रतिलिङ्गं [23]ससूत्रकम् ।
बाणलिङ्गं विना [24]यन्त्रं प्रतिलिङ्गं प्रकल्पयेत् ॥६॥
प्रतिलिङ्गं प्रकर्तव्यं [25]बाललिङ्गं तथोक्तवत् ।

उ०–१३ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।; पीठिकामानम् —

'पीठमथ शृणु ।
स्त्रीशिलां तु परिग्राह्य पीठं कुर्याद्विशेषतः ॥
लिङ्गविस्तारमानेन त्रिगुणं पीठविस्तृतम् ।
कर्णाद् द्विगुणमेवं वा त्रिगुणं पीठविस्तृतम् ॥
कर्णस्य द्विगुणार्धं वा लिङ्गदैर्घ्यसमं तु वा ।
गर्भगेहं त्रिधा भज्य भागैकं पीठविस्तृतम् ॥
लिङ्गमानेन हर्म्यं स्याल्लिङ्गमानेन पिण्डिका ।
पूर्वाकृतिर्यथा पीठं तथा कुर्यात्पुनः पुनः ॥
अन्याकृतिर्न कर्तव्या कृता चेत्कर्तृनाशिनी ।
वेदाश्राष्टाश्रमानं तु विभजेदष्टधा पुनः ॥
गुणभागमधस्त्यक्त्वा बाणांशं पीठकोच्छ्रयम् ।
ब्राह्मचवैष्णवमानं तु षोडशांशेन भाजयेत् ॥
सप्तभागमधो मुक्त्वा ग्रहांशं पिण्डिकोच्छ्रयम् ।'
(**पूर्वकारणे** ९.१४० उ०–१४६); एतद्विषये पुनः**अजिते** १६.१–८ तथा **रौरवे** क्रियापादे २८.७४, ७५ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[12] कुर्यात्कर्तृहस्तमितेऽथवा—अ, इ, उ.

[13] ०भागैकं—अ, आ, इ, उ; भागेकं—ई.

[14] पीठिका—अ, इ, उ.

[15] एतद्विषये **अजिते** १८.५९–७२ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[16] ०भागं त्रिभागैकं—अ, आ, इ, उ; ०भागं त्रिभागेकं—ई.

[17] त्रिभागं— आ, ई.

[18] ०भागं—अ, इ, उ.

[19] ०भागिकम्—अ, आ, इ, उ; ०भागकम्—ई.

[20] सूत्रा शिवाधिकम्—अ, इ, उ; सूत्रशिवाधिकम्—आ; सूत्रं शिवाधिकम्—ई.

[21] 'कारयेत्प्रतिलिङ्गं तु याज्ञिकैर्वृक्षकैस्तथा ।
उपपीठं तथा कृत्वा श्वभ्रमध्ये तु विन्यसेत् ॥
प्रतिलिङ्गं तु संस्थाप्य सुस्थितं दुःस्थितं विदुः ।
पिण्डिकां प्रतिलिङ्गं च यष्टिसूत्राणि संत्यजेत् ॥'
(**पूर्वकारणे** ५९.१७० उ०–१७२ पू०)

[22] स्वाज्ञिकैर्वृक्षे—इ.

[23] ससूत्रकैः—अ, आ, इ, ई, उ.

[24] यन्त्रम्=यन्त्रलिङ्गम् ।; अत्र **रौरवे** क्रियापादे २५.११ उ०–२० पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[25] बाणलिङ्गं—आ, ई; बाललिङ्गम्—
'लोहजं शैलजं लिङ्गं दारुजं मृन्मयं तु वा ।
कारयेत्तु विशेषेण लक्षणोक्तेन देशिकः ॥
शमीबिल्वमधूकैश्च अश्वत्थोदुम्बरैस्तथा ।

आदौ [26]मध्येऽवसाने [27]तु लिङ्गस्थापनकर्मणि ॥७॥
प्रतिलिङ्गं गृहीत्वा तु कर्मान्ते तद्विसर्जयेत् ।

[[28]लक्षणोद्धारः]

शिल्पान्ते शैललिङ्गं तु पञ्चगव्ये तु निक्षिपेत् ॥८॥
[29]प्रासादपुरतः कुर्यान्मण्डपं चतुरश्रकम् ।
तन्मध्ये वेदिकां कुर्याद्दर्पणोदरसंनिभाम्[30] ॥९॥
स्थण्डिलं कल्पयेत्तत्र वेदिकोपरि शालिभिः ।
पञ्चगव्यात्समुद्धृत्य लिङ्गं [31]प्रक्षालयेज्जलैः ॥१०॥
आनयेद्वेदिकामध्ये[32] स्थापयेत्प्राक्ससूत्रकम् ।

बाललिङ्गं प्रकर्तव्यं मृन्मयं चेत्सुपक्वकम् ॥
द्वादशाङ्गुलमुत्सेधमुत्तमं परिकीर्तितम् ।
सप्ताङ्गुलमथोत्सेधमधमाधममेव हि ॥
तस्माद्द्वयङ्गुलवृद्ध्या तु बाललिङ्गा नव स्मृताः ।
स्वधामकुण्डलीभूतं सर्ववृत्तमिहोच्यते ॥
छत्राकारं शिरः कुर्याल्लक्षणोद्धारणं विना ।
स्वयोनिं कारयेत्पीठमथवा चेष्टकामयम् ॥
सप्तपञ्चत्रिहस्तं वा कर्तव्यं तरुणालयम् ।
एवमाद्यं समाख्यातं द्वितीये तरुणालये ॥
पूजाभागसमायामं त्रिपादं वार्धमेव वा ।
आयामसदृशं नाहं लक्षणोद्धारणं विना ॥
नतौ विष्णुविरिञ्चांशौ तच्छिरो मूललिङ्गवत् ।
लिङ्गमेवं समापाद्य'
(**सुप्रभेदे** क्रियापादे २६. ८ उ०–१६ पू०); एतद्विषये पुनः **रौरवे** क्रियापादे २७.८ उ० –१२पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[26] मध्यावसाने––उ.

[27] च––ई.

[28] 'कृत्वा कर्मकुटौ देशे लिङ्गे सूक्ष्माणि शिल्पिभिः ।
शाणाभिर्घर्षयित्वा तु लिङ्गं पीठसमायुतम् ॥
पीठे तु प्रतिलिङ्गं च यथायुक्त्या तु योजयेत् ।
कृत्वा तु लक्षणोपेतं लक्षणोद्धारमारभेत् ॥
प्रासादस्याग्रतः कुर्यान्मण्टपं नातिदूरतः ।
अथवा दक्षिणे भागे सर्वालङ्कारसंयुतम् ॥
मध्यमे स्थण्डिलं कृत्वा तत्र लिङ्गं तु विन्यसेत् ।
सुवर्णतूलिकां ग्राह्य हृदा गैरिकया लिखेत् ॥
स्थूलरेखां ततः कृत्वा शिल्पिना विधिचोदितम् ।
पूजाभागं ततः कृत्वा षोडशांशं समं बुधः ॥
त्यक्त्वोर्ध्वे तु चतुर्भागं भागेन मुकुलं भवेत् ।
त्रिभागैकं भवेदग्रं तन्मानं मूलविस्तृतम् ॥
तन्मानमूलं तत्प्रोक्तं त्यक्त्वाधस्ताद्द्वियंशकम् ।
रेखाद्वयं तु नालं स्यात्तयोरर्धांशकान्तकम् ॥
पार्श्वसूत्रौ समालिख्य मुकुलाद्यब्धिकान्तकम् ।
नालान्तरत्रियंशेन तन्मूलादनुपूर्वशः ॥
द्विभागोर्ध्वे तु परितः सूत्रे पृष्ठे तु बन्धयेत् ।
यवं वापि यवार्धं वा सूत्रनिम्नं विधीयते ॥
सूत्राग्रे तु मुखं प्रोक्तं सूत्रसन्धौ तु पृष्ठकम् ।
सूत्रपार्श्वं तु तत्पार्श्वं तन्मूलं तस्य पद्मकम् ॥
स्थापकः स्थपतिं पूज्य पश्चाच्छुद्धिं समाचरेत् ।
अष्टमृत्पञ्चगव्यैश्च शुद्धतोयैर्विचक्षणः ॥'
(**सुप्रभेदे** क्रियापादे ३६.६–१६); एतद्विषये पुनः **अजिते** १८.४९–९४; **मतङ्गपारमेश्वरे** क्रियापादे १३.२४ उ०–३२, तथा **रौरवे** क्रियापादे २८. १५–२३ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[29] प्रासादं––आ, ई.

[30] ०संनिभम्––अ, आ, इ, ई, उ.

[31] प्रक्षालयेत्सुधीः––आ, ई.

[32] ०मध्यं––आ, ई.

[33]विलिखेत्स्वर्णसूचिभ्यां [34]लिङ्गे सूत्रत्रयान्विते[35] ॥११॥
[36]ब्रह्मविष्णुमहेशास्तु [37]दक्षिणे वाममध्यगे[38]।
[39]ब्रह्मजज्ञानमन्त्रेण ब्रह्मरेखां समालिखेत् ॥१२॥
[40]इदं विष्णुर्विचक्रम इति मन्त्रेण विष्णुरेखां समालिखेत्।
[41]आवो राजेति[42] मन्त्रेण रुद्ररेखां समालिखेत् ॥१३॥
अर्पयेन्मधुसर्पिभ्यां हेमसूच्या स्वलिङ्गकैः[43]।

[[44]जलाधिवासः]

पुरतः [45]स्थण्डिलं कृत्वा तत्र लिङ्गं प्रवेशयेत् ॥१४॥
प्राक्शिरस्कमधःसूत्रं पीठिकां [46]सह वासयेत्।
पटेनावेष्टयेल्लिङ्गं प्रपायां वेष्टयेत्पटैः ॥१५॥
जलतीरे प्रपां कृत्वा मध्ये कृत्वा तु वेदिकाम्।
स्थण्डिलं कारयेत्तत्र स्थापयेत्कलशान्नव ॥१६॥
ससूत्रान्वस्त्रसंयुक्तान्सकूर्चान् सापिधानकान्[47]।
एकत्रिपञ्चरात्रं वा सप्तरात्रं निवासयेत् ॥१७॥

[[48]मण्डपस्तत्र वेदिकाकुण्डकल्पनम्]

प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम्।

---

[33] विलेखेत्––उ.
[34] लिङ्गं––अ, आ, ई, उ; लिङ्गसूत्र०––इ.
[35] ०त्रयान्वितम्––अ, आ, इ, ई, उ.
[36] 'उ' मातृकायां १२ पूर्वार्धं न दृश्यते।
[37] दक्षिणं––अ, इ; दक्षिणा––आ, ई.
[38] मध्यगम्––अ, ०मध्यमम्––आ, इ, ई.
[39] **तै० संहिता** ४.२.८.४.
[40] **ऋग्वेदे** १.२२.१७; **तै० संहिता** १.२.१३.४.
[41] **ऋग्वेदे** ४.३.१; **तै० संहिता** १.३.१४.२; **सामवेदे** ६९;
[42] आपो राजेति––अ; 'उ' मातृकायामिदमर्धं न दृश्यते।
[43] स्वलिङ्गकैः मधुसर्पिमन्त्रैः; अत्र ११.४ उत्तरार्धटिप्पणीं पश्यत।
[44] 'जलेऽधिवासयेद्देवं द्वित्रिरात्रं सपीठकम्।
एकरात्रं दिवारात्रं याममात्रमथापि वा ॥
नाभिमात्रोदके कृत्वा प्रपामण्टपमण्डिताम्।
जलतीरे विधायैवं स्थण्डिलद्वितयं क्रमात् ॥
भद्रपीठं समारोप्य देवं देवीं क्रमेण तु।
आच्छाद्य नववस्त्रेण लम्बकूर्चसमन्वितम् ॥
अभितोऽष्टघटान्न्यस्त्वा शम्भोर्देव्याः समाहितः।
प्रधानकूर्चवस्त्राढ्यान् हेमयुक्तान्सलोकपान् ॥
जलमध्ये न्यसेत्पश्चाद्देवं देवीं घटांश्च तान्।
शाययेत्फलकादौ तु प्राक्शिरश्चोर्ध्ववक्त्रकम्' ॥
(**पूर्वकामिके** ६४.७५–७९);
एतद्विषये पुनः **अजिते** १८.९५–९८, तथा **रौरवे** क्रियापादे २८.२४–२६ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः।
[45] स्थण्डिले––आ, इ.
[46] पीठिकां लिङ्गेन सह वासयेदित्यर्थः।; सुविवासयेत्––अ, इ, उ; सुविपासयेत्––आ; सुविपातयेत्––ई.
[47] सपिधानकान्––आ.
[48] 'तत्रोक्तदेवहर्म्याग्रे पार्श्वयोर्यागमण्डपम्।

हस्तद्वादशविस्तारं दशहस्तमथापि वा ॥१८॥
[49]षट्त्रिंशत्स्तम्भसंयुक्तं षोडशस्तम्भमेव [50]वा ।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ॥१९॥
तन्मध्ये वेदिकां कुर्यान्नव[51]भागैकभागिकाम्[52] ।
एकहस्तसमुत्सेधां[53] दर्पणोदरसंनिभाम्[54] ॥२०॥
[55]वेदिकायास्ततो बाह्ये नवकुण्डानि[56] कल्पयेत् ।
चतुरश्रं तु [57]पूर्वायामाग्नेय्यां [58]तु [59]भगाकृतिम् ॥२१॥
धनुराकृति याम्यायां[60] नैर्ऋत्यां तु त्रिकोणकम् ।
[61]वृत्तकुण्डं तु [62]पश्चिम्यां [63]वायव्यां तु षडश्रकम् ॥२२॥
पद्मकुण्डं तु सौम्याया[64]मैशान्यामष्टकोणकम् ।
[65]ईशानेन्द्रकयोर्मध्ये वृत्तकुण्डं प्रकल्पयेत् ॥२३॥
त्रिमेखलासमायुक्तं नाभियोनिसमन्वितम् ।

[[66]मण्डपालंकारः]

प्रोक्षयेत्पञ्चगव्येन गोमयेनानुलेपयेत् ॥२४॥

कल्पयेद्दशरन्ध्राष्टहस्तं च चतुरश्रकम् ॥
विकारस्तम्भसंयुक्तं भानुस्तम्भयुतं तु वा ।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ॥
वितानध्वजसंयुक्तं दर्भमालाभिरावृतम् ।
गात्रवेष्टनसंयुक्तं चित्रवस्त्रैरलंकृतम् ॥
स्वर्णदामै रत्नदामैः पुष्पदामैश्च शोभितम् ।
क्रमुकं नालिकेरं च लिकुचं मातुलुङ्गकम् ॥
एवं फलैश्च पुष्पैश्च समन्तादुपशोभितम् ।
कृत्वा मध्यांशके वेदिं तच्चतुर्थांशमुन्नतम् ॥
उपवेदिसमायुक्तं निम्नोन्नतविवर्जितम् ।
कुण्डानि परितः कुर्यादिन्द्राद्यष्टदिशासु च ॥
श्रुत्यश्रं योनिचन्द्रार्धं त्र्यश्रं वृत्तं षडश्रकम् ।
पद्ममष्टाश्रकुण्डानि लक्षणोक्तं तु कारयेत् ॥
शक्रेशानकयोर्मध्ये वृत्तकुण्डं प्रधानकम् ।
पञ्चाग्नौ चतुरश्राणि दिशासु श्रेष्ठं वृत्तकम् ॥
एकाग्नौ चैव कुण्डं च पूर्वे वा चतुरश्रकम् ।'
(**चिन्त्ये** २०.१४ उ०–२२);
एतद्विषये पुनः **अजिते** १८.३४–४८ तथा **रौरवे** क्रियापादे २८.२७–३१ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[49] 'उ' मातृकायां १९ श्लोकः २० श्लोकस्य चतुर्थपादे 'दर्पणोदर' इत्यन्तो भागश्च लुप्तः ।

[50] च—ई.

[51] ०भागेक०—ई.

[52] ०भागिकम्—अ, इ, ई; भागकम्—आ.

[53] ०समुत्सेधं—अ, आ, इ, ई. उ.

[54] ०संनिभम्—अ, आ, इ, ई, उ.

[55] वेदिकायां ततो—आ.

[56] ०कुम्भानि—उ.

[57] पूर्वस्यामा०—ई.

[58] तद्भगाकृतिः—अ; तद्भगा०—इ.

[59] 'भगाकृतिम्' इत्यारभ्य 'त्रिकोणकम्' इत्यन्तो भागः 'उ' मातृकायां लुप्तः ।

[60] याम्ये धन्वाकृतिः प्रोक्ता—आ, ई.

[61] घृतकुण्डं—इ.

[62] 'पश्चिमायाम्' इत्यत्र 'पश्चिम्याम्' इति प्रयोगः।; अत्र १४, ७ पू० टिप्पणी द्रष्टव्या ।; पश्चिम्या—ई.

[63] वायवे—आ, ई.

[64] ०मीशान्या०—इ; 'उ' मातृकायां 'ऐशान्याम्' इत्यारभ्य २४ प्रथमपादे 'समायुक्तम्' इत्यन्तं लुप्तम् ।

[65] ईशान इन्द्रयो०—अ, इ; ईशानेन्दयो०—ई.

[66] एतद्विषये **अजिते** १८.१०४–११३ तथा **रौरवे** क्रियापादे २८.३३–३५ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[६७]स्तम्भान्वस्त्रैः समावेष्ट्य दर्भमालाभिरावृतम् ।
आवेष्टयेद्वितानैश्च मण्डपं [६८]वेष्टयेत्पटैः ॥२५॥
मुक्ता[६९]दामैर्ध्वजैश्छत्रैर्भूषयेत्फलपल्लवैः ।
[७०]पालिकाघटिकापूर्णकुम्भैरेवाष्टमङ्गलैः[७१] ॥२६॥
[७२]धूपदीपविचित्राङ्गैरलंकृत्य[७३] तु मण्डपम् ।

[[७४]शयनाधिवासः]

[७५]स्थण्डिलं कल्पयेत्तत्र वेदिकोपरि शालिभिः ॥२७॥
[७६]तण्डुलैश्च तिलैर्दर्भैर्भूषयेदुपरि[७७] क्रमात् ।
अण्डजैर्मुण्डजैश्चैव रोमजैश्चर्मजैरपि ॥२८॥
[७८]दिव्यजैः [७९]पञ्चभिर्ह्येतैः शयनं कल्पयेत्क्रमात् ।
जलाल्लिङ्गं समुद्धृत्य [८०]जलतीरं प्रवेशयेत् ॥२९॥
महानिद्रा[८१]भयाच्छिद्रदर्पणोदरकुम्भयोः ।

---

[६७] स्तम्भानि वस्त्रैः संवेष्टय––अ, इ, उ; स्तम्भांश्च वस्त्रैः संवेष्टय––आ.

[६८] वेष्टयेत्ततः––आ, ई.

[६९] ०दामध्वजैश्चैव रोमजैरण्डजैरपि––आ, ई.

[७०] यद्यपि २६ उत्तरार्धं २७ पूर्वार्धमुभयमप्युपलब्धासु मातृकासु सर्वास्वपि ४१ श्लोकानन्तरमेव लिखितम् । तथापि मण्डपालंकारविषयत्वादस्यार्धद्वयस्य तत्र स्थितिरयुक्तेति प्रकरणमनुसृत्यैतदर्धद्वयमप्यत्र संयोजितम् ।

[७१] अष्टमङ्गलानि––अत्र ५.८ पू० ; ८.५ पू० टिप्पणी द्रष्टव्या ।

[७२] धूपदीपैर्विचि०––इ.

[७३] ०कृत्वा––अ, इ, उ.

[७४] 'शालिभिः स्थण्डिलं कृत्वा चाष्टद्रोणैस्तदर्धकैः ।
तन्मध्ये नलिनं लिख्य तिलैर्लाजैश्च शोभयेत् ॥
दर्भैः पुष्पैः परिस्तीर्य प्रोक्षयेत्प्रणवाम्बुना ।
जलाद्बिम्बं समुद्धृत्य तीर्थकुम्भाभिषेचनम् ॥
तीरे वा मण्डपे वापि स्नानवेद्यां तु विन्यसेत् ।
स्नापयेत्पञ्चगव्यैश्च पुष्पगन्धोदकादिभिः ॥
लिङ्गपीठेष्टकादीनि प्रवेश्य यागमण्डपे ।
वेद्यूर्ध्वे विन्यसेद्धीमानर्चयेन्मूलमन्त्रतः ॥
रक्षासूत्रं तु विधिवद्रुद्रभागे तु धारयेत् ।
पीठनालाग्रके बद्ध्वा देवानां सव्यहस्तके ॥
देवीनां वामहस्ते तु अस्त्राणां मध्यपत्रके ।
बृहत्सामेति देवानां देवीनां तु त्रियम्बकात् ॥
भस्मना तन्तुनाक्तं तु रक्षासूत्रं तु बन्धयेत् ।
पञ्चभिः शयनं कल्प्य देशिकः स तु बुद्धिमान् ॥
चर्मजं रोमजं चैव अण्डजं मुण्डजं तथा ।
कार्पासं चैव पञ्चैतैः शयनं संप्रकल्पयेत् ॥
तेषामूर्ध्वे शयेद्बिम्बं प्राक्शिरश्चोर्ध्ववक्त्रकम् ।
पीठं च नन्दिकावर्ता विन्यसेल्लिङ्गमन्त्रतः ॥
स्वस्वमूलेन चाभ्यर्च्य न्यस्त्वा मूलाच्छिरोऽन्तिके ।
आत्मविद्याशिवैस्तत्त्वैः पादाद्भागत्रये न्यसेत् ॥
दर्शयेल्लिङ्गमुद्रां च सुरभिं पद्ममुद्रिकाम् ।
लिङ्गं च पिण्डिकां चैव एकवस्त्रेण वेष्टयेत् ॥'
(**चिन्त्ये** २०. ८२–९२); एतद्विषये पुनः **अजिते** १८.११४–१२१; १३१–१३७ तथा **रौरवे** क्रियापादे २८.३६–४१ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[७५] 'आ, ई' मातृकयोः २७ उत्तरार्धं २८ श्लोकश्च न दृश्येते ।

[७६] 'उ' मातृकायां पादोऽयं लुप्तः ।

[७७] ०भूषयेत्तु परि०––उ.

[७८] दिव्यभिः पञ्चभित्येते––अ.

[७९] पञ्चभिस्तत्त्वैः––आ, ई; पञ्चभिर्येते––इ.

[८०] जलतीरे––अ, इ, उ.

[८१] ०भयेऽच्छिद्रे––अ, इ, उ; ०भयेऽच्छिद्रे––आ, ई.

क्षालयेत्सलिलैर्लिङ्गं सेचयेत्स्थापितोदकैः ॥३०॥
अर्चयेद्गन्धपुष्पाद्यैर्नववस्त्रेण वेष्टयेत्।
रथमारोप्य यत्नेन मण्डपं संप्रवेशयेत् ॥३१॥
प्रतिष्ठादिवसस्यादौ रात्रौ चैवाधिवासयेत्।
[८२]प्राक्शिरस्कमधःसूत्रं शाययेद्वेदिकोपरि ॥३२॥
कुशैर्वस्त्रैः समाच्छाद्य ऊर्ध्वाधो वेष्टयेत्पटैः।
लिङ्गस्य पश्चिमे पार्श्वे पीठं तत्राधिवासयेत् ॥३३॥

[[८३]कुम्भस्थापनं तत्र देवतायजनं च]

लिङ्गस्य दक्षिणे पार्श्वे शिवकुम्भं न्यसेत्पुनः।

---

[८२] 'आ, ई' मातृकयोः ३२ उत्तरार्धं ३३ श्लोकश्च न स्तः।

[८३] 'शिरःप्रदेशे लिङ्गस्य शिवकुम्भं च विन्यसेत्।
ससूत्रं सापिधानं च सकूर्चं वस्त्रवेष्टितम् ॥
पूरितं स्याच्चतुर्विंशत्प्रस्थतोयैः सुगन्धिभिः।
शिवकुम्भमिदं प्रोक्तं सरत्नं साधिदैवतम् ॥
कुम्भमध्ये न्यसेद् बीजं प्रासादाख्यं च ग्रन्थितम्।
कूटं भूतं च यान्तं च मान्तमौकारसंयुतम् ॥
बिन्दुनादसमायुक्तं शिवमन्त्रमिति स्मृतम्।
क्षकारः पृथिवी ज्ञेयो वकारो वरुणः स्मृतः ॥
रेफश्चैवानलो ज्ञेयो यकारोऽनिल उच्यते।
व्योम चौकार एवं स्यात्पञ्चभूताक्षरं परम् ॥
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरः शिव एव च।
पञ्चभूताधिदैवत्यं भुक्तिमुक्तिफलप्रदम् ॥
कालाग्न्यादिशिवान्तं स्यान्मन्त्रे सर्वं व्यवस्थितम्।
ज्ञात्वा तु सर्वगं बीजं छेदयेत्पशुपाशकम् ॥
ध्यात्वा सदाशिवं रूपं पञ्चमूर्तिभिरन्वितम्।
दिव्याम्बरधरं देवं दिव्यगन्धविभूषितम् ॥
शुद्धस्फटिकसंकाशं कुन्देन्दुधवलप्रभम्।
कुण्डलैः कर्णगैर्हारैर्यज्ञसूत्रविभूषितम् ॥
शूलं परशु वज्रं च खड्गाभयं च दक्षिणे।
पाशाङ्कुशं च वह्निं च खेटकं वरदं परे ॥
कुम्भे ध्यात्वा विशेषेण पद्ममुद्रां प्रदर्शयेत्।
आवाहनादिकं सर्वं पूर्वोक्तविधिना कुरु ॥
शिवमन्त्रं समुच्चार्य गन्धपुष्पादिनार्चयेत्।
वर्धनीं विन्यसेद्वामे द्रोणतोयप्रपूरिताम् ॥
सकूर्चां सापिधानां च सवस्त्रां हेमसंयुताम्।
षान्तान्तं यान्तसंयुक्तमीकारस्वरसंयुतम् ॥
बिन्दुनादसमायुक्तं वर्धनीमध्यमे न्यसेत्।
ध्यात्वा गणाम्बिकां देवीं पीनोन्नतपयोधराम् ॥
श्यामाभां द्विभुजां शान्तां सर्वाभरणभूषिताम्।
दुकूलवसनां देवीं ध्यात्वा वर्धनिमध्यमे ॥
उमागायत्रिमन्त्रेण गन्धपुष्पादिनार्चयेत्।
दर्शयेल्लिङ्गमुद्रां च नमस्कारां मनोरथाम् ॥
अभितः कलशानष्टौ द्रोणार्धोदकपूरितान्।
अष्टविद्येश्वरैर्युक्तान्सकूर्चान्सापिधानकान् ॥
सवस्त्रान्पल्लवैर्युक्तान्स्थापयेत्साधिदैवतान्।
हेमशूलसमायुक्तान्हेमकूटसमायुतान् ॥
स्वनामाद्यक्षरं बीजं बिन्दुनादसमन्वितम्।
घटयोर्मध्यमे न्यस्त्वा तत्तन्मूर्तीश्च भावयेत् ॥
त्रिणेत्रांश्चतुर्भुजान्देवान्जटामकुटधारिणः।
अनन्तादिशिखण्डचन्तानष्टविद्येश्वरान्न्यसेत् ॥
तत्तन्मन्त्रं समुच्चार्य गन्धपुष्पादिना यजेत्।
उपवेद्युपरि न्यस्त्वा लोकपालाधिदैवतान् ॥
कलशांल्लक्षणोपेतान्हेमवस्त्रसमन्वितान्।
ससूत्रान्सापिधानांश्च सकूर्चान्वारिपूरितान् ॥
तत्तन्मन्त्रं समुच्चार्य पूजयित्वा यथाविधि।
अष्टमङ्गलरूपाणि उपवेद्युपरि न्यसेत् ॥
पूजयित्वा यथान्यायं तोरणान्दिग्गजान्न्यसेत्।
द्वारकुम्भं तथा स्थाप्य द्वारं द्वारं प्रति द्वयम् ॥
नन्द्यादिपशुपत्यन्तं तत्तत्कुम्भेषु योजयेत्।'
(दीप्ते २०.१४१ उ०–१६५);

वर्धनीं वामपार्श्वे तु स्थापयेत्पूर्ववत्सुधीः[८४] ॥३४॥
पूर्वादीशान[८५]पर्यन्तमष्टकुम्भांश्च[८६] विन्यसेत् ।
[८७]ससूत्रान्सोदका[८८]न्वस्त्ररत्नकूर्चकुशैर्युतान्[८९] ॥३५॥
[९०]सहेमान्सायुधा[९१]न्साष्टमङ्गलान्सापिधानकान्[९२] ।
अर्चयेद्गन्धपुष्पाद्यैर्मन्त्रमूर्तिं समावहेत् ॥३६॥
[९३]लिङ्गस्य दक्षिणे कुम्भे ईशमूर्तिं समावहेत् ।
लिङ्गस्य [९४]वामे वर्धन्यामुमामावाहयेत्पुनः ॥३७॥
पूर्वे तत्पुरुषमूर्तिं[९५] [९६]घोरमूर्तिं तु दक्षिणे ।
पश्चिमे सद्यमूर्तिं तु वाममूर्तिं तथोत्तरे ॥३८॥
आग्नेय्यां [९७]हृदयमूर्तिं शिरोमूर्तिं तु नैर्ऋते ।
[९८]वायव्यां तु शिखामूर्तिमीशे कवचमूर्तिकाम्[९९] ॥३९॥
नेत्रमूर्तिं न्यसेल्लिङ्गे पीठे [१००]चास्त्रं न्यसेत्पुनः ।
[१०१]तल्लिङ्गबीजमुच्चार्य मन्त्रमूर्तिं समावहेत् ॥४०॥
[१०२]पञ्चाङ्गानि षडङ्गानि [१०३]लिङ्गे लिङ्गे क्रमान्न्यसेत् ।
अर्चयेद्गन्धपुष्पाद्यैः [१०४]स्वैः स्वैर्लिङ्गैर्यथाक्रमम् ॥४१॥
कृत्वाधिवासनं ह्येवं कुर्यादध्ययनं ततः ।

[[१०५]अध्ययनम्]

ऋग्वेदाध्ययनं प्राच्यां यजुर्वेदं तु दक्षिणे ॥४२॥

एतद्विषये पुनः **अजिते** १८.१३८–१४७ तथा **रौरवे** क्रियापादे २८.४२–५७ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[८४] पूर्ववद्भवेत्—अ, इ, उ.

[८५] ०पर्यन्तं कुम्भानि विन्यसेद्बुधः—उ.

[८६] ०मष्टकुम्भानि—अ, इ, ई.

[८७] ससूत्रान्वेदकान्—उ.

[८८] ०न्वस्त्रान्रत्न०—अ, इ, उ.

[८९] ०कुशायुतान्—अ, आ; ०कुशायुधान्—इ.

[९०] सहैमान्—इ, उ.

[९१] अष्टमङ्गलानि ५.८. पू०, ८.५ पू० टिप्पण्यां निर्दिष्टानि ।

[९२] सपिधानकान् —आ.

[९३] 'आ, ई, उ' मातृकासु इदमर्धं न दृश्यते ।

[९४] वामवर्धन्या०—अ, उ.

[९५] प्रायः 'तत्पुरुषं मूर्तिं' इति पाठो दृश्यते । तादृशः पाठो मूर्तिशब्दस्य पुंसि प्रयोगे साधु भवेत् ।

[९६] अघोर०—अ, इ, उ.

[९७] हृदयं मूर्तिं—अ, इ, ई.

[९८] वायव्ये—आ, ई.

[९९] ०मूर्तिनम्—अ, आ, इ; ०मूर्तिकम्—ई.

[१००] चास्त्राणि विन्यसेत्—आ, ई.

[१०१] सलिङ्गं बीज—अ, आ, इ, उ.

[१०२] पञ्चाङ्गषडङ्गविवरणम् ९.२२,११.२२ श्लोकयोर्दृश्यते ।

[१०३] अत्र 'लिङ्गे पीठे क्रमान्न्यसेत्' इति पाठो युक्त इति भाति ।

[१०४] स्वे स्वे लिङ्गे यथा०—ई; स्वस्वलिङ्गैः०—उ.

[१०५] 'कुर्यादध्ययनं दिक्षु जपेन्मन्त्रं विदिक्षु च ।
ऋग्वेदं दिशि पूर्वायां यजुर्वेदं तु दक्षिणे ॥
साममुत्तरदेशे तु पश्चिमेऽथर्वमेव च ।
प्रासादमीशकोणे तु अघोरं वह्निगोचरे ॥
मृत्युञ्जयं तु नैर्ऋत्यामुमाबीजं तु वायवे ।'
(**सूक्ष्मे** ४२.१६१ उ०–१६३);
एतद्विषये पुनः **अजिते** १८.१४८ श्लोकस्तदीयटिप्पणी च द्रष्टव्याः । तथा **रौरवे** क्रियापादे २८.५७ उ० द्रष्टव्यम् ।

प्रतीच्यां सामवेदं तु उदीच्यां दिश्यथर्वणम्[१०६] ।
[१०७]पञ्चाङ्गाध्ययनं वह्नौ [१०८]षडङ्गं नैर्ऋते दिशि[१०९] ॥४३॥
अघोरास्त्रं तु [११०]वायव्यामीशे पाशुपतास्त्रकम्[१११] ।
[११२]प्रागाद्यध्ययनं ह्येवं ततो होमं समाचरेत् ॥४४॥

[[११३]होमः]

[११४]पालाशं खादिरं प्लक्षं [११५]शम्यश्वत्थमुदुम्बरम् ।
अपामार्गं वटं बिल्वं समित्पूर्वादिषु क्रमात् ॥४५॥
इध्मं [११६]पलाशमेतेषां समिधो [११७]द्वादशाङ्गुलाः ।
[११८]कनिष्ठाङ्गुलिपरीणाहा[११९] [१२०]द्विगुणः परिधिर्भवेत् ॥४६॥
समिद्घृतचरुक्षीरयववेणुप्रियङ्गवः ।
लाजसर्षपमाषाश्च [१२१]तिला मधुगुलाः[१२२] स्मृताः[१२३] ॥४७॥
प्राच्याद्यभिमुखा[१२४] भूत्वा [१२५]होमकाः कुण्डपाश्च ये[१२६] ।
आसनन्याससंयुक्ताः[१२७] प्राणायामसमन्विताः ॥४८॥
पुण्याहं वाचयेत्तत्र प्रोक्षयेत्तु कुशाम्भसा ।
अग्न्याधानादिकं कृत्वा [१२८]ह्याज्यभागान्तमाचरेत् ॥४९॥
यस्यां दिशि स्थिता[१२९] मूर्तिस्तस्यां[१३०] कुण्डाधिदैवतम्[१३१] ।
तत्र कुण्डे समावाह्य गन्धाद्यैरर्चयेत्क्रमात् ॥५०॥

---

[१०६] ०थर्वणः—इ.

[१०७] पञ्चाङ्गविवरणम् ९.२२,११.२२ श्लोकयोर्दृश्यते ।

[१०८] षडङ्गे—उ; षडङ्गविवरणम् ९.२२; ११.२२ श्लोकयोर्दृश्यते ।

[१०९] 'दिक्'शब्दविशेषणस्य नैर्ऋतशब्दस्य पुंसि प्रयोगः । एतद्विषये विवरणाय ३.४ पू० टिप्पणीं पश्यत ।

[११०] वायव्ये ईशे—आ, ई.

[१११] ०पदास्त्रकम्—उ.

[११२] प्राहाराध्ययनं—अ; प्राकाराध्ययनं—आ, ई; प्राहाराभ्याध्ययनं—इ.

[११३] एतद्विषये **अजिते** १८.१४९—१७० पू० तथा **रौरवे** क्रियापादे २८.५८—६४ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[११४] समित्प्रकरणे वृक्षवाचकशब्दानां प्रायेण क्लीबे प्रयोगः । ५.१८ पू० टिप्पणीं पश्यत ।; पलाशं खदिरं—अ, इ, उ.

[११५] शम्यश्विनिमुदुम्बरम्—इ

[११६] पालाश०—अ.

[११७] द्वादशाङ्गुलाम्—इ.

[११८] कनिष्ठाङ्गुल०—ई, उ.

[११९] ०परीणाहं—अ, इ, ई, उ.

[१२०] द्विगुणं—अ, इ, ई, उ.

[१२१] तिलं—आ, ई.

[१२२] गुलं—आ, ई; गुला—उ.

[१२३] स्मृतम्—आ, ई.

[१२४] ०मुखो—अ, आ, इ, ई, उ.

[१२५] होमकान्—उ.

[१२६] कुण्डपश्चिमे—अ, इ, उ.

[१२७] ०संयुक्ता—अ, इ.

[१२८] आज्य०—अ, आ, इ; चाज्य०—ई.

[१२९] स्थितो—अ, इ, उ.

[१३०] तत्र—अ, इ, उ.

[१३१] ०दैवतः—उ.

स्वलिङ्गैः समिधो[१३२] हुत्वा [१३३]त्र्यम्बकेण घृतं हुनेत्।
[१३४]आवो राजेति [१३५]मध्वन्नं [१३६]सर्वो वैति पयो हुनेत्॥५१॥
[१३७]यवांश्च विश्वंभूतेन[१३८] [१३९]कद्रुद्रायेति वैणवम्।
[१४०]हिरण्यया [१४१]प्रियं हुत्वा [१४२]अग्निमीलेति लाजकम्॥५२॥
सर्षपं [१४३]च [१४४]इषे त्वेति [१४५]अग्न [१४६]आयाहि माषकम्।
[१४७]शं नो देव्या तिलं हुत्वा [१४८]मानस्तोके हुनेन्मधु॥५३॥
गुल[१४९]मिमा रुद्रायेति [१५०]प्रत्येकं चाष्टविंशतिः[१५१]।
प्रतिद्रव्यं[१५२] कुशैः स्पृष्ट्वा वह्निलिङ्गं स्पृशेत्पुनः॥५४॥
अग्रमग्रेण संस्पृश्य मध्यं मध्येन संस्पृशेत्।
[१५३]मूलं मूलेन संस्पृश्य स्वमन्त्रैः [१५४]संस्पृशेत्कुशैः॥५५॥
द्रव्यशेषसमायुक्तं पूर्वाभिमुखसंस्थितः[१५५]।
व्योमव्यापिनमुच्चार्य [१५६]स्रुचा पूर्णाहुतिं हुनेत्॥५६॥
[१५७]सर्वाङ्गं च कुशैः स्पृष्ट्वा'

[[१५८]रत्नादिन्यासः]

[१५९]'शयनाल्लिङ्गमुद्धरेत्।

---

[१३२] समिधान्—इ.

[१३३] **ऋग्वेदे** ७.५९.१२; **तै० संहितायाम्**—१.८.६.२; 'आ, ई' मातृकयोः ५१ द्वितीयपादप्रभृति ५२ तृतीयपादान्तं न दृश्यते।

[१३४] **ऋग्वेदे** ४.३.१; **तै० संहितायाम्** १.३.१४.२; **सामवेदे** ६९; आपो राजेति—अ.

[१३५] मध्वान्नं—अ; मध्वान्न—इ.

[१३६] 'सर्वो वै रुद्रः' इति मन्त्रेण; **तै० आरण्यके** १०.२४; वै+इति स्थिते एचोऽयवायावः' (६,१.७८) इत्यनेन आयादेशे 'वायिति' इति स्थिते 'लोपः शाकल्यस्य' (८,३,२१) इत्यनेन यकारलोपे 'वा इति' इति स्थिते 'पूर्वत्रासिद्धम्' इति लोपशास्त्रस्यासिद्धत्वान्न स्वरसन्धिः स्यात्। अत्र श्लोके सन्धिरार्षः।; सर्वो वै वैणयो—अ; सर्वो वै णेयो—इ; सर्वो वै त्रिणयो—उ.

[१३७] यावश्च पीश्च भूतेन—उ.

[१३८] **तै० आरण्यके** १०.२४

[१३९] **ऋग्वेदे** १.४३.१; **तै० आरण्यके** १०.२५.

[१४०] हिरण्यया—'नमो हिरण्यबाहवे' इति मन्त्रेण; **तै० आरण्यके** १०.२२.

[१४१] 'प्रियङ्गुम्' इत्यत्र 'प्रियम्' इति नामैकदेशप्रयोग इति भाति।

[१४२] **ऋग्वेदे** १.१.१; **तै० संहिता**—४.३.१३.३.

[१४३] तु—आ, ई.

[१४४] **तै० संहिता** १.१.१.१; इषे त्वादि—अ, आ, इ.

[१४५] **ऋग्वेदे** ६.१६.१०; **तै० ब्राह्मणम्** ३.५.२; **सामवेदे** १.६.६०.

[१४६] आयेति—आ, ई.

[१४७] **ऋग्वेदे** १९.९.४; **तै० आरण्यकम्** ४.९२; **अथर्ववेदे** १.६.१

[१४८] **ऋग्वेदे** १.११४.८; **तै० संहिता** ४.५.१०.६.

[१४९] ०मिमां च रुद्रेति—आ, ई, उ; ०मिमाञ्च रुमेति—इ; 'इमा रुद्राय' इति मन्त्रेण; **ऋग्वेदे** १.११४.१; **तै० संहिता** ४.५.१०.३.

[१५०] प्रत्येकां—उ.

[१५१] अत्र ९.२५ उ० टिप्पणी द्रष्टव्या।

[१५२] प्रतिमव्यं—इ.

[१५३] 'आ, ई' मातृकयोरिदमर्धं न दृश्यते।

[१५४] स्पर्शयेत्कुशैः—अ, उ.

[१५५] ०संस्थिताः—अ, इ.

[१५६] सृजा—उ.

[१५७] सर्वाङ्गानि—आ, ई.

[१५८] 'प्रासादमध्यसूत्रं तु किंचिद्वामे नियोजयेत्। पादाधारशिलां तत्र स्थापयेच्छ्वभ्रमध्यमे॥

पूर्वाभिमुखमास्थाप्य गन्धादिभिरथार्चयेत् ॥५७॥
प्रासादे स्थापनस्थाने क्षिपेत्पादशिलामतः[160] ।
[161]पादशैले न्यसेत्तत्र [162]रत्नलोहाष्टमङ्गलम्[163] ॥५८॥

[[164]नवरत्नानि]

पद्मरागं च [165]रत्नं च वैडूर्यं [166]नीलमेव च ।
इन्द्रनीलं च [167]मुक्तां च [168]हरितं [169]स्फटिकं तथा ॥५९॥
[170]पुष्परागं च मध्यादि नवरत्नानि[171] विन्यसेत् ।

लिङ्गविस्तारमानं तु समं वै चतुरश्रकम् ।
किंचिदीशानमाश्रित्य श्वभ्रं कुर्याद्विचक्षणः ॥
लिङ्गतारचतुर्भागं श्वभ्रावटार्धमेव च ।
नवावटास्तु कर्तव्या अस्मिञ्श्वभ्रे विशेषतः ॥
द्वयाङ्गुलं तु विस्तारं तावन्निम्नं तु कारयेत् ।
तन्मध्ये तु न्यसेद्रत्नं नवसंख्यं विशेषतः ॥
वज्रमौक्तिकवैडूर्यं मरकतं स्फटिकं तथा ।
पुष्परागं चन्द्रकान्तमिन्द्रनीलं तथैव च ॥
पद्मरागं विशेषेण नवरत्नं प्रकीर्तितम् ।
पूर्वे तु स्थापयेद्वज्रमाग्नेय्यां मौक्तिकं न्यसेत् ॥
याम्ये वैडूर्यकं न्यस्त्वा मरकतं निर्ऋतौ न्यसेत् ।
वारुणे स्फटिकं न्यस्त्वा वायव्यां पुष्परागकम् ॥
चन्द्रकान्तं तु कौबेर्यामैशान्यामिन्द्रनीलकम् ।
मध्यमे पद्मरागं तु न्यसेच्छ्वभ्रस्य मध्यमे ॥
सौवर्णं वृषभं कृत्वा न्यसेच्छ्वभ्रस्य मध्यमे ।
नवरत्नाद्यभावे तु सौवर्णं दिक्षु निक्षिपेत् ॥'
(**दीप्ते** १५.६–१४) ;
एतद्विषये पुनः **अजिते** १८.१८९–१९९; **रौरवे** क्रियापादे २८.६८–७० पू०; **मतङ्गपारमेश्वरे** क्रियापादे १३.३४––३६ पू० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[159] शयनं लिङ्गम्—उ.

[160] ०मताः—अ, इ, उ; ०मताम्—आ, ई.

[161] 'अथातः संप्रवक्ष्यामि पादशैलस्य लक्षणम् ।
नपुंसकशिलां ग्राह्य पादाधारं च कारयेत् ॥
उत्तमा अधमा मध्या त्रिविधा पादधारिका ।
पीठतारसमं यत्र पादशैलस्य विस्तरम् ॥
उत्तमा इति विज्ञेया मध्यमा वक्ष्यतेऽधुना ।
यस्य लिङ्गस्य विस्ताराद्द्विगुणं पादधारिका ॥
मध्यमा इति विज्ञेया अध्यर्धं कन्यसा भवेत् ।
किंचिन्न्यूनं भवेत्तत्र अधिकं चापि वर्जयेत् ॥
छेदयेत्तु विशेषेण समं वै चतुरश्रकम् ।
तदूर्ध्वं बहुलं विद्यात्तत्र भागैकमेव च ॥'
(**दीप्ते** १५.१–५.)

[162] रत्नाल्लो०—अ, इ; रत्नं लो०—उ.

[163] ०मङ्गलान्--अ, इ.

[164] 'वज्रं मरतकं पुष्यरागं नीलं प्रवालकम् ।
मौक्तिकं चैव वैडूर्यं स्फटिकं च महामणीन् ॥
इन्द्रादिमध्यपर्यन्तं विन्यसेन्मूलविद्यया ।'
(**पूर्वकारणे** ५९.१७३उ०, १७४)

[165] अत्र रत्नशब्देन वज्रं प्रोच्यते । रत्नशब्दो वज्रपर्यायत्वेन **शब्दकल्पद्रुमे** वज्रशब्दविवरणे प्रोक्तः ।

[166] नवरत्नेषु नीलस्येन्द्रनीलस्य च पृथक्परिगणनम्
'पद्मरागं च वैडूर्यं वज्रं पुष्पं तथैव च ।
स्फटिकं मौक्तिकं नीलमिन्द्रनीलं प्रवालकम् ॥
एतेषु नवरत्नाम्बु'
(**सुप्रभेदे** क्रियापादे १५.८६ उ०–८७)

[167] मुक्ता च––अ; मुक्तं च––इ, उ.

[168] मरकतं––अ; मरतकं––इ, उ.

[169] स्फाटिकं––आ, ई.

[170] पुष्यरागं––अ, आ, ई, उ.

[171] ०रत्नादि––अ, आ, इ.

[[१७२]लोहाः]

[१७३]सुवर्णं रजतं [१७४]ताम्रमायसं[१७५] चारकूटकम्[१७६] ॥६०॥

[[१७७]अष्टमङ्गलानि]

दर्पणं पूर्णकुम्भं च [१७८]वृषभं युग्मचामरम्[१७९] ।
श्रीवत्सं स्वस्तिकं शङ्खं [१८०]दीपं देवाष्टमङ्गलम् ॥६१॥
[१८१]ऋषभं कूर्ममत्स्यं च मध्यमे विन्यसेत्पुनः ।
सौवर्णं विन्यसेदेतान्रत्नालाभे[१८२] हिरण्मयम् ॥६२॥
लिङ्गं प्रवेशयेत्[१८३]तत्र [१८४]हृद्यावृतैर्मूर्तिभिः सह ।
[१८५]स्वस्तिसूक्तं[१८६] जपित्वा तु पुण्याहं वाचयेत्ततः ॥६३॥

[[१८७]आचार्यादिपूजा]

आचार्यं पूजयेत्तत्र वस्त्रैराभरणादिभिः ।
हिरण्यं दशनिष्कं तु द्विगुणं त्रिगुणं [१८८]तु वा ॥६४॥
चतुर्गुणं [१८९]पञ्चगुणं षड्गुणं [१९०]सप्तभिर्गुणम्[१९१] ।

---

[१७२] 'ततःकाञ्चनरौप्ये च ताम्रं चैवारकूटकम् ।
त्रपुसीसायःकांस्यानि पित्तलं च क्रमान्न्यसेत् ॥'
(**अजिते** १८.१९८);
'सुवर्णं रजतं ताम्रमायसं त्रपु सीसकम् ।
आरकूटं च कांस्यं च लोहाष्टकमुदाहृतम् ॥'
(**रौरवे** क्रियापादे २४.४१);
'सुवर्णं रजतं ताम्रमायसं त्रपुकं तथा ।
मध्यमे च चतुर्दिक्षु विन्यसेत्पञ्चलोहकम् ॥'
(**सुप्रभेदे** क्रियापादे २९.२३उ०,२४ पू०)

[१७३] स्वर्णं रजतं——इ.

[१७४] ताम्रं मृण्मयं–अ, इ, ई; ताम्रं मृन्मयं–आ, उ.

[१७५] अत्र यद्यपि मातृकासु 'आयसम्' इति पाठो न दृश्यते । तथापि मृन्मयस्य लोहत्वाभावाद् 'आयसम्' इति शोधितम् ।

[१७६] 'मध्यादि विन्यसेत्' इति पूर्वार्धश्लोकादत्राप्यध्याहारेण व्याख्येयमिति भाति ।

[१७७] एतद्विषये ५.८. पू०, ८.५ पू०टिप्पण्यौ द्रष्टव्ये ।

[१७८] ऋषभं——अ, इ, उ.

[१७९] ०चामरः——उ.

[१८०] दीपो——अ, इ, उ; दीपा——आ.

[१८१] वृषभं——आ, ई.

[१८२] ०देतं रत्नालाभे——आ, ई; ०न्नृत्तलाभे——उ.

[१८३] तत्र आवृत्तै०——अ, ई; तत्रावृत्ते——उ.

[१८४] ह्यावृते०——आ, ई.

[१८५] **ऋग्वेदे** १.९.६; **तै० आरण्यके** १.१.

[१८६] ०सूत्रं——इ.

[१८७] 'अधमं विंशनिष्कं स्याद् द्विगुणं मध्यमं भवेत् ।
उत्तमं त्रिगुणं प्रोक्तमाचार्यस्य तु दक्षिणा ॥
पिण्डिकास्थापकस्यार्धमष्टांशं मूर्तिपस्य तु ।
द्विगुणं वास्तुहोमस्य अर्धमध्ययनस्य तु ॥
दैवज्ञस्य तथैव स्याद्भक्तानामस्त्रजापिनाम् ।
भक्तानां परिवाराणां यथा श्रद्धा तु दक्षिणा ॥'
(**दीप्ते** २०.२१७——२१९);
एतद्विषये पुनः **अजिते** १८.२६९——२७६; **मतङ्गपारमेश्वरे** क्रियापादे १३.४१उ०–४२ पू०; **रौरवे** क्रियापादे २८.६५ श्लोकस्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[१८८] तथा——आ, ई.

[१८९] सप्तगुणं——आ, ई.

[१९०] सप्त वा गुणैः——आ, ई.

[१९१] अत्र गुणितमित्यर्थे गुणमिति प्रयोग इति भाति ।

[192]अष्टगुणं [193]नवगुणमलाभादधमादिकम् ॥६५॥
नवधा दक्षिणां दद्यादाचार्यस्य प्रियं ततः[194] ।
पूजयेद्धोमकान्मूर्तिधारकान्परिचारकान् ॥६६॥
[195]निष्केणार्धेन पादेन [196]पादार्धेनाथवा पुनः ।

[[197]लिङ्गस्थापनम्]

सुमुहूर्ते सुनक्षत्रे लिङ्गं संस्थापयेत्ततः[198] ॥६७॥

---

[192] अष्टागुणं––आ.
[193] नवमथालादिद्याद्दशमा०––अ; नवगुणा (मदा) हलाभादधमा०––आ; नवमयालाद्यादधमा० ––इ; नवगुणं नवमं नवमाधिकम्––उ.
[194] हितः––अ; हितम्––इ, उ.
[195] निष्केना०––आ, ई; निष्णेणान्धेन––इ; निष्णेणार्धेन––उ.
[196] पादान्धे०––इ; पादोर्धे०––उ.
[197] 'कालं निरीक्ष्य कालज्ञो गुरवे संदिशेत्क्रमात् ।
शिवं प्रणम्य विज्ञाप्य पूजयित्वा विशेषतः ॥
आचार्यो मूर्तिपैः सार्धं लिङ्गस्थापनमारभेत् ।
पञ्चमेन ततः स्थाप्य लिङ्गं द्वारस्य दिङ्मुखम् ॥
चलिते स्फुटिते वक्रे भ्रमिते शब्दिते यदि ।
चलिते तु महद्दुःखं स्फुटिते द्रव्यनाशनम् ॥
सवक्रं शिल्पिनं हन्ति भ्रमिते रोगसंभवः ।
दोषानेतान्समुद्वीक्ष्य निष्कृतिं च समाचरेत् ॥
बहुरूपेण मन्त्रेण सर्वदोषप्रशान्तये ।
शतमष्टोत्तरं हुत्वा शिवाग्नौ शिवमन्त्रतः ॥
नन्द्यावर्तशिला योज्य वालुकाभिः सुपूरयेत् ।
गत्वा तु पिण्डिकां तत्र पूजयित्वा विशेषतः ॥
विलिप्तगन्धवस्त्रेण शीतधूपेन धूपयेत् ।
उत्थाप्य गौरीबीजेन स्यन्दने रोप्य देशिकः ॥
प्रासादे द्वारदेशे तु पूजाकर्म समाचरेत् ।
नवलिङ्गे समारोप्य गौरीमन्त्रेण मन्त्रवित् ॥
संधाय मूर्तिपैः सार्धं लिङ्गस्योपरि यत्नतः ।
शनैर्निवेश्य के पीठं वालुकाभिः सुपूरयेत् ॥
समं सुनिश्चलं ज्ञात्वा बन्धनैरष्टबन्धनैः ।
शुद्धिं कृत्वा यथान्यायं ततः पुण्याहमाचरेत् ॥
समभ्यर्च्य ततो लिङ्गं गन्धपुष्पादिभिः शुभैः ।
निधाय दक्षिणं हस्तं गुरुर्लिङ्गस्य मूर्धनि ॥
व्योमव्यापि समुच्चार्य एकचित्तः प्रयत्नतः ।
अष्टत्रिंशत्कलान्यासं मकुटादि नियोजयेत् ॥
शिवाङ्गानि न्यसेद्विद्वान्नेत्राणि क्षुरिकां ततः ।
संबध्वावाहिनीमुद्रां पुष्पहस्तः सुखासनः ॥
आवाह्य देवदेवेशं सद्योजातेन मन्त्रतः ।
शुद्धस्फटिकसंकाशं तरुणादित्यसंनिभम् ॥
त्र्यक्षं दशभुजं शान्तं पञ्चवक्त्रं स्मिताननम् ।
दिव्याम्बरधरं देवं दिव्यगन्धानुलेपनम् ॥
जटामकुटसंयुक्तं चन्द्रार्धकृतशेखरम् ।
विद्याविद्येश्वरैरष्टगणैर्लोकेश्वरैर्युतम् ॥
ध्यात्वा सदाशिवं देवं सर्वज्ञ कारणेश्वरम् ।
संस्थाप्य वामदेवेन अघोरेण निरोधयेत् ॥
पुरुषेणैव सांनिध्यमीशानेन प्रणम्य च ।
पिण्डिकां पूजयेत्तत्र उमागायत्रिमन्त्रतः ॥
षडध्व विन्यसेत्तत्र कालाग्न्यादिगुणान्तकम् ।
सतीमावाहयेत्पीठे दुकूलवसनान्विताम् ॥
सर्वाभरणसंयुक्तां नीलालकसमन्विताम् ।
सुकेशां कम्बुग्रीवां च पीनोन्नतपयोधराम् ॥
मकुटकुण्डलैर्हारैः केयूराद्यैरलंकृताम् ।
ध्यात्वा तु पिण्डिकामध्ये गौरीं सम्यग्विचिन्तयन् ॥
स्थापनं संनिरोधं च उमामन्त्रेण कल्पयेत् ।
दर्शयेल्लिङ्गमुद्रां च मुकुलं पद्ममुद्रिकाम् ॥
(**दीप्ते** २०.२६७–२८८); एतद्विषये पुनः **अजिते** १८.२०४–२२३ पू०; **रौरवे** क्रियापादे २८.७० उ०, ७१, ८१ पू०, ८२; **मतङ्गपारमेश्वरे** क्रियापादे १३.३६ उ० –४१ पू० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।
[198] ०स्थापयेद्बुधः––आ, ई.

चतुरश्रमधो ब्राह्मं[199] मध्येऽष्टाश्रं तु वैष्णवम् ।
[200]ऊर्ध्वे वर्तुलमैशानं[201] [202]स्वलिङ्गैरभिमन्त्रयेत् ॥६८॥
पञ्चवक्त्रं दशभुजं पञ्च[203]मूर्धसमन्वितम् ।
नेत्र[204]पञ्चदशैर्युक्तं [205]गङ्गोर्ध्वमिन्दुशेखरम् ॥६९॥
सर्वलक्षणसंयुक्तं सर्वाभरणभूषितम् ।
मन्त्र[206]मूर्ति महेशानं न्यसेत्पादशिलोपरि ॥७०॥
[207]त्रियम्बकं लिङ्गमूर्ति स्थापयेत्स्थापकोत्तमः[208] ।
[209]निश्चलं स्थापयेल्लिङ्गं बलवत्कारयेत्ततः ॥७१॥
इष्टकाभिः शिलाभिर्वा सुधागुलसमन्वितम् ।
भूमिस्थं [210]ब्राह्मकं भागं वैष्णवं पीठसंस्थितम् ॥७२॥
पीठोर्ध्वमैश्वरं[211] भागं [212]पूर्णं तु त्रिविधं मतम् ।
[213]ब्रह्माणं दक्षिणे सूत्रे [214]ब्रह्मजज्ञेन [215]विन्यसेत् ॥७३॥
वामसूत्रे[216] न्यसेद्विष्णुं [217]विष्णुलिङ्गेन मन्त्रवित् ।
शिवसूत्रे[218] न्यसेदीशं [219]शिवलिङ्गेन मन्त्रवित् ॥७४॥

[[220]कुम्भाभिषेकः]

सकुशेन करेणैव कुम्भकूर्चोदकेन च ।

---

[199] ०श्रमयो ब्रह्मा—अ, उ; ०श्रं मधो ब्रह्मा—आ; ०श्रमये ब्रह्मा—इ; ०श्रमथो ब्रह्म—ई.

[200] ऊर्ध्व०—आ, इ; ऊर्ध्वं—उ.

[201] ०मीशानं—अ, आ, इ, ई, उ.

[202] तल्लिङ्गै०—ई; स्वलिङ्गैः—स्वस्वमन्त्रैः ।

[203] ०मूर्धा०—अ; ०मूर्धमुमायुतम्—आ, ई; ०मूर्धानि संयुतम्—इ; ०मूर्ध्ना च संयुतम्—उ.

[204] अत्र 'पञ्चदशैः' इत्यस्य पूरणप्रत्ययान्तपदस्य संख्यामात्रे प्रयोग इति भाति ।

[205] गङ्गोर्ध्वं चेन्दु०—आ; गङ्गोर्ध्वमिन्दु०—इ, उ; गङ्गोर्ध्वे चेन्दु०—ई.

[206] ०मूर्ति महे०—अ, इ.

[207] 'आ, ई' मातृकयोः ७१ पूर्वार्धं न दृश्यते ।; त्र्यम्बक—उ.

[208] ०कोत्तमम्—इ.

[209] 'उ' मातृकायां '७१' उत्तरार्धं '७२' श्लोकश्च न स्तः ।

[210] ब्रह्मकं—अ, इ; ब्रह्मगं—आ, ई.

[211] ०मीश्वरं—अ, आ, इ, ई.

[212] पूर्ववत्त्रिविधं—अ, उ; पूजा तु त्रिविधं—इ,

[213] ब्रह्मगं—ई; 'उ' मातृकायामिदमर्धं '७४' श्लोकश्च न दृश्यते ।

[214] ब्रह्मजज्ञान०—अ, इ; ब्रह्मजज्ञेन—ब्रह्मजज्ञानमन्त्रेण; तै० संहिता ४.२.८.४.

[215] वा न्यसेत्—आ.

[216] ०सूत्रं—अ, इ.

[217] विष्णुलिङ्गेन—विष्णुमन्त्रेण

[218] शिवसूत्रं—अ, इ.

[219] शिवलिङ्गेन—शिवमन्त्रेण

[220] 'शिवकुम्भं समादाय शिरसा धार्य देशिकः ।
वर्धनीं शिरसा धार्य विद्येशकलशांस्तथा ॥
शिरसा मूर्तिपैर्धार्य शनैर्गत्वा प्रदक्षिणम् ।
द्वारपूजां ततः कृत्वा स्थाप्य लिङ्गस्य संनिधौ ॥
सुमुहूर्ते सुलग्ने तु मन्त्रन्यासं समारभेत् ।
शिवकुम्भाच्छिवं बीजं लिङ्गस्य हृदये न्यसेत् ॥
शिवस्य शिरसि न्यस्त्वा मेढ्रमूले तु विन्यसेत् ।
ब्रह्माङ्गं च यथास्थानं न्यसेद्वै देशिकोत्तमः ॥
पिण्डिकायां न्यसेद्बीजमुमाख्यं वर्धनीघटात् ।

स्वस्वलिङ्गं समुच्चार्य स्वस्थाने विन्यसेत्ततः ॥७५॥
प्रोक्ष्याभिषेचनं कृत्वा गन्धाद्यैरर्चयेत्क्रमात् ।
प्रायश्चित्ताहुतिं [२२१]हुत्वा स्विष्टान्तं होममाचरेत् ॥७६ ॥

[[२२२]पीठबन्धोऽष्टबन्धनं च]

पीठबन्धं ततः कृत्वा कारयेदष्टबन्धनम् ।
वस्त्रेण वेष्टयेल्लिङ्गं[२२३] पीठं वस्त्रेण वेष्टयेत् ॥७७॥
उत्तरे मण्डपं कुर्यान्मण्डपं चतुरश्रकम् ।
सहस्रं वा तदर्धं वा शतमष्टोत्तरं तु वा ॥७८ ॥
स्थापयेत्कलशांस्तत्र प्रकुर्यादष्टबन्धनम् ।
तैलं गुलं [२२४]गैरिकं [२२५]च गुग्गुलुं [२२६]कुरु[वि]न्दकम् ॥७९॥
सितं सर्जरसं चैव[२२७] लाक्षां तैलादिभिर्युतम् ।
विधिवत्पाचयेद्योज्यं[२२८] विवरे [२२९]ह्यष्टबन्धनम्[२३०] ॥८० ॥

विद्येशबीजमादाय तत्तत्स्थाने विचक्षणः ॥
पूजयित्वा यथान्यायं पञ्चमावरणैः सह ।
स्नपनं कारयेदन्ते पूर्वोक्तविधिना सह ॥
पाद्यमाचमनं चार्घ्यं हृन्मन्त्रेण प्रदापयेत् ।
ददेद्वस्त्रं हृदा मन्त्री यज्ञसूत्रं हृदा तथा ॥
लेपनं चाञ्जनं पट्टं कुण्डलं पादुकं तथा ।
हारं च कटिसूत्रं च कटकं चाङ्गुलीयकम् ॥
केयूरमकुटं छत्रं हृदयेन प्रदापयेत् ।
द्वारपालवृषादींश्च यक्षरक्षःपिशाचकान् ॥
दिक्पालान्बलिदानेन तोषयेन्मातृदेवताः ।
देवस्याचमनं दद्यान्निर्माल्यं तु विसर्जयेत् ॥
तच्छेषं चण्डमूर्तेस्तु दद्यादाचमनीयकम् ।
चण्डस्याचमनं दत्त्वा निर्माल्यं तु विसर्जयेत् ॥
मखवासं च कर्पूरं शिवस्य परिकल्पयेत् ।
हरिद्रासर्षपं लोध्रमञ्जनं तु मनश्शिला ॥
घृतं गोरोचनं चैव सप्ताङ्गं लेपयेत्क्रमात् ।
प्रतिष्ठोत्सवं तु कर्तव्यं यावत्सप्तदिनान्तकम् ॥'
(**दीप्ते**, २०,२८९–३०१);
एतद्विषये पुनः **अजिते** १८.२२३उ०–२६८; **रौरवे** क्रियापादे २८.८३––८९ पू० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[२२१] कृत्वा––ई.

[२२२] 'प्रदक्षिणं स्यात्पूर्वात्तु नन्द्यावर्तशिला न्यसेत् ।
नपुंसकशिलायां तु नन्द्यावर्तशिलाकृतिः ॥
पूर्वपश्चिममायामं तथा वै दक्षिणोत्तरम् ।
एवं वै विन्यसेद्विद्वांश्चूर्णबन्धेन बन्धयेत् ॥
तदूर्ध्वे पीठिकां कुर्यादष्टबन्धेन बन्धयेत् ।
आचार्यशिल्पी सहितौ कुर्यातां पीठबन्धनम् ॥'
(**दीप्ते** १५.१७ उ०–२० पू०);
एतद्विषये पुनः **अजिते** १८.२१२उ०–२१९; **रौरवे** क्रियापादे २८.८१ उ० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[२२३] ०लिङ्ग०––उ.

[२२४] वै शैरिकं गुग्गुलुं––अ; वैगरिकं ––इ, उ.

[२२५] गुलुगुलुं––इ.

[२२६] च कुरुन्दकम्––अ, आ, इ; कुन्दरुष्ककम्––ई; च कुरन्दकम्––उ.

[२२७] सर्जरसारं वै––अ, इ; सजर्थरासारं––आ, सञ्जझरसारं वै––उ.

[२२८] ०द्योज्य––ई.

[२२९] अष्ट०––अ, इ; चाष्ट०––उ.

[२३०] 'लाक्षाशर्करसंयुक्तं कुरुविन्दं च गुग्गुलुम् ।
गैरिकं गुलतैलं च कदलीफलसंयुतम् ॥
अष्टबन्धनमेवं तु सर्वेषां बन्धयेत्क्रमात् ।'
पूर्वकारणे १२६.३ उ०, ४. पू० ६२६)

कृत्वाष्टबन्धनं ह्येवं मन्त्र[२३१]स्नपनमाचरेत् ।
गन्धादिभिः समभ्यर्च्य [२३२]पायसान्नं निवेदयेत् ॥८१॥
[२३३]गुलान्नं दापयेत्पश्चात्प्रदद्यात्तु महाहविः[२३४] ।
सहस्रं वा तदर्धं वा तदर्धार्धमथापि वा ॥
[२३५]ब्राह्मणान्भोजयेत्तत्र यथाविभवविस्तरैः[२३६] ॥८२॥

[२३७]इति [२३८]श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे [२३९]शैललिङ्ग[२४०]प्रतिष्ठा[२४१]विधिर्नाम[२४२] [२४३]षोडशः पटलः ॥

---

[२३१] ०स्थापन०—आ, ई; ०स्नापनमारभेत्—उ.
[२३२-२३३]पायसान्न—गुलान्नविवरणाय ९.३७ पू० टिप्पणी द्रष्टव्या ।
[२३४] ०हविम्—इ.
[२३५] 'ई' मातृकायामिदमर्धं न दृश्यते ।
[२३६] ०विस्तरम्—आ.
[२३७] इति श्रीरौरवोत्तरे—अ; इति रौरवोत्तरे—इ.
[२३८] 'श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे' इति 'आ, ई' मातृकयोर्न दृश्यते ।
[२३९] शिवलिङ्ग०—ई.
[२४०] 'प्रतिष्ठा' इति 'उ' मातृकायां न दृश्यते ।
[२४१] 'आ, ई' मातृकयोः 'विधिः' इति न दृश्यते ।
[२४२] 'अ, इ, उ' मातृकासु 'नाम' इति न दृश्यते ।
[२४३] षोडशपटलः—ई, उ.

सप्तदशः पटलः

[1]मुखलिङ्गप्रतिष्ठाविधिः

[2]रुरुरुवाच —

प्रतिष्ठां मुखलिङ्गस्य श्रोतुमिच्छाम्यहं प्रभो ।
तत्सर्वं मम संक्षेपात्कथयस्व महेश्वर[3] ॥१॥

[4]ईश्वर उवाच —

प्रतिष्ठां मुखलिङ्गस्य शृणु प्रयतमानस[5] ।
संक्षेपेणैव तत्सर्वं कथयामि रुरो तव ॥२॥

[[6]मुखलिङ्गलक्षणम्]

चतुरश्र[7]मथाष्टाश्रं वर्तुलं पूर्ववत्कृतम्[8] ।

---

[1] अस्मद्ग्रन्थालये विद्यमानेषु आर्. इ. २५१९१, २५१९३, २५२०२ इत्यङ्कितेषु तालपत्रकोशेषु विद्यमाने **शिवालयनिर्माणस्थापनदीपिकाख्ये** ग्रन्थे मुखलिङ्गस्थापनविधौ **रौरवोत्तर**सप्तदशपटलस्थाः २, ३उ०–६, ९–१४, २४, २५ उ०–३२, ३४ श्लोकाः केवलमुपलभ्यन्ते । तेषां पाठभेदाः क्रमशः 'ऐ १, ऐ २, ऐ ३' इति संकेतेन निर्दिष्टाः ।; मुखलिङ्गप्रतिष्ठाविधिविषये **उत्तरकारणे** (आर्. इ. १५५३५) २०५ तमे पत्रे; **दीप्ते** ४८; **मकुटे** (टि. १४६) पृ० ६९–७१; टि.७४२. पृ० ८१–८३) मुखलिङ्गस्थापनविधिपटला द्रष्टव्याः ।

[2] 'आ, ई मातृकयोः 'रुरुरुवाच' इति न दृश्यते ।

[3] महेश्वरम्——उ.

[4] 'आ, ई.' मातृकयोः 'ईश्वर उवाच' इति न दृश्यते

[5] संप्रीतमानसः——आ; प्रियतमानसम्—इ; संप्रीतमानस——ई; शृणुतः प्रियमानसा——ऐ २; शृणतः प्रियमानसः——ऐ ३.

[6] 'द्वारमानेन वा कुर्याद्गर्भमानेन वा पुनः ।
उक्तं लिङ्गस्य यन्मानं तन्मानेनैव कारयेत् ॥
उत्सेधं तु त्रिधा कृत्वा पूजाभागं त्रिधा भवेत् [भजेत् ?] ।
मध्यमांशे मुखं कुर्यान्मौलिं चैवोर्ध्वभागया ॥
अधो ग्रीवां भुजांश्चैव भागेनैकेन कारयेत् ।
लिङ्गायामत्रिभागेन भुजनिर्गमनं भवेत् ॥
ब्रह्मांशं नवधा कृत्वा संत्यजेद्भागपञ्चकम् ।
मुखनिर्गमनार्थं च चतुर्भागं मुखं भवेत् ॥
भुजभागस्तथैकेन मध्यभागे मुखं भवेत् ।
कृष्णांशं चतुरश्रं स्याद्ब्रह्मांशाष्टाश्रकं भवेत् ॥
जटामकुटसयुक्तं चन्द्रार्धकृतशेखरम् ।
वसुश्रोत्र चतुर्नासि लोचनैर्द्वादशैर्युतम् ॥
चतुर्मुखस्य लिङ्गस्य नाह्येऽयं त्रिमुखं शृणु ।
ब्रह्मांशं नवधा कृत्वा चतुर्भागं मुख भवेत् ॥
एकैकं मुखमानं स्याद्भुजभागं द्विभागया ।
अथैकवक्त्रकं कुर्यात्त्रिभागाभिर्विशेषतः ॥
भद्रेश्वरमुखं पूर्वं दक्षिणं भीषणं मुखम् ।
पश्चिमं स्यात्तथा सौम्यं विरागं चोत्तरं मुखम् ॥
पूर्ववक्त्रमतिश्यामं दक्षिणं चाञ्जनप्रभम् ।
सुशुक्लं पश्चिम वक्त्रं वामवक्त्रं तु रक्तकम् ॥
चतुरास्यं त्रिरास्यं वा प्रासादे स्थाप्य लिङ्गवत् ।
एकवक्त्रमतिशुक्लं स्थापयेच्चलवद्बुधः ॥
पद्मे वा भद्रपीठे वा ब्रह्मभागं विनिक्षिपेत्
प्रतिमालक्षणं पोक्तम्
(**दीप्ते** ४८.२–१३);

पञ्चवक्त्रैः समायुक्तं शिरोभिः पञ्चभिर्युतम् ॥३॥
[9]अक्षपञ्चदशोपेतं[10] [11]जटामकुट[12]संयुतम् ।
पूर्वे तत्पुरुषं वक्त्रमघोरं [13]दक्षिणे मुखम् ॥४॥
पश्चिमे सद्यवक्त्रं तु वामवक्त्रं तथोत्तरे ।
[14]मध्ये तु [15]वक्त्रमीशानं नेत्रपञ्चदशान्वितम्[16] ॥५॥
एवं पञ्चमुखं[17] लिङ्गं त्रिमुखं वा त्रिर्मूर्तिकम्[18] ।
लिङ्गमेकमुखं वापि कृत्वा प्रक्षालयेज्जलैः[19] ॥६॥

[[20]नेत्रोन्मीलनम्]

प्रासादपुरतः कुर्यान्मण्डपं चतुरश्रकम् ।

'मुखलिङ्गमथोच्यते ।
पञ्चवक्त्रं चतुर्वक्त्रं त्रिमुखं द्विमुखं तथा ॥
एकवक्त्रमितीमानि मुखलिङ्गानि पञ्च च ।
ईशतत्पुरुषाघोरवामाजैः पञ्चववत्रकम् ॥
मस्तके शैववक्त्रं स्यात्पूर्वे तत्पुरुषं मुखम् ।
अघोरं दक्षिणे भागे वामदेवं तथोत्तरे ॥
लिङ्गपश्चिमभागे तु सद्योजातं प्रकल्पयेत् ।
ईशं विना चतुर्वक्त्रं लिङ्गं कुर्याद्विचक्षणः ॥
पुरुषाघोरवामैश्च त्रिवक्त्रं लिङ्गमीरितम् ।
पुरुषाजातवक्त्राभ्यां द्विमुखं लिङ्गमीरितम् ॥
पुरुषेणैकवक्त्रं स्यादित्येवं लिङ्गमीरितम् ।' **सिद्धान्तशेखरे** (३.६.२८२ उ०–२८७); एतद्विषये पुनः **रौरवोत्तरे** १५.५.उ० टिप्पणी द्रष्टव्या ।

[7] ०मथाष्टाश्र श्राग्वर्तुलं पूर्वा यत्कृते—उ.

[8] ०त्कृते—आ, इ, ई; 'कृतम्' इत्यत्र 'कुरु' इति पाठश्चेत्सुष्ठु ।

[9] अक्षि०—अ, आ, इ, ई, उ; अक्षः—रुद्राक्षः **मेदिनीकोशे** षद्विकप्रकरणे। ; अत्र 'कक्ष्यापञ्चदशोपेतजटामकुटसंयुतम् ।' इति पाठो युक्त इति भाति ।; 'जटाभिः पञ्चभिर्ग्रन्थि त्रिमात्रेण विशेषतः । एकधा तु त्रिधावृत्या शेषाभिः पार्श्वलम्बनम् । जटामकुटमेतद्धि' (**उत्तरकामिके** ४८.२४, २५पू०).

[10] ०पञ्चदशायुक्तं—अ, इ, उ, ऐ१, ऐ २, ऐ ३.

[11] मकुटलक्षणम्—**रौरवे** क्रियापादे ४३.१–१२; **अजिते** २२. ६८,६९ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[12] ०मण्डितम्—आ, ई.

[13] दक्षिणं—ऐ १; दक्षिणमखम्—ऐ २, ऐ ३.

[14] वामे तु—अ, आ, इ, ई, उ.

[15] ऊर्ध्वमीशानं—ऐ २.

[16] ०दशायुतम्—अ; ०दशैर्युतम्—इ, उ, ऐ १, ऐ २, ऐ ३;

[17] पञ्चसु स्वं—आ, ई.

[18] ०मूर्तिनम्—ऐ ३; **पूर्वकामिके** (६२.४०) चतुर्मुखत्रिमुखैकलिङ्गानि निर्दिष्टानि । **पूर्वकारणे** (९.१३६–१३८) पञ्चमुखचतुर्मुखत्रिमुखैकमुखलिङ्गानि निर्दिष्टानि । **रौरवोत्तरे**ऽस्मिन्पटले पञ्चमुखत्रिमुखैकमुखलिङ्गानि निर्दिष्टानि । ग्रन्थान्तरेषु द्विमुखलिङ्गमपि निर्दिष्टम् ।

[19] ०ज्जलम्—आ; ०ज्जले—ऐ २.

[20] 'स्थण्डिलं शालिभिः कुर्यात्तिलदर्भसमन्वितम् ।
तस्य मध्ये न्यसेद्देवं सर्वातोद्यसमन्वितम् ॥
अभितः कलशानष्टौ द्रोणतोयेन पूरितान् ।
सकूर्चान्सापिधानांश्च कल्पयेत्तु यथाक्रमम् ॥
गन्धादिना समभ्यर्च्य नेत्रमोक्षणमारभेत् ।
हेमसूचिप्रहाराभ्यां पक्ष्मरेखां समालिखेत् ॥
कृष्णमण्डलमालिख्य ज्योतिर्मण्डलमालिखेत् ।
नेत्रमन्त्रं समुच्चार्य प्रोतहेमनखेन च ॥
वामाघोरसमन्त्राभ्यां मध्वाज्याभ्यां च तर्पयेत् ।
पञ्चगव्यैः कषायैश्च मृद्भिरद्भिः प्रसेचयेत् ॥
पुण्याहं वाचयेदन्ते पूज्य गन्धादिना बुधः ।'
(**दीप्ते** ४८.१५–२० पू०)

चतुर्द्वारसमायुक्तं तन्मध्ये वेदिकाकृतिः[२१] ॥७॥
स्थण्डिलं कल्पयेत्तत्र [२२]शालिभिश्चतुरङ्गुलम् ।
दर्भमालाभिरावेष्टय पुष्पमालां प्रलम्बयेत् ॥८॥
लिङ्गं प्रवेशयेत्तत्र स्थापयेद्वेदिकोपरि ।
[२३]नववस्त्रेण संवेष्टय [२४]पटेनावेष्टयेद्बहिः ॥९॥
[२५]मण्डलत्रययुक्तानि नेत्रपञ्च[२६]दशानि च ।
नेत्रमन्त्रं समुच्चार्य [२७]हेमसूच्या विलेखयेत् ॥१०॥
[२८]अर्पयेन्मधुसर्पिभ्या[२९] नेत्रपञ्चदशेषु च[३०] ।
[३१]स्थापये[३२]त्कपिलां [३३]गां वा [३४]कृष्णां गां वा सुतान्विताम् ॥११॥
[३५]संयज्य [३६]लिङ्गमुच्चार्य दर्शयेद्गोमुखाकृतिम्[३७] ।
वस्त्रगन्धादिभिर्युक्तानभितः[३८] कलशान्नव[३९] ॥१२॥
[४०]स्थापयेच्छक्तिभिर्युक्तं [४१]संपूज्य स्नापयेत्ततः ।

[[४२]जलाधिवासः]

रथमारोप्य यत्नेन वेशयेत्सलिलाश्रयम् ॥१३॥

---

[२१] ०कृते—अ, ई; ०कृतौ—आ, ई; अत्र भवेदिति पदमध्याहृत्य व्याख्येयम् ।

[२२] 'आ, ई' मातृकयोः ८ द्वितीयपादप्रभृति ९ प्रथमपादान्तं न दृश्यते ।

[२३] नववस्त्रैः समावेष्टय—अ, आ, इ, ई, उ.

[२४] पटेण वेष्ट०—अ, आ; पदैर्वा वेष्ट०—ऐ १; पटैर्वा वेष्ट०—ऐ २, ऐ ३.

[२५] त्रीणि मण्डलयुक्तानि—अ, आ, इ, ई, उ, ऐ १, ऐ ३; मणिमण्डलयुक्तानि—ऐ २; मण्डलत्रयम् —
'ततश्च हेमसूच्या तु शिल्पिना दृष्टिमण्डलम् ।
वर्तयित्वा ततः कृष्णज्योतिश्चाथ च वर्तयेत् ॥'
(**अजिते** ४०.२२);
'श्वेतमण्डलमालिख्य तन्मध्ये कृष्णमण्डलम् ।
कृष्णस्याभ्यन्तरे धीमाञ्ज्योतिर्मण्डलमालिखेत् ॥'
(**सुप्रभेदे** क्रियापादे ३७.१९)

[२६] ०दशासु च—इ; 'पञ्चदशानि' इति अत्र पूरणप्रत्ययान्तस्य संख्यामात्रे प्रयोगः ।

[२७] हेमसूच्यैर्वि०—इ; एवं सूच्या वि—ऐ १, ऐ ३,

[२८] अर्चयेन्मधु०—उ; अर्पयेमधु०—ऐ १, ऐ २.

[२९] अत्र मधुसर्पिभ्यां मन्त्राभ्यां मधुसर्पिषी अर्पयेदिति व्याख्येयमिति भाति । अत्र १२.७ पू० टिप्पणीं पश्यत ।

[३०] ०दशासु च—अ, इ, उ, ऐ २; ०दशैर्युतम्—आ, ई; ०दशानि च—ऐ १, ऐ ३; अत्र पूरणप्रत्ययान्तस्य संख्यामात्रे प्रयोगः ।

[३१] दर्शयेत्—ई, ऐ १, ऐ २, ऐ ३.

[३२] ०त्कपिलाङ्गं वा—उ.

[३३] गावाः—ऐ १, ऐ ३; गावः—ऐ २.

[३४] कृष्णां गो वा सुतान्विताम्—इ; कृष्णागं सा।युता०—ऐ १; कृष्णाङ्गा साधुता०—ऐ २; कृष्णागं साथुता०—ऐ ३.

[३५] संयज्यो—अ, इ, उ; संमृज्य—आ, ई; सद्यजो—ऐ १, ऐ २, ऐ ३.

[३६] लिङ्गमुच्चार्य—गोमन्त्रमुच्चार्य; तद्विवरणाय १०.६ उ० टिप्पणी द्रष्टव्या ।

[३७] ०कृति—अ, ऐ १, ऐ २, ऐ ३; अत्राकृतिशब्देन स्वरूपमेव बोध्यत इति भाति ।

[३८] ०र्युक्तानवभिः—ऐ २.

[३९] ०न्तव—उ; ०न्नवम्—ऐ १; ०न्नवः—ऐ ३.

[४०] स्थापयेत्तु शक्तिभि०—इ; स्थापयेच्च त्रिभि०—ऐ २.

[४१] पूज्य स्ना०—ऐ ३.

[४२] 'रथमारोपयेन्मूर्तिं कुर्याद्ग्रामप्रदक्षिणम् ।'
'वस्त्रकूर्चसमायुक्तं जले चैवाधिवासयेत् ॥

प्रपां कृत्वा तु तत्रैव शाययेत्प्राचि शीर्षकम्[४३]।
[४४]कुशैर्वस्त्रैः समावेष्टच [४५]प्रपां तीरे प्रकल्पयेत् ॥१४॥
तन्मध्ये वेदिकां कुर्यात्स्थण्डिलं कल्पयेत्ततः।
स्थापयेन्नवकुम्भांस्तु[४६] वस्त्रहेमादिभिर्युतान्[४७] ॥१५॥
नवरुद्रान्समावाह्य गन्धादिभिरथार्चयेत्।
[४८]एकरात्रं त्रिरात्रं वा पञ्च सप्ताधिवासयेत् ॥१६॥

[[४९]मण्डपस्तत्र वेदिकाकुण्डकल्पनं च]

प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम्।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ॥१७॥
तन्मध्ये वेदिकां कुर्यान्नव[५०]भागैकभागिकाम्[५१]।
एकहस्तसमुत्सेधां[५२] दर्पणोदरसंनिभाम्[५३] ॥१८॥
[५४]वेदिकायास्ततो बाह्ये नव कुण्डानि [५५]कल्पयेत्।
चतुरश्रादिवृत्तान्तं [५६]त्रिमेखलसमायुतम् ॥१९॥

एकरात्रं द्विरात्रं वा त्रिरात्रं वा जलोषितम्।'
(**दीप्ते** ४८.२० उ०, २१ उ०, २२पू०)

[४३] ०त्प्रविशीर्षम्—ई; ०त्प्रविशीर्षकः—ऐ २.

[४४] कुशैर्दर्भैः—अ, आ, इ, ई, उ, ऐ १, ऐ ३; कुशदर्भैः—ऐ २; कुशदर्भयोः पर्यायत्वाद्वस्त्रैः इति पाठः साधितः।; अत्र ६. १० उ० टिप्पणी द्रष्टव्या।

[४५] प्रपां तीरे—अ; प्रपां मध्ये—आ, ई; प्रपान्तरे—इ, उ; प्रपान्ते च—ऐ १, ऐ २, ऐ ३; अत्र **दीप्ते** (२०.११६ उ०) 'जलमध्ये प्रपां कृत्वा' इत्यस्ति। **चिन्त्ये** (२०.७२) 'जलतीरे प्रपां कृत्वा' इति दृश्यते। **रौरवोत्तरे**ऽत्र 'प्रपां तीरे' 'प्रपां मध्ये' इति पाठद्वयं दृश्यते। 'प्रपां मध्ये' इति पाठे प्रपां जलमध्ये इति व्याख्येयम्।

[४६] कुम्भानि—अ, इ, ई, उ.

[४७] ०दिभूषितान्—आ; ०दिभूषितम्—ई.

[४८] एकरात्रि—उ.

[४९] 'प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम्।
दशद्वादशहस्तं वा नवहस्ताष्टहस्तकम् ॥
षोडशस्तम्भसंयुक्तं चतुर्द्वारसमन्वितम्।
चतुस्तोरणसंयुक्तं वितानध्वजसंयुतम् ॥
तन्मध्ये वेदिकां कुर्यात्त्रिहस्तं विस्तरं क्रमात्।
रत्निमात्रसमुत्सेधं तालमात्रमथापि वा ॥
चतुरश्राणि कुण्डानि दिक्षु कुर्याद्यथाक्रमम्।
आग्नेयादीशकोणान्तं वृत्तकुण्डानि कारयेत् ॥
ईशानशक्रयोर्मध्ये वृत्तं प्राधानिकं कुरु।
सर्वेषां हस्तविस्तीर्णं गम्भीरं तत्समं भवेत् ॥
मेखलात्रयसंयुक्तं नाभियोनिसमन्वितम्।
गोमयालेपनं कृत्वा शालिपिष्टैर्विचित्रयेत् ॥'
(**दीप्ते** ४८.२२ उ०–२८ पू०)

[५०] ०भागेक०—ई.

[५१] ०भागिकम्—अ, आ, इ, ई, उ.

[५२] ०समुत्सेधं—अ, आ, इ, ई, उ.

[५३] ०संनिभम्—अ, आ, इ, ई, उ.

[५४] वेदिकायां ततो—आ.

[५५] विन्यसेत्—अ, आ, इ, उ; नवकुण्डकल्पनम्—१६.२१–२३

[५६] त्रिमेखलासमा०—आ, ई; मेखलाशब्दस्य स्त्रीलिङ्गस्य ह्रस्वाकारान्तत्वं छन्दोभङ्गवारणार्थम्। **रामायणे** सुन्दरकाण्डे २२.२६ पू० (कुम्भकोणप्रकाशिते) 'श्रोणीसूत्रेण महता मेचकेन सुसंवृतः' इति श्लोकार्धे 'मेचकेन' इति सुपाठस्थाने 'मेखलेन' इति क्वाचित्कपाठान्तरानुरोधेन मेखलाशब्दस्य पुंसि नपुंसके च प्रयोग इति केषांचिदाधुनिककोशकाराणामाशयः।

नाभियोनिसमायुक्तं कृत्वा प्रागादिषु क्रमात् ।
प्रोक्षयेत्पञ्चगव्येन गोमयेनानुलेपयेत् ॥२०॥

[[57]शयनाधिवासः, कुम्भस्थापनं तत्र यजनं च]

स्थण्डिलं कल्पयेत्तत्र वेदिकोपरि शालिभिः ।
कल्पयेच्छयनं तत्र [58]ह्यण्डजाद्यैरनुक्रमात् ॥२१॥
जलाल्लिङ्गं समुद्धृत्य [59]स्नापयेत्स्थापितैर्जलैः ।
वेष्टयेन्नववस्त्रेण गन्धादिभिरथार्चयेत् ॥२२॥
रथमारोप्य यत्नेन प्रासादं संप्रवेशयेत् ।
अद्भिः प्रक्षालयेल्लिङ्गं कुशैर्वस्त्रैश्च वेष्टयेत् ॥२३॥
[60]शाययेच्छयने लिङ्गं गन्धादिभिरथार्चयेत् ।
पूर्वादीशानपर्यन्त[61]मष्टकुम्भांस्तु विन्यसेत्[62] ॥२४॥
मध्यमे शिवकुम्भं तु शिरोभागे तु दक्षिणे ।
ईशानाद्यस्त्रपर्यन्तं मन्त्रमूर्ति [63]स्वलिङ्गकैः ॥२५॥
आवाह्य स्थाप्य गन्धाद्यैरर्चयेत्क्रमशः पुनः ।

[[64]होमः]

[65]समिद्घृतचरुक्षीर[66]यववेणुप्रियङ्गवः ॥२६॥

---

[57] 'स्थण्डिलं वेदिकामध्ये तण्डुलैः सह कल्पयेत् ।
तिलदर्भैः समाकीर्य शयनं तत्र कल्पयेत् ॥
तन्मध्ये विन्यसेद्देवं प्राक्शिरस्कमधोमुखम् ।
गन्धपुष्पादिना पूज्य रक्तवस्त्रेण वेष्टयेत् ॥
शिवकुम्भं वर्धनीं च तत्तदीशे तु विन्यसेत् ।
पूर्वोक्तशिवमन्त्रं तु शिवकुम्भे तु विन्यसेत् ॥
वर्धन्यां वर्धनीबीजं तद्रूपं तु विभावयेत् ।
अभितोऽष्टघटान्यस्त्वा शिवतोयेन पूरयेत् ॥
सवस्त्रान्सापिधानांश्च लोकपालाधिदैवतान् ।
बीजानि लोकपालानां तत्तत्कुम्भेषु विन्यसेत् ॥
पूजयित्वा यथान्यायं नैवेद्यान्तं विशेषतः ।'
(दीप्ते ४८.२८ उ०–३३)

[58] अण्डजाद्यै०––अ, इ; मुण्डजाद्यै०––आ, ई.

[59] स्थापये०––अ, आ, इ, उ.

[60] शायये शयने––ऐ २.

[61] ०मष्टकुम्भानि––अ, इ, उ; ०मष्टौ कुम्भांस्तु––ऐ १, ऐ ३.

[62] ०मष्टविद्येश्वरान्न्यसेत्––आ, ई.

[63] सुलिङ्गकैः––ऐ १, ऐ ३; . . लिङ्गके––ऐ २.

[64] 'दिशास्वध्ययनं कुर्यात्ततो होमं समाचरेत् ।
समिदाज्यचरुक्षीरं लाजं चापि तथा मधु ॥
अपूपं फलसिद्धचर्थं तिलं वै जुहुयात्क्रमात् ।
पलाशौदुम्बराश्वत्थवटाः पूर्वादितः क्रमात् ॥
शम्यर्कखादिरं बिल्वं विदिक्षु परिकल्पयेत् ।
पलाशं तु प्रधानस्य प्रत्येकं जुहुयाच्छतम् ॥
एककुण्डे शिवं प्रोक्तं दिक्कुण्डेषु भवादिकान् ।
शिवाग्निं जनयेत्पूर्वं पञ्चसंस्कारसंयुतम् ॥
प्रणीताग्निं समादाय दिक्कुण्डेषु विनिक्षिपेत् ।
सद्यादि जुहुयाद्दिक्षु विदिक्षु हृदयाद्यथ ॥
आज्यादितिलपर्यन्तं ब्रह्माङ्गैर्जुहुयात्क्रमात् ।
रुद्रसूक्तैर्ब्रह्मसूक्तैर्विष्णुसूक्तैश्च होमयेत् ॥
एवं जागरणं रात्रौ प्रभाते स्थापनं भवेत् ।
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ॥
जयादिरभ्याधानं च राष्ट्रभृच्च हुनेत्क्रमात् ।
स्विष्टान्तं होमयित्वा तु ततः स्थापनमारभेत् ।'
(दीप्ते ४८.३४–४१)

[65] प्रमितप्रातचरुं क्षीरं––ऐ १, ऐ ३.

[66] ०द्धृतचरुक्षीरं––ऐ २.

[67]लाजसर्षपमाषाश्च[68] [69]तिला मधु[70]गुलाः स्मृताः ।
[71]अग्न्याधानादिकं [72]कृत्वा [73]ह्याज्यभागान्तमाचरेत् ॥२७॥
स्वस्व[74]दिङ्मुखमावाह्य [75]स्वस्वलिङ्गैः [76]समर्चयेत् ।
[77]स्वैः स्वैश्च मूर्तिभिर्लिङ्गैः[78] [79]समिदादीन्हुनेत्क्रमात्[80] ॥२८॥
[81]पञ्चाङ्गैश्च षडङ्गैश्च [82]ह्यन्नादीञ्जुहुयात्क्रमात् ।
[83]अष्टाविंशतिमेकैकं[84] हुत्वाङ्गेषु कुशैः स्पृशेत् ॥२९॥

[[85]रत्नन्यासः लिङ्गस्थापनं च]

[86]शयनाल्लिङ्गमुद्धृत्य हृदा पूर्णाहुतिं हुनेत् ।
[87]प्रासादे [88]स्थापनस्थाने [89]नवरत्नानि विन्यसेत् ॥३०॥
लिङ्गं प्रवेशयेत्तत्र[90] स्थापयेन्मूर्तिभिः सह ।

---

[67] लाजा०—ऐ ३.
[68] ०माषानि —ई; ०माषांश्च—ऐ १, ऐ ३.
[69] तिलं—आ.
[70] ०गुलं—आ; गुला—उ; गुणान्वितम्—ऐ १; गुलान्वितम्—ऐ ३.
[71] अग्निधा०—ऐ १, ऐ ३.
[72] सर्वं—ई.
[73] आज्य०—अ, इ, ऐ १, ऐ २, ऐ ३, त्वाज्य०—ई.
[74] ०दिग्देवतामावाह्य—ऐ १; ०द्विग्देवमावाह्य—ऐ २, ऐ ३.
[75] स्वस्वैर्लिङ्गैः—इ, ऐ२; स्वैः स्वैर्लि०—ऐ १, स्वै स्वैर्लि०—ऐ३.
[76] समुच्चरन्—ऐ १, ऐ ३.
[77] स्वस्वैस्तु—आ, ई; स्वस्वैश्च—इ, उ; स्वैः स्वैर्त्रिमूर्ति०—ऐ १; स्वस्वैस्त्रिमूर्ति०—ऐ २; स्वैस्वैत्रिमूर्ति०—ऐ ३.
[78] मूर्तिलिङ्गाद्यैः—आ, ई.
[79] समिदादि—उ; समिधादीन्—ऐ १, ऐ २, ऐ ३.
[80] ०न्क्रमाद्धुनेत्—आ, ई; न्हुत्वा क्रमात्—ऐ २.
[81] पञ्चाङ्गषडङ्गविवरणम् ९.२२,११.२२श्लोकयोर्द्रष्टव्यम्
[82] अन्नादीन्–अ, इ, उ, ऐ १, ऐ २, ऐ ३; अस्त्रादीन्—ई.
[83] अष्टविंशति०—ऐ १, ऐ ३.
[84] ०रैकेकं—अ, आ, इ, उ, ऐ १, ऐ २, ऐ ३; ०रेकेकं०—ई.
[85] उत्थाप्य शयनाद्देवं शं नो देवीति मन्त्रतः ।
अचलं गर्भगेहे तु स्नानवेद्यां न्यसेच्चलम् ॥
रत्नन्यासं ततः कुर्याद्गर्भगेहे विधानतः ।
आसनं कल्पयेद्धीमान्स्नानश्वभ्रे विशेषतः ॥
तत्र देवं समायोज्य कलाङ्गानि ततो न्यसेत् ।
सुमुहूर्ते सुनक्षत्रे सुतिथौ स्थापयेद्बुधः ॥
शिवकुम्भात्समादाय प्रासादं प्रतिमस्य च ।
हृदये विन्यसेद्धीमान्पिण्डिकायां तु वर्धनीम् ॥
दिशाकुम्भानि संस्नाप्य व्योमव्यापि उदाहरन् ।
शुद्धदेशं समानीय वस्त्राभरणमालया ॥
अर्चनोक्तं समभ्यर्च्य नैवेद्यान्तं हृदा बुधः ।
मुखवासं हृदा दद्याद्धृदयेन तु मन्त्रतः ॥
एकाहमुत्सवं कुर्यात्सप्ताहं वापि कारयेत् ।'
(**दीप्ते**, ४८.४२–४८ पू०)
[86] शयनाद्बिम्बमु०—ई.
[87] प्रासादस्था०—अ, आ, इ, उ.
[88] स्थापने—ऐ १, ऐ २, ऐ ३.
[89] तेन रत्नादि—इ; नवरत्नादि—ई; नवरत्नानां विवरणाय–१६.५९, ६० पू० टिप्पणी द्रष्टव्या ।
[90] ०येत्ततत्—ऐ ३.

[९१]यस्यां दिशि मुखं प्रोक्तं तस्यां दिशि चतुर्मुखम् ॥३१॥
स्थापयेदीशमन्त्रेण[९२] [९३]मूर्तिभिः पूर्ववत्क्रमात् ।
पीठबन्धं ततः कृत्वा कारयेदष्टबन्धनम्[९४] ॥३२॥
पूर्ववत्स्नपनं कृत्वा हविर्दत्त्वा तु [९५]पायसम् ।
पुण्याहं वाचयेत्तत्राप्याचार्यं पूजयेत्ततः ॥३३॥
होमकान्पूजयेत्पश्चात्पूजयेत्परिचारकान्[९६] ।
ब्राह्मणान्भोजयेत्तत्र यथाविभवविस्तरैः[९७] ॥३४॥

[९८]इति [९९]श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे मुखलिङ्गप्रतिष्ठा[१००]विधिर्नाम[१०१]
[१०२]सप्तदशः पटलः ॥

---

[९१] यस्याग्निमुखं--इ.

[९२] स्थापनाद्दीपमाप--अ, इ; स्थापनादिपमाप--आ; स्थापनादि . . . --ई; स्थापन . . . --उ.

[९३] मन्त्रेण मूर्तिभिः क्रमात्--अ, इ, उ; मन्त्रेण मूर्तिभिः सह--आ, ई.

[९४] अष्टबन्धनम्--अत्र १६.७७-८० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[९५] पायसम्--अत्र ९.३७ पू० टिप्पणी द्रष्टव्या ।

[९६] ०वारकान्--इ.

[९७] ०विस्तरम्--आ, ई.

[९८] इति श्री रौरवोत्तरे--अ; इति रौरवोत्तरे--इ.

[९९] 'आ, ई' मातृकयोः 'श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे' इति न दृश्यते ।

[१००] 'आ, ई' मातृकयोः 'विधिः' इति न दृश्यते ।

[१०१] 'अ, इ, उ' मातृकासु 'नाम' इति न दृश्यते ।

[१०२] सप्तदशपटलः--उ.

अष्टादशः पटलः

बाणलिङ्गप्रतिष्ठाविधिः[1]

[[2]बाणलिङ्गलक्षणम्]

[3]प्रतिष्ठां [4]बाणलिङ्गस्य लक्षणं कथयामि ते।
त्वं शृणुष्व रुरो सम्यक्स्वमानं तस्य मानकम्[5] ॥१॥
[6]श्वेतवर्णं भवेद्विप्रे[7] [8]क्षत्रिये रक्तवर्णकम्।
पीतवर्णं भवेद्वैश्ये[9] कृष्णवर्णं तुरीयके[10] ॥२॥
[11]स्थूलं [12]शिरः कृशं मूलमुन्नतेन[13] मुखं भवेत्।
[14]रुद्रांशलक्षणं दृष्ट्वा तज्जले [15]चाधिवासयेत् ॥३॥

[[16]मण्डपस्तत्र कुण्डवेदिकाकल्पनम्]

प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम्[17]।

---

[1] बाणलिङ्गप्रतिष्ठाविधिविषये **अंशुमत्तन्त्रे** (टि० ७४५) २२०–२२३ पृष्ठेषु; **उत्तरकामिके** ३६; **पूर्वकारणे** ६२; **सहस्रे** ४२ पटला द्रष्टव्याः। **सुप्रभेदे** (आर्. इ. २०३१२) ३४–४१ पत्राणि द्रष्टव्यानि।

[2] 'माषमात्रादिहस्तान्तं तेषां मानमुदाहृतम्।
पादाङ्गुलविवृद्धया तु गृह्णीयाद्वा यथेच्छया॥
विस्तारनाहमानं तु बाणलिङ्गस्य नेष्यते।
रेखाबिन्दुकलङ्कादिरहितं युक्तमेव वा॥
सर्वेषामपि लिङ्गानां बाणलिङ्गं विशिष्यते।'
(**उत्तरकामिके** ३६.५–७पू०)

[3] बाणलिङ्गप्रतिष्ठाया लक्षणं—आ, ई.

[4] बाणलक्षणं कथयामि—अ; बाणलक्षणं कथयामि रुरो तव—इ.

[5] स्वस्य मानस्य मानकम्—उ.

[6] 'विप्रस्य श्वेतवर्णं स्यात्क्षत्रियस्य तु रक्तकम्।
वैश्यस्य पीतवर्णं स्याच्छूद्रस्यैव तु नीलकम्॥
शिरोवर्तनहीनं तु ब्रह्मसूत्रविहीनकम्।'
सूक्ष्मे (टि० १९१) ८५.५, ६ पू०;
श्वेतं वर्णं—आ.

[7] भवेद्विप्रं—अ, आ, ई; भवेदीप्रं—इ; भवेद्विप्र—उ.

[8] क्षत्रियो—अ, इ; क्षत्रियं—आ, ई, उ.

[9] ०द्वैश्यः—अ, इ; ०द्वैश्यं—आ, ई, उ.

[10] तुरीयकम्—आ, ई.

[11] स्थूलमध्यं—ई.

[12] मध्यं—आ.

[13] 'उन्नतेन' इत्यत्र 'उन्नतं तु' इति पाठश्चेत्साधु।;
'स्थूलं शिरः कृशं मूलमुन्नतं तु मुखं भवेत्।
ईदृशं लक्षणं दृष्ट्वा तज्जले चाधिवासयेत्।'
अयं श्लोकः **आत्मार्थपूजापद्धतौ** (टि० ३७१) ११३१, ११३२ पृष्ठयोः **'रौरवोत्तरे'** इति-निर्दिश्योदाहृतः।

[14] 'लक्षणोद्धारणं नेष्टं स्वाकारो लक्षणं भवेत्।
विधाय लिङ्गशुद्धिं तु शिवेनास्त्रेण मृज्जलैः।
जलाधिवासनं कुर्यात्'
(**उत्तरकामिके** ३६.२१ उ०, २२);
रुद्रांशं—अ, आ, इ, ई, उ.

[15] वाधिवासयेत्—इ, उ.

[16] 'नवपञ्चैककुण्डकम्।
कुर्याल्लिङ्गाधिवासार्थं वेदिकासहितं यथा॥
वेदिकारहितं चैतद्गृहादौ स्थण्डिलं मतम्।

तन्मध्ये वेदिकां कुर्याद्दर्पणोदरसंनिभाम्[18] ॥४॥
वेदिकायास्तु परितो [19]नवकुण्डानि कल्पयेत् ।
चतुरश्रादिवृत्तान्तं नाभि[20]योनी [21]तु पूर्ववत् ॥५॥
दर्भमालाभिरावेष्टच सर्वालंकारसंयुतम् ।

[[22]शयनाधिवासः]

स्थण्डिलं कल्पयेत्तत्र वेदिकोपरि शालिभिः ॥६॥
शयनं कल्पयेत्तत्र [23]ह्यण्डजाद्यैरनुक्रमात् ।
जलाल्लिङ्गं समुद्धृत्य प्रासादं संप्रवेशयेत् ॥७॥
क्षालयेदुदकेनैव [24]नववस्त्रेण वेष्टयेत् ।
वेशयेन्मण्डपं[25] तत्र शयनोपरि शाययेत् ॥८॥
कुशैर्वस्त्रैः समाच्छाद्य तद्रात्रौ चाधिवासयेत् ।

[[26]कुम्भस्थापनं तत्पूजा च]

लिङ्गस्य दक्षिणे पार्श्वे मूर्तिकुम्भं न्यसेत्ततः[27] ॥९॥
पूर्वादीशानपर्यन्तमष्टकुम्भांश्च[28] विन्यसेत् ।
वस्त्रहेमादिभिर्युक्तान्सकूर्चान्सापिधानकान्[29] ॥१०॥
क्रमेण स्थापयेत्तत्र मन्त्रमूर्ति समावहेत्[30] ।
गन्धादिभिरथाभ्यर्च्य होमकर्म समारभेत् ॥११॥

[[31]होमः]

समिद्घृतचरुक्षीरयववेणुप्रियङ्गवः ।

शिल्प्युद्वासनपुण्याहविप्रभुक्त्युपलेपनम् ॥'
(उत्तरकामिके ३६.२२ उ०, २३, २४ पू०)

[17] मण्डपं भूश्रकर्म तु—अ.

[18] ०संनिभम्—आ, उ.

[19] नवकुम्भान् प्रकल्पयेत्—आ, ई; नवकुण्डकल्पनम्—१६.२१–२३.

[20] ०योनि—अ, आ, इ, ई, उ.

[21] च—ई.

[22] 'स्थण्डिले शयनं तस्य पूजनं प्राग्वदाचरेत् ।
जलमध्यादथानीय शुद्धिं गव्यादिभिर्नयेत् ॥
अभ्यर्च्यावेष्टच वस्त्रेण कृतप्रतिसरं शिवम् ।
शय्यामध्ये निवेश्याथ'
(उत्तरकामिके ३६.२५, २६)

[23] अण्डजाद्यै०—अ, इ, उ; मुण्डजाद्यै०—आ, ई.

[24] वस्त्रेणैव च—आ, ई.

[25] ०न्मण्डलं—अ, आ, इ, उ.

[26] 'शिवकुम्भं च वर्धनीम् ॥
विद्येशकुम्भसंयुक्तं ससूत्रं सापिधानकम् ।
सहिरण्यं सवस्त्रं च गन्धोदपरिपूरितम् ॥
संस्थाप्य संयजेत्सर्वांस्तत्त्वतत्त्वेशसंयुतान् ।
मूर्तिमूर्तीश्वरान्न्यस्त्वा'
(उत्तरकामिके ३६.२६उ०–२८)

[27] ०त्तदा—आ, ई, उ.

[28] ०कुम्भानि—अ, इ.

[29] ०न्सापिधानकान्—आ.

[30] समाचरेत् — आ.

लाजसर्षपमाषाश्च [३२]तिला मधु[३३]गुलाः स्मृताः ॥१२॥
अग्न्याधानादिकं कृत्वा [३४]ह्याज्यभागान्तमाचरेत् ।
स्वस्वमूर्ति समावाह्य गन्धपुष्पादिनार्चयेत् ॥१३॥
[३५]समिध[३६]स्त्र्यम्बकेणैव [३७]ईशानेन घृतं हुनेत् ।
पञ्चब्रह्मषडङ्गैश्च [३८]ह्यन्नादीञ्जुहुयात्क्रमात्[३९] ॥१४॥
[४०]अष्टाविंशतिमेकैकं[४१] हुत्वाङ्गेषु कुशैः स्पृशेत् ।
शयनाल्लिङ्गमुद्धृत्य पूर्णाहुतिमथाचरेत् ॥१५॥

[[४२]रत्नन्यासः]

प्रासादे स्थापनस्थाने नवरत्नानि[४३] विन्यसेत् ।
अथवा पीठमध्ये तु [४४]त्रिभागैके बिलीकृते ॥१६॥
[४५]रत्नानि विन्यसेत्तत्र लिङ्गं तत्र प्रवेशयेत् ।

[[४६]लिङ्गस्थापनम्]

स्थापयेदीशमन्त्रेण परितो मूर्तिभिः सह ।१७॥

---

[३१] 'संपाद्यैवं शिवानलम् ।
समिदाज्यान्नलाजैश्च तिलेन च समन्वितम् ॥
जुहुयान्मूलमन्त्रेण शतमष्टोत्तरं यथा ।
मनोन्मन्यार्धमङ्गैस्तु दशांशं द्विजसत्तमाः ॥
तत्त्वतत्त्वेश्वरादीनां पूर्ववद्धोममाचरेत् ।
वस्त्रेणाच्छाद्य लिङ्गं तु नैवेद्यं च निवेदयेत् ॥
प्रातः स्नात्वार्चयित्वा तु मण्टपाधिपदेवताः ।
लिङ्गमग्निमघोरेण जुहुयाच्छतसंख्यया ॥'
(**उत्तरकामिके** ३६.२८उ०–३२पू०)

[३२] तिलं—आ, ई.

[३३] गुलं स्मृतम्—आ, ई.

[३४] आज्य०—अ, इ, उ.

[३५] समित्त्रियम्बकेनैव—अ; समिधं त्र्यम्बकैर्हुत्वा—आ; समित्र्यम्बकेनैव—इ, उ; समिधस्त्र्यम्बकैर्हुत्वा—ई.

[३६] त्र्यम्बकेण—त्र्यम्बकमन्त्रेण; **ऋग्वेदे** ७.५९.१२; **तै० संहिता** १.८.६.२.

[३७] हीशानेन—ई.

[३८] अन्नादीं—अ; अन्नादीन्—इ, उ.

[३९] ०यात्ततः—आ, ई.

[४०] अष्टविंशति०—उ.

[४१] ०रेकैकं—अ, आ, इ, ई, उ.

[४२] 'रत्नन्यासं ततः कुर्यान्नवपञ्चैकरत्नकम् ।
पिण्डिकावटमध्ये तु हेमं वाथ विनिक्षिपेत् ॥
(**उत्तरकामिके** ३६.२०उ०, २१ पू०)

[४३] **नवरत्नानि**—एतद्विषये १६.५९, ६० पू० श्लोकौ तदीयटिप्पणी च द्रष्टव्याः।; ०रत्नादि—अ, आ.

[४४] त्रिभागैकं बिलं कृते—अ; त्रिभागैकं बिलीयते—आ; त्रिभागैकं बलं कृते—इ, उ; त्रिभागैकं विधीयते—ई.

[४५] रत्नादि—अ, उ.

[४६] 'संप्राप्तदक्षिणस्तुष्टः प्राप्तपञ्चाङ्गभूषणः ।
मुहूर्ते समनुप्राप्ते मन्त्रन्यासं समाचरेत् ॥
एकाद्या नवनिष्कान्ता भवेद्देशिकदक्षिणा ।
संकल्प्य सासनं मूर्ति मूलमन्त्रं शिवे न्यसेत् ॥
तज्जलैः स्नापयेद्देवं देवीं पीठस्वरूपिणीम् ।
स्नपनं कारयेदन्ते दद्यान्नैवेद्यमादरात् ॥
यदनुक्तं भवेदत्र लिङ्गस्थापनवन्नयेत् ।
चतुर्थहोमं चण्डेशयजनं चास्य नेष्यते ॥
प्रत्यहं पूजयेद्देवमर्चनोक्तविधानतः ।'
(**उत्तरकामिके** ३६.३२ उ०–३६)

मूर्तिन्यासं ततः [47]कृत्वा [48]ह्यष्टबन्धं न्यसेत्ततः।
स्नपनं कारयेत्तत्र स्विष्टान्तं होममाचरेत् ॥१८॥
[49]उपचाराणि सर्वाणि शास्त्रदृष्टेन कर्मणा।
आचार्यं पूजयेत्तत्र होमकान्परिचारकान्[50] ॥
[51]पायसेन हविर्दद्याद्ब्राह्मणान्भोजयेत्ततः ॥१९॥

[52]इति [53]श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे बाणलिङ्गप्रतिष्ठा[54]विधिर्नाम[55]
अटादशः पटलः[56] ॥

[47] कुर्यादष्टबन्धं—उ.

[48] अष्टबंधं —अ, इ; **अष्टबन्धनम्**—एतद्विषये १६.७७–८० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः।

[49] उपचारशब्दः क्लीबे प्रयुक्तः।

[50] ०वारकान्—इ.

[51] **पायसम्**—अत्रैतद्विषये ९.३७ पू० टिप्पणी द्रष्टव्या।

[52] इति श्रीरौरवोत्तरे—अ; इति रौरवोत्तरे—इ.

[53] 'आ, ई' मातृकयोः 'श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे' इति न दृश्यते।

[54] 'आ, ई' मातृकयोः 'विधिः' इति न दृश्यते।

[55] 'अ, इ, उ' मातृकासु 'नाम' इति न दृश्यते।

[56] ०दशपटलः—ई, उ.

एकोनविंशः पटलः

इष्टलिङ्गप्रतिष्ठाविधिः

[1]प्रतिष्ठामिष्टलिङ्गस्य[2] लक्षणं च [3]रुरो शृणु ।
संक्षेपेणैव तत्सर्वं कथयामि समासतः ॥१॥
[4]पर्वते वा वने वापि नद्यां वापि जलेऽपि वा ।
इष्टलिङ्गं गृहीत्वा तु जले चैवाधिवासयेत्[5] ॥२॥

[मण्डपस्तत्र कुण्डवेदिकाकल्पनम्]

प्रासादस्याग्रतो वापि मण्डपं कारयेद्बुधः[6] ।
तन्मध्ये वेदिकां [7]कुर्याद्दर्पणोदरसंनिभाम्[8] ॥३॥
[9]वेदिकायास्ततो बाह्ये [10]नवकुण्डानि कल्पयेत् ।

[शयनाधिवासः]

स्थण्डिलं कल्पयेत्तत्र शालिभिश्चतुरङ्गुलम्[11] ॥४॥
शयनं कल्पये[12]त्तत्र [13]ह्यण्डजाद्यैरनुक्रमात् ।
सर्वालंकारसंयुक्तं पूर्वोक्त[14]विधिवत्ततः[15] ॥५॥
जलाल्लिङ्गं समुद्धृत्य सेचयेत्स्थापितोदकैः ।
वस्त्रेण वेष्टयित्वा तु मण्टपं संप्रवेशयेत् ॥६॥
[16]स्नापयेदुदकेनैव शयनोपरि शाययेत् ।
कुशैर्वस्त्रैः समाच्छाद्य [17]गन्धादिभिरथार्चयेत् ॥७॥

---

[1] अयं श्लोकः **आत्मार्थपूजापद्धतौ** (टि ३७१. पृ० ११२०) '**रौरवे** चललिङ्गलक्षणम्' इति निर्दिश्योद्धृतः ।

[2] ०मष्टलिङ्गस्यात्—इ.

[3] रुरोजस —अ; इ; रुरो तव—आ, ई.

[4] 'सरित्प्रवाहसंस्थं च बाणलिङ्गसमाकृति ।
यदन्यदपि बोद्धव्यं लिङ्गं सर्वसुखावहम् ॥
पर्वतादिसमुद्भूतं तद्वदेव समीरितम् ।
(**उत्तरकामिके** ३६.१२ उ०, १३)

[5] चैवावासयेत्—इ.

[6] कारयेत्ततः—आ, ई.

[7] कृत्वा दर्प०—आ, ई.

[8] ०संनिभम्—आ, इ.

[9] वेदिकात्तु कृतो—इ.

[10] नवकुण्डकल्पनम्—१६.२१—२३.

[11] 'इ' मातृकायां' चतुरङ्गुलम्' इत्यारभ्य षष्ठश्लोकस्य पूर्वार्धे 'सेचयेत्' इत्यन्तं न दृश्यते ।

[12] ०त्तत्रारण्डजाद्यै०—उ.

[13] अण्डजाद्यै०—अ.

[14] ०विधिना तदा—ई.

[15] ०त्तदा—आ.

[16] स्थापये०—अ, आ, इ, ई.

[17] गन्धाद्यैरर्चयेद्बुधः—आ, ई.

[कुम्भस्थापनं तत्पूजा च]

स्थापयेन्नवकुम्भान्वै[१८] मध्यादीशानमूर्तिभिः[१९] ।
गन्धादिभिः समभ्यर्च्य ततो होमं [२०]समारभेत् ॥८॥

[होमः]

समिद्घृत[२१]चरुक्षीरयववेणुप्रियङ्गवः[२२] ।
लाजसर्षपमाषाश्च[२३] [२४]तिला [२५]मधुगुलाः स्मृताः ॥९॥
अग्न्याधानादिकं कृत्वा [२६]ह्याज्यभागान्तमाचरेत् ।
स्वस्वमूर्तिं समावाह्य गन्धाद्यैरर्चयेत्क्रमात् ॥१०॥
[२७]स्वैः स्वैश्च मूर्तिभिर्मन्त्रैः [२८]समिदाहुतिमाचरेत् ।
[२९]आवो राजेति मन्त्रेण घृताहुतिमथाचरेत् ॥११॥
[३०]पञ्चाङ्गैश्च षडङ्गैश्च [३१]ह्यन्नादीञ्जुहुयात्क्रमात् ।
अष्टाविंशतिमेकैकं[३२] हुत्वाङ्गेषु कुशैः स्पृशेत् ॥१२॥
पुनराहुतिमाज्येन प्रत्येकं चाष्टविंशतिम्[३३] ।

[लिङ्गस्थापनम्]

लिङ्गमुद्धृत्य शयनात्स्थापयेन्मूर्तिभिः सह ॥१३॥
[३४]त्रिभागैकं बिले मग्नं द्विभागमुपरि स्थितम्[३५] ।
कृत्वाष्टबन्धनं[३६] सम्यङ्[३७]मूर्तिभिश्चाभिषेचयेत् ॥१४॥
पुण्याहं वाचयेत्तत्र स्नपनं कारयेत्ततः ।
[३८]पायसेन हविर्दद्याद्गुलान्नं [३९]दापयेत्ततः ॥१५॥

---

[१८] ०कुम्भानि—अ, इ, ई; ०कुम्भांश्च—उ.

[१९] 'ईशानादिमूर्तिभिः' इत्यर्थे 'ईशानमूर्तिभिः' इति प्रयुक्त इति भाति। अत्र विषये १६.३७–३९ श्लोका द्रष्टव्याः ।

[२०] समाचरेत्—आ, ई, उ.

[२१] ०मधुक्षीर०—ई.

[२२] ०प्रियङ्गवम्—इ.

[२३] ०माषाणि—ई.

[२४] तिलं—आ, ई.

[२५] मधुगुलं स्मृतम्—आ, ई; मधुगुणा स्मृताः—इ.

[२६] आज्य०—अ, इ, उ; चाज्यं—ई.

[२७] स्वस्वश्च—उ.

[२८] समिधाहुति०—इ, उ.

[२९] **ऋग्वेदे** ४.३.१; **तै० संहिता** १.२.१४.२; **सामवेदे** ६९; 'आ, ई' मातृकयोरिदमर्धं न दृश्यते ।

[३०] पञ्चाङ्गषडङ्गविवरणम् ९.२२; ११.२२ श्लोकयोर्दृश्यते ।

[३१] अन्नादीन्—अ, इ; अन्नादि—उ.

[३२] ०रेकैकं—अ, आ, इ, उ; रेकेकं—ई.

[३३] ०विंशतिः—अ, आ, इ, ई, उ; 'अष्टविंशतिम्' इति ह्रस्वघटितप्रयोगो वृत्तार्थ इति भाति ।

[३४] त्रिभागेकं—ई.

[३५] स्थितः—उ.

[३६] अष्टबन्धनम्—अत्र विषये १६.७७–८० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[३७] ०मूर्तिभिरभि०—इ.

[३८] पायसम्, गुलान्नम्—एतद्विवरणाय ९.३७ पू० टिप्पणी द्रष्टव्या ।

[३९] परिचारकान्—आ, ई.

[आचार्यादिपूजा]

आचार्यं पूजयेत्तत्र होमकान्परिचारकान् ।
ब्राह्मणान्भोजयेत्तत्र यथाविभवविस्तरैः[४०] ॥१६॥

[४१]इति [४२]श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे इष्टलिङ्गप्रतिष्ठा[४३]विधिर्नाम[४४] एकोनविंशः पटलः[४५] ॥

[४०] ०विस्तरम्—आ, ई.

[४१] इति श्रीरौरवोत्तरे—अ; इति रौरवोत्तरे—इ.

[४२] 'आ, ई' मातृकयोः 'श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे इति न दृश्यते ।

[४३] 'आ, ई' मातृकयोः 'विधिः' इति न दृश्यते ।

[४४] 'अ, इ, उ' मातृकासु 'नाम' इति न दृश्यते ।

[४५] ०विंशतिपटलः—इ, उ.

विंशः पटलः

[1]रत्नलिङ्गप्रतिष्ठाविधिः

[2]रुरुरुवाच --

[3]रत्नलिङ्गप्रतिष्ठां च श्रोतुमिच्छामि [4]संप्रति ।
[5]तत्सर्वं मम संक्षेपात्कथयस्व[6] महेश्वर ॥१॥

ईश्वर उवाच[7] --

[8]रत्नलिङ्ग[9]प्रतिष्ठां च प्रवक्ष्यामि समासतः ।
[10]त्वं शृणुष्व रुरो सम्यङ्[11]मनसा निश्चलेन वै ॥२॥

[[12]रत्नलिङ्गतत्पीठयोर्लक्षणम्]

[13]माणिक्यमुक्तावैडूर्यमिन्द्रनीलं प्रवालकम् ।

---

[1] अयं पटलः अस्मद्ग्रन्थालये आर्. इ. १०८६४ अङ्किते तालपत्रकोशे १,२ पत्रयोर्दृश्यते । तदीयपाठभेदाः 'ओ' इति निर्दिश्य लिखिताः ।; रत्नलिङ्गप्रतिष्ठाविधिविषये **पूर्वकारणे** ६२; **दीप्ते** ७१; **भीमसंहितायाम्** (टि. ७७६) पृ० २९४—२९७; **योगजे** ५ पटला द्रष्टव्याः ।

[2] 'आ, ई, ओ' मातृकासु 'रुरुरुवाच' इति न दृश्यते ।

[3] प्रतिष्ठा रत्नलिङ्गस्य श्रो०—ओ.

[4] संस्मृतः—अ, इ, उ; शंकरा—ओ.

[5] ततः सर्वं तु सं०—ओ.

[6] कथयत्व—अ; कथय—इ; कथायस्वि—उ; कथयामि—ओ.

[7] 'आ, ई' मातृकयोः 'ईश्वर उवाच' इति न दृश्यते ।; 'ओ' मातृकायाम् 'उवाच' इति न दृश्यते ।

[8] रत्नलिङ्गं च प्र०—इ.

[9] ०प्रतिष्ठान्तं च—अ.

[10] संशृणुष्व—ओ.

[11] निश्चलेनैव मानसः—अ, उ; निश्चयेनैव मानसः—इ; लक्षणं च त्वमानघ—ओ.

[12] 'माणिक्यं पद्मरागं च तथा मरकतं भवेत् ।
स्फटिकं च तथा प्रोक्तं पुष्परागं तथैव च ॥
प्रवालं चैव वज्राख्यं वैडूर्यमिन्द्रनीलकम् ।
माणिक्यं जयदं ज्ञेयं पद्मरागं धनावहम् ॥
पुष्टिं मरकतं कुर्यात्स्फटिकं पुत्रवृद्धिदम् ।
स्तम्भनं पुष्परागं च राजवश्यं प्रवालकम् ॥
आकर्षणं तु वज्राख्यं वैडूर्यं चायुर्वर्धनम् ।
इन्द्रनीलं महासिद्धिं रत्नजानां फलं भवेत् ॥
अङ्गुल्यादि वितस्त्यन्तं कुर्याल्लिङ्गं तु रत्नजम् ।
अङ्गुल्यारभ्य हस्तान्तं यथेष्टं लोहजं कुरु ॥
स्वमानेन च कर्तव्या पिण्डिका रत्नलोहयोः ।
स्वयोनिरेव पीठः स्यात्तदलाभे विधीयते ॥
रत्नजे लोहजं पीठं धातुजस्यैव धातुजम् ।
लोहजस्यैव लिङ्गस्य पीठिका श्वभ्रवर्जिता॥
श्वभ्रं कुर्याद्वियोनेस्तु चतुर्भागैकभागया ।
त्रिगुणं लिङ्गतारं तु पिण्डिकायास्तु विस्तृतम् ॥
चतुर्गुणं वा कर्तव्यमुत्सेधं तत्समं भवेत् ।
चतुरश्रा च वृत्ता च चललिङ्गस्य पिण्डिका ॥
उत्सेधं पिण्डिकायास्तु षोडशांशेन भाजयेत् ।
पट्टिका चाश्विनीभागा पञ्चांशं पद्मकुण्डकम् ॥
कण्ठभागं तु द्व्यंशं स्याच्चतुर्भागोर्ध्वपद्मकम् ।
द्व्यंशेन तु महापट्टी चांशेन घृतवारिणीम् ॥
पीठारे च त्रिभागैकं नालं निर्गममुच्यते ।
कृत्वा तु निश्चलं लिङ्गं प्रतिष्ठां कारयेत्ततः ॥'
(**दीप्ते** ७१.३ उ०—१५ पू०); एतद्विषये पुनः **अजिते** ४.५३—५९ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[13] माणिक्यं—अ; माणिक्क०—आ, इ, ई, उ; माणिक्कं मौक्ति०—ओ.

[14]स्फटिकं पद्मरागं च [15]पुष्परागं च विश्रुतम्[16] ॥३॥
वज्रं [17]मरकतं कान्तं सूर्यकान्तेन्दुकान्तकम् ।
गृहीत्वा [18]लिङ्गवल्लिङ्गं स्वयोनि[19] [20]वान्ययोनिकम् ॥४॥
लिङ्गस्य [21]नाहद्विगुणं योनिनाहं प्रकीर्तितम् ।
[22]लिङ्गायाम[23]त्रिभागैकमन्ययोनौ[24] विनिर्गतम्[25] ॥५॥
[26]योनिपीठमिति [27]ज्ञेयमश्रं वा वृत्तमेव वा ।
अन्य[28]योनि[29]समायुक्तौ कारयेदष्टबन्धनम्[30] ॥६॥
लोह[31]योनिसमायुक्तौ [32]तैलैर्लोहैश्च बन्धनम् ।
सुस्निग्धं कारयेत्तत्र'

[[33]लिङ्गशुद्धिर्जलाधिवासश्च]

'पञ्चगव्याभिषेचनम्[34] ॥७॥
एकरात्रं त्रिरात्रं[35] वा [36]जले [37]चैवाधिवासयेत् ।

[[38]मण्डपस्तत्र कुण्डवेदिकाकल्पनम्]

प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम् ॥८॥

---

[14] स्फाटिकं—ई.
[15] पुष्यरागश्च—इ; पुष्य०—उ, ओ.
[16] विद्रुमम्—ओ.
[17] मरतकं—उ, ओ.
[18] लिङ्गविल्लिङ्गं—आ, ई; लिङ्गलिवल्लीयाग्रि वान्य०—इ; लिङ्गं लिङ्गं स्व०—उ.
[19] ०योनिं—अ, आ, ई, उ, ओ.
[20] चान्य०—आ, ई.
[21] नाहं त्रिगुणं—आ, इ, ई, ओ; नाहन्त्रगुणं—उ.
[22] लिङ्गायामं—अ, इ; लिङ्गनाहं—ओ.
[23] ०त्रिभागेकं मन्य—ई.
[24] ०योनि०—आ, ई; ०योनो—ओ.
[25] ०विनिर्गमम्—ई.
[26] योनिः—ई.
[27] ज्ञेयं चतुरश्रं वृत्तमेव च—अ, इ, ई, उ; ज्ञेयं चतुरश्रं वृत्तमेव—ाअ.
[28] ०योनौ—अ, इ, उ; योन्यौ—ओ.
[29] ०संयुक्तौ—उ.
[30] अष्टबन्धनम्—एतद्विवरणाय १६.७७–८० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।
[31] ०योनौ समा०—अ, इ, उ, ओ.
[32] कारयेदष्टबन्धनम्—आ, ई; रत्नजान्यैः प्रतिष्ठितम्—ओ.
[33] 'पञ्चगव्यं समाहृत्य स्नापयेद्धृदयेन तु । स्नापयेद्गन्धतोयेन लिङ्गं वस्त्रेण वेष्टयेत् ॥ जलाधिवासनं कुर्याज्जलाधारस्य मध्यमे । एकरात्रं द्विरात्रं वा रात्रित्रयमथापि वा ॥' (दीप्ते ७१.२२ उ०–२४ पू०)
[34] ०भिषेचयेत्—अ, आ, इ, उ, ओ.
[35] ०रात्रौ त्रिरात्रौ—ई; ०रात्र त्रिरात्रे—ओ.
[36] पञ्च सप्ताधि०—अ; पञ्चरात्राधि०—आ, ई.
[37] चैव शिवस्य च—ओ.
[38] 'मण्डपं चललिङ्गानां प्रवक्ष्यामि महानल । नदीतटाकतीरे वा पर्वते वा वनान्तरे ॥ कोष्ठे देवालये चैव गृहे वा पूजकस्य वा ।

चतुर्द्वारसमायुक्तं चतुस्तोरण[39]भूषितम् ।
तन्मध्ये वेदिकां कुर्याद्दर्पणोदरसंनिभाम्[40] ॥९॥
वेदिकायास्तु परितो [41]नवकुण्डानि कल्पयेत् ।
प्रोक्षयेत्पञ्चगव्येन गोमयेनानुलेपयेत् । ॥ १०॥

[[42]शयनाधिवासः]

स्थण्डिलं कल्पयेत्तत्र वेदिकोपरि शालिभिः ।
शयनं कल्पये[43]त्तत्र [44]ह्यण्डजाद्यैरनुक्रमात् ॥११॥
दर्भमालाभिरावेष्टच पुष्प[45]मालां [46]प्रलम्बयेत् ।
मुक्ता[47]दामवितानैश्च फलपल्लवशोभितम् ॥१२॥
जलाल्लिङ्गं समुद्धृत्य मण्डपं [48]संप्रवेशयेत् ।
पुनः [49]प्रक्षाल्य तल्लिङ्गं [50]नववस्त्रेण वेष्टयेत् ॥१३॥
[51]शयने शाययेल्लिङ्गं प्राक्शिरश्चोर्ध्ववक्त्रकम् ।
कुशैर्वस्त्रैः समाच्छाद्य नववस्त्रेण वेष्टयेत् ॥१४॥

[[52]कुम्भस्थापनं तत्पूजा च]

मध्यादीशानपर्यन्तं नवकुम्भांश्च[53] विन्यसेत् ।
[54]नवमूर्तीः समावाह्य गन्धादिभिरथार्चयेत् ॥१५॥

नवहस्ताष्टहस्तं वा सप्तहस्तमथापि वा ॥
षोडशस्तम्भसंयुक्तं चतुर्द्वारसमन्वितम् ।
ध्वजतोरणसंयुक्तमाम्रपल्लवशोभितम् ॥
मण्टपस्य तु तन्मध्ये वेदिं कुर्याद्द्विहस्तकाम् ।
तालमात्रसमुत्सेधां दर्पणोदरसंनिभाम् ॥
परितः कल्पयेत्कुण्डं चतुर्दिक्ष्वीशदेशतः ।
प्राग्देशे कल्पयेत्कुण्डमेकहोमे विशेषतः ॥
चतुरश्रं धनुर्वृत्तं त्रिकोणं पद्ममेव च ।
पिण्डिकाकृति यद्वाथ कुण्डानि परिकल्पयेत् ॥
अग्निकार्यं पुरा कुर्यात्स्थण्डिलं वाथ कारयेत् ।
एवं संस्कृत्य विधिवत्स्थापनं हि समारभेत् ॥'
(दीप्ते ७१.१५ उ०–२२ पू०)

[39] ०संयुतम्––आ. ओ.

[40] ०संनिभम्––आ, ओ.

[41] नवकुम्भानि––उ; नवकुण्डकल्पनविषये १६. २१–२३ श्लोका द्रष्टव्याः ।

[42] 'जलादुत्तीर्य देवेशं स्नापयेत्पञ्चगव्यकैः ।
पूजयित्वा यथा मन्त्री गन्धपुष्पादिभिः क्रमात् ॥
शयनं कल्पयेद् धीमानण्डजाद्यैरनुक्रमात् ।
वामादिशक्तयस्तत्र पूजयित्वा स्वनामतः ॥
शयनोपरि न्यसेल्लिङ्गं प्राक्शिरस्कमधोमुखम् ।
पूजयित्वा यथा मन्त्री रक्तवस्त्रेण वेष्टयेत् ॥'
(दीप्ते ७१.२४ उ०–२७ पू०)

[43] ०त्तत्रारण्ड०––उ.

[44] अण्डजाद्यै०––अ, इ, ओ.

[45] ०मालाप्रलम्बितम्––अ; ०मालावतंसितम्––ओ.

[46] प्रलम्बितम्––इ.

[47] ०दामैर्विता०––इ, उ, ओ.

[48] चतुरश्रकम्––ओ.

[49] प्रक्षालयेल्लिङ्गं––ओ.

[50] 'आ, ई' मातृकयोः १३ चतुर्थपादः १४ प्रथमपादश्च न स्तः ।

[51] 'इ, ओ' मातृकयोः १४ श्लोको न दृश्यते ।

[52] 'ऐशान्यां स्थापयेन्मन्त्री शिवकुम्भं च वर्धनीम् ।
अभितः कलशानष्टौ ससूत्रान्सापिधानकान् ॥
सवस्त्रान्वारिसंपूर्णान्सकूर्चान्सहिरण्यकान् ।
विद्येश्वरसमायुक्तान्पल्लवैरुपशोभितान् ॥
स्थापयित्वा यथान्यायं पूजयेत्स्वस्वनामभिः ।

[[55]होमः]

समिद्घृत[56]चरुक्षीरयववेणुप्रियङ्गवः[57] ।
लाजसर्षपमाषाश्च [58]तिला मधुगुलाः स्मृताः ॥१६॥
[59]अग्न्याधानादिकं [60]सर्वमाज्यभागान्तमाचरेत् ।
[61]स्वैः [62]स्वैश्च मूर्तिभिर्मन्त्रैः [63]समिदाहुतिमाचरेत् ॥१७॥
[64]आवो [65]राजेति मन्त्रेण घृतं हुत्वा ततः परम् ।
[66]पञ्चाङ्गैश्च षडङ्गैश्च [67]ह्यन्नादीञ्जुहुयात्क्रमात् ॥१८॥
अष्टाविंशतिमेकैकं[68] हुत्वाङ्गेषु कुशैः स्पृशेत् ।
[69]पुनराहुतिराज्येन प्रत्येकं [70]चाष्टविंशतिः ॥१९॥

नैवेद्यं दापयेद्धीमान्हृदयेन तु मन्त्रतः ॥
मुकुलीं पद्ममुद्रां च शूलमुद्रां प्रदर्शयेत् ।
नन्द्यादिपशुपत्यन्तं द्वारकुम्भेषु योजयेत् ॥'
(**दीप्ते** ७१.२७ उ०–३१ पू०)

[53] ०कुम्भानि––अ, इ, ई; ०कुम्भं तु––ओ.

[54] नवमूर्ति––अ, आ, इ, उ, ओ.

[55] 'ततो होमं प्रकुर्वीत शास्त्रदृष्टेन कर्मणा ।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ॥
खादिरौदुम्बराश्वत्थवटपालाशमेव च ।
पलाशं स्यात्तथैकाग्नौ शतमर्धं तदर्धकम् ॥
समिदाज्यचरूँल्लाजान्सर्षपांश्च यवांस्तिलान् ।
होमयेद्विधिना धीमान्द्रव्याणि च विशेषतः ॥
समिधो जुहुयाद्दिक्षु सद्यादीशानमन्त्रकैः ।
आज्यादि तिलपर्यन्तं हुत्वा वै हृदयादिभिः ॥
द्रव्यान्ते व्याहृतिं हुत्वा स्पृष्ट्वा लिङ्गं हृदा बुधः ।
दशबीजैर्वर्णमन्त्रैः पिण्डिमन्त्रैश्च होमयेत् ॥
स्रुचा चतुर्गृहीतेन हृदा पूर्णाहुतिं ददेत् ।
द्रव्यैरेतैस्तथा मन्त्रैरेकाग्रो जुहुयात्क्रमात् ॥
पालाशी च समित्प्रोक्ता शतमर्धार्धमेव वा ।
एवं जागरणं रात्रौ'
(**दीप्ते** ७१.३१ उ०–३८ पू०)

[56] ०कुशक्षीरं०––अ; ०चरुक्षीरं–ओ.

[57] ०प्रियङ्गवाः––ओ.

[58] तिलं मधुगुलं स्मृतम्––आ, ई; तिलपुष्पगुल-स्मृताः––ओ.

[59] 'ओ' मातृकायामिदमर्धं न दृश्यते ।

[60] कृत्वा ह्याज्य०––ई.

[61] स्वस्वैस्त्रि०––उ.; १७उ०–२० श्लोकानां-स्थाने 'ओ' मातृकायामधस्तनाः श्लोका दृश्यन्ते ––'सद्येन समिधं हुत्वा त्र्यम्बकेन घृतं हुनेत् ।
आवो राजानमध्वान्तं सर्वे रुद्रं पयं हुनेत् ॥
यवाश्च विश्वभूतेन कद्रुद्रायेति वैणवम् ।
हिरण्यवर्णां प्रियं हुत्वा अग्निमीलेति लाजकम् ॥
सर्षपं च इषे त्वेति अग्न आयाहि माषकम् ।
शन्नो देव्या तिलं हुत्वा मानस्तोके हुनेन्मधु ॥
गुलमीशान रुद्रेति प्रत्येकं चाष्टविंशति ।
प्रतिद्रव्यं कुशैःस्पृष्ट्वा वह्नि लिङ्गं स्पृशेत्पुनः ॥
अग्रमग्रेण संस्पृश्य मध्यं मध्येन संस्पृशेत् ।
मूलं मूलेन संस्पृश्य स्वमन्त्रैः स्पर्शनाद्बुधैः ॥
द्रव्यशेषसमायुक्तं पूर्वाभिमुखसंस्थितम् ।
व्योमव्यापि समुच्चार्य पूर्णाहुतिं हुनेत्क्रमात् ॥
सर्वाङ्गं कुशया स्पृश्य शयनाल्लिङ्गमुद्धरेत् ।'

[62] स्वैस्त्रिमूर्तिभि०––अ, आ, इ, ई; १७.२८ तृतीयपादमनुसृत्यात्र पाठः शोधितः ।

[63] समिधाहुति०––इ.

[64] **ऋग्वेदे** ४.३.१; **तै० संहिता** १.३.१४.२; **सामवेदे** ६९; आपो राजेति––उ.

[65] राजानमन्त्रेण––ई.

[66] पञ्चाङ्गषडङ्गविवरणं ९.२२; ११.२२ श्लोकयोर्द्रष्टव्यम् ।

[67] अन्नादीन्––अ, उ; अग्न्यादीन्––इ.

[68] ०तिरेकैकं––अ, आ, इ, उ; ०तिरेकेकं––ई.

[69] अत्र 'होतव्या' इत्यध्याहृत्य व्याख्येयम् ।

[70] 'अष्टविंशतिः' इति ह्रस्वघटितपाठो वृत्तार्थ इति भाति ।

[71]शयनाल्लिङ्गमुद्धृत्य गन्धादिभिरथार्चयेत् ।
पूर्णाहुतिं हृदा हुत्वा सर्वाङ्गं [72]च कुशैः स्पृशेत् ॥२०॥

[[73]लिङ्गस्थापनम् कुम्भतोयाभिषेकश्च]

[74]प्रासादं [75]वेशयेल्लिङ्गं पुण्याहं वाचयेत्ततः ।
मूर्तिन्यासं ततः [76]कुर्यात्सेचयेत्स्थापितोदकैः ॥२१॥
गन्धादिभिरथाभ्यर्च्य [77]स्विष्टान्तं होममाचरेत् ।
आचार्यं पूजयेत्तत्र होमकान्परिचारकान् ॥
पायसेन हविर्दद्याद्ब्राह्मणान्भोजयेत्ततः ॥२२॥

[78]इति [79]श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे रत्नलिङ्गप्रतिष्ठा[80]विधिर्नाम[81]
विंशः पटलः[82] ॥

---

[71] शयनाद्बिम्बमु०—ई.

[72] कुशया स्पृ०—अ, आ, इ.

[73] 'प्रभाते स्थापनं भवेत् ।
आचार्यो मूर्तिपैः सार्धं स्नानं कृत्वा यथाविधि ॥
निद्राकुम्भानि संपूज्य सलिङ्गं देशिकोत्तमः ।
उपाहुतिं तथा कुर्यात्पञ्चविंशतिसंख्यया ॥
घृतमिक्षेति मन्त्रेण घृतं हुत्वा विशेषतः ।
सद्यादीशानपर्यन्तं चर्वादीनि हुनेत्क्रमात् ॥
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ।
दक्षिणां दापयेद्विद्वान्यथावित्तानुसारतः ॥
स्नानवेद्यां न्यसेल्लिङ्गं हृदा मन्त्रं समुच्चरन् ।
कलाङ्गानि न्यसेत्तस्मिन्पूजयित्वा यथाविधि ॥
सुमुहूर्ते सुलग्ने तु मन्त्रन्यासं समाचरेत् ।
उद्धृत्य शिवकुम्भं तु वर्धन्या सह देशिकः ॥
कुम्भाद्बीजं समादाय लिङ्गस्य शिरसि न्यसेत् ।
वर्धन्या वर्धनीबीजं पिण्डिकायां तु विन्यसेत् ॥
अनन्तादिशिखण्डचन्तानष्ट विद्येश्वरान्क्रमात् ।
पूर्वादीशानपर्यन्तं पिण्डिकायां तु विन्यसेत् ॥
पञ्चगव्यैः शिवाद्भिस्तु स्नापयेच्छिवमन्त्रतः ।
शुद्धदेशे समानीय विन्यसेद्विष्टरे बुधः ॥
एकावरणमार्गेण यजेद्गन्धादिभिर्बुधः ।
पायसान्नं हृदा दद्याद्गुलखण्डसमन्वितम् ॥
शिखयाचमनं दद्यान्निर्माल्यं तु विसर्जयेत् ।
ताम्बूलं दापयेत्पश्चाद्धृदयेन तु मन्त्रतः ॥'
(दीप्ते ७१.३८–४८)

[74] प्रसादं—आ; प्रासादे—ओ.

[75] वाशये०—ओ.

[76] कृत्वा सेचयेत्—आ, इ, ई, उ, ओ.

[77] स्विष्टान्ते—ओ.

[78] इति श्रीरौरवोत्तरे—अ; इति रौरवोत्तरे—इ, ओ.

[79] 'आ, ई' मातृकयोः 'श्रीमद्रौरवोत्तरे प्रतिष्ठातन्त्रे' इति न दृश्यते ।

[80] 'आ, ई' मातृकयोः 'विधिः' इति न दृश्यते ।; विधिपटलविंशतिः—ओ.

[81] 'अ, इ, उ' मातृकासु 'नाम' इति न दृश्यते ।

[82] विंशतिः पटलः—अ, इ; विंशतिपटलः—उ; पटलपुष्पिकाया अनन्तरं 'अ' मातृकायां 'श्रीसाम्बशिवार्पणमस्तु । श्रीगुरुभ्यो नमः । रौरवागमं रङ्गवाध्यार् पुत्रन् सुब्बन् स्वहस्तलिखितम् ।' इति दृश्यते ।; 'इ' मातृकायां 'वृषसंवत्सरे कुम्भमासे पूर्वपक्षे शुक्लवासरे शुभयोगशुभकरणयुक्तायां त्रयोदश्यां पुण्यतिथौ शैवसिद्धान्तनिरूपणसत्यज्ञानपादाम्बुजअचञ्जलापयुक्तायां वेदारण्य निवासरान तिल्लैनायकमुनि वेदारण्येश्वरशिवालय रौरवोत्तरम् । शेङ्गमलप्पोर्पादपण्डारगोत्रमान अळकियनयिनापण्डारत्तिन् पुत्रन् चिदम्बरं स्वहस्तलिखितम् । सोमास्कन्दाय नमः । कमलालयनायक्यै नमः । श्रीम(द्गु)रुभ्यो नमः । कनकसभापतये नमः शिवकामसौन्दर्यै नमः । श्रीमहागणपतये नमः । त्रिपुरसुन्दर्यै नमः । हरः ओम् शुभमस्तु ।' इति दृश्यते.

अनुबन्धः

१

रेणुकाप्रतिष्ठाविधिः

[1]ईश्वर उवाच --

[2]अथ वक्ष्ये विशेषेण रेणुकास्थापनं परम्[3]।

[प्रतिष्ठाकालः]

[4]योग्यमासेषु कर्तव्यमागमोक्तविधानतः ॥१॥

[मृत्संग्रहणादि]

मृत्संग्रहणपूर्वं तु अङ्कुरार्पणमेव च।
वास्तु[5]पूजां [6]समारम्य [7]पर्यग्निकरणं कुरु ॥२॥

[रत्नन्यासः]

रत्नन्यासं ततः [8]कुर्यान्नवकोष्ठेषु विन्यसेत्।
कोष्ठ[9]पूजासमायुक्तं [10]वैडूर्यादि [11]क्रमाद् बुधः ॥३॥
[12]स्वर्णं वा रजतं ताम्रं[13] नवशक्तीश्च[14] पूजयेत्।
नैवेद्याद्युपचारैस्तु [15]पायसान्नं बलिं ददेत् ॥४॥

---

[1] ईश्वरौवाच--ख; 'ईश्वर उवाच' इति 'झ' मातृकायां न दृश्यते।
[2] इदमर्धं 'ख, ग, घ, छ, ज, झ'मातृकासु न दृश्यते।
[3] प्रथमश्लोकस्य पूर्वार्धानन्तरं 'औ, क, ख, ग, घ, छ, ज, झ' मातृकासु --
'रेणुकास्थापनं वक्ष्ये शृणुष्व कमलासन।
सर्वमासेषु कर्तव्यं वारपक्षदिनं विना ॥'
इत्यधिकं दृश्यते।
[4] प्रथमश्लोकस्योत्तरार्धं द्वितीयश्लोकश्च 'ख, ग, घ, छ, झ' मातृकासु न दृश्येते।; प्रथमश्लोकस्योत्तरार्धं द्वितीयश्लोकस्य पूर्वार्धं च 'ज' मातृकायां न दृश्यते।
[5] ०पूजाः०--ज.
[6] संपूज्य--औ, क.
[7] अङ्कुरार्पणपूर्वकम्--ज.
[8] कृत्वा नव०--औ, क, ख, ग, घ, छ, झ.
[9] ०पूजां०--ख.
[10] वैदूर्यादि--औ, छ, ज.
[11] ०क्रमं--ख, घ.
[12] सौवर्णं रजतं--क; सुवर्णरजतं--छ; सुवर्णं रजतं--झ.
[13] स्वर्णरजतताम्रं च--ख. ग. घ.
[14] ०शक्त्यादि--औ, क, ख, घ, छ, ज, झ; शक्ति च--ग.
[15] पायसादिबलिं--ख, ग, छ, झ; पायसं च बलिं --ज.

[नयनोन्मीलनं, प्रतिमाशुद्धिश्च]

नयनोन्मीलनं [१६]कृत्वा पुण्याहं वाचयेद्[१७] गुरुः[१८] ।
[१९]कांस्य[२०]ताम्रादिपात्रेषु[२१] [२२]घृतं क्षौद्रं न्यसेत्क्रमात् ॥५॥
हेम[२३]सूचीहेम[२४]दूर्वा[२५]टङ्कमुद्गायुधानि च ।
कलश[२६]स्थापनं कृत्वा पूर्वोक्तविधिना सह ॥६॥
[२७]प्रच्छन्न[२८]पट[२९]मावर्ज्य [३०]कन्यादर्शनमेव च ।
दर्पणं दर्शनं [३१]कृत्वा [३२]धान्यदर्शनमेव च ॥७॥
[३३]गोब्राह्मण[३४]जनांश्चापि [३५]दर्शयेद्धोमकर्मणि ।
नेत्रमन्त्रं समुच्चार्य शतमष्टोत्तरं हुनेत्[३६] ॥८॥
अग्निबीजं समुच्चार्य[३७] [३८]सूर्यसोमाभिमन्त्रयेत् ।
[३९]प्रतिमां [४०]शुद्धतोयेन पञ्च[४१]गव्यैश्च सेचयेत् ॥९॥
[४२]कषाय[४३]फल[४४]पुष्पैश्च [४५]रत्नस्वर्णोदकैः क्रमात् ।
गन्धतोयाभिषेकेन शुद्ध[४६]कुम्भाभिषेचनम्[४७] ॥१०॥

[१६] कृत्वा—कारयित्वा, अन्तर्भावितणिजर्थे शिल्पिना कारयित्वेत्यर्थः ।; कुर्यात्—छ.

[१७] 'ज' मातृकायां 'नयनोन्मीलनं' इत्यारभ्य 'वाचयेद्' इत्यन्तं न दृश्यते ।

[१८] ततः—झ.

[१९] कांस०—ग; कौस०—ज.

[२०] ०पात्रादि—औ, झ.

[२१] ०पात्रेण—औ, क, ख, ग, घ, छ, ज, झ.

[२२] घृतक्षौद्रं—औ, क, ख, घ, छ, झ; घृतसद्यं—ज.

[२३] ०सूचि०—औ, क, ख, छ, ज, झ.

[२४] ०दारु०—ख, ग, घ, छ, ज.

[२५] कोट्टलाय च निर्म च—ख, घ, ज; कोट्टलाय च निर्म्य च—ग; कोट्टलायुथ निर्म च—छ; कोट्टलाय च निर्मचा—झ.

[२६] ०स्थानं कृत्वा—औ; ०स्नपनं—झ.

[२७] प्रच्छिन्न०—क; प्रश्चिन्न०—ख; प्रश्चिने—छ.

[२८] ०दामां विसृज्याथ—ज.

[२९] ०मारभ्य—औ, ख, ग, घ, छ.

[३०] दृग्दर्शन०—औ, क; दत्त्वा दर्शन०—ख, ग, घ; दिग्दर्शन०—छ; कन्त्रुदर्शन०—झ.

[३१] कृत्वा=कारयित्वा अन्तर्भावितणिजर्थे । दर्शयित्वेत्यर्थः ।

[३२] कन्या०—औ, क, छ, ज, झ.

[३३] गवां कन्यां जनानां च—ख; गो वा कन्या जनानां च—ग, छ; गवां कन्या जनानां च—घ; गोविप्रजनानां च—ज; सवत्सां गां जनानां च—झ.

[३४] ०जनानां च—औ, क.

[३५] दर्शयेत्सोम०—ज.

[३६] हुत्वा—छ.

[३७] अक्षरं मन्त्रसंयुक्तं—औ, क, ख, ग, घ, झ; अक्षरं मन्त्रसंयुतम्—छ; समुन्चार्य—ज.

[३८] सोमसूर्याग्नि—ग; सूर्यसोमाग्नि—ख, घ, झ; सोमसूर्याभि—ज; सूर्यसोमौ+अभि=सूर्यसोमा अभि; ततः संधिरार्षः ।

[३९] प्रतिमा—ग, छ.

[४०] शुद्धितोयेन—औ, क, ग; शुभ्यते येना—छ; शुद्धिते यग्न—ज.

[४१] ०गव्याभिषेचयेत्—औ, क, ख, ग, घ, छ, ज, झ.

[४२] काषाय०—क, ख, ग, घ, झ; काषायं—छ.

[४३] ०कल०—ज.

[४४] ०पुष्पं च—औ, क, ख, ग, घ, छ, ज.

[४५] रत्नस्वर्णोदकं कुशैः—औ, छ; रत्नस्वर्णोदकाङ्कुरैः—क; रसोदकादिसंयुतैः—ख, ग, घ; स्वर्णरत्नोदकं कुशैः—ज; रत्नस्वर्णोदकं—झ.

[४६] ०तोयाभि०—ज.

[४७] ०षेचयेत्—औ, क, ख, ग, घ, छ, ज, झ.

[प्रतिमाया जलाधिवासः यागशालानयनं च]

स्फटिकं दर्पणं चैव [48]घटतोये निधापयेत् ।
[49]सुधाचित्रादि[50]बेरेषु [51]प्रासादेष्वथ कल्पयेत् ॥११॥
[52]दारुलोहजबेरेषु[53] ग्रामप्रदक्षिणं कुरु ।
[54]आपो वा इति मन्त्रेण [55]जपन्नवभृथं कुरु ॥१२॥
[56]जलाधिवासनं कृत्वा [57]एकरात्रं विशेषतः ।
अथवा एकयामं वा [58]जले [59]वासं तु कारयेत् ॥१३॥
उद्धृत्य याग[60]शालां च [61]प्रविशेत्स्नानमाचरेत् ।

[मण्डपकल्पनम्]

षोडशस्तम्भसंयुक्तं [62]मध्यवेदिं तु मण्डपम् ॥१४॥
चतुर्द्वारसमायुक्तं चतुस्तोरण[63]भूषितम् ।
[64]वृत्तां वा [65]चतुरश्रां वा मध्ये [66]वेदिं प्रकल्पयेत्[67] ॥१५॥

[वर्धनीस्थापनम्]

[68]द्वारशक्त्यादि[69]वर्धनीर्मूर्तिशक्त्यादि[70]पूज्यकाः ।

---

[48] घटतोयेन धापयेत्—औ, झ; घटतोयेन दापयेत्—क, ख; घटतोयेऽग्नि दापयेत्—ज.

[49] तयो चित्रया बैरैस्तु—छ; सुधाचित्राय बैरैस्तु—घ.

[50] ०बेरं तु—औ, ग, ज, झ; ०बेरैस्तु—क, ख.

[51] प्रासादरथ—औ, घ, छ, झ; सुप्रसादादि—क; प्रासादरध—ख; प्रासादरस—ग; प्रासादाधार—ज.

[52] दारुशिलालोहजं—ज.

[53] ०बेरैस्तु—औ, क, ख, ग, घ, छ, झ; ०वेरैस्तु—ज.

[54] इदमर्धं 'औ, क, छ' मातृकासु न दृश्यते ।; **तै० आरण्यके** १०.२९.

[55] जपेदवभृतं—ख, ग, घ, झ; जपन्नवभुतं—ज.

[56] 'ख, घ, छ' मातृकासु '१३' श्लोको न दृश्यते ।

[57] एकरात्रौ—औ, क, ज, झ.

[58] जलाधिवासयेत्कुरु—ग; जलाधिवासनं भवेत्—ज.

[59] वासस्तु—क.

[60] ०शालायां—छ, ज.

[61] प्रविशेस्थान०—औ; प्रवेशस्थान०—क; प्रविशेत्स्थान०—छ; प्रवेशे स्थापनं चरेत्—ज; प्रविशेत्स्नपन०—झ.

[62] मध्ये वेदीं प्रकल्पयेत्—औ, छ; मध्ये वेदिं प्रकल्पयेत्—औ, ज; मध्ये वेदीं तु वृत्तकम्—ख; मध्ये वेदिं तु वृत्तकम्—ग, घ; मध्यवेदी प्रकल्पयेत्—झ; मध्ये वेदिः यस्मिन् सः तं; मण्डपस्य विशेषणम् ।

[63] ०संयुतम्—ख, ग, घ.

[64] इदमर्धं '१४' श्लोकानन्तरं 'ख, ग, घ' मातृकास्वेव दृश्यते ।; वृत्तं—ख, ग, घ.

[65] चतुरश्रं—ख, ग, घ.

[66] वेदीं—ख.

[67] '१५' श्लोकानन्तरं 'झ' मातृकायां 'योन्याकाराणि कुण्डानि प्रागादिषु प्रकल्पयेत् । ऐशान्यां पुण्डरीकं तु वृत्तं वापि प्रकल्पयेत् ॥ योन्याकाराणि कुण्डानि सर्वं वापि प्रकल्पयेत् ।' इत्यधिकं दृश्यते ।

[68] द्वारशक्त्या निबन्धः स्यान्मन्त्रशक्त्यादि—क.

[69] ०वर्धन्या मन्त्रशक्त्यादि—औ, छ, ज; ०वर्धन्यामिन्द्रशक्त्यादि—ख, ग, घ; वधान्यां मळन्

अष्टशक्तिसमायुक्ता वेदिकोपरि विन्यसेत् ॥१६॥
[७१]तीव्रादिशक्तिपूज्याश्च[७२] रेणुकामध्यवर्धनीम्[७३] ।

[शयनाधिवासः]

[७४]शय्यालंकारसंयुक्ता[७५] चर्मवस्त्रैश्च[७६] कम्बलैः[७७] ॥१७॥
[७८]यवतण्डुलदर्भैश्च अष्टद्रोणैश्च [७९]शालिभिः ।
तदूर्ध्वे [८०]शाययेद्देवीं प्राक्शिरश्चोर्ध्ववक्त्रकम्[८१] ॥१८॥
[८२]वर्धनीं [८३]रेणुकां [८४]पूज्य वस्त्रहेमादिरत्नकैः ।
नालिकेर[८५]शिरःकेशमाम्रपत्रं च कूर्चकम्[८६] ॥१९॥
आवाह्य [८७]रेणुकां पूज्य [८८]मूर्तिशक्तीश्च पूजयेत् ।

[ध्यानम्]

[८९]रक्तवर्णां त्रिणयनां [९०]करण्डमकुटान्विताम्[९१] ॥२०॥

शक्त्यादि—झ.

[७०] पूजयेत्—औ, क, ख, ग, घ, छ, ज, झ; मूर्तिशक्त्यादयः पूज्याः यासु ताः; बहुव्रीहिसमासः, वर्धनीरित्यस्य विशेषणम् ।

[७१] इदमर्धं 'झ' मातृकायां न दृश्यते ।; निवृत्त्यादि—छ.

[७२] ०पूजां च—औ, क, ख, ग, घ, छ, ज, झ; तीव्रादिशक्तयः पूज्याः यासु ताः, वर्धनीविशेषणम् ।

[७३] वर्धनी—औ, झ; वर्धिनी—क; रेणुकाधिष्ठिता मध्यवर्धनी रेणुकामध्यवर्धनी मध्यमपदलोपिसमासः ।

[७४] शयनालंकारसंयुक्तं—औ, क, ख, ग, घ, छ, ज, झ.

[७५] अत्र 'कर्तव्या' इत्यध्याहृत्य व्याख्येयम् ।

[७६] चर्ममस्त्रैश्च—छ; चर्मवस्त्राद्य०—ज.

[७७] कम्बलम्—ख, ग, घ, छ; '१७' श्लोकानन्तरं 'झ' मातृकायाम्: —
'अलाभे रक्तवस्तं वा पञ्चधा शयनं क्रमात् ।
वेद्युर्ध्वे स्थण्डिलं कृत्वा अष्टद्रोणैश्च श लिभिः ॥
शाल्यर्धतण्डुलैश्चैव तण्डुलार्धतिलैरपि ।
तिलार्धं लाजमित्युक्तं सप्तधान्यं शिवं शिवम् ॥'
इति श्लोकद्वयमधिकं दृश्यते ।

[७८] इदमर्धं 'झ' मातृकायां न दृश्यते ।

[७९] शालिना—औ, क.

[८०] प्राक् शरोदूर्ध्ववक्त्रेण शाययेद्बुधः—औ; प्राक्शिरादूर्ध्ववक्त्रेण शाययेत्. . . क; प्राक् शिरोदूर्ध्वाविक्त्रेण शाययेद्बुधः—ख; . . . शिरोदूर्ध्वाविक्त्रेण शाययेद्बुधः—ग; प्राक्शिरा ऊर्ध्ववक्त्रेण शाययेद्बुधः—घ; प्राक् शिरोदूर्ध्वे वक्त्रेण शाययेद्बुधः—छ; प्राक् शिरोदूर्ध्वे वक्त्रेण शाययेत्क्रमात्—झ.

[८१] ०वक्त्रगाम्—ज.

[८२] वर्धनी—औ, क, ख, ग, घ, छ.

[८३] रेणुकापूजा—औ, क, ख, ग, घ, छ; रेणुकामित्यस्य लक्षणया 'रेणुकाधिष्ठिताम्' इति व्याख्येयम् ।

[८४] पूज्यां—झ.

[८५] शिरोकेश आम्रपत्रं—औ; शिरोकेशा आम्र—क; शिरः केशं क्रमुपत्रं—ग; शिरं केशमाम्र०—छ; शिरं केशदाम्र०—ज.

[८६] विन्यस्येति शेषः ।

[८७] रेणुं संपूज्य—औ, क; रेणु संपूज्य—ख, ग, घ; रेणु संपूजा—छ; रेणुकां मन्त्रैः—झ.

[८८] मूर्तिशक्त्यै प्रपूजयेत्—औ, क, ख, ग, घ; मुक्तिशक्त्यै प्रपूजयेत्—छ; भूतिशक्त्यै प्रपूजयेत्—ज; मूर्तिशक्ति च— झ.

[८९] रक्तवर्णं त्रिनयनं—ख, घ; रक्तवर्णं त्रिणयनं—ग, छ; रक्तवर्ण त्रिणेत्रं च—झ.

सर्वालंकार[९२]संयुक्तां सर्वाभरण[९३]भूषिताम् ।
शङ्खचक्र[९४]धरां [९५]देवीं [९६]कपालखड्गधारिणीम्[९७] ॥२१॥
[९८]शूलायुधसमायुक्तां [९९]डमरुं[१००] पाशमेव च ।
[१०१]खेटकं च धनुर्बाण[१०२]मभयं वरदान्वितम्[१०३] ॥२२॥
ध्यात्वा देवीं समभ्यर्च्य [१०४]तत्त्वेशीः [१०५]पूजयेत्क्रमात्[१०६] ।

[अष्टमङ्गलपूजा]

[१०७]गजकुम्भौ [१०८]ध्वजदीपौ चामरे शङ्खपद्मके ॥२३॥
[१०९]स्वस्तिकं च समायुक्तमष्टमङ्गलमर्चयेत् ।

[दशायुधपूजा]

[११०]वज्रं शक्तिं च दण्डं च [१११]खड्गं पाशं च तोमरम् ॥२४॥
धनुर्बाणं च खेटं च [११२]चक्रं चेति दशायुधम् ।

[मण्डपालंकारः]

अष्टध्वजसमायुक्तमष्टच्छत्रसमन्वितम् ॥२५॥

---

[९०] करालमकुटा०—ज.
[९१] ०मकुटोज्ज्वलम्—ख, ग, घ; ०मकुटान्वितम्—छ, झ.
[९२] ०संयुक्तं—ख, ग, घ, छ, झ.
[९३] ०भूषितम्—ख, ग, घ, छ, झ.
[९४] ०धरं—ख, ग.
[९५] देविं—ख.
[९६] कपालं खड्ग०—छ.
[९७] ०धारिणम्—ग.
[९८] कपालशुलसंयुक्तं—ख, ग, घ, छ; कपालशुलसंयुक्तां—ज, झ.
[९९] हेमरूपां पाशधारिणीम्—ज.
[१००] 'डमरुं' इत्यस्य स्थाने 'डमरुकं' इति दृश्यते—झ.
[१०१] खड्गखेट धनुः—ख, घ, छ, ज, झ; खड्गखेटकधनु०—ग.
[१०२] ०मभया वर०—औ, क, झ.
[१०३] ०न्विताम्—औ, छ, ज, झ; 'वरदान्वितम्' इत्यनन्तरं 'धरन्तीम्' इत्यध्याहृत्य 'ध्यात्वा' इत्यनेनान्वयः कर्तव्यः ।
[१०४] तत्त्वेशं—औ, ज; तत्त्वेशीं—ख, घ, झ; तत्त्वेशि—ग; तत्तद्देवीं—छ.
[१०५] प्रपूजयेत्—छ.
[१०६] ०येत्कुरु—ख; ०येद्गुरुः—ग, घ, झ; ०येद् गुरुम्—ज; २३ श्लोकस्य पूर्वार्धानन्तरं 'झ' मातृकायाम्—
'मन्त्रं क्लीं . . . रक्तपञ्चमीरेणुकादे . . स्वाहा-क्लीं क्लीं . . .
पञ्चदशाक्षरीमन्त्रं दुर्लभं सर्वजन्तुषु ।
अनेन मन्त्रराजेन होमं कृत्वा विशेषतः ॥'
इत्यधिकं दृश्यते ।
[१०७] 'झ' मातृकायां २३ तमश्लोकोत्तरार्धप्रभृति ४३ श्लोकपूर्वार्धपर्यन्तं न दृश्यते ।; गजे कुम्भे—क; ध्वजे कुम्भे—ज.
[१०८] ध्वजे दीपे—औ, क, ख, ग, घ, छ, ज.
[१०९] स्वस्तिके च—ज.
[११०] वज्रशक्तिश्च—छ.
[१११] खड्गं च पाशतोमरम्—ख, ग, घ.
[११२] अष्टायुध समर्चयेत्—ख, ग, घ, छ; अष्टायुत समर्चयेत्—ज.

[113]पताकाष्टमलंकृत्य महाशासु प्रकल्पयेत् ।
दर्भ[114]माल्याभरणैश्च पुष्प[115]दामैरलंकृतम् ॥२६॥
[116]क्रमुकैर्नालिकेरैश्च लिकुचैः कदलीफलैः ।
नाग[117]वल्लीदलैर्युक्तमिक्षुदण्ड[118]समायुतम् ॥२७॥
सर्वालंकारसंयुक्तं [119]मुक्तादामैरलंकृतम्[120] ।
[121]अङ्कुरार्पण[122]संयुक्तपालिकानव[123]पञ्चकम् ॥२८॥

[मण्डपपूजा]

[124]हेमप्रतिसरं बद्ध्वा उदकुम्भं [125]यजेद्बुधः ।
[126]आचार्यं [127]पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ॥२९॥
[128]द्वारपूजासमायुक्तं गणेशं पूजयेद्गुरुः ।
वास्तुपूजासमायुक्तं पर्यग्निकरणं [129]कुरु ॥३०॥

[द्वारशक्तयः]

[130]जया [131]च विजया चैव [132]योगिनी [133]मोहिनी तथा ।
[134]मलिनी मालिनी चैव [135]भोगिनी [136]भोगवत्यथ ॥३१॥
[137]द्वार[138]शक्तीश्च संपूज्य गन्ध[139]पुष्पाक्षतादिभिः ।

---

[113] पताकमष्टमलं—ग; पादुकाष्टमलं—छ; 'पताकाष्टकम्' इत्यत्र 'पताकाष्टम्' इति वृत्तार्थं प्रयुक्तमिति भाति ।

[114] ०मालाभिरङ्गैश्च—औ, क; ०मालाभिराद्वैश्च—छ; ०मालाभिरा चैव—ज.

[115] ०मालाभिरावृतम्—ज.

[116] 'घ' मातृकायां २७ श्लोकः २८ श्लोकपूर्वार्धं च न दृश्यते।; क्रमुकं नालिकेरं च लिकुचं कदलीफलम्—औ, क, ख, ग, छ, ज.

[117] ०वल्लिदलै०—औ, छ.

[118] ०समन्वितम्—ग.

[119] 'क' मातृकायां २८ श्लोकस्य द्वितीयतृतीयपादौ न दृश्येते ।

[120] 'ज' मातृकायां २८ श्लोकपूर्वार्धानन्तरं २९ श्लोकस्योत्तरार्धं स्थानविपर्ययेण लिखितम् ।

[121] अङ्कुराण्यर्पयित्वा तु पालिका०—ज.

[122] ०संयुक्तं पालिका०—औ, ख, घ; संयुक्तं पालिकं—ग; समायुक्तं पालिका०—छ.

[123] ०पञ्चके—ज.

[124] हेमप्रतिकरं बुध्वा—औ, क; होमं प्रति०—ख, ग; हेमं प्रति०—घ, छ, ज.

[125] जपेद्—औ, क, ख, ग, घ, छ, ज.

[126] २९ उत्तरार्धं ३० पूर्वार्धं च 'ख, ग, घ, ज' मातृकासु परं दृश्येते ।

[127] पूजयेत्पश्चाद्वस्त्र०—ख, ग, घ.

[128] द्वारपूजां—ख.

[129] गुरुम्—छ.

[130] जयाश्च विजयाश्चैव—ग.

[131] 'छ' मातृकायां चकारो न दृश्यते ।

[132] भोगिनी—ख, ग, घ; योगिनां—ज.

[133] मोहिनीस्तथा—ख; मोहिनां तथा—ज.

[134] मालिनी मलिनी—ख, ग, घ; मालिनिर्मालिनी—ज.

[135] भोगि भोगवती तथा—औ, क; भोगी भोगवतिस्तथा—ख, घ; भोगी भोगपतिस्तथा—ज.

[136] भोगवती तथा—ग.

[137] द्वारपूजादिशक्त्यादि संपूज्य गन्धपुष्पकैः—ख, ग, घ.

[138] ०शक्त्यादि सं०—औ, क, छ, ज.

[139] ०पुष्पार्चनादिभिः—औ, क, ज; ०पुष्पाक्षदा-

स्वगुरुं पूजयेत्तत्र वर्धनीं [१४०]ब्राह्मणीं गुरुः ॥३२॥
[१४१]अस्त्रवर्धनीं संपूज्य ईशाने स्थिरपूजनम्[१४२] ।
[१४३]वेद्यां तु रेणुकां पूज्य[१४४] नैवेद्यादि [१४५]समर्पयेत् ॥३३॥
[१४६]अष्टदेव्यः[१४७] समभ्यर्च्या[१४८] एकावरणमर्चयेत् ।

[अष्टकुम्भशक्तयः]

[१४९]तीव्रशक्तिस्तीव्ररूपी[१५०] खड्गिनी निम्बवासिनी ॥३४॥
[१५१]निम्बरूपी च मायी च [१५२]महामायी प्रकोपिनी ।
[१५३]अजकुक्कुटभक्षी च [१५४]अष्टशक्तीः सुपूजयेत् ॥३५॥
[१५५]ताम्बूलधूप[१५६]दीपाद्यैरुपचारैः समर्चयेत् ।

[होमः]

[१५७]योनिं वाथ त्रिकोणं वा वेदि[१५८]पूर्वे प्रकल्पयेत् ॥३६॥
अग्निकार्याणि सर्वाणि अग्निकार्योक्तमाचरेत् ।
होमद्रव्याणि सर्वाणि शतमष्टोत्तरं हुनेत् ॥३७॥
तिलतण्डुलमुद्गं च घृतमाषादि होमयेत् ।

दिभिः—छ.

[१४०] ब्राह्मणं—औ, ज; ब्रह्मणा—क; ब्राह्मणान्—ख, ग, घ; अत्र 'ब्राह्मीं' इति पाठश्चेत् सुष्ठु ।

[१४१] कुम्भास्त्रवर्धनीं स्थाप्य—औ; कुम्भास्त्रवर्धनी स्थाप्या—क; अस्त्रवर्वनि संपूज्य—छ; अस्त्रं च वर्धनीं पूज्य—ज.

[१४२] ०पूजयेत्—ज.

[१४३] 'ज' मातृकायां ३३ श्लोकोत्तरार्धप्रभृति ३७ पूर्वार्धावधि विद्यमानश्लोकानां स्थानेऽधोलिखितरीत्या श्लोकत्रयं दृश्यते —
'वेदिका रेणुकां पूज्य अष्टशक्तिसमावृताम् ।
गन्धपुष्पैः समभ्यर्च्य धूपदीपसमन्वितम् ॥
नैवेद्योपचारैश्च ताम्बूलं च प्रकल्पयेत् ।
चतुरश्रं पद्मकुण्डं च योन्याकारं त्रिकोणकम् ॥
कारयेत्पूर्वदिग्भागे ईशाने वाथ कल्पयेत् ।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ॥'

[१४४] वेदिका रेणुपूजां च—औ, क; वेदिके रेणुकां पूज्य—ख, घ; वेदिके रेणुपूजां च—ग; वेदिको रेणुपूजां च—छ.

[१४५] समर्चयेत्—औ, क, ख, ग, घ, छ.

[१४६] ३४,३५ श्लोकौ 'ख, ग, घ' मातृकासुपरं दृश्येते ।

[१४७] अष्टवेदीं—ख, ग, घ.

[१४८] समभ्यर्च्य—ख, ग, घ.

[१४९] तीव्रशक्ति—ख; तीव्रशक्ती—घ.

[१५०] तीव्ररूपि—ख; 'तीव्ररूपिणी' इति पदं वृत्तार्थं 'तीव्ररूपी' इति प्रयुक्तमिति भाति ।

[१५१] नि . . . पि च—ग; निम्बरूपिणी' इत्येत्पदमत्र वृत्तार्थं 'निम्बरूपी' इति प्रयुक्तमिति भाति ।

[१५२] महामायि—ख; महामारी—ग. अत्र 'प्रकोपिनी' इति 'महामायी' इत्यस्य विशेषणम् ।

[१५३] 'अजकुक्कटभक्षिणी' इति भवितव्यम् । वृत्तार्थमजकुक्कुटभक्षीति प्रयुक्तमिति भाति ।

[१५४] अष्टशक्ति—ख, ग, घ.

[१५५] ताम्बूलं धूपदीपं च उप०—क, छ; ताम्बूलं धूपदीपादि उप०—ख, ग, घ.

[१५६] ०दीपादि पांच उप०—औ.

[१५७] ३६ उत्तरार्धं ३७ पूर्वार्धं च 'ख, ग, घ' मातृकास्वेव दृश्येते ।; एवं वाथ—ग.

[१५८] ०पूर्वे तु कल्प०—ग.

गोधूमैः [159]सर्षपैर्लाजैर्गुलक्षौद्रफलादिभिः ॥३८॥
[160]नालिकेरादि[161]द्रव्यैश्च रेणुमन्त्रेण[162] होमयेत् ।
शतं सहस्रमयुतं [163]होमयेद्देशिकोत्तमः ॥३९॥
[164]स्पर्शाहुतिं च संकल्प्य [165]मूर्तिमूर्तीशपूजनम्[166] ।
प्रायश्चित्तं ततो हुत्वा रेणुगायत्रिमन्त्रतः ॥४०॥

[प्रतिमास्थापनं कुम्भाभिषेकश्च]

[167]उद्धृत्य शयनाद्बिम्बं स्थापनं च समाचरेत् ।
मन्त्रन्यासादिकं कृत्वा निद्राकुम्भं च पूजितम् ॥४१॥
प्रदक्षिणक्रमेणैव गर्भगेहं प्रवेशयेत् ।
सुमुहूर्ते [168]सुनक्षत्रे [169]स्थिरलग्ने तु कारयेत् ॥४२॥
[170]स्थापनं कारयित्वा तु जीवन्यासादिकं क्रमात् ।
[171]षड्विंशतिकलान्यासं [172]मातृकान्यासमेव च[173] ॥४३॥
[174]वर्धन्यास्त्वभिषेको न [175]सुधाचित्रे विशेषतः ।

---

[159] सर्षपैराज्यैर्गुल०—औ, क, ग.
[160] नारिकेलादि०—ग.
[161] ०मूलैश्च—औ, क, छ, ज.
[162] रेणुमन्त्रैस्तु—औ, क; रेणुमन्त्रस्य—ख, ग, घ; रेणुकामन्त्रस्य—छ.
[163] गोमये देशि०—ज.
[164] पुष्पैश्च होमस्पर्शेन —औ, क; पुष्पैश्च स्पर्शनैश्चैव—ख, घ, छ; पुष्पैश्च स्पर्शने चैव—ग.
[165] मूर्तिमूर्ति सुपूजयेत्—ख, घ; मूर्तिमूर्तिनी पूजयेत्—ग; मूर्तिमूर्तिं च पूजयेत्—छ.
[166] ०पूजयेत्—औ, क; ०होमयेत्—ज.
[167] 'औ, क, ख, ग, घ, छ' मातृकासु ४१ श्लोकस्य ४२ श्लोकपूर्वार्धस्य च स्थाने 'उद्धृत्य-स्थापितं कृत्वा मन्त्रन्यासादिकं भवेत् । कुम्भानि पुरतः कृत्वा प्रादक्षिण्यक्रमेण तु ।' इत्येक एव श्लोको दृश्यते। अत्रार्थानुरोधेन 'ज' मातृकापाठस्थः सार्धश्लोकः संघटितः। 'प्रादक्षिण्यक्रमेण तु' इत्यस्य 'क, ख, ग, घ, छ' मातृकासु 'प्रदक्षिणक्रमेण तु' इति पाठो दृश्यते।
[168] सुलग्ने च सुनक्षत्रे स्थिरलग्नके—ज.
[169] स्थिरलग्नं—औ, क, ख, ग, घ.
[170] जीवन्यासादिकं कृत्वा पूर्वोक्तविधिना सह—औ, क, घ, ख, ग, छ.
[171] अष्टत्रिंशत्कला न्यस्त्वा—ख, ग, घ; अष्टत्रिंशत्कलान्यासं—छ, ज, झ.
[172] ०मन्त्रन्यासं तु एव च—झ.
[173] ०न्यासमुच्यते—औ, क; ०न्यासमर्चयेत्—छ.
[174] वर्धनीमभिषेके न—औ, क, ग; वर्धन्यामभिषेचे न—ख, घ; वर्धनीमभिषेकं तु—छ; वर्धनीमभिषे चैव—झ.
[175] सुधाचित्रं—औ, क; स्वधाचित्रं—ख, घ; सुधाचित्र-ग, झ; स्वधाचित्रा—छ; 'ज' मातृकायां ४४ श्लोकप्रभृति ४७ श्लोकान्तं विद्यमानश्लोकचतुष्टयस्य स्थानेऽधोलिखितरीत्या षट्-श्लोका दृश्यन्ते—
'प्राणप्रकृतियोगं तु पूर्वोक्तविधिना सह ।
यागशालां प्रविश्याथ प्रायश्चित्तं च होमयेत् ॥
जयादिरभ्याधानं च राष्ट्रभृच्च क्रमाद्धुनेत् ।
पूर्णाहुतिं ततः कृत्वा यागशेषं व्यपोह्य च ॥
कुम्भानुद्धृत्य शिरसा बाह्ये धामप्रदक्षिणम् ।
गर्भगेहं प्रविश्याथ वर्धनीमभिषेचयेत् ॥
सुधाचित्रविशेषेण स्फाटिके दर्पणे तथा ।
अभिषेकं शनैः कृत्वा घृतवारिसमन्वितम् ॥
पञ्चगव्याभिषेचेन पञ्चामृतं च तत्परम् ।

[176]स्फटिके दर्पणे [177]चैव अभिषेकं तु कारयेत् ॥४४॥
[178]घृतधारासमोपेतं पञ्चगव्याभिषेचनम्[179] ।
[180]अर्चयेद् रेणुकामन्त्रैरावाह्य ध्यानपूर्वकम् ॥४५॥
अर्चयेत्तीव्र[181]शक्त्यादीरष्टदिक्षु सुपूजयेत् ।
[182]नैवेद्यं व्यञ्जनैर्युक्तं प्रभूतहविषं ददेत् ॥४६॥
[183]ताम्बूलं दापयेत् [184]पश्चादुपचारैः प्रपूजयेत् ।
[185]पूर्णाहुति[186]प्रदानेन [187]जयादि[188]यजनं कुरु ॥४७॥
दिग्बलिं कारयेत्तत्र भूतराजस्य पूजनम् ।
[189]बलिदाने विशेषेण अजकुक्कुटमेव च ॥४८॥
[190]आसनं दापयेत्तत्र [191]भूतराजप्रियावहम्[192] ।
आचार्यं [193]पूजयेत्तत्र वस्त्र[194]गोदान[195]भूषणैः[196] ॥४९॥
[197]यागोपकरणं सर्वं देशिकाय प्रदापयेत् ।
[198]शिवशक्तिं च संपूज्य समयाचारपूजनम् ॥५०॥

वस्त्रगन्धादिभिः पूज्य धूपदीपादिसंयुतम् ॥
नैवेद्यं दापयित्वा तु ताम्बूलं च निवेदयेत् ।
छत्रचामरसंयुक्तमुपचारेण प्रपूजयेत् ॥'

176 स्फटिकं दर्पणं चैव—औ, क, ख, ग, घ; स्फटिकं दक्षिणे चैव—छ.

177 चैवाभिषेकं—झ.

178 घृतवारिसमो०—ख, ग, घ, छ, झ.

179 ०षेचयेत्—औ, क, ख, ग, घ, छ, झ.

180 ४५ श्लोकस्योत्तरार्धप्रभृति ४६ श्लोकपर्यन्तं 'ख, ग, घ' मातृकास्वेव दृश्यते ।

181 ०शक्तिं च अष्ट०—ख, ग, घ.

182 नैवेद्यव्यञ्जनै०—ख, ग.

183 'छ' मातृकायां ४७ श्लोकपूर्वार्धं न दृश्यते ।

184 पश्चादुपचाराणि सर्वशः—ख, ग, घ.

185 पश्चात्पञ्चास्त्रमन्त्रेण प्रायाश्चित्तादिकं कुरु —ख, ग, घ.

186 ०प्रदानेनाजेलतियजनं—छ.

187 जपादि०—औ, ख, ग, घ; जयाति०—'झ' मातृकापाठान्तरम् ।

188 ०जननं—झ.

189 'क' मातृकायां ४८ श्लोकस्योत्तरार्धं न दृश्यते ।; 'ज' मातृकायां ४८ श्लोकोत्तरार्धं ४९ श्लोकपूर्वार्धं च न दृश्यते ।

190 अजस्सर्वापयेत्—औ; अबलिं कारयेत्तत्र—क; अजं सर्वप्रयत्नेन—छ; अजं सर्वत्र दातव्यं —झ.

191 मतराज०—छ.

192 ०श्रियावहम्—ख, ग, घ.

193 पूजयेत्पश्चाद्वस्त्रा०—ख, घ; पूजयेत्पश्चाद्वस्त्र०—ग; पूजयित्वातु वस्त्र०—ज.

194 ०भरणभूषणम्—ख, घ; ०गोधनभूषणम्—छ; ०हेमाङ्गुलीयकैः—ज.

195 ०भूषणम्—ग.

196 'औ, क, छ, झ' मातृकासु ४९ श्लोकोत्तरार्धानन्तरम्—
'यजमानाभिषेकेन गन्धदामैः समर्चयेत् ।
अष्टमूर्तिसमायुक्तं गुरुं संतोष्य कारयेत् ॥'
इत्येकः श्लोकोऽधिकतया दृश्यते । एतच्छ्लोकपाठभेदाः—'जपमानाभिषेकेन' इति 'झ' मातृकायां प्रथमपादपाठभेदः । 'गन्धताम्बूलदापयेत्' इति 'छ' मातृकायां द्वितीयपादपाठभेदः । 'गुरुसंतुष्टं कारयेत्' इति 'छ' मातृकायां चतुर्थपादपाठभेदः । एवमेव 'ज' मातृकायामपि ४९ श्लोकोत्तरार्धानन्तरम्—'ऋत्विग्भिः परिवारैश्च मन्त्रजप्तांस्तथैव च' इत्यर्धमेकमधिकं दृश्यते ।

197 इदमर्धं 'ख, ग, घ' मातृकास्वेव दृश्यते ।

198 इदमर्धं 'ज' मातृकायां न दृश्यते ।; शिवं शक्तिं च—क; शिवशक्तिश्च—ख, ग, घ.

[199]दीनान्धकृपणादीनां [200]भूरिदानं विशेषतः ।
[201]पादुके आतपत्रं च [202]दापयेत्तु विशेषतः[203] ॥५१॥

इति [204]रौरवोत्तरे प्रतिष्ठातन्त्रे रेणुकाप्रतिष्ठा[205]विधिः [206]समाप्तः[207]

---

[199] दिनार्धं पणादीनां—क; दीनान्धककृपाणं च —ख, ग, घ; दीनान्त क्वपणादीनं यथेष्टं च प्रदापयेत्—ज.

[200] धूलिदानं—ग; 'छ' मातृकायां ५१ तमश्लोको न दृश्यते ।

[201] पादुका आतपा यत्र—औ; पादुका आतपत्रं च —क; पादुका धूपपात्रं च—ख, घ; पादुका धूतपं यत्र—ग; पादुकायानं च दानं च—ज; पादुका आतपत्रा यत्र—झ.

[202] पालिकादानमेव च—औ, क; चूलिकादान० —ख, घ; पङ्क्तिकादान०—ग; पळ्ळिकादान० —झ.

[203] 'झ' मातृकायां ५१ श्लोकानन्तरम्—
'प्रायश्चित्तं ततः कृत्वा रेणुगायत्रिमन्त्रतः ।
मूर्तिहोमं ततः कृत्वा ब्राह्मणान्भोजयेत्ततः ॥
अष्टोत्तरशतं चैव तदर्धं वा विशेषतः ।
स्नपनं कारयेदन्ते अष्टोत्तरशतं हुनेत् ॥
मोहिनीं पूजयित्वा तु भोजराजं तु पूजयेत् ।'
इति सार्धद्वयश्लोकोऽधिकतया दृश्यते ।

[204] 'छ' मातृकायां 'कारणे प्रतिष्ठातन्त्रे रेणुकाविधिपटलः' इति पटलपुष्पिका दृश्यते ।; 'झ' मातृकायां 'रौरवे रेणुकाख्ये महातन्त्रे रेणुकादेवीप्रतिष्ठाविधिपटलः । हरिः ओं' इति पटलपुष्पिका दृश्यते ।;

[205] ०विधिः पटलः शुभमस्तु—ग; ०विधिपटलः शुभमस्तु—घ.

[206] 'क, ज' मातृकयोः 'समाप्तः' इति नास्ति ।

[207] 'ख' मातृकायां 'पटलः शुभमस्तु । हरिं ओं' इत्यधिकं दृश्यते ।

(२)

रेणुकोत्सवविधिः

अथ वक्ष्ये विशेषेण [1]शृणु त्वं रेणुकोत्सवम्[2]।

[उत्सवफलम्]

रेणुकोत्सव[3]मारब्धं पुत्रपौत्रविवर्धनम् ॥१॥
ग्रामवृद्धिकरं पुण्यं [4]राज्ञो विजयवर्धनम् ।
[5]रोगशान्तिकरं पुण्यं रिपुक्षयकरं भवेत् ॥२॥

[उत्सवत्रैविध्यम्]

सर्वमासेषु कर्तव्यमुत्सवं [6]कारयेद्बुधः ।
वारोत्सवमिदं पुण्यं पक्षोत्सवं तु [7]पौष्टिकम् ॥३॥
मासोत्सवं तु विजयमुत्सवं त्रिविधं कुरु ।
शुक्रवारादि [8]वारं तु [9]पञ्चम्यादि तु [10]पौष्टिकम् ॥४॥
[11]पूर्णेन्दु[12]पौर्णमासान्तं [13]विजयं रेणुकोत्सवम् ।

[अङ्कुरार्पणकालः]

[14]पूर्वरात्रे तु कर्तव्यमङ्कुरार्पणमेव च ॥५॥

[घण्टाताडनम्]

[15]घण्टां च ताडयेत्कृत्वा नानावाद्यसमन्वितम्[16] ।

---

[1] रेणुकोत्सवमुच्यते—औ, क; रेणुकोत्सवमथ शृणु—ख, ग, घ.
[2] 'औ, क' मातृकयोः १ पूर्वार्धानन्तरम् 'यां कृत्वा रेणुकायां तु उत्सवं कुरुते यदा' इत्यर्धमेकमधिकं दृश्यते ।
[3] ०मारभ्य पुत्र०—औ, क, ख, ग, घ.
[4] राजा विजय०—औ, क, ख, ग, घ.
[5] नराणां रोगनाशं च—ख, घ.
[6] विधिमाचरेत्—औ, क.
[7] पौष्णकम्—क.
[8] वाराणि—औ, क, ख, ग, घ.
[9] पञ्चम्यादिषु—औ, क, ख, ग, घ.
[10] पञ्चमी—औ, क, ख, ग, घ.
[11] चूर्णेन्दु०—क; पूर्णे तु—ख, घ.
[12] ०पौर्णमासे तु—औ, क; ०पूर्णमासेषु—ख ग, घ.
[13] विजया—क.
[14] पूर्वरात्रौ—क, ख, ग, घ.
[15] चण्डिका घोषयेत्—ख, ग, घ.
[16] ०समायुतम्—औ, क, ग.

[ध्वजपटः]

पटप्रतिष्ठा [17]कर्तव्या [18]शिल्पिना चित्रकर्मणा[19] ॥६॥
पक्ष[20]हस्तं पटं चैव [21]द्विहस्तपुच्छसंयुतम् ।
शेषं तु त्रिविधं [22]भज्य गजाश्वफणिसंयुतम् ॥७॥
छत्र[23]चामरे पार्श्वे तु [24]खड्गास्त्रं [25]मध्यमे लिखेत् ।
नयनोन्मीलनं कृत्वा जीवन्यासादि[26] होमयेत् ॥८॥

[ध्वजारोहणम्]

सन्धिदेवताह्वानादि[27] [28]खड्गास्त्रादि समर्चयेत् ।
[29]ब्रह्मादीशानपर्यन्तं नृत्तवाद्यादिसंयुतम् ॥९॥
आवाह्य पूजयेत्तत्र बलिं दत्त्वा विशेषतः ।
मुग्दान्नं [30]पायसान्नं च सर्पिपिण्डबलिं ददेत् ॥१०॥
ग्रामप्रदक्षिणं [31]रेणुखड्गभूत[32]पटैः सह ।
नानादीपसमायुक्तं [33]नानाच्छत्रसमन्वितम् ॥११॥
नानावाद्यसमायुक्तं नानानृत्तसमन्वितम् ।
[34]नानाध्वजसमायुक्तं शिवशक्त्यादिसंयुतम् ॥१२॥
[35]प्रविशेद्रेणुका[36]देव्या [37]आलयं तु प्रदक्षिणम् ।
भूतराजस्य पुरतो [38]ध्वजदण्डे प्रतिष्ठिते ॥१३॥

---

[17] कर्तव्यं—औ, क, ख, ग.

[18] शिल्पिनं—औ, क.

[19] ०कर्मणि—औ, क, ख, ग, घ.

[20] ०हस्तपटं—औ, क, ख, ग, घ.

[21] द्विहस्तं पुच्छ०—औ, ग; द्विहस्तं वापि—क.

[22] भज्या—क; भागं—ख, ग, घ.

[23] ०चामरपार्श्वे—औ, क, ख, ग, घ.

[24] खड्गास्त्रमध्यमं—ख; संगास्त्रमध्यमं—घ.

[25] मध्यमं—ग.

[26] अत्र 'च' इत्यध्याहृत्य 'नयनोन्मीलनं जीवन्यासादि च कृत्वा' इत्यन्वयः कर्तव्य इति भाति ।

[27] देवताह्वानशान्तिश्च—औ; देवताह्वानशक्तिश्च—क; देवादि देवताह्वादि—ख, घ; देवतार्हादिशक्तिश्च—ग; अत्रोपरि ५० तमश्लोके 'संधिदेवान्विसृज्याथ' इति दर्शनात्तदनुसृत्य पाठः संघटितः ।; अत्र 'कृत्वा' इति शेषः

[28] खस्थास्त्रादि समर्चयेत्—क; शक्तिश्चास्त्रादि देवतान्—ख, घ.

[29] पृष्ठादीशान०—क; ग्रामादीशान०—ग.

[30] पायसं सर्पिबलिदानादिकं कुरु—औ, क; पायसं सर्पिर्बलिदानादिकं कुरु—ग; अत्र 'नवपिण्डबलिं' इति पाठो युक्त इति भाति २० पूर्वार्धं पश्यत ।

[31] रेणुं खड्गभूत०—औ, क; रेणु अस्त्रभूत०—ख, घ.

[32] ०पटस्सह—ख, घ.

[33] नानाचित्रसम०—ख, ग, घ.

[34] नानागज०—ग.

[35] प्रविशे रेणुका०—ख, घ.

[36] ०मन्त्रं—औ, क, ख, ग, घ.

[37] 'औ, क' मातृकयोः १३ श्लोकस्य द्वितीयतृतीयपादौ न दृश्येते ।

[38] ध्वजदण्डप्रतिष्ठितम्—औ, क; ध्वजदण्डं प्रतिष्ठितम्—ख, ग, घ.

[३९]ध्वजं लक्षणमारभ्य वेदिकोपरि विन्यसेत्।
दशहस्त[४०]प्रमाणे तु हस्तमात्रेण [४१]यष्टिका ॥१४॥
[४२]यष्टिदण्डे [४३]न्यसेच्छिद्रं वलय[४४]मग्रसंयुतम्।
दर्भमालासमायुक्तं [४५]मयूरपत्रवेष्टितम्[४६] ॥१५॥
ध्वजदण्डं [४७]समभ्यर्च्य रेणुमन्त्रेण पूजयेत्।
पट[४८]दीर्घद्वय[४९]रज्जु[५०]घण्टासंयुक्तबन्धनम् ॥१६॥
ध्वज[५१]मारोपये[५२]द्देवीरेणुमन्त्र[५३]जपं कुरु।
[५४]ध्वजदण्डे समावाह्य रेणुकां सप्त[५५]मातृकाः ॥१७॥
[५६]ज्येष्ठां च वीरभद्रं च [५७]विष्णुं परशुरामकम्।
[५८]मातङ्गीमष्ट[५९]लक्ष्मीश्च [६०]इन्द्रादिषु यजेत्क्रमात् ॥१८॥
ध्वजपूजादिकं [६१]कुर्याद् गन्धपुष्पं च धूपकम्।
[६२]दीपं नीराजनं चैव [६३]नैवेद्याद्युपचारकम् ॥१९॥
नव[६४]शक्त्यादिपूजां च [६५]नवपिण्डबलिं ददेत्[६६]।
[६७]ताम्बूलधूपदीपं च भूतराजबलिं ददेत् ॥२०॥

[रक्षाबन्धनम्]

[६८]रेणुमन्दिरमागत्य मूलबेरस्य पूजनम्।
रक्षासूत्रं ततः कृत्वा मन्दिरस्य प्रदक्षिणम् ॥२१॥

---

[३९] 'ध्वजं लक्षणं' इत्यस्य लक्षणया 'ध्वजपटं लक्षणसहितम्' इत्यर्थो व्याख्येय इति भाति।
[४०] ०प्रमाणेन—औ, क, ख, ग, घ.
[४१] इष्टिका—ख.
[४२] यष्टिदण्डं—औ, क, ग; यिष्टिदण्डं—ख, घ.
[४३] न्यसेच्चित्रं—औ, क, ग, घ; न्यसेत्श्चित्रं—ख.
[४४] ०मग्रिमं भवेत्—ग.
[४५] मयूरं पत्रवेष्टयेत्—औ; कुक्कुटमग्रवेष्टयेत्—ख, घ; कुक्कुटं वस्त्रवेष्टयेत्—ग.
[४६] ०वेष्टयेत्—क.
[४७] समारभ्य—क.
[४८] ०दीर्घद्वयं—औ, ख, ग, घ; ०दीपद्वयं—क.
[४९] रज्जुं—क.
[५०] ०पटसंयुक्त०—ख, ग, घ.
[५१] ०मारोहयेद्देवीं—ख, घ.
[५२] ०द्देवीं—ग.
[५३] ०जयं—क.
[५४] 'ग, घ' मातृकयोः १७ उत्तरार्धं १८ श्लोकश्च न दृश्येते।
[५५] ०मातृकाम्—औ, क, ख.
[५६] श्रेष्ठा—क.
[५७] रेणुं—क.
[५८] मादिभिश्चाष्ट०—क.
[५९] ०लक्ष्मीं च—औ, ख.
[६०] इन्द्रादीनां—औ, क, ख.
[६१] कृत्वा—औ, क, ख, ग, घ.
[६२] दीपनीरा०—औ.
[६३] नैवेद्यमुपदंशकम्—औ, क.
[६४] ०शक्त्याद्युपचारं च—घ.
[६५] नवपिण्डे बलिं—औ, क; नवपिण्डं—ग.
[६६] 'ग' मातृकायां २० श्लोकस्य पूर्वार्धानन्तरं—'तीव्रशक्ति तीव्ररूपी खड्गिनी निम्बवासिनी। निम्बरूपी च मायी च महामायी प्रकोपिनी ॥ अजकुक्कुटभक्षी च नवशक्तिबलिं ददेत् ॥' इति सार्धश्लोकोऽधिकतया दृश्यते।
[६७] ताम्बूलं धूप०—ख, ग, घ.
[६८] रेणुमण्डपमागत्य—औ, ख, घ, रेणुमण्डलमागत्य—क; रेणुं मण्डपमागत्य—ग.

[69]रेणुवामकरे [70]चैव रक्षा[71]बन्धनमाचरेत् ।
खड्गास्त्रं [72]धारयेच्चैव भूतराजस्य [73]धारणम् ॥२२॥
[74]आचार्यः सह संधार्य [75]भस्म [76]दत्त्वा तु रक्षके ।
[77]नैवेद्यधूप[78]दीपाद्यैरुपचारैः समन्वितम् ॥२३॥

[अङ्कुरार्पणम्]

[79]यागशालां प्रविश्याथ उत्सवाङ्कुरमेव च ।
तीर्थाङ्कुरं तु कर्तव्यं [80]पालिका[81]नव[82]पञ्चके ॥२४॥

[पालिकादेवताः]

[83]मारी [84]चैव महामारी सर्पकङ्कणधारिणी[85] ।
[86]कपालीमौक्तिके चैव [87]पालिकास्वर्चयेत्क्रमात् ॥२५ ॥
क्षीरेण बीजसंयुक्तं तत्तन्मन्त्रेण निक्षिपेत् ।

[यागशालाशुद्धिः]

वास्तुपूजासमायुक्तं पर्यग्निकरणं कुरु ॥२६॥
शुद्धिपुण्याहमेवोक्तं [88]विक्रान्त्वा चास्त्रवर्धनीम् ।
पञ्चगव्यादि [89]संप्रोक्ष्य [90]भूमिशुद्ध्यन्तमाचरेत् ॥२७॥

[यागशालायामर्चना]

पञ्चाङ्गभूषणैर्युक्तो[91] वस्त्रहेमाङ्गुलीयकैः[92] ।

---

[69] रेणुं वाम०––क, ख, ग, घ.
[70] हस्ते रक्षा०––औ, क, ग.
[71] ०सूत्रं तु दापयेत्––ख, ग, घ.
[72] धारयेत्कृत्वा भूत०––ख, ग, घ.
[73] धारिणं––क; धारिणीं––ग.
[74] 'औ, क' मातृकयोः २३ श्लोकस्य स्थाने–– 'भस्मं दत्त्वादिरक्षार्थं नैवेद्यमुपचारकैः ।' इत्येकमर्धं दृश्यते ।; आचार्यसहितं धार्य––ख, घ.
[75] भस्मं––ग.
[76] दत्त्वादिकं ददेत्––ख, घ; दत्त्वादिरक्षकैः––ग.
[77] नैवेद्यं धूप––ख, ग, घ.
[78] दीपादि उपचारसम०––ख, ग, घ.
[79] यागशाला––ग.
[80] वापिका०––ग.
[81] वेदिपञ्चके––ग, घ.
[82] ०पञ्चकम्––औ, क, ख.
[83] 'औ, क' मातृकयोः २५ श्लोकः २६ पूर्वार्धं च न दृश्येते ।
[84] 'ख, घ' मातृकयोः 'एव' शब्दो न दृश्यते.
[85] ०धारिणम्––ख, घ.
[86] कपालि०––ख, घ; कपाल०––ग.
[87] पालिकामर्चयेत्––ख, घ; पापालिकामर्चयेत्––ग.
[88] अम्बिका तस्य वर्धनीम्––औ; अम्बिका तस्य वर्धनी––क; वक्रान्तस्य च वर्धनीम्–ख, घ; विक्रान्तस्य च वर्धनीम् ––ग.
[89] संप्रक्ष्य––ग.
[90] भूतशुद्ध्यन्तरं यजेत्––औ, क, ग; भूतशुद्ध्यन्त०––ख, घ.
[91] ०युक्तं––औ, क, ख, ग, घ.
[92] ०लीयकम्––औ, क.

उष्णीष[93]मुत्तरीयं च [94]अक्षमालादि धारयन्[95] ॥२८॥
[96]गुरुः [97]संतुष्य [98]संपूज्य [99]रेणुहस्तधरो[100] न्यसेत्।
अङ्गन्यासकला[101]न्यास[102]मन्त्रन्यासादिकं [103]चरेत् ॥२९॥
द्वारशक्त्यादिपूजां च मूर्तिशक्त्यादिपूजनम्[104]।
चलासनं तु संपूज्य वर्धनीभ्रमणं[105] चरेत्[106] ॥३०॥
स्थिरासनं तु संपूज्य तोरणादिषु पूजयेत्।
अष्टमङ्गलपूजां च [107]दशायुधानि पूजयेत् ॥३१॥
अष्टच्छत्रादि संपूज्य अष्टध्वजादि पूजयेत्।
[108]पताकाष्टकं संपूज्य[109] [110]क्षेत्रेशं परशुरामकम् ॥३२॥
वेदिकोपरि विन्यस्य रेणुं संपूज्य बुद्धिमान्[111]।
[112]शक्त्यादिपद्मपर्यन्तं [113]पूजयेत्तु यथाविधि ॥३३॥
कुण्डली [114]कुङ्कुमी चैव कुम्भोद्भवा कुमारिणी।
[115]कुसुम्बी [116]निम्बिनी चैव खड्गिनी कामिनी तथा ॥३४॥
मण्डलत्रयमभ्यर्च्य मण्डलाधिपतिं विना।
रेणुकासनमभ्यर्च्य [117]मूर्तिशक्तीश्च पूजयेत् ॥३५॥

[ध्यानम्]

[118]रक्तवर्णां [119]त्रिणेत्रां च [120]कपालखड्गधारिणीम्[121]।

---

93 ०मुपवीतं—औ, क.
94 बहिर्वासादि—औ, क.
95 धारयेत्—औ, क, ख, ग, घ.
96 गुरुं—औ, क, ख, ग, घ.
97 संतोष्य—औ, क, ख, ग, घ.
98 पूजां च—औ, क, घ, ग, घ.
99 रेणुकास्त्रधरो—औ, क.
100 ०शिरो—ख, ग, घ.
101 ०न्यासं—ख, ग, घ.
102 भूतशुद्ध्यन्तरं कुरु—औ; भूतशुद्ध्यन्तरं गुरु—क.
103 कुरु—ख, ग, घ.
104 पूजयेत्—औ, क, ग.
105 ०करणं—ग.
106 कुरु—औ, क, ख, ग, घ.
107 अष्टायुधादि—औ, क, ग; देशायुधादि—ख, घ.
108 पताकाष्टकसं—औ, क; पताष्टकं सं०—ख, घ.
109 ०पूज्या—क.
110 गणेशं गुरु पूजयेत्—ख, घ; . . .णगं गुरु पूजयेत्—ग.
111 'औ, क' मातृकयोः ३३ पूर्वार्धानन्तरम्—'अष्टशक्त्यादि संपूज्य मूर्तीमूर्तिश्च पूजयेत्।' इत्यर्धमेकमधिकं दृश्यते। तत्र 'मूर्तिमूर्ति च पूजयेत्' इति 'क' मातृकायां द्वितीयपादपाठो दृश्यते।
112 'औ, क' मातृकयोः ३३ उत्तरार्धमारभ्य ३५ श्लोकन्तो भागो न दृश्यते।
113 पूजयेच्च—ग.
114 कुङ्कुमं चैव कुम्भोद्भवकुमारिणि—ख, घ; . . . कृमि चैव कुम्भोद्भवकुमारिणि—ग.
115 कुसुमी—ख, घ.
116 निम्बनी—ख, घ.
117 मूर्ति शक्ति च—ख, ग, घ.
118 रक्तवर्णं—ख, ग, घ.
119 त्रिणेत्रं—ख, ग, घ.
120 कपालं खड्ग०—ग.
121 ०धारिणं—क.

शङ्खचक्रधरां देवीं पाशाङ्कुश[122]धरां शुभाम् ॥३६॥
[123]शूलघण्टासमायुक्तां रेणुं संपूज्य [124]देशिकः[125]।
[126]आवाहनादि संपूज्य [127]षोडशैरुपचारकैः ॥३७॥
अष्टशक्तिषु [128]चैवोक्तमेकावरणमेव हि।
सर्वोपचारसंयुक्तमग्निकार्यमथाचरेत् ॥३८॥

[होमः]

[129]योन्याकारं त्रिकोणं वा [130]अग्निकार्यादि पूर्ववत्।
होमद्रव्याणि सर्वाणि [131]घृतं क्षौद्रं तु होमयेत् ॥३९॥
[132]होमद्रव्याणि सर्वाणि रेणुमूलेन होमयेत्।

[बलिविधिः]

होमान्ते [133]तु बलिं दद्यादन्तर्बलिबहिर्बली[134] ॥४०॥
[135]रेणुयात्रा [136]प्रकर्तव्या कर्तव्यं बलिमाचरेत्।
[137]दिने [138]दिनैकवारं [139]स्याद् यात्रा बलिर्हुनेत्क्रमात्[140] ॥४१॥

[यानक्रमः]

प्रथमं मल्लयन्त्रं च द्वितीयं दीपयन्त्रकम्।
[141]तृतीयं [142]नृत्तयन्त्रं तु चतुर्थं [143]नागपीठकम् ॥४२॥

---

[122] ०धराय च—ख, ग, घ.

[123] शूलखण्डा०—क; शूलं घण्डा०—ख, ग, घ.

[124] देशिकम्—ख.

[125] 'औ, क' मातृकयोः ३७ पूर्वार्धानन्तरम्—'अर्घ्यपाद्यादिनैवेद्यं ताम्बूलं धूपदीपकम्।' इत्येकमर्धमधिकं दृश्यते।

[126] ३७ उत्तरार्धं ३८ श्लोकश्च 'ख, ग, घ' मातृकासु परं दृश्यते।

[127] षोडशं चोपचारकम्—ख, ग, घ.

[128] ०मेवोक्त०—ख, ग, घ.

[129] योन्याकाराणि कुण्डानि—औ, क; योन्याकारत्रि०—ख, ग, घ.

[130] अग्निकार्याणि—क; अग्निकार्येण—ख, ग, घ.

[131] घृतक्षौद्रं—औ, ख, ग, घ.

[132] इदमर्धं 'औ, क' मातृकयोर्न दृश्यते।

[133] पबलिं—क.

[134] ०बहिर्बलिः—क; ०बहिर्बलिम्—ख, ग, घ.

[135] रेणुयन्त्रा—औ; रेणुयानात् प्र०—क; रेणुयन्त्रं प्र०—ख; रेणुयन्त्र प्र०—घ.

[136] प्रकर्तव्य—औ, क, ख, ग, घ.

[137] दिनेकवारं स्यादेकयात्रा बलि हुनेत्—औ; दिनेकवारं स्यादेकयात्राबलिं हुनेत्—क; दिने दिनेकवारं—ख, ग, घ.

[138] दिने + एक = दिन एक; ततः संधिरार्षः।

[139] स्यादेकधात्र बलि हुनेत्—ख; स्यादेकयात्राबलिं हुनेत्—ग, घ.

[140] 'औ' मातृकायां 'क्रमात्' इति नास्ति।

[141] त्रितीयं—ख.

[142] नृत्तयज्ञं—क; नृत्तयात्रा—ख, घ.

[143] नातपीठकम्—क.

पञ्चमं गजवाहं [१४४]च षष्ठं [१४५]च वाजिवाहनम् ।
सप्तमं [१४६]तु त्रिशूलं च डोलारोहण[१४७]मष्टमम् ॥४३॥
[१४८]जटिलं [१४९]यन्त्रयुक्तं च [१५०]रथो वा [१५१]शिबिका .[१५२]भवेत् ।

[तीर्थोत्सवः]

[१५३]साये [१५४]चोत्सव[१५५]मारभ्यं [१५६]प्रातरवभृथं कुरु ॥४४॥
[१५७]चूर्णोत्सवं बलिं तत्र महा[१५८]तीर्थं प्रकल्पयेत् ।
नदीतीरे तटाके वा [१५९]मण्टपं कारयेद्बुधः ॥४५॥
[१६०]रेणोः स्नानं च कर्तव्यं नैवेद्यं धूपदीपकम् ।
उपचाराणि सर्वाणि नृत्तवाद्यसमायुतम् ॥४६॥
[१६१]दर्शनं [१६२]मृगयुद्धस्य प्रविशेदालयं प्रति ।
प्रायश्चित्तार्थहोमं तु [१६३]रेणुखड्गास्त्रमन्त्रवित् ॥४७॥
[१६४]पूर्णाहुतिं[१६५] ततो हुत्वा यागदेवान्विसर्जयेत् ।
[१६६]रेणोः [१६७]कुम्भाभिषेकं [१६८]च नैवेद्यमुपचारकैः ॥४८॥

[आचार्यदक्षिणा]

दशनिष्कधनं दत्त्वा [१६९]गुरुं संतोष्य भूषणैः ।
वस्त्रहेमाङ्गुलीयैश्च दासीगोदानमेव च ॥४९॥

---

[१४४] षष्ठमं वाजि०—ख, घ.
[१४५] वा—ग.
[१४६] च—क, ख, घ.
[१४७] ०मेव च—ख, ग, घ.
[१४८] जटिलः सिंहः ।
[१४९] यन्त्रसप्तश्च—ख, घ.
[१५०] रथे—औ; रटो—क.
[१५१] शिबिकं—ख, ग, घ.
[१५२] वहेत्—औ; यजेत्—क.
[१५३] सायन्त्वोत्सव०—घ.
[१५४] ०त्वोत्सव—ख.
[१५५] ०मारभ्य—औ, क, ख, ग, घ.
[१५६] प्रातर्यवभृतं—औ, ग; प्रातर्यन्त्रविधं—क; प्रातार्याविभृतं—ख; प्रातर्यवभृथं—घ.
[१५७] चूर्णोत्सवबलि—औ, क, घ, ग, घ.
[१५८] ०तीर्थस्य कल्प०—ग.
[१५९] मण्डपं—घ.
[१६०] 'औ, क' मातृकयोः ४६ श्लोकस्य स्थाने 'रेणुं संपूज्य नैवेद्यं नृत्तवाद्यसमायुतम् ।' इत्येकमेवार्धमुपलभ्यते ।; रेणुं स्नानं—ख, घ; रेणुं स्थानं—ग.
[१६१] दर्शन—औ, क.
[१६२] अजयुद्धे स्यात्—क; मृगयुद्धं च प्र०—ख, घ; मृगयुक्तं च प्र०—ग.
[१६३] 'औ, क' मातृकयोः ४७ श्लोकचतुर्थपादो न दृश्यते ।
[१६४] 'औ, क' मातृकयोः ४८ पूर्वार्धस्य स्थाने एक एव पादो दृश्यते । तत्र 'पूर्णाहितिविसर्जनम्' इति 'औ' मातृकापाठः । 'पूर्णा इति विसर्जना' इति 'क' मातृकापाठः ।
[१६५] पुण्याहुतिं—ग.
[१६६] रेणु०—औ, क; रेणुं—ख, ग, घ.
[१६७] कुम्भाभिषेचं—ख, ग, घ.
[१६८] तु—औ, क.
[१६९] गुरून्—ख.

[ध्वजावरोहणम्]

ध्वजावरोहणं कृत्वा नवपिण्डानि [१७०]दापयेत् ।
संधि[१७१]देवान्विसृज्याथ [१७२]मौनबलिं विनिक्षिपेत् ॥५०॥
रेणु[१७३]गेहं प्रविश्याथ भूतराजबलिं ददेत् ।
[१७४]प्राकारस्य तु बाह्ये तु लोकाचारबलिं क्षिपेत् ॥५१॥
शिव[१७५]शक्तिं च [१७६]पूज्याथ [१७७]स्वर्णमुद्रादिपल्लिकम्[१७८] ।
[१७९]वस्त्रहेमाङ्गुली[१८०]निष्कैः [१८१]पङ्क्तिपूजां च कारयेत् ॥
[१८२]दीनान्ध[१८३]कृपणादीनां [१८४]भूरिदानं [१८५]प्रकल्पयेत् ॥५२॥

[१८६]इति रौरवोत्तरे [१८७]प्रतिष्ठातन्त्रे रेणुकोत्सवविधिपटलः ॥

---

[१७०] धापयेत्—औ.

[१७१] देवं वि०—ग.

[१७२] मौनस्य बलिं निक्षिपेत्—औ, क, ख, ग, घ.

[१७३] गेह प्र०—औ.

[१७४] इदमर्धं 'ख, ग, घ' मातृकासु परं दृश्यते ।

[१७५] ०शक्तिश्च—औ.

[१७६] पूजां च—औ; संपूज्य—ख, घ.

[१७७] चूर्णां मुद्रादि पल्लिके—औ; चूर्णमात्रादिपालिके—क; स्वर्णाप्पमुद्रादि पल्लिक—ख; स्वर्णार्पमुद्रादिपल्लिक—घ.

[१७८] ०पल्लिका—ग; पल्लिका—अल्पो ग्रामः; स्वर्णमुद्रादयः पल्लिकाश्च एतेषां समाहारः स्वर्णमुद्रादिपल्लिकं तत् ।

[१७९] भक्तहेमाङ्गुली०—क; व . . . हेमाङ्गुनिष्के च—ख, घ; वस्त्रहेमाङ्गनिष्के च—ग.

[१८०] ०निष्कै भक्तिपूजां—औ.

[१८१] भक्तिपूजां—क.

[१८२] दिनान्धककुपाणां च—ख, घ; दीनान्धककृपाणं च—ग.

[१८३] तुपणादीनां—क.

[१८४] धूलिदानं—ख, ग, घ.

[१८५] प्रपूजयेत्—औ, क.

[१८६] इति रौरवे रेणुकोत्सवपटलः—औ, क; इति रौरवे प्रतिष्ठातन्त्रे रेणुकोत्सवः पटलः—ग.

[१८७] महातन्त्रे—ख, घ.

रेणुकोत्सवप्रायश्चित्तविधिः

प्रायश्चित्तविधिं वक्ष्ये शृणुष्व [1]कमलासन ।

[अङ्कुरार्पणहीने]

अङ्कुरार्पण[2]हीने तु बालानां नाशनं भवेत् ॥१॥
[3]शान्तिमन्त्रं ततः कृत्वा [4]रेणुमन्त्रशतं हुनेत् ।

[दीपयन्त्रविहीने]

[5]दीपयन्त्रविहीने तु दिशाहोमं तु कारयेत् ॥२॥
[6]रेणुमन्त्रं समुच्चार्य शतमष्टोत्तरं हुनेत् ।

[मल्लयन्त्रविहीने]

[7]मल्लयन्त्रविहीने तु [8]तृणाग्निः शूलमेव च ॥३॥
मूर्ति[9]मन्त्रं शतं हुत्वा [10]रेणुमन्त्रशतं हुनेत् ।
शान्तिहोमं ततः कृत्वा [11]रेणुमन्त्रं शतं हुनेत् ॥४॥

[नृत्तयन्त्रविहीने]

[12]नृत्तयन्त्रविहीने तु दिशाहोमं तु कारयेत् ।
[13]रेणुमन्त्रं समुच्चार्य शतमष्टोत्तरं हुनेत् ॥५॥

[नागपीठविहीने]

[14]नागपीठविहीने तु [15]ग्रामनाशस्य [16]संभवः ।

---

[1] कमलासनः—ख, ग.
[2] ०हीनेन—ग.
[3] शक्तिमन्त्रं—औ, क.
[4] रेणुमन्त्रं शतं—औ, क.
[5] दीपयज्ञविहीने—क.
[6] इदमर्धं 'औ, क' मातृकयोर्न दृश्यते ।
[7] कल्पयन्त्र०—क.
[8] नृणाग्नि—औ; नृणाग्निः—क, ख.
[9] ०मन्त्रशतं—ख, ग, घ.
[10] रेणुमन्त्र तु हुनेत्—औ; रेणुमन्त्रं शतं—क.
[11] रेणुमन्त्रशतं—औ, ख, घ.
[12] नृत्तयज्ञविहीने—क.
[13] इदमर्धं 'ख, ग, घ' मातृकासु न दृश्यते ।
[14] नादपीठ०—क.
[15] ग्रामनाशं भवे नरम्—ख, घ; ग्रामनाशं भवेन्नरः—ग.
[16] संभव—औ.

[17]शान्तिहोमं ततः कृत्वा [18]रेणुमन्त्रेण विंशतिः ॥६॥

[गजवाहनहीने]

गजवाहनहीने तु [19]राष्ट्रक्षो[20]भकरो भवेत् ।
[21]भग्ने च पतिते चैव [22]रेणुमन्त्रशतं हुनेत् ॥७॥
अस्त्रमन्त्रं समुच्चार्य शतमष्टोत्तरं हुनेत् ।

[वाजिवाहनहीने]

[23]वाजिवाहनहीने तु नृपवाहननाशनम् ॥८॥
शक्रमन्त्रं समुच्चार्य शतमष्टोत्तरं हुनेत् ।

[मन्त्रशुद्धिविहीने, नरपतने च]

[24]मन्त्रशुद्धिविहीने तु [25]भग्ने तु पतिते [26]नरे ॥९॥
[27]महामार्यः प्रवर्तन्ते विष्णुमन्त्रशतं हुनेत् ।
रेणुगायत्रिमन्त्रेण अष्टोत्तर[28]सहस्रकम् ॥१०॥
[29]नरे भूपतिते चैव गोदानमश्वदानकम् ।

[डोलायन्त्रविहीने]

डोलायन्त्रविहीने तु [30]भग्ने तु पतिते [31]तथा ॥११॥
[32]राजा शक्ति[33]विहीनः स्यान्नृप[34]कन्याविनाशनम् ।

---

[17] शान्तिमन्त्रं ततः––ख, ग, घ.

[18] रेणुमन्त्रस्य––ख, ग, घ; अत्र 'होतव्यम्' इति पदमध्याहृत्य 'रेणुमन्त्रेण विंशतिवारं होतव्यम्' इति व्याख्येयमिति भाति ।

[19] राजक्षोभकरं––ख; राक्षक्षोभकरं––ग; राजक्षोविकरं––घ.

[20] ०करं––औ, क.

[21] गणे च––क.

[22] रेणुमन्त्रं शतं––क.

[23] 'औ, क'मातृकयोः ८ उत्तरार्धं ९ पूर्वार्धं च न दृश्येते ।

[24] मन्त्रहीने विहीने––औ; मन्त्रहीनविहीने––क.

[25] गणे तु––क.

[26] नरः––औ, क, ख, घ.

[27] महामारी प्र०––औ, क, ग, घ; महामारि––ख.

[28] ०सहस्रकैः––औ, क, ख, घ.

[29] 'ग' मातृकायां ११ तमश्लोकस्य पूर्वार्धप्रभृति १२ श्लोकपर्यन्तं न दृश्यते ।; नरोष्ट्रपतिते––औ; नरो भूपतिते––क; नरेष्टपतितेश्चैव––ख; नरेष्टपतिते––घ.

[30] हुने तु––औ; गणे तु––क.

[31] स्त्रियः––ख, घ.

[32] राज्यशक्ति०––औ, क; राजशक्ति०––ख, घ.

[33] विसृज्याथ नृप०––औ, क, ख, घ.

[34] ०कन्यां नाशनम्––औ; कन्या च नाशनम्–– क.

रेणुंगायत्रिमन्त्रेण अष्टोत्तरशतं हुनेत् ॥१२॥
[३५]आज्यमाषतिलैर्हुत्वा दासीगोदानमेव च।

[रथहीने तदङ्गहीने च]

रथहीने तु मरणं [३६]प्राणिनां च भयावहम् ॥१३॥
[३७]रथे तु पतिते चैव राजराष्ट्रं विनश्यति।
[३८]बेरस्याङ्गविहीने तु लोकसस्यविनाशनम् ॥१४॥
[३९]घोटकस्य विहीने तु [४०]मानवस्य विनाशनम्[४१]।
तद्दोषशमनार्थाय शान्तिहोमं तु कारयेत् ॥१५॥
पुण्याहं वाचयेत्तत्र पुनः संधानमाचरेत्।
दशदानादिकं कृत्वा देशिकाय समर्पयेत् ॥१६॥
उष्णीषमुत्तरीयं च वस्त्रहेमाङ्गुलीयकैः।
रेणुगायत्रिमन्त्रेण सहस्रमयुतं हुनेत् ॥१७॥
पुनरुत्सवमारभ्य कर्तव्यं [४२]तद्दिने भवेत्।

[ध्वजपटच्छेदादौ]

ध्वजस्तम्भपटे नष्टे पतिते भग्नदण्डके ॥१८॥
रज्जुच्छेदे [४३]पटच्छेदे पुनः संधानमाचरेत्।
पुण्याहं [४४]वाचयेत्तत्र पदहोमं तु कारयेत् ॥१९॥
पुनरुत्सवमारभ्य [४५]तद्दिने [४६]शेषं होमयेत्।
रेणुगायत्रिमन्त्रेण सहस्रं होमयेद् बुधः ॥२०॥

[द्वारकुम्भविहीने]

[४७]द्वारकुम्भविहीने तु [४८]अङ्गमन्त्रं शतं हुनेत्।

---

[३५] आज्यं माषतिलं—ख, घ; आज्यमाषतिलं—ग.
[३६] नरप्राणिभया०—ख, ग, घ.
[३७] रथेषु पतिते बेरे अङ्गहीने तु दण्डके—औ; रथेषु पतिते बेरे अङ्गहीने तु दग्धके—क; अन्येषां पतिते बेरे अङ्गहीने तु दण्डके—ग.
[३८] १४ श्लोकस्योत्तरार्धं १५ श्लोकस्य पूर्वार्धं च 'औ, क, ग' मातृकासु न दृश्यते।
[३९] कोटकस्य—ख, घ.
[४०] दानवस्य—ख, घ.
[४१] 'क, ख, ग, घ'मातृकासु १५ श्लोकस्य पूर्वार्धानन्तरम्—'नरेषु पतिते भग्ने राजराष्ट्रं विनश्यति' इत्यर्धमेकमधिकं दृश्यते।
[४२] तु दिने—ख, ग, घ.
[४३] पटे छिन्ने पुनः—ख, घ.
[४४] कारयेत्तत्र—ग.
[४५] तद्दिनं—क.
[४६] शेषहोमयेत्—औ, क, ख, ग, घ.
[४७] चारुकुम्भ०—औ.
[४८] अङ्गमन्त्रशतं—औ, क; अङ्कमन्त्रशतं—ख, घ.

[शक्तिकुम्भविहीने]

[49]शक्तिकुम्भविहीने तु शक्ति[50]मन्त्रं शतं हुनेत् ॥२१॥

[अष्टमङ्गलहीने]

अष्टमङ्गलहीने तु रेणुमन्त्रं शतं हुनेत् ।

[दशायुधविहीने]

[51]दशायुधविहीने तु अस्त्रमन्त्रं शतं हुनेत् ॥२२॥

[ध्वजतोरणच्छत्रच्छेदादौ]

ध्वजतोरण[52]च्छत्रेषु [53]चोरच्छेदेऽग्निदग्धके ।
पुण्याहं वाचयेत्तत्र पुनः संधानमाचरेत् ॥२३॥
सूर्यमन्त्रशतं हुत्वा सोममन्त्रशतं हुनेत् ।

[कुम्भपतनादौ]

[54]कुम्भे तु पतिते भग्ने नष्टे [55]दग्धे तु शोषणे ॥२४॥
शान्तिहोमं ततः कृत्वा पुण्याहं [56]वाचयेद् गुरुः ।
पुनः संधानमेवोक्तं [57]रेणुमन्त्रं शतं हुनेत् ॥२५॥

[होमद्रव्यविहीने]

होमद्रव्यविहीने तु सस्यानां नाशनं भवेत् ।
चन्द्रमन्त्रशतं हुत्वा [58]तद्द्रव्यं द्विगुणं भवेत् ॥२६॥
[59]रेणुमन्त्रसहस्रं तु [60]जपेद्धोमसहस्रकम् ।
[61]अन्नाज्ययोर्विहीने तु दुर्भिक्षं जायते भुवि ॥२७॥

---

[49] इदमर्धं 'क' मातृकायां न दृश्यते ।
[50] ०मन्त्रशतं—औ, ख, घ.
[51] अष्टायुध०—ख, ग, घ.
[52] ०चित्रेषु—क.
[53] चोरे छेदेषु दण्डके—औ; चोरछेदेषु दग्धके—क; . . . येऽष्टदण्डके—ग.
[54] कुम्भेषु पतिते—औ, क, ख, ग, घ.
[55] दण्डे तु—औ; दग्धेषु—ख, ग, घ.
[56] वाचयेत्ततः—औ, क.
[57] रेणुमन्त्रशतं—औ, ख, ग, घ.
[58] तद्द्रव्यद्विगुणं—औ.
[59] रेणुमन्त्रं सहस्रं—ख, घ.
[60] जपहोमं०—औ, क, ख, ग, घ.
[61] 'औ, क' मातृकयोः २७ उत्तरार्धं २८ पूर्वार्धं च न दृश्यते ।; अन्नाज्येषु विहीने—ख, ग, घ.

तद्द्रव्यं द्विगुणं दत्त्वा रेणु[६२]गार्यात्र होमयेत् ।

[दर्भमालाविहीने]

दर्भमालाविहीने तु [६३]सूर्यमन्त्रशतं हुनेत् ॥२८॥

[बलिहीने]

बलिहीने महा[६४]व्याधिरस्त्र[६५]मन्त्रशतं हुनेत् ।

[नैवेद्यहीने आज्यादिहीने च]

नैवेद्यहीने दुर्भिक्षमाज्यहीने बलक्षयः[६६] ॥२९॥
[६७]ताम्बूलसस्यहीने तु [६८]दुष्यन्ति पुत्रहीनकाः[६९] ।
विघ्नमन्त्रशतं हुत्वा [७०]तद्द्रव्यं [७१]द्विगुणं भवेत् ॥३०॥

[मन्त्रद्रव्यक्रियादिहीन]

मन्त्रहीने तु मरणं द्रव्यहीने तु निष्फलम् ।
क्रियाहीने महा[७२]व्याधिर्मुद्रा[७३]हीनेऽसुराद्भयम् ॥३१॥
[७४]मन्त्रद्रव्यविहीने तु रेणुमन्त्रशतं हुनेत् ।
मन्त्रद्रव्य[७५]क्रियापूर्णे[७६] भुक्तिमुक्तिफलप्रदम् ॥३२॥
अणिमाद्यष्ट[७७]सिद्धिः स्याद् रेणुलोकं स गच्छति ।
[७८]संकोचेऽज्ञः स [७९]कर्तॄणां [८०]संपूर्णं च फलप्रदम् ॥३३॥
विस्तारतोऽपि फलदः[८१] संपूर्णज्ञो भवेद् गुरुः ।

---

[६२] ०गायत्रि—ख, ग, घ.
[६३] मूलमन्त्र०—औ.
[६४] ०व्याधि अस्त्र०—ख, घ; महामन्त्रं—ग.
[६५] ०मन्त्रं शतं—ख.
[६६] ०क्षयम्—औ, क, ख, ग, घ.
[६७] ताम्बूलं सस्य०—औ, क, ख, ग, घ.
[६८] दुष्टयन्ति—औ; दूष्यन्ति—क; तुष्टन्ति—ख, घ.
[६९] ०हीनकम्—औ, क, ख, घ.
[७०] तदद्रव्यद्वि०—औ.
[७१] त्रिगुणं—ख, घ.
[७२] ०व्याधिमुद्रा०—क, घ.
[७३] ०द्धीने—ग.
[७४] इदमर्धं 'ख, ग, घ' मातृकासु न दृश्यते ।
[७५] ०क्रियाद्धीनां भुक्ति०—ग.
[७६] ०पूर्णां—औ.
[७७] ०सिद्धि स्याद्—औ, ग; ०सिर्द्धि स्याद्—घ.
[७८] संकोशज्ञो—औ, ख, ग, घ; संकोशं त्योकहस्तानां संपू०—क;
[७९] कर्तानां—औ, ख, ग.
[८०] संपूर्णा च—औ, ग; संपूर्णाश्च—ख, घ.
[८१] ०ऽपि फलदो—औ, क; विभलं ज्ञानं—ख; विफलदो—ग; विफलं ज्ञानं—घ.

गुरु[८२]चित्तं तु संतोष्यं भोगमोक्षफलप्रदम् ॥३४॥

इति [८३]रौरवोत्तरे [८४]रेणुकोत्सवप्रायश्चित्तविधिपटलः[८५] ॥

---

[८२] ०चित्तस्य संतोष्य—औ, क; ०चित्तस्य संतोष्यं—ख; ० चित्तस्य संतोषं—घ.

[८३] 'रौरवोत्तरे' इत्यस्य स्थाने 'रौरवे' इति दृश्यते—ग.

[८४] 'औ, क' मातृकयोः 'रेणुकोत्सव' इति नास्ति ।

[८५] एतदन्तरं 'ख' मातृकायां 'श्रीपर्वतवर्धन्यै नमः' इत्यधिकं दृश्यते।; 'ग' मातृकायां 'समाप्तः शुभमस्तु' इत्यधिकं दृश्यते।

चामुण्डाप्रतिष्ठाविधिः

अतः परं प्रवक्ष्यामि चामुण्डास्थापनं परम् ।

[ग्रामादौ चामुण्डास्थापनफलम्]

ग्रामादौ पट्टणे वापि पर्वताग्रे वनेषु च ॥१॥
भूतप्रेतपिशाचाश्च [1]गन्धर्वोरगराक्षसाः ।
तद्ग्रामे तद्भयं घोरं [2]विनश्यति न संशयः ॥२॥
[3]ज्वरमारीप्रवेशे च[4] महा[5]स्फोटविनाशनम् ।
[6]अपस्मार[7]विनाशश्च महा[8]दोषविनाशनम् ॥३॥
चामुण्डास्थापनं चैव ग्रामादिषु विशेषतः ।
नवकोटिमहा[9]शक्तिदेवीनां च [10]प्रियावहम् ॥४॥
तासां मध्ये तु चामुण्डा महा[11]शक्तिर्महोग्रका ।
ग्रामादौ [12]स्थापनेनाथ [13]राजसंस्थानकं शुभम् ॥५॥

[प्रतिष्ठाकालः]

उत्तरायणकाले तु शुक्लपक्षे शुभे दिने ।
सुमुहूर्ते सुलग्ने च देवीमावाह्य पूजयेत् ॥६॥

[यागशाला]

अष्टादशविधानेन मृत्संग्रहणपूर्वकम् ।
यागशालां ततः कृत्वा पूर्वोक्तविधिना [14]सह ॥७॥

---

[1] गन्धर्वमृग०––औ; गन्धर्वा मृग०––क, च.
[2] अत्र 'चामुण्डास्थापनेन' इत्यध्याहृत्य व्याख्येयम् ।
[3] ज्वरमारि०––औ.
[4] ०प्रवेशाश्च––ङ.
[5] ०स्फोटकनाशनम्––औ, क, च.
[6] अभस्मार०––औ, ङ, अपस्मारं––क; अभस्मारं––च.
[7] ०विनाशं च––च.
[8] ०दोषो वि०––ङ.
[9] ०शक्तिर्देवानां––औ, च; ०शक्तिदेवानां–क, ङ.
[10] स्त्रियावहम्––औ, क, ङ, च.
[11] ०शक्तिमहोग्रका––क, ङ, च.
[12] स्थापनं यां यां––औ, च; स्थापनायां यां––क; स्थापयेनाथ––ङ.
[13] राजसं राजधानिके––ङ.
[14] सहा––ङ.

[15]आयाम उर्वीविस्तारं द्विहस्तं [16]वा त्रिहस्तकम् ।
[17]चतुर्हस्तं तथा कार्यं दर्पणोदरसंनिभम् ॥८॥

[कुण्डकल्पनम्]

कुण्डानि परितः कुर्यात्पूर्वादिषु विशेषतः ।
पूर्वादि [18]उत्तरान्तं तु [19]पद्मकुण्डं विशेषतः ॥९॥
ईशाने [20]देविकुण्डं तु योन्याकारेण कल्पयेत् ।

[यागशालासंस्कारः]

गोमयालेपनं कृत्वा पर्यग्निकरणं कुरु ॥१०॥
पुण्याहं वाचयित्वा तु [21]यागं [22]संप्रोक्षयेत्क्रमात् ।

[सप्तविंशतिकुम्भस्थापनम्]

पञ्चैक[23]चतुरस्त्रिभिः पञ्चद्वि[24]चतुरस्त्रिभिः ॥११॥
[25]एतत्संख्यांश्च [26]कुम्भांश्च [27]स्थापयेत्तु [28]विशेषतः ।

[नववर्धनीस्थापनं तत्पूजा च]

[29]वेदिकोपरि [30]संस्थाप्या [31]वर्धन्यो नवधा [32]स्मृताः ॥१२॥
[33]तन्मध्यवर्धनी सैव [34]तस्यां देवीं प्रपूजयेत् ।

---

[15] ८ श्लोकप्रभृति १२ पूर्वार्धान्तं 'ङ' मातृकायां न दृश्यते । आयामैर्वीचिविस्तारं—औ; आयामौर्वी च विस्तारं—क; आयामौर्विचि सिस्तारम्—च.

[16] चात्रिहस्तकम्—च.

[17] चतुर्हस्त यथा—औ, च.

[18] उत्तरातन्तु—औ, च.

[19] पदं कुण्डं—औ.

[20] 'देवीकुण्डम्' इत्यत्र वृत्ताय 'देविकुण्डम्' इति प्रयुक्तमिति भाति ।

[21] यागसंप्रोक्ष०—औ; 'यागम्' इत्यस्य पदस्य लक्षणया यागस्थानमित्यर्थो व्याख्येयः ।

[22] संप्रेक्षयेत्—क.

[23] ०चतुरस्त्रीभिः—औ, च.

[24] ०चतुरस्त्रयः—औ; चतुरं स्त्रियः—क, च.

[25] एते संध्यां च—औ; एतैः संख्यां तु—क; एतत्संध्य तु—च.

[26] कुम्भं—क; कुम्भाश्च—च.

[27] स्थापने तु—औ.

[28] विचक्षणः—क, च.

[29] वैदिकोपरि—क.

[30] संस्थाप्य—औ, क, ङ, च.

[31] वर्धन्यां—औ, क, ङ; वर्धन्या—च.

[32] स्मृतः—ङ.

[33] तन्मध्ये वर्धनी चैव—औ, क, ङ, च.; सैव 'चामुण्डाधिष्ठितैव' इत्यर्थः ।

[34] तस्य—ङ.

[35]कराली विकराली च भद्रकाली तथैव च ॥१३॥
महादेवी महारौद्री महाशूला तथैव च ।
मनोन्मनी महा[36]शक्तिः पूर्वादीशान्तमर्चयेत् ॥१४॥
[37]प्रणवादि नमोऽन्तं च [38]ह्लींकारं च विशेषतः ।
[39]आधारशक्ति[40]रादिः स्यात्कुटिलान्तं[41] समर्चयेत् ॥१५॥
मण्डलत्रयमभ्यर्च्य मण्डलाधिपतिं तथा ।
[42]तस्य मध्ये [43]महाशक्तिं चामुण्डां पूजयेत्क्रमात् ॥१६॥
गन्धपुष्पैश्च संपूज्य धूपदीपेन पूजयेत् ।
[44]पञ्चावरणमार्गेण पूजयित्वा [45]यथाविधि ॥१७॥
आवाहनादि[46]मुद्राश्च दर्शयेत्तु विचक्षणः ।
शक्तिबीजं समावाह्य कुम्भमध्ये तु विन्यसेत् ॥१८॥

[जीवन्यासः षड्विंशतिकलान्यासश्च]

पश्चात्प्राण[47]प्रतिष्ठा च जीव[48]न्यासादिपूर्वकम् ।
षड्विंशतिकला [49]ह्येताश्चामुण्डा[50]देविमर्चयेत् ॥१९॥

(१) [51]ओं ह्रीं [52]रक्तचामुण्डायै नमः मूर्ध्नि ।
(२) [53]ओं ह्रीं महाचामुण्डायै नमः[54] मुखे ।
(३) ओं ह्रीं मेधायै नमः नेत्रे[55] ।
(४) ओं ह्रीं [56]काल्यै नमः [57]नासिकायाम् ।

---

[35] 'ङ' मातृकायां १३ श्लोकस्योत्तरार्धं १४ श्लोकश्च न दृश्येते ।

[36] ०शक्तिपूर्वादी०—च; अत्र 'एताः' इति द्वितीयान्तं पदमध्याहार्यम् ।

[37] पूर्णवादि नमोऽन्तश्च—क.

[38] ह्लींकाराश्च—औ, च; ह्लींकारश्च—क.

[39] वामादिनवशक्तिं च पूजयेत्तु विशेषतः—ङ.

[40] ०मादिस्यात्—औ, ०मादिध्यात्—क.

[41] ०त्कुटिलां तु—क; ०त्कुटिलान्त—च.

[42] 'ङ' मातृकायां १६ श्लोकस्योत्तरार्धप्रभृति ३० श्लोकावधि न दृश्यते । मध्यस्थः षड्विंशतिकलान्यासः परं विद्यते ।

[43] महाशक्तिश्चामुण्डी—औ; महाशक्तिश्चामुण्डीं—क; महाशान्तिश्चामुण्डि—च.

[44] पञ्चमावरण०—औ.

[45] यथाविधिः—औ, च.

[46] ०मुद्रां च०—औ, क, च.

[47] प्रतिष्ठां च—औ, क, च.

[48] ०न्यासस्य पूर्वकम्—औ, क, च.

[49] ह्येते चामुण्डी० औ, क; ह्येते चामुण्डि०—च.

[50] ०दे . . . च्चरेत्—औ; ०देवमर्चयेत्—च; अत्र वृत्तार्थं 'देवीम्' इत्यत्र 'देविम्' इति प्रयोगः ।

[51] 'क' मातृकायां 'ओं' इति न दृश्यते ।

[52] रत्नचामुण्डायै—क; रक्तचामुण्डी—ङ.

[53] 'ओं' इति 'क' मातृकायां नास्ति ।

[54] ०चामुण्डी नमः—ङ.

[55] नेत्रयोः—ङ.

[56] कंकाल्यै—औ, क, च.

[57] नासिके—ङ.

(५) ओं ह्लीं [५८]कालायै नमः [५९]ओष्ठयोः।
(६) ओं ह्लीं कामरूपिण्यै नमः [६०]गले।
(७) ओं ह्लीं रत्यै नमः हृदये।
(८) ओं ह्लीं काम[६१]वर्धन्यै नमः कुक्षौ[६२]।
(९) ओं ह्लीं पञ्च[६३]मुख्यै नमः नाभिस्थाने।
(१०) ओं ह्लीं खड्गहस्तायै नमः दक्षिणहस्ते।
(११) ओं ह्लीं [६४]डमरुहस्तायै नमः वामहस्ते।
(१२) ओं ह्लीं [६५]सत्यै नमः योनौ।
(१३) ओं ह्लीं [६६]कामपालिन्यै नमः दक्षिणोरौ।
(१४) ओं ह्लीं कालकण्ठ्यै नमः वामोरौ।
(१५) ओं ह्लीं महा[६७]मायायै नमः दक्षिणजानुनि।
(१६) ओं ह्लीं ऊर्ध्व[६८]केशिन्यै नमः वामजानुनि।
(१७) ओं ह्लीं मोहिन्यै नमः दक्षिणजङ्घायाम्[६९]।
(१८) ओं ह्लीं [७०]भद्रकाल्यै नमः वामजङ्घायाम्[७१]।
(१९) ओं ह्लीं तारायै नमः दक्षिणपादे।
(२०) ओं ह्लीं विद्यायै नमः वामपादे।
(२१) ओं ह्लीं [७२]ग्रामरक्षायै नमः दक्षिण[७३]स्तने।
(२२) ओं ह्लीं [७४]निशीथिन्यै नमः वाम[७५]स्तने।
(२३(ओं ह्लीं मालिन्यै नमः दक्षिणपार्श्वे।
(२४) ओं ह्लीं प्रभापुष्ट्यै नमः वामपार्श्वे।
(२५) ओं ह्लीं दंष्ट्रा[७६]कराल्यै नमः [७७]ऊर्ध्वभागे।
(२६) ओं ह्लीं [७८]पिङ्गलाक्ष्यै नमः अधोभागे।

षड्विंशति[७९]कलाः प्रोक्ताश्चामुण्डा तत्र [८०]देहिका।

---

[५८] कायै—ङ.
[५९] ओष्टौ—अ, क, च.
[६०] भुजे—ङ.
[६१] ०वर्धिन्यै—औ.
[६२] वक्षौ—ङ.
[६३] ०मुखीनमः नाभिदेशे—ङ.
[६४] डमरुकहस्तायै—औ, ङ; डमरुकहाय—क; डमरुकायै—च.
[६५] स्वस्त्यै—ङ.
[६६] कामायै नमः—ङ.
[६७] ०मायि नमः—ङ.
[६८] ०केशि नमः—ङ.
[६९] ०जङ्घे—ङ.
[७०] कालिन्यै नमः—औं, क, च.
[७१] ०जङ्घे—ङ.
[७२] कामरक्षायै—च.
[७३] ०हस्ते—औ, क, च.
[७४] निशिथिन्यै—औ, ङ.
[७५] ०हस्ते—औ, क. च.
[७६] ०करालिन्यै—औ क, च; कराली नमः—ङ.
[७७] ऊर्ध्वे—ङ.
[७८] पिङ्गलाक्षी नमः—ङ.
[७९] ०कला प्रोक्ता चामुण्डा—औ, क, च.
[८०] देहिकाम्—औ, च; देशिक—क.

[तत्त्वतत्त्वेश्वरीमूर्तिमूर्तीश्वरीषडध्वन्यासाः]

[81]तत्त्वतत्त्वेश्वरीश्चैव[82] मूर्तिमूर्तीश्वरीस्तथा[83] ॥२०॥
[84]तत्त्वभुवन[85]वर्णाश्च पदमन्त्रकलाः स्मृताः ।
षडध्वमर्चयेत्कृत्वा साङ्गोपाङ्गं प्रपूजयेत् ॥२१॥

[पञ्चावरणपूजा]

पञ्चावरणमार्गेण पूजनीयं यथाक्रमम् ।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥२२॥
वाराही चैव माहेन्द्री दुर्गादेवी तथैव च ।
द्वितीयावरणे [86]प्रोक्तास्तृतीयावरणं शृणु ॥२३॥
जया च विजया चैव योगिनी मोहिनी तथा ।
मलिनी मालिनी चैव [87]भोगी भोगवती तथा ॥२४॥
तृतीया[88]वरणे प्रोक्ताश्चतुर्थावरणं शृणु ।
[89]मनोन्मनीं विना चैव वामाद्या अष्टशक्तयः ॥२५॥
चतुर्था[90]वरणे [91]प्रोक्ताः पञ्चमावरणं शृणु ।
खड्गं कपालं घण्टां च नाराचं [92]डमरुं ध्वजम् ॥२६॥
क्षुरिकापाश[93]पद्मं च चक्रं चेति [94]दशायुधान् ।
[95]पञ्चावरणमार्गेण पूजयित्वा [96]यथाविधि ॥२७॥

[स्तोत्रम्]

महाशक्ते महाघोरे[97] महा[98]ज्ञाने [99]नमो नमः ।
[100]महाशूले महापाशे[101] महा[102]खड्गे नमो नमः ॥२८॥

---

[81] तत्त्वं तत्त्वे—क.
[82] ०श्वरीं चैव—औ, क; ० श्वरं चैव—च.
[83] ०श्वरीं तथा—औ, क, च.
[84] तत्त्वे इवान०—क.
[85] ०वर्णानां पदमन्त्रं कला स्मृताः—औ, क, च.
[86] प्रोक्तं तृतीया०—औ, क, च.
[87] भोगि भोग०—औ, च.
[88] ०वरणं प्रोक्तं चतुर्था०—औ, क, च.
[89] मनोन्मनी विना—औ, क; मनोन्मनि विना—च.
[90] ०वरणं—क, च.
[91] प्रोक्तं पञ्चमा०—औ, क, च.
[92] डमरूं—क.
[93] ०पामं च—क.
[94] दशायुधम्—औ, च; दशयुधाः—क.
[95] पञ्चमावरण०—औ, क, च.
[96] यथाविधिः—औ, च.
[97] ०घोरी—औ, क, च.
[98] ०ज्ञानी—औ; ज्ञान—क, च.
[99] मनोन्मनी—क.
[100] २८ उत्तरार्धं २९ पूर्वार्धं च 'क' मातृकायां न दृश्यते।; महाशूली—च.
[101] ०पाशी—च.
[102] ०खड्गी—औ, च.

रक्तनेत्रि[103] शवारूढे[104] महाकोपे[105] नमो नमः।
महासूक्ष्मे[106] महाघोषे[107] महानीलि[108] नमो नमः[109] ॥२९॥
उग्रनेत्रि[110] महालक्ष्मि[111] पराशक्ते[112] नमो नमः।
नवशक्ति[113]स्वरूपे च नाना[114]वेषे [115]नमो नमः ॥३०॥
[116]एवं स्तुत्वा विशेषेण सर्वकामफल[117]प्रदाम्।
[118]एवं मन्त्रेण संपूज्य [119]मध्वन्नं च निवेदयेत् ॥३१॥
[120]धूपदीपेन संपूज्य अर्घ्यं दत्त्वा विशेषतः।
ताम्बूलं च निवेद्यं च [121]जपान्तं पूजयेत्क्रमात् ॥३२॥

[होमः]

[122]अर्घ्यपात्रं समादाय [123]शक्त्यानुज्ञां समाचरेत्।
प्रधानकुण्डे [124]आचार्यो होमयेत्तु विचक्षणः ॥३३॥
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत्[125]।
बालाग्निं कल्पयेद्धीमान्[126]बालाग्निं पूजयेत्क्रमात् ॥३४॥
तन्मध्ये शक्तिमावाह्य [127]ध्यानपूजापुरःसरम्।
[128]नैवेद्यधूपदीपं च [129]शक्तिं साङ्गं प्रपूजयेत् ॥३५॥
[130]समिदाज्यचरूणां च प्रत्येकं तु [131]शताहुतिः।
[132]पलाशखादिरं चैव [133]वटार्कबिल्वमेव च ॥३६॥

---

[103] ०नेत्री—औ, च.
[104] ०रूढी—औ, च.
[105] ०कोपी—औ, च.
[106] ०सूक्ष्मी—औ, क, च.
[107] ०घोरी—औ, क, च.
[108] ०नीली—औ, क, च.
[109] मनोन्मनी—क.
[110] ०नेत्री—औ, क, च.
[111] ०लक्ष्मी—औ, क, च.
[112] ०शक्ती—औ क, च.
[113] ०स्वरूपायी नाना०—औ; ०स्वरूपाणि नाना० —क; ०स्वरूपाथ नाना०—च.
[114] ०वेषी—औ; ०घोषी—क, च.
[115] मनोन्मनी—क.
[116] इदमर्धं 'औ, क, च' मातृकासु न दृश्यते।
[117] ०प्रदान्—ङ.
[118] एव मन्त्रेण—च.
[119] मद्यान्शं—औ, क, ङ; मद्यानं—च.
[120] धूपदीपनैवेद्यमर्घ्यं—क.
[121] जपान्नं—क.
[122] 'ङ' मातृकायां ३३ श्लोको न दृश्यते।
[123] शत्कयानुज्ञा—क.
[124] आचार्यं—क.
[125] ०मार्गतः—औ, क, च.
[126] बालध्यानं समाचरेत्—औ, क, च.
[127] ध्यात्वा वह्निं प्रपूजयेत्—ङ.
[128] पञ्चावरणमार्गेण शक्तिं—औ, क, च.
[129] शक्तिसाङ्गं—ङ.
[130] समिधाज्यचरून् लाजान् प्रत्येकं—ङ.
[131] शताहुतिम्—ङ; अत्र होतव्येति शेषः।
[132] पलाशं—क, ङ. च.
[133] शमीबिल्वं च दूर्वकम्—औ; शमीबिल्वं च दूर्वयेत्—क; शमीबिल्वं च दूर्पयेत्—च.

[134]अश्वत्थप्लक्षसमिध औदुम्बरसमित्क्रमात्[135] ।
[136]सर्वं मूलेन मन्त्रेण [137]होमयेत्तु विशेषतः[138] ॥३७॥
[139]मध्वन्नं पायसान्नं च [140]गुलान्नं [141]कृसरान्नकम् ॥
मुद्गान्नं [142]घृतदध्यन्नं होमयेत्तु विशेषतः ॥३८॥
[143]द्रव्यान्ते चैव [144]द्रव्यान्ते [145]व्याहृतीर्जुहुयाद्घृतैः ।

[चामुण्डामूलमन्त्रम्]

ओं श्रीं ह्रीं श्रीं क्लीं हे [146]महाचामुण्डि रक्त-
[147]चामुण्डि हन हन दह दह ओं स्वाहा ।

[ध्यानम्]

चतुर्बाहुं [148]त्रिणेत्रां च द्विपादेन [149]समन्विताम् ॥३९॥
[150]ऊर्ध्वकेशीं सुदंष्ट्रां च रौद्रदृष्टिसमन्विताम् ।
लम्बितं दक्षिणं पादं वामपादं तु [151]शायिनम् ॥४०॥
दक्षहस्ते तु [152]संयुक्तं डमरुं पाशमेव च ।
वाम[153]हस्तान्तरे चैव शूलं चैव कपालकम् ॥४१॥
नीलवर्णां महारूपां वामपादाट्टहासिनीम्[154] ।
लम्बोष्ठीं [155]मातुलुङ्गाक्षीं महाकोपसमन्विताम् ॥४२॥

---

[134] अश्वत्थं प्लक्षसमिधं—औ, क, च.
[135] ०समित्तथा—ङ.
[136] सर्वमूलेन—ङ.
[137] होमहेतु—च.
[138] 'ङ' मातृकायां ३७ श्लोकानन्तरम्—'गोधुमास्तण्डुलादीनि नवधान्यं च होमयेत्'। इत्येकमर्धमधिकं दृश्यते ।
[139] मद्यन्नं—औ, च; आद्यन्तं—क; मध्वान्नं—ङ.
[140] गुडान्नं—औ, क, च.
[141] कूसान्नकम्—च.
[142] घृतमध्वान्नं—ङ; घृतमध्यन्नं—च.
[143] द्रव्यान्तं चैववत् द्रव्यद्रव्यान्ते व्याहृतिं हुनेत्—औ; द्रव्यान्तं चैववत् द्रव्यं द्रव्यान्ते व्याहृतिं हुनेत्—क, च.
[144] होमान्ते—ङ.
[145] व्याहृतिर्जुहुयाद्—ङ.
[146] ०चामुण्डिने रक्तचामुण्डा हन—औ, ङ, च.
[147] ०चामुण्डा हन—क.
[148] त्रिणेत्रं—क, च.
[149] समन्वितम्—क, च.
[150] ऊर्ध्वकेशं—क; ऊर्ध्वकेशि—च.
[151] शायिनाम्—औ, ङ, च.
[152] संयुवतां—औ, ङ, च.
[153] ०हस्तान्तरं—क, च.
[154] ०हासिनम्—क; वामपादाधोऽट्टहासं कुर्वन् योऽसुरः यस्याः सा, तामित्यर्थः। अस्मिन् पक्षे लम्बितो वामपादः, दक्षिणपादश्च शयितः।
[155] मातुलं कांक्षि—औ; मातुलंकाक्षीं—ङ; मातुलङ्गाक्षि—च.

उग्ररूपां महा[१५६]वेषां [१५७]चामुण्डाध्यान[१५८]माचरेत् ।
एवं ध्यात्वा महादेवीं पूजयेत्तु विशेषतः ॥४३॥

देवीमालामन्त्रम्

ओं ह्रीं महाचामुण्डीं ओं ह्रूं[१५९] वीरचामुण्डीं ओं ह्रैं रक्तचामुण्डीं [१६०]ह्रौं खड्गशूलड मरु-कपाल[१६१]हस्तां श्रीं ह्रीं श्रीं क्लीं [१६२]वरद वरद महाचामुण्डचै स्वाहा ।

होमान्ते चैव होमान्ते देवीं [१६३]साङ्गं प्रपूजयेत् ।
नैवेद्यं दापयेत्पश्चाद्धूप[१६४]दीपं समाचरेत् ॥४४॥

इति रौरवे चामुण्डाप्रतिष्ठा[१६५]विधिपटलः ॥

---

[१५६] ०वेषीं—ङ.

[१५७] चामुण्डां ध्यान०—औ, क, ङ.

[१५८] ०मर्चयेत्—ङ; एतदनन्तरं 'ङ' मातृका-पाठः पटलसमाप्तिपर्यन्तं यथामातृकं लिख्यते—
'प्राणप्रतिष्ठै (ष्ठा ?) ।
ओं ह्रां अं कं इं ईं व्योमव्यापिने नमः ।
एवं दशाक्षरन्यासं ब्रह्मकूर्मासनस्थिताम् ॥
ओंकारं प्रथमं बीजं हकारं तु द्वितीयकम् ।
तृतीयं बीजश्रीमख्यं सर्वकारणकारणम् ॥
चतुर्थं दशमं बीजं सर्वात्मं चेति विश्रुतम् ।
अमुष्य प्राण इह प्राण अमुष्य जीव इह स्थितः ॥
अमुष्य [स]र्वेन्द्रियाणां वाङमनश्चक्षुःश्रोत्र-जिह्वाघ्राण[ा]इहैवागत्य उ(इ ?) हैवेन्द्रियाय-स्वाहा। इति रौरवे चामुण्डाविधिः समाप्तः ।

[१५९] ह्रीं—औ, क.

[१६०] ह्रौं—औ.

[१६१] ०हस्ति—औ, क, च.

[१६२] वर वरद—क.

[१६३] संगं—क.

[१६४] ०दीप समा०—औ, च.

[१६५] ०विधिः—ङ.

महाकालीप्रतिष्ठाविधिः

अथ वक्ष्ये विशेषेण कालिकास्थापनं परम्।

[प्रतिष्ठाकालः]

उत्तरायणकाले तु शुक्लपक्षे शुभे दिने ॥१॥
शुभवारादिभिर्युक्ते प्रतिष्ठां सम्यगाचरेत्।

[अङ्कुरार्पणम्]

प्रतिष्ठादिवसात्पूर्वे [1]त्रियहे [2]वाथ [3]पञ्चमे ॥२॥
अङ्कुराण्यर्पयेद्धीमान् पूर्वोक्तविधिना सह।

[रत्नन्यासः]

[4]मण्डपं समलंकृत्य [5]शालिभिः स्थण्डिलं कुरु ॥३॥
तिलाक्षतैः परिस्तीर्य लाजैः पुष्पैः परिस्तरेत्।
तन्मध्ये [6]विन्यसेद्देवीं नवकोष्ठ[7]समायुते ॥४॥
इन्द्रनीलं [8]न्यसेद्ब्राह्मीं [9]वैडूर्यं तु [10]महेश्वरीम्।
महानीलं तु कौमारी मौक्तिकं वैष्णवी तथा ॥५॥
स्फटिकं [11]वाराहिरुक्ता पुष्यरागं [12]महेन्द्रिका।
चामुण्डी च प्रवालं स्याद्वज्रं [13]विघ्नेश्वरस्तथा ॥६॥
[14]माणिक्यं तु महाशास्ता [15]इत्येतान्स्थापयेत्क्रमात्।
प्रतिमां तत्र विन्यस्य सांनिध्यं कारयेत्ततः ॥७॥

---

[1] त्रियाहे--औ; त्रियाह--क; त्रियम्बकमितिवत् 'त्रियहे' इति प्रयोगः।

[2] वा च --औ, क.

[3] पञ्चके--औ, क.

[4] मण्डस्थामलं०--औ; मण्डपस्थमलं०--क.

[5] शलिभि स्थण्डिलं--औ.

[6] विन्यसेद्दर्वीं--क.

[7] ०समायुतम्--औ; अत्र 'पीठे' इत्यध्याहृत्य व्याख्येयम्।

[8] न्यसेद्ब्राह्मी--औ; अत्र 'ध्यात्वा' इति पदमध्याहृत्य व्याख्येयम्।

[9] वैडूर्यं--औ.

[10] महेश्वरी--औ; अत्रापि 'ध्यात्वा' इति पदमध्याहृत्य व्याख्येयम्।

[11] वाराहिमेवोक्तं--औ, क; 'वाराहयुक्ता' इति पाठश्चेत् सुष्ठु। वृत्तार्थमेवं प्रयुक्तमिति भाति।

[12] महेन्द्रिकम्--क.

[13] विघ्नेश्वरं तथा--औ.

[14] माणिक्कं--क.

[15] इत्येते स्थापक्रमम्--औ, क; 'ध्यात्वा' इति पदमध्याहृत्य इत्येतान् ध्यात्वा क्रमात् स्थापयेदिति व्याख्येयम्।

[नयनोन्मीलनं प्रतिमाशुद्धिश्च]

नेत्रयुग्म[१६]युतर्क्षे तु नेत्रमोक्षणमाचरेत् ।
[१७]मण्डपे स्थण्डिलं कृत्वा अष्टद्रोणैश्च शालिभिः ॥८॥
तन्मध्ये नलिनं लिख्य साष्टपत्रं सकर्णिकम् ।
वर्धनीं [१८]न्यस्य तन्मध्ये [१९]देव्यास्तु प्राङ्मुखं कुरु ॥९॥
[२०]हेमसूची[२१]प्रहाराभ्यां [२२]पक्ष्मरेखां समालिखेत् ।
सितमण्डलमालिख्य [२३]दृष्टिमण्डलमालिखेत् ॥१०॥
ज्योतिर्मण्डलकं [२४]पश्चान्नेत्रमुच्चार्य लेखयेत् ।
वस्त्र[२५]हेमाङ्गुलीयैश्च संपूज्योद्वास्य शिल्पिनम् ॥११॥
[२६]नेत्रे हिरण्यदूर्वाभिः [२७]मध्वाज्ये च प्रदापयेत् ।
सौवर्णमुत्तमं प्रोक्तं [२८]मृण्मयं चाधमं भवेत् ॥१२॥
पात्रं घृतेन [२९]संपूर्य घृत[३०]सूक्तेन दर्शयेत् ।
[३१]धेनुं गौर्धेनुमन्त्रेण [३२]ब्रह्मसूक्तेन भूसुरान् ॥१३॥
[३३]प्रच्छन्नपट[३४]मावर्ज्य दर्पणादि[३५] प्रदर्शयेत्[३६] ।
पञ्चमृत्पञ्चगव्येन स्नापयेच्छक्तिमन्त्रतः ॥१४॥

[ग्रामप्रदक्षिणम्]

ग्रामप्रदक्षिणं कुर्यात्सर्वालंकारशोभिताम् ।
[३७]संधौ संधौ प्रयत्नेन माहिषादिबलिं क्षिपेत् ॥१५॥
शुद्धतोयेन संस्नाप्य गन्धपुष्पाक्षतादिभिः ।
वस्त्राभरणमालाभिर्देवीं संभूषयेत्ततः ॥१६॥

---

[१६] ०द्व्यर्क्षे—औ, क.
[१७] मण्डपं—क.
[१८] तस्य—औ.
[१९] देव्यायाः प्राङ्०—औ, क.
[२०] हेमसूचि०—क.
[२१] ०महाराभ्यां—औ.
[२२] पक्षरेखां—क.
[२३] दृष्टिर्मण्डल०—औ; मुष्टिमण्डल०—क.
[२४] पञ्चनेत्र०—क.
[२५] ०हेमाङ्गुलीभिश्च—औ, क.
[२६] नयने हिरण्य०—औ, क.
[२७] मध्वाज्याभ्यां प्रतापयेत्—औ; मध्वाज्याभ्यां प्रदीपयेत् —क.
[२८] मुन्मयं चाथमं—औ.
[२९] संपूज्य—क.
[३०] ०सूक्तं प्रदर्शयेत्—औ, क; घृतसूक्तम् **तै० आरण्यके १०,१२**
[३१] धेनुगौर्धेनु०—औ, क; **याजुषमन्त्रप्रश्ने २. १०.८.**
[३२] ब्रह्मसूक्तम्—**याजुषमन्त्ररत्नाकरे पृ० ९०,९१.**
[३३] प्रच्छिन्नं०—क.
[३४] ०मारभ्य—औ.
[३५] ०वर्त्यदर्पणादि—औ, क.
[३६] . . . येत्—औ; प्रदापयेत्—क.
[३७] सिद्धिसिद्धिप्रयत्नेन—औ; संधिसंधिप्रयत्नेन —क.

[जलाधिवासः]

ततो जलाशयं प्राप्य तीरे समतलं कुरु ।
स्थण्डिलं कारयेत्तत्र देवीं तस्योपरि न्यसेत् ॥१७॥
नववस्त्रेण संवेष्टच लम्बकूर्चसमन्वितम् ।
[३८]कण्ठदघ्नजले चैव [३९]प्रपां कृत्वातिसुन्दराम् ॥१८॥
चतुर्गात्रसमायुक्तां[४०] दर्भमालासमन्वितम् ।
[४१]प्रतिमां शाययेन्मध्ये प्राक्शिरश्चोर्ध्ववक्त्रकम्[४२] ॥१९॥
अभितः कलशानष्टौ [४३]ससूत्रान्सापिधानकान् ।
गन्धोदक[४४]हिरण्यादिरत्नवस्त्रान्सकूर्चकान् ॥२०॥
स्थापयित्वा क्रमेणैव [४५]लोकशक्तीः समर्चयेत् ।
त्रिरात्रमेकरात्रं वा यामं यामार्धमेव वा[४६] ॥२१॥

[मण्डपकल्पनम्]

प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम् ।
[४७]द्वादशैर्दशहस्तैर्वा नवहस्ताष्टहस्तकम् ॥२२॥
वितानध्वजसंयुक्तं श्रुतिद्वारसमन्वितम् ।

[मण्डपे वेदिकाकुण्डकल्पनम्]

मण्डपं तु त्रिधा कृत्वा मध्यभागे तु वेदिकाम् ॥२३॥
रत्नि[४८]मात्रसमुत्सेधां दर्पणोदरसंनिभाम् ।
कुण्डानि परितः कुर्याद् दिग्विदिक्षु समाचरेत् ॥२४॥
योन्याकाराणि कुण्डानि सर्वदिक्षु प्रकल्पयेत् ।
[४९]कुण्डं हस्तप्रविस्तारं संयुतं मेखलादिभिः ॥२५॥

---

[३८] कण्ठादघ्नजले—औ; कण्ठदघाजले—क.
[३९] प्रपा—क.
[४०] ०युक्तं—क.
[४१] प्रतिमा शाय०—औ, क.
[४२] ०वक्त्रगाम्—क.
[४३] सूत्रासामपिधारकान्—क.
[४४] ०हिरिण्यादीन्रक्तवस्त्रान्—औ, क.
[४५] लोकशक्ति सम०—औ, क; 'लोकपशक्तीः' इत्यत्र वृत्तार्थं 'लोकशक्तीः' इति प्रयुक्तमिति भाति ।
[४६] 'औ, क' मातृकाद्वयोरपि यद्यपि २१ तमश्लोकानन्तरम् 'जलादुत्तीर्य बेरं तु अभिषेकमथाचरेत्' इत्यर्धमेकमधिकं दृश्यते । तथापि मातृकाद्वयेऽपि पूर्वनिर्दिष्टस्य श्लोकार्धस्य समानार्थकत्वेन 'जलादुत्तीर्य कालीं च स्नानश्वभ्रोपरि न्यसेत्' । इत्येतदर्धं ३२ तमश्लोकस्योत्तरार्धत्वेन दृश्यते । अतोऽत्रासङ्गतमिति तत्पाठे न संघटितम् ।
[४७] द्वादशं दशहस्तं वा—औ, क.
[४८] ०मात्रं तदुत्सेधां—औ; ०मात्रं तदुत्सेधं—क.
[४९] कुण्डहस्त०—औ.

युगाग्निवेदसंयुक्तमब्जं कुण्डेषु वर्जयेत् ।
मण्डपस्योत्तरे पार्श्वे स्नानश्वभ्रं ततः कुरु ॥२६॥

[मण्डपसंस्कारालंकारौ]

गोमयालेपनं [५०]कृत्वा कुर्याच्छिल्पिविसर्जनम् ।
मण्डपं पूजयेत्पश्चादष्टदिक्षु[५१] ध्वजानि च ॥२७॥
वितानदर्भमालाभिः संयुक्तं[५२] साष्टमङ्गलम् ।
[५३]नालिकेरफलैश्चैव मुक्तादामैः प्रलम्बितम् ॥२८॥
भूसुरान्भोजयेत्पश्चादधिवासनमारभेत् ।

[अधिवासः]

वास्तुहोमं ततः कृत्वा पर्यग्निकरणं कुरु ॥२९॥
[५४]विघ्नेशं पूजयित्वा तु पुण्याहं वाचयेत्ततः ।

[शयनाधिवासः]

वेद्यूर्ध्वे स्थण्डिलं कुर्यादष्टद्रोणैश्च शालिभिः ॥३०॥
[५५]तदर्धतण्डुलैश्चैव तदर्धैश्च तिलैरपि ।
दर्भैः पुष्पैः परिस्तीर्य सर्वालंकारशोभितम् ॥३१॥
तन्मध्ये शयनं [५६]कल्प्य चर्मजाद्यैरनुक्रमात् ।
जलावुत्तीर्य [५७]कालीं च स्नानश्वभ्रोपरि न्यसेत् ॥३२॥
[५८]वस्त्रकूर्चे विसृज्याथ बिम्बशुद्धिं समाचरेत् ।
नवाम्बरेण चाच्छाद्य गन्धपुष्पादिभिर्हृदा ॥३३॥
कौतुकं बन्धयेत्पश्चाद्वामहस्ते विशेषतः ।
कालीगायत्रिमन्त्रेण [५९]पूजये[६०]च्छुद्धिपारगः ॥३४॥
आरोप्य सुमुहूर्ते तु प्राक्शिरश्चोर्ध्ववक्त्रकम्[६१] ।
शयने शाययेत्कालीं मूलमन्त्रेण पूजयेत् ॥३५॥

